BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NO 1399

बोधिचर्यावतार पंजिका ।

PRAJÑĀKARAMATI'S COMMENTARY
TO THE
BODHICARYĀVATĀRA OF ÇĀNTIDEVA,
AN INTRODUCTORY TREATISE ON THE DUTIES OF A BUDDHIST.

EDITED WITH INDICES
BY
LOUIS DE LA VALEE POUSSIN,
Professor of Sanskrit in the University of Ghent

FASCICULUS I-VII

CALCUTTA
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET
1914

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MR. BERNARD QUARITCH, 11, *Grafton Street, New Bond Street, London, W.* AND MR OTTO HARRASSOWITZ, BOOKSELLER, *Leipzig, Germany.*

Complete copies of those works marked with an asterisk * *cannot be supplied—some of the Fasciculi being out of stock*

BIBLIOTHECA INDICA

Sanskrit Series.

		Rs.	
Advaitachintā Kaustubha, Fasc 1-3 @ /10/ each	Rs.	1	14
Aitarēya Brāhmana, Vol I, Fasc 1-5, Vol. II, Fasc 1-5, Vol. III, Fasc. 1-5, Vol IV, Fasc 1-8 @ /10/ each	...	14	0
Aitareyalocana	...	2	0
Amarakosha, Fasc 1 2	.	4	0
Anumana Didhiti Prasarini, Fasc 1 3 @ /10/	..	1	14
Astasāhasrika Prajñāpāramita, Fasc 1 6 @ /10/ each		3	12
Ātmatattvaviveka, Fasc 1	..	0	10
Açvavaidyaka, Fasc 1-5 @ /10 each		3	2
Avadāna Kalpalatā, (Sans and Tibetan) Vol 1, Fasc 1-11 Vol II, Fasc 1-11 @ 1/ each	...	22	0
Bālam Bhaṭṭī, Vol 1, Fasc 1-2, Vol II, Fasc 1, @ /10/ each		1	14
Baudhāyana Srauta Sutra, Fasc 1 3, Vol II, Fasc 1-5, Vol. III, Fasc 1, @ /10, each	...	5	10
Bhasavritty	.	0	10
Bhātta Dīpikā, Vol I, Fasc 1 6, Vol II, Fasc 1 2 @ /10/ each		5	0
Bauddhastotrasangraha	...	2	0
Brhaddevatā, Fasc 1-4 @ /10/ each	...	2	8
Bṛhaddharma Purāna, Fasc 1-6 @ /10/ each	.	3	12
Bodhicaryāvatāra of Çāntideva, Fasc 1 6 @ /10/ each	.	3	12
Cri Cantinatha Charita, Fasc 1-3 .	..	1	14
Çatadūṣanī, Fasc 1-2 @ /10/ each		1	4
Catalogue of Sanskrit Books and MSS, Fasc 1-4 @ 2/ each	...	8	0
*Çatapatha Brāhmana, Vol 1, Fasc 1-7, Vol II, Fasc 1-5, Vol III, Fasc 1-7, Vol V, Fasc 1-4 @ /10/ each	...	14	6
Ditto Vol VI, Fasc 1-3 @ 1/4/ each	...	3	2
Ditto Vol VII, Fasc 1 5 @ /10/	..	3	2
Ditto Vol IX, Fasc 1-2	...	1	4
Çatasāhasrikā prajñāpāramita, Part I, Fasc. 1-18 @ /10/ each		11	4
*Caturvarga Chintāmani, Vol II, Fasc 1-25, Vol III, Part I, Fasc 1-18, Part II, Fasc 1-10, Vol IV, Fasc. 1-6 @ /10/ each		36	14
Ditto Vol. IV, Fasc 7, @ 1/4/ each		1	4
Ditto Vol IV, Fasc 8-10 @ /10/	... .	1	14
Çlokavartika (English), Fasc 1-7 @ 1/4/ each		8	12
*Çrauta Sūtra of Çānkhāyana, Vol I, Fasc 1 7, Vol II, Fasc 1-4; Vol III, Fasc 1-4, Vol 4, Fasc 1 @ /10/ each	..	10	0
Çrī Bhāshyam, Fasc 1-3 @ /10/ each	...	1	14
Dāna Kriyā Kaumudī, Fasc 1-2 @ /10/ each	...	1	4
Gadadhara Paddhati Kālasara, Vol 1, Fasc 1-7 @ 10 each	,	4	6
Ditto Ācārasāra, Vol II, Fasc 1-4		3	2
Gobhiliya Grhya Sūtra, Vol I, @ /10/ each	...	3	2
Ditto Vol II, Fasc 1 2 @ 1/4 each	.	2	8
Ditto (Appendix) Gobhila Parisista		2	0
Gobhilīya Grhya Sūtra, Grhya Sangraha	...	0	10
Haralata	..	1	14
Karmapradiph, Fasc 1	..	1	4
Kāla Viveka, Fasc 1-7 @ /10/ each	..	4	6
Kātantra, Fasc 1-6 @ /12/ each	..	4	8
Kavi Kalpa Lata, Fasc 1	.	0	10
Kavindravacana Samuccayah	...	3	8
Kurma Parana, Fasc 1—9 @ /10/ each	...	5	10
Kiranavali, Fasc 1 3, @ /10/	...	1	14
Madana Pārijāta, Fasc 1-11 @ /10/ each		6	14
Mahā-bhāsya pradīpodyota, Vol. I Fasc 1 9, Vol II, Fasc 1-12; Vol III, Fasc 1 10 @ /10/ each			

INTRODUCTION

(PRELIMINARY)

The text of the Bodhicaryāvatārapañjikā is preserved in two MSS., now forming part of the collection of the Government of Bengal at Calcutta, both acquired by Professor Haraprasād Çāstrī (See Notices of Sanskrit MSS., Vol. XI, p. 7). The first is in the Nepalese character and contains (with several large lacunae) the whole of the work;[1] the second, in the Maithili character contains only the commentary on the ninth chapter.[2]

As concerns the text of the Bodhicaryāvatāra, I have used the edition of Minaev and his critical apparatus, together with the two MSS. in Paris (Devanāgarī 78, Burnouf 98, called Dev. and Burn.).

Some help has been found in a little tract, of which some fragments only are preserved, called Bodhicaryāvatāraṭippaṇī; this MS. was discovered in the Durbar Library at Kathmandu by Professor Cecil Bendall and was copied for him. I refer to it as Tipp.

Much more profitable has proved the study of the Çikṣāsamuccaya, from which our author, Prajñākaramati, has borrowed, mostly without acknowledgment, nearly the whole of his illustrations from earlier literature. The able editor of this work has helped us in identifying and comparing the two texts.

The translations of the Bodhicaryāvatāra and of the Pañjikā in the Tandjur have been used, from the 16th page of this edition onwards, for ascertaining or elucidating the Sanskrit text; the Tibetan text of the lost passages, together with a translation, will be given in a final Appendix.

Ghent, July 1902. LOUIS DE LA VALLÉE POUSSIN

[1] On the tenth chapter of the Avatāra, the authenticity of which is rather doubtful, there is, so far as I know, no commentary by Prajñākaramati.

[2] Edited by myself in Latin character, some years ago, in my *Bouddhisme, Études et Matériaux*, I. (London, Luzac.)

प्रज्ञाकरमतिकृता बोधिचर्यावतारपञ्जिका ।

ओँ नमो बुद्धाय[1] ॥

सुगतान् ससुतान् सधर्मकायान्
प्रणिपत्यादरतोऽखिलांश्च वन्द्यान् ।
सुगतात्मजसंवरावतारं
कथयिष्यामि यथागमं समासात् ॥[2] १ ॥

. . . . [3] अखि] लांश्च वन्द्यानिति 5
कल्याणमित्रप्रभृतीनां[4] ॥ सुगतात्मजसंवरावतारमित्यभिधेय-
कथनं । कथयिष्यामीति प्रयोजनाभिधानं । संबन्धप्रतिपादनपदं

---

[1] Sic Minaev, Burn., Dev., I² has namah sarvabuddhabodhisattvebhyah M namo ratnatrayāya, the tippanī namas tārāyai

[2] The first four stanzas of our text are quoted by the author Çāntideva in the exordium to his work the *Çiksāsamuccaya* (edited by C. Bendall in the *Bibliotheca Buddhica*), with some variants. Here instead of "yathāgamam samāsāt," the Çiksā has "samuccitārthavākyaih." The special character of the two works, which have the same "prayojana" and the same "abhidheya" (bodhisattvasamvara), is clearly illustrated by their introductive formulas

[3] The first folio of our MS is lost. The second one, in some parts illegible, is broken down, wants the right part (four or five aksaras)

The tippanī begins as follows Ihāyam ācāryaçāntidevah parān bodhisattvasam[vare va]tārayitum ātmānam ca [illegible] sthirīkartum bodhicaryāvatāram kartukāma ādau sadācāraparipālanārtham sugatān ityādy āha

[4] Supply in the lost part of the Comm. pranatih, namaskrtih

तु न विद्यते । सामर्थ्यादेव तु स प्रतिपत्तव्यः ॥ यथागममिति
स्वातन्त्र्यपरिहारपदं। समासा[दिति पुनरु][1]क्ततापरिहारवचनं।
इति समुदायार्थः[2] ॥

अवयवार्थस्तूच्यते । सुगतानित्यत्र गतशब्देन सर्वपृथग्जनेभ्यो
5 भगवतां व्यवच्छेदमुपदर्शयति । तेषां संसारान्तर्गतत्वात्।
भगवतां तु संसारविनिर्गतत्वात् । सुशब्दस्तु प्रशस्ताद्यर्थस्त्र[3]य-
वृत्तिविशिष्टं सुग[- - - -]। तेनायमर्थः । प्रशस्तं यथा भवति
एवं मध्यमप्रतिपदा[4] क्लेशाद्यावरणप्रहाणं गताः सुगताः । अनेन
प्रहाणसंपत्तिरुक्ता ॥ यदि वा प्रशस्तं सर्वधर्मनिःस्वभावता-
10 तत्त्वं गता अधिगताः सुगताः । अनेनाधिगमसंपदुपदर्शिता ॥
य[- - - -तौ]र्थिकशास्तृभ्यो भगवतां विशेषश्चोपदर्शितो भवति।
तेषामात्मादिभावाभिनिवेश[वशात्] प्रशस्त[गमना][5]भावात् ।
आत्मादीनां च प्रमाणबाधितत्वात् । संसाराप्रतिपक्षत्वाच्च अप्र-
शस्तं गमनं ॥ अपुनरावृत्त्या वा गताः । पुनर्जन्मनो रागादीना[-
15 - - - ह]कार- -[6]ाहंकारबीजस्याविद्यायाः सर्वथा प्रहाणात्

---

[1] Punaruktatā, *cf* *infra* p 6, l 5

[2] Tipp atra çloke ratnatrayasya vandyānām upādhyāyaprabhṛtīnām ca pranatiḥ । abhidheyam । tatsambandhaḥ । prayojanam । asvātantryam । apaunaruktyam iti sad arthāḥ pratipāditāḥ ॥ tatra sugatātmajasamvaro' bhidheyam । asya ca granthenāmunā' bhidhā[nam । abhidhā]nābhidheyabhāvalakṣaṇaḥ sambandhaḥ sāmarthyagamyaḥ । asya cābhidheyasya buddhatvam pariniṣṭhitam prayojanam gamyam ।) This method of exposition (abhidheya, etc), is well known by the Nyāyabindutikā, the Madhyamakavṛtti, the Vedāntasāra, the Tarkasamgraha p. 70 , *cf*, *infra*, p 4, l 14

[3] MS °artha traya °

[4] MS has madhyamāpra

[5] Three syllables added in margin The last seems to be vya

[6] Perhaps °kāraçuddhyā.°

सुगताः। अनेन स्रोतआपन्न[सकृद्]आगामिबोधिसत्त्वेभ्यो ऽपि भगवतां विशेषो दर्शितः। तेषां प्रशस्तगमनेऽपि सर्वथा-त्व-प्रहाणात्[1] पुनरावृत्तिसंभवात्॥ निःशेष वा - - - - - - - - - स][2b]र्ववासनाया अपि कायवाग्बुद्धिवैगुण्यलक्षणायाः स्वय-मधिगतमार्गोख्यावपाटवस्य[2] वा सर्वथा प्रहाणात् सुगताः। एता-वता संपूर्णगामित्वं[3] भगवतां प्रतिपादितं। अनेनाप्यनागामि-श्रावकप्रत्येकबुद्धेभ्यो भगवतामसाधारणगुणत्वमावेदितं। तेष[ा- - - -] कायवाग्बुद्धिवैगुण्यस्य स्वाधिगतमार्गोख्यपाटवस्य च संभवात्। एवं च बुद्धत्वमशेषगुणपरमसाधारणमपरयोगिभि[ः] सुगतशब्देन ख्यापितं॥

तानेवंभूतान् सुगतानादरतः परमप्रसादेन प्रणिपत्येति नमस्कृत्य सुगतात्मजसंवरावतारं कथयि[ष्यामीति] संबन्धः॥

किंभूतान् ससुतानिति। सुताश्च मुनीनामिह लब्धप्रमु-दितादिभूमयो[4] बोधिसत्त्वा एव गृह्यन्ते। तेषामेवात्राधिकृत-त्वात् तैः सह। अनेन विशेषणेनार्यसंघस्य नमस्कारोऽन्तर्भावितः॥

अपरं विशेषणमाह। सधर्मकायानिति। सर्वाप[- - - -]क्षो भगवतां स्वाभाविको धर्मकायः[5]। स एव चाधिगमस्वभावो धर्मः। समूहार्थो वा कायशब्दः। जनकायो बलकाय इति यथा। तेन प्रवचनस्यापि ग्रहणं। तेन सह। अनेनापि धर्मस्य नमस्कारो ऽन्तर्भावितः। इति रत्नत्रयनमस्कारोऽयमित्यु [- - - - -]॥

[1] MS Sarvadhārhatva Ex conj sarvadhātv? [2] Apāt ıva, in Lezs only
[3] New word [4] The first of the ten Bhūmis (Dh. S lxiv).
[5] On the Dharmakāya, see KERN, *Over den aanhef eener buddh Inscr uit Battambang* (Versl. d K. Ak. v. Wet, Afd. Letter 4 R, D III, Amsterdam 1899)

ननु बुद्धाद्धर्मो धर्मतश्चार्यसंघ इति क्रमः । तत्किमिति बुद्धानन्तरमार्यसंघ. । तदनु धर्म इति व्यतिक्रमनिर्देशः ॥ सत्यमिह लोकवृद्धानुरोधाद् व्यतिक्रमनिर्देशो वेदितव्यः । योजनात्तु सुगतान् सधर्मकायान् ससुतान् प्रणिपत्येत्यनुक्रमेण-
5 [व न कश्चिदत्र][1] दोष· ॥ अथ वा बोधिसत्त्वानामप्यधिगत-धर्मत्वादानुरूप्येण धमकायो विद्यत एव । तेषामपि सह धर्मकायेन नमस्क[रण] प्रतिपादनीय । तेऽपि हि समधिगत-धर्मतया सुगतत्वनियता सुगतप्रायाः । इति धर्मात्पूर्व निर्देशः । इति न किंचिदयुक्त ।
10 किंमे[तानेव] । नेत्याह । अखिलांश्च वन्द्यानिति । अपरा-नपि समस्तान् वन्दनीयान् । आचार्योपाध्यायप्रभृतीनपि[2] । आदरतः प्रणिपत्येति ।

इति पूर्वार्धेन सुगतादीना नम·स्कृतिमभिधाय । अपरार्धे-नाभिधेयादीनि प्रतिपादयन्नाह । सुगतात्मजेत्यादि ॥ आत्मनो
15 जाताः । आत्मजा. । सुगतानामात्मजा जिनपुत्रा बोधिसत्त्वा इत्यर्थ· ॥ तेषा सवरावतार । सवरण संव्रियते वानेनेति सवरः । बोधिचित्तग्रहणपूर्वक बोधिसत्त्वशिक्षासमादान । तच्च यथावसर वक्ष्याम·[3] ॥ तस्यावतरणमवतीर्यते तस्मिन् वा ऽने-नेत्यवतारो मार्ग । येन बोधिसत्त्वपदप्राप्तौ सुगतत्वमवाप्यते ।
20 त कथयिष्यामि प्रतिपादयिष्यामि । अनेन ग्रन्थेनेत्यर्थः ।

1 MS., quite illegible: has ... namaskṛtatayā prati°

2 Ācārya, upādhyāya, cf. Chavannes, *Religieux éminents*, ii, 1, 140

3 MS. Saṃvara, saṃvaraṇam. 4 *Cf. infra*, iii, 22

एवमनेन प्रतिपाद्यमानत्वात्संवरावतारोऽभिधेयमस्य । अयमभि-
धानं संवरावतारस्य ॥ इत्यभिधानाभिधेयलक्षणः संबन्धो-
ऽप्यर्थात्कथितः । तत्कथनं चाभिधानप्रयोजनं । परमार्थतस्त्वभि-
धेयस्वरूपव्युत्पत्तिरेव तत्प्रयोजनं । अभिधेयस्य पुनः [1]श्रुतमय्या-
दिप्रज्ञोत्पादनक्रमेण सर्वावरणविगमाद् बुद्धत्वमेव प्रयोजनमिति 5
प्रयोजननिष्ठा । इदं च सुगतात्मजसंवरावतारशब्द एवान्तर्भा-
वितं । तदनन्तरमेवोक्तः । यदनुग्राहक[3b]यनेन च सूचयिष्यति ।

अशुचिप्रतिमामिमां गृहीत्वा
जिनरत्नप्रतिमां करोत्यनर्घां । इति[2] ॥

इति संबन्धाभिधेयप्रयोजनानि प्रवृत्त्यङ्गतया प्रतिपादि- 10
तानि ॥ अन्यथाऽनभिधेयादिशङ्कया प्रेक्षावतामत्र प्रवृत्तिर्न
स्यात्[3] ॥

ननु त्वया स्वातन्त्र्येण कथितं कथनं ग्रहीष्यन्तीत्याह ।
यथागममिति । आगमानतिक्रमेण । यथैव प्रवचने भगवद्भिः
प्रतिपादितः । तथा मयापि तदर्थानतिवृत्त्या प्रतिपादयितव्यः । 15
अनेनागमात्स्वातन्त्र्यं परिहृतं भवति । उत्सूत्रमिदं न भवती-
त्यर्थः[4][5] । [6]प्रवचनार्थावगाहनमपि चावक्रतयानेनात्मनो दर्शितं ॥
इदमपि प्रवृत्त्यङ्गमेव ।

---

[1] *Cf* M Vyut 25, and *infra*, v, 25 [2] *Infra*, i, 10

[3] *Cf. Nyāyabinduṭīka*, 3, 27 In the Abhidharmakoça five sorts of prajñā are enumerated, among them the "vimalā prajñā"

[4] New in Buddhist works? —P W utsūtra = was nicht im Sūtra steht (*Mahābh* (K), 12, 27 [5] New compound

[6] Avakratā, new word

ननु यदि यथागमं कथयितव्यस्तर्ह्यागम एव तदभि-
लाषिणः प्रवर्तिष्यन्ते । तत्किमनेनेत्याह । समासादिति संक्षे-
पात् । यदि नाम आगमेऽपि कथितः । तथापि तत्रातिविस्तरेण
नानासूत्रान्तेषु प्रतिपादनात् । अहं तु पिण्डीकृत्य संक्षेपेण
5 कथयिष्यामीति विशेषः ॥ अनेन पुनरुक्तमिदं भवतीति परि-
हृतं । अयमपि चाप्रवृत्त्यङ्गतापरिहारः । तस्मात्प्रवृत्त्यङ्गत्वाद्
अभिधेयादिकथनमसंगतं न भवति ॥

तर्हि प्रणामकरणमपार्थकं ॥ तदपि श्रेयोलाभाद्यर्थमभि-
धीयमानं कथमपार्थकं । अयमस्याभिप्रायः । सुगतादिप्रणाम-
10 समुद्भूतपुण्यसंभारसमाक्रान्तचित्तसंतानस्य[1] प्रतनुतरपुराकृतपाप-
वृत्तेरुपशान्तविघ्नस्यारब्धार्थपरिसमाप्तिरुपजायते । समस्तसाधु-
जनगतमार्गानुगमनमपि चानेनात्मनः प्रकाशितं भवेत् ।
इष्टदेवतादिनमस्कृतिश्रवणादास्तिकत्वसंभावनया[2] श्रोतॄणा-
मात्मग्रन्थे च गौरवमापादितं स्यात् ॥ अत्र च सुगतशब्दे-
15 नोद्भावितभगवद्गुणमाहात्म्यश्रवणात्तदभिलाषिणस्तदुपार्जनप्रवण-
मानसाः सुगतात्मजसंवरावतारपरिज्ञानाय यत्नवन्तोऽस्मिन्
प्रवर्तन्ते । इदमभिमतं देवतादिप्रणामफलं ॥ एतेनेदमपि ।
येन यदभिमतमभिप्रेतं कर्तुं स तदेव करोतु नान्यत् । अन्य-
करणेऽप्रस्तुताभिधानमतिप्रसङ्गश्च स्यात् । तदयमपि संवराव-
20 तारकथने कृताभिप्रायः किमप्रस्तुतमिष्टदेवतादिप्रणामं

---

[1] This expression (cittasaṃtāna) is well known from the Sarvadarçana-saṃgraha, etc., and the Chap. ix of this book. [2] Āstikatva, new word

करोति । प्रागुक्तदोषद्वयप्रसङ्गादिति यदुच्यते तदपि निराकृतं भवति । प्रकृत एव तदुपयोगस्य वर्णितत्वात् । नाप्रस्तुताभिधानं । यत्प्रकृतोपयोगि तदक्तव्यं नान्यदित्यतिप्रसङ्गो नास्तीति सर्वं सुस्थं ॥

नन्वागमानतिरिक्तं संक्षेपेणाभिधीयमानमपि कथमर्थ- 5 विशेषाद्यभावाद् विशेषेण प्रवृत्त्यङ्गतया कस्य चिदुपादेयं स्यात् । तस्मादागमादधिकमपि किं चिदत्र वक्तव्यमित्याशङ्क्याह ।

न हि किं चिदपूर्वमत्र वाच्यं
न च संग्रन्थनकौशलं ममास्ति ।
अत एव न मे परार्थचिन्ता 10
स्वमनो वासयितुं कृतं ममेदं[1] ॥ २ ॥

नैव किं चिदपूर्वमपरमागमादतिरिक्तमस्मिन् वक्तव्यमस्ति मम । यस्मादर्थे वा हि शब्दः ॥ तर्हि तदधिकप्रमेयानभिधानेऽपि पदार्थरचनाविशेषो भविष्यति । तस्मादपि विशेषेण प्रवृत्तिः स्यादिति ॥ अत्राह । न चेति । नापि । [2]सग्रन्थनमर्थ- 15 पदविन्यासविशेष । तत्र कौशलं नैपुण्य ममास्ति । अवधारणे वा चकारः ॥ यद्येवं कथमस्य परार्थोपयोगित्वमिति । आह । अत एवेति । परप्रसञ्जितमेवाभ्युपगच्छति[3] । यस्मादपूर्वं वक्तुं मम शक्तिर्नास्ति । नापि संग्रन्थनकौशलमस्ति । न च परार्थ- चिन्तापि । परार्थोपयुक्तमिदं भवति विकल्पोऽपि मे नास्ति । 20

[1] Minaev and Text MSS bhāvayitum,—Çikṣā has parārthayatnaḥ svamano bhāvayitum mamedam iṣṭam
[2] Saṃgranthana, new meaning, cf. Vāgbhaṭālaṃkāra I, 12
[3] Read bhavatīti

तच्च शक्तिवैगुण्यात् ॥ किमर्थं करणाय यत्न इति चेत् । आह । स्वमन इति । आत्मचित्तं सुगतात्मजसंवरावताराभ्यासरसेनाधिकाधिकं वासयितुं कृतं प्रणीतं मया प्रकरणमिदं । संवरावतारकथनं वा ।[1] अतीतकालनिर्देशोऽन्तस्तत्त्वनिष्पन्नं
5 मनसि निधायेति ॥

ननु नात्मार्थं ग्रन्थप्रणयनं दृष्टं । न च स्वयंकृतेनैवात्मनि विशेषाधानं । तावतः संस्कारविशेषस्य प्रागेवात्मनि विद्यमानत्वादिति ॥ अत्राह ।

मम तावदनेन याति वृद्धिं
10 कुशलं भावयितुं प्रसादवेगः ।
अथ [2]मत्समधातुरेव पश्येद्
अपरोऽप्येनमतोऽपि सार्थकोऽयं ॥ ३ ॥

अनेन ग्रन्थेन तदर्थेन वा । कुशलं शुभमनस्कारं भावयितुमाराधयितुं । वृद्धिं याति प्रसादवेगः । उत्तरोत्तर-
15 वर्धमानस्य प्रसन्नचित्तसंतानस्य प्रवाहवाहितया प्रवृत्तिः ॥ अनेन स्वार्थकारित्वमनुभवसिद्धमस्य निदर्शयति ॥ परार्थकारित्वमपि लेशतः संभवति । इति दर्शयन्नाह । अथ मत्समेत्यादि । अथेति प्रकारान्तरोपन्यासे । स्वार्थकारित्वमस्य तावदनुभवसिद्धं । यदि पुनर्मम समानप्रकृतिरेव कश्चिदन्यः पश्येदीक्षेत ।
20 एनं ग्रन्थमर्थं वा । अतोऽपि परार्थोपयुक्तत्वादपि सार्थकः सप्रयोजनोऽयं । परार्थोपयोगस्यापि कथं चित्संभवात् ॥

---

1 MS quite illegible

2 Çikṣā has yadi matsama°.

अनेन श्लोकद्वयेन निरभिमानताम्[1] आत्मनो दर्शयति ॥

इदानीं सवरावतारकथां ग्राहयितुमुपोद्घात रचयन्नाह ।

[2]क्षणसंपदियं सुदुर्लभा
प्रतिलब्धा पुरुषार्थसाधनी ।
यदि नात्र विचिन्त्यते हितं 5
पुनरप्येष समागमः कुतः ॥ ४ ॥

अष्टाक्षणविनिर्मुक्तस्य क्षणस्य संपत्तिः समग्रता । इयं सुदुर्लभा । सुष्ठु दुःखेन लभ्यत इ[3]ति कथ चित्प्राप्या ।

महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमा[4] ।

प्रतिलब्धा प्राप्ता सा च पुरुषार्थसाधनी । पुरुषस्यार्थोऽभ्यु- 10
दयनिःश्रेयसलक्षणः । तस्य साधनी । निष्पादनी तदङ्गत्वात्तत्र
समर्थेति यावत् ॥ यदि चैवंभूतायामप्यस्यां न हित विचि-
न्त्यते । स्वपरसुखहेतुः । स्वर्गापवर्गसाधन नोपादीयते । तदा
पुनरपि भूयोऽपि । एष तथागतोत्पाद. श्रद्धा ऽक्षणविमुक्तो
मनुष्यभाव इत्ययं समागमः समावेशो मिलनमिति यावत् । 15

---

[1] Nirabhimānatā, new word

[2] Cf *Saddh puṇḍ* (S B of the E xxi) p 121, 2

[3] Cf IX, 163, M Vyut 120, Çikṣās 2, ?, Dh S cxxxiv, Mhv 1, 405 Cf *infra*, p 10, n 5

[4] Cf *infra* IX, 20 Burn *Lotus*, p 431 (°grīvāpraveçavat), Kern, *Saddh* (*transl* p 423) "as the entering of the tortoise's neck into the hole of the yoke formed by the great ocean" and note thereof, "I am as unable to elucidate this comparison as Burnouf was . —"It is as unlikely to happen as if a tortoise should put its neck into a hole opening every yuga in the world's ocean"

रात्रौ यथा मेघघनान्धकारे
विद्युत्क्षणं दर्शयति प्रकाशं ।
बुद्धानुभावेन तथा कदाचित्
लोकस्य पुण्येषु मतिः क्षणं स्यात् ॥ ५ ॥

निशायां यथा जलदागमसमये मेघैर्बहुले तमसि सति सौदामनी क्षणलवमात्रमालोकयति किं चिद्वस्तुजातं प्रकाशयति । सैवोपमात्रापि । इत्याह । बुद्धानुभावेनेत्यादि । बुद्धा एव हि भगवन्तो हितसुखोपसंहाराय सदा भव्याभव्यतया[1] सर्वसत्त्वसंतानमवलोकयन्तस्तिष्ठन्ति । यदा यत्र येनोपायेन यस्मै यं भव्यं पश्यन्ति तदा तत्र तेनोपायेन तस्मै तमधितिष्ठन्ति । अभव्यावस्थायामुपेक्ष्य विहरन्ति । इति तथागताधिष्ठानेन । कथं[2] चिद्दुर्लभोत्पत्तिकत्वात् । लोकस्य जनस्य पुण्येषु हितसुखहेतुषु कुशलेषु कर्मसु बुद्धिर्मुहूर्तमेकं भवेत् । तत्र तस्या अस्थिरत्वात् । अनादिसंसारे लोकेनाकुशलपक्षस्यैवाभ्यस्तत्वात् ॥ यदि नामैवं ततः किमित्याह ।

तस्माच्छुभं दुर्बलमेव नित्यं
बलं तु पापस्य महत्सुघोरं ।
तज्जीयतेऽन्येन शुभेन केन
संबोधिचित्तं यदि नाम न स्यात् ॥ ६ ॥

1 Bhavya [illegible] abhavya, new word, [illegible] 121 + 135, [illegible], 208, n. 7.
2 Ms. [illegible] Better reading than the "Kadācit" of the Text-Mss.

यत एव तस्माच्छुभं पुण्यं दुर्बलं सामर्थ्यविकलमेव विद्यु-
दुन्मेषप्रायत्वात् । अतिकृश । नित्यं सर्वकालं ॥ कस्य तर्ह्यति-
शयवद्बलमस्तीत्याह । बलं त्विति । सामर्थ्यं पुनरशुभस्य महत् ।
मेघघनान्धकारसदृशत्वात्तस्य । सुघोरमतिभयकरं नरकादि-
5 दुःखदायकत्वात् । सुदुर्जयत्वाच्च ॥ भवतु नाम महत्सामर्थ्यमस्य ।
तथापि तदपरेण बलवता पुण्येन जेष्यते । तथा च न
का चित्क्षतिरिति । आह । तदित्यादि । तत्तादृश महासामर्थ्यं
जीयते । अभिभूयते । अन्येन इतरेण पुण्येन केन । न केना-
पीत्यर्थः ॥ कुतः पुनरेवमुच्यते । सबोधीत्यादि । सम्यक्संबोधौ
10 बुद्धत्वे यच्चित्तं सर्वसत्त्वसमुद्धरणाभिप्रायेण तत्प्राप्त्यर्थमध्याशयेन
मनसिकारः । तद्यदि नाम न भवेत् । महासामर्थ्यं हि तद-
परेण महीयसा पराजीयते । सूर्येणेव निशान्धकारः । न च
[6a]संबोधिचित्तात्प्रतिपक्षो महीयानपरः संभवति । तस्मा-
त्तत्प्रतिघाताय सबोधिचित्तमेवोपादेयं नान्यदित्यभिप्रायः ॥
15 इतोऽपि सबोधिचित्तमुपादेयमित्याह ।

कल्पानल्पान् प्रविचिन्तयद्भि-
र्दृष्टं मुनीन्द्रैर्हितमेतदेव ।
यतः सुखेनैव सुखं प्रवृद्ध-
मुत्प्लावयत्यप्रमिताञ्जनौघान् ॥ ७ ॥

20 एकोऽन्तरकल्पः कल्पः । विंशतिरन्तरकल्पाः कल्पः । अशी-

तिरन्तरकल्पा: कल्प:[1] । स च महाकल्प इत्यभिधीयते । तदिह महाकल्पस्यैव ग्रहणम् । कल्पान् बहून् । [2]प्रथमासंख्येयान्तर्गतान् ॥ प्रविचिन्तयद्भिस्तात्पर्येण परिभावयद्भिर्दृष्ट: अधिगत: मुनीन्द्रै: । बुद्धैर्भगवद्भिर्बोधिसत्त्वावस्थायां । हितं सर्वार्थसाधनयोग्यं तद्वीज-भूतत्वात् । एतदेव सबोधिचित्तमेव ॥

कथं पुनरिदमेव हितमित्याह । यत इत्यादि । यस्मात्सुखं प्रवृद्धं प्रकर्षगतं बुद्धत्वलक्षणं । अप्रमितानप्रमेयान् । जनौघान् सत्त्वसमूहान् । उत्प्लावयति । उत्तारयति । संसारदु:खमहार्णवात् ॥ तस्मादिदमेव हितं ॥

अथ वा । यस्मात् सुखं देवमनुष्यसंपत्तिलक्षणं । प्रवृद्धं वृद्धिं गतं । अर्थात्सबोधिचित्तादेव । उत्प्लावयत्यतिशयेन संतर्पयति । सौकर्यादधिकतरं यद्भवति तदुत्प्लावनमुच्यते । यथा दध्ना वयमुत्प्लाविता इति सौकर्यादधिकतरं दधि भूतमित्यर्थ: ॥

यदि वा । यत: सबोधिचित्तात्सुखं प्रवृद्धमिति योजनीयं ॥

कथं प्रवृद्धमित्याह । सुखेनैवेति । अकृच्छ्रेण । न शिरोलुञ्च-नादिना महता कष्टेन । तथा हि बोधिचित्तसवरादेव बोधि-सत्त्वोऽमितपुण्यज्ञानसंभारात्प्रवर्धमानो देवमनुष्यसंपत्ती: सुख-मधिगच्छन् सत्त्वानेवाधिकतरं ताभि: संतर्पयतीति । यद्वक्ष्यति ।

एवं सुखात्सुखं गच्छन् [fol. ?] को विषीदेत्सचेतन: ।
बोधिचित्तरथं प्राप्य सर्वखेदश्रमापहं ॥ इति ॥[4]

[1] Cf Sp Hardy Manual, 7, Childers s. v. kappo, vuge, infra ad II 8
[2] Ex conj parama (??)
[3] I do not know from which koça this half çloka is quoted —Utplāvana, new word, W K F. has utplava, utplavana
[4] Cf infra VII, 30

ननु भगवतामपि मैत्रीबलादिजातकेषु[1] महद्दुष्करं श्रूयते । तत्कथं सुखेनैव सुखं प्रवृद्धमिति ॥ नैष दोषः । यत उत्पाद्यमेव परहितसुखाधायकं दुःखं स्वपरयोः कृपात्मभिः । सुखमेव तादृशं दुःखं परदुःखदुःखिनां धीमतामिति प्रतिपादयिष्यते[2] ॥

अस्मादपि स्वपरहितहेतुत्वाद्बोधिचित्तं न परित्याज्यमेवेति दर्शयन्नाह ॥

भवदुःखशतानि तर्तुकामै-
रपि सत्त्वव्यसनानि हर्तुकामैः ।
बहुसौख्यशतानि भोक्तुकामै-
र्न विमोच्यं हि सदैव बोधिचित्तम् ॥ ८ ॥

संसारदुःखशतानि । नरकादिगतिदुःखानामसातवेदितानां शतानि । अपर्यन्तममूहांस्तर्तुकामैः परित्यक्तुमिच्छद्भिः श्रावक-प्रत्येकबुद्धगोत्रैः[3] ॥ न केवलमात्मीयानि लोकानां जात्यादि-दुःखान्यपि हर्तुकामैरपनेतुकामैर्बोधिसत्त्वगोत्रैः[4] । न केवलं स्वपरदुःखानि हर्तुकामैः । अपि च । बहूनि सुखान्येव

---

[1] *Jātakamālā*, VIII, 'not met with in the Caryāpiṭaka nor in the five (first) volumes of the Pāli Jātaka' (Speyer, Sacred Books of the Buddhists, I, 71). The story of Maitrībala is parallel to the stories of the king of the Çibis and of M[illegible].

[2] Cf. *infra* VII, 22 and foll. — Traces of rhythm.

[3] Cf. Mhv. I, 373.

[4] *Cf.* M. Vyut. 61, CHILDERS s. voc. gotrabhu. The expressions Çrāvaka-gotra, pratyeka°, bodhisattva°, although identical in meaning with the technical terms of the M. Vyut., are new; cf. Çikṣ. 8, [illegible] and *infra*, 23, [illegible].

सौख्यानि । तेषां शतानि । देवमनुष्योपपत्तिलभ्यानि[1] । अनुभवितुकामैः संसारसुखाभिलाषुकैरपि ॥ सदैव सर्वकालं न विमोच्यमपरित्याज्यं बोधिचित्तं । स्वीकर्तव्यमित्यर्थः ॥ अथ वा संबोधिकाङ्क्षिणामेव विशेषणानि ॥ 5

अस्मादपि गुणविशेषाद्बोधिचित्तं ग्राह्यमित्याह ।

भवचारकबन्धनो वराकः
सुगतानां सुत उच्यते क्षणेन ।
स नरामरलोकवन्दनीयो
भवति स्मोदित एव बोधिचित्ते ॥ ९ ॥ 10

संसार एव बन्धनागारं । तत्र बन्धन बन्धो रागादय एव यस्येति विग्रहः । तादृशो वराकस्तपस्वी[2] समुदित एव बोधिचित्ते । प्रथमतरं बोधिचित्तसंवरग्रहणसमये । सुगतानां सुत उच्यते । बुद्धपुत्र इत्यभिधीयते । क्षणेन । तत्क्षणमेव ॥

न केवलमेवेत्याह । स नरामरेत्यादि । सह नरामरैर्मनुष्य- 15 देवैर्वर्तन्ते ये । असुरादयो [7b] लोकाः । तेषामपि वन्दनीयो नमस्करणीयः स्तवनीयश्च भवति स्म । स्मशब्देनातीतकालाभिधोत[न]ाद्बोधिचित्तोदयसमय[3] एव भूतः ॥

अस्मादपि गुणानुशंसदर्शनाद्बोधिचित्तग्रहणे यत्नः करणीय इत्याह । 20

---

1 Upapatti rebirth, cf. *Childers*, s voc

2 Cf. *infra ad* VI, 51.

3 MS abhidyautād —Cf *infra ad* I, 21.

अशुचिप्रतिमामिमां गृहीत्वा
जिनरत्नप्रतिमां करोत्यनर्घां ।
रसजातमतीव वेधनीयं
सुदृढं गृह्णत बोधिचित्तसंज्ञं ॥ १० ॥

अमेध्यप्रतिमामिमां मनुष्यादिकलेवरस्वभावां तद्धातुकां तत्स्वभावां तेन संवर्धितामित्यर्थः । तां गृहीत्वाऽदाय । जिन एव रत्नं दुर्लभप्रतिलम्भादिगुणयोगात् । तस्य प्रतिमां करोति निष्पादयति बोधिचित्तं । तथागतविग्रहं निर्वर्तयतीत्यर्थः । किंभूतां । अनर्घां । न विद्यतेऽर्घो मूल्यं यस्याः । सर्वत्रैधातु-कातिशायिगुणत्वाद्गुणपर्यन्तापरिज्ञानाच्च । तथोक्तां तां ॥

अत एव रसजातं । रसप्रकारं । अत्युच्चवेधकारित्वादतीव वेधनीयं । कर्तर्यनीयः करणे वा । तत्तादृशं । बोधिचित्तं संज्ञा अस्य रसजातस्य । बोधिचित्तापरव्यपदेशं । सुदृढं गृह्णत यथा गृहीतं न पुनश्चलति । गृह्णीतेति प्राप्ते गृह्णतेति यथागमपाठात् ॥ तस्माज्जिनरत्नमात्मानं कर्तुकामैर्बोधिचित्तमहारसः सुदृढं ग्रहीतव्यः ॥

उक्तं चार्यमैत्रेयविमोक्षे । तद्यथा कुलपुत्रास्ति हाटकप्रभासं नाम रसजातं । तस्यैकं पलं लोहपलसहस्रं सुवर्णीकरोति ।

---

[1] Cf. Pāṇ. 3, 4, 68 and Vārtt. on 3, 1, 96.—*Speijer*, *Sanskrit Syntax* § 357 (saṃgamanīyo maṇiḥ 'the jewel that causes the reunion').

[2] The form 'gṛhṇata' is [illegible] – The authority of the tradition warrants the irregular form.'

[3] This fragment is quoted in Çikṣ-s. 177, 16–178, 2 (Cf. *infra ad* V, 98). Read with the Çikṣās. saṃkleçasahitam (p. 17, l. 6) but with our MS., tadisapalam (l. 1), [illegible] (l. 4), [illegible] (l, 5).

न च तद्रसपलं शक्यते तेन लोहपलसहस्रेण पर्यादातुं लोहीकर्तुं वा। एवमेवैकः सर्वज्ञताचित्तोत्पादरसधातुः कुशल[मूल]-परिणामनाज्ञानसंगृहीतः सर्वकर्मक्लेशावरणलोहानि पर्यादाय सर्वधर्मान् सर्वज्ञतासुवर्णान् करोति। न च सर्वज्ञताचित्तोत्पाद-रसधातुः शक्यते सर्वकर्मक्लेशा[7b]वरणलोहादिभिः पर्यादातुं तत्कर्तुं वेति॥ 5

भवगतिषु विभूतिकामैरपि नात्र संशयो विपर्यासो वा कर्तव्यः। इत्युपदर्शयन्नाह।

सुपरीक्षितमप्रमेयधीभि-
र्बहुमूल्यं जगदेकसार्थवाहैः। 10
गतिपत्तनविप्रवासशीलाः
सुदृढं गृह्णत बोधिचित्तरत्नं॥ ११॥

गतय एव पत्तनानि। पण्यद्रव्यक्रयविक्रयनगराणीह पत्तनानि। तदच्छुभाशुभकर्मपण्यद्रव्यक्रयविक्रयस्थानानि गतिपत्तनानि। तेषु विप्रवासो विप्रवसनमेव शीलं स्वभावो येषां ते 15 तथोक्ताः। तेषां संबोधनं। हे गतिपत्तनविप्रवासशीलाः सुदृढं गृह्णत बोधिचित्तरत्नं॥ बोधिचित्तमेव रत्नं। रत्नमिव। यथा चिन्तामणिमहारत्नं सर्वदारिद्र्यदुर्गतिप्रशमनहेतुः। तथेदमपि बोधिचित्तरत्न॥ अयमभिप्रायः। वणिज एव सुखसंपत्ति-लाभार्थिनो यूयं। अत इदमेव महारत्नं महतादरेण गृह्णत। 20 कुतः। बहुमूल्यमिति। हेतुपदमेतत्। यस्मादनर्घमिदं। सर्वा-

तिशायि लौकिकालोकोत्तरसंपत्तिनिदानभूतत्वात्। तस्मादिदमेव ग्राह्यमित्यर्थः॥

कथमिदं ज्ञायत इति चेदाह। सुपरीक्षितमिति। सुष्ठु निरूपितं सम्यक् निर्णीतमित्यर्थः॥ कैरित्याह। अप्रमेय-
5 धीभिः। अप्रमेया प्रमातुमशक्या धीर्बुद्धिर्येषां तैर्महाप्राज्ञैर्बुद्ध-बोधिसत्त्वैः। एतावता परीक्षायां स्खलितमपि नास्ति। इति सुपरीक्षितमुच्यते॥ पुनरपि किंभूतैः। जगदेकसार्थवाहैः। सार्थं वाहयन्तीत्यण्[1]। जगतामेक एव सार्थवाहाः करुणावश-वर्तिनो बुद्धा भगवन्तो बोधिसत्त्वाश्च। तैः। यथा खलु वणिजां
10 हिताहितप्राप्तिपरिहारयोर्हितैषिणो ज्ञानवन्तश्च सार्थवाहा नेता-[8a]रो भवन्तीति न तत्र विसंवादसंभावना। तथात्रापीत्य-भिप्रायः। तस्मादिदमेव बोधिचित्तरत्नमनघं सुदृढं ग्राह्यमिति।

एतच्च तत्रैवोक्तं[2]। तद्यथा कुलपुत्र यावच्चन्द्रसूर्यौ मण्डल-प्रभयावभासेते। अत्रान्तरे ये केचिद्धनधान्यरत्नजातरूपरजत-
15 पुष्पधूपगन्धमाल्यविलेपनवस्त्रपरिभोगाः। ते सर्वे वणिराज-महामणिरत्नस्य मूल्यं न क्षमन्ते। एवमेव यावत्त्रिष्वप्यध्वसु सर्वज्ञज्ञानं धर्मधातुविषयमवभासयति। अत्रान्तरे यानि कानि चित्सर्वदेवमनुष्यसर्वसत्त्वसर्वश्रावकप्रत्येकबुद्धकुशलमूलानि सास्र-वानास्रवाणि सर्वाणि तानि बोधिचित्तोत्पादवणिराजमहामणि-
20 रत्नस्य मूल्यं न क्षमन्ते। इति॥

---

1 See PAN 3 2, 1

2 *Maitreyavimokṣe,* one of the rare quotations in our text hitherto not found in the Çikṣās.

इदमपरमसाधारणमतिशयवत्कल्पतरोरिव माहात्म्यमस्यो-
पदर्शयन्नाह ।

कदलीव फलं विहाय याति
क्षयमन्यत्कुशलं हि सर्वमेव ।
सततं फलति क्षयं न याति 5
प्रसवत्येव तु बोधिचित्तवृक्षः ॥ १२ ॥

कदली यथा फलमेकवारं दत्त्वा न पुनः फलति । तथा
बोधिचित्तादन्यदपि कुशलं सर्वमेव । किं चिदेव । विपाके[1]
परिपक्के न पुनः फलदानसमर्थं भवति । तावतैवास्य परिक्षयात् ।
विपाकस्य चाव्याकृततया पुनः फलानुबन्धाभावात् ॥ बोधिचित्त- 10
स्य पुनरयं विशेष इत्याह । सततमित्यादि । सर्वकालं फलति ।
देवमनुष्योपपत्तिषु सुखसंपत्तिप्रदानात् क्षयं न याति तदन्यकु-
शलवत् स्थिरस्वभावत्वात् । प्रतिक्षणमनेकप्रकारैः शुभमेघप्रवाहै-
रापूर्यमाणत्वाच्च प्रसवत्येव तु बोधिचित्तवृक्षः । अविच्छिन्नसुख-
संपत्तिफलप्रसवनात् । उत्तरोत्तरमपरापरगुणविशेषजननाच्च । 15
बोधिचित्त वृक्ष इव । उपमितं व्याघ्रादिभिरिति समासः[2] ।
यस्मादेवं तस्मादनुपरतमतिशयवत्सर्वसुखसं[8b]पदः प्राप्तुकामैः
प्रेक्षावद्भिरिदमेव ग्राह्यं ।

---

[1] MS has "na kiṃ cid eva vipāke na", na erased
[2] PĀṆ 2, 1, 56

कथित चैतदार्याक्षयमतिनिर्देशे[1] । तद्यथापि नाम भदन्त शारद्वतीपुत्र महासमुद्रपतितस्योदकबिन्दोर्नास्त्यन्तरा परिक्षयः पर्यादानं । यावन्न कल्पपर्यन्त इति । एवमेव बोधिपरिणामितस्य कुशल[मूल]स्य नास्त्यन्तरा परिक्षयः पर्यादान । यावन्न 5 बोधिमण्डनिषदनं । इति ॥

न केवल सर्वशुभसंचयकारण । अकुशलपक्षक्षयहेतुरपि बोधिचित्तमिति सार्धश्लोकेन दर्शयन्नाह ।

> कृत्वापि पापानि सुदारुणानि
> यदाश्रयादुत्तरति क्षणेन ।
> 10 शूराश्रयेणेव महाभयानि
> नाश्रीयते तत्कथमज्ञसत्त्वैः[2] ॥ १३ ॥

बोधिचित्तग्रहणात्पूर्वं कृत्वापि पापानि । अकुशलकर्माणि । नरकादिषु दुःसहदुःखदायकत्वात् सुदारुणानि । अतिभयकराणि । महान्ति वा । यस्य बोधिचित्तस्याश्रयादाश्रयणात् । 15 तदुत्पादनरक्षणवर्धनसेवनलक्षणात् । उत्तरति निस्तरति तत्सामर्थ्याभिभवेनातिक्रामतीत्यर्थः । क्षणेन । एकस्मिन्नेव क्षणे महतः पुण्यराशेः समुपार्जनात् । तदुत्पादनमात्रेण ॥ कथमिवोत्तरति । शूराश्रयेणेव महाभयानि । बलवत्पुरुषाश्रयेण यथा महापराधं कृत्वापि कश्चिदुत्तरति । तदपराधफलान्निर्भयो भवति । तथा

---

[1] The same text is quoted Çikṣās. 158. 7 with some variants.
[2] On this topic see Çikṣās. Chap. VIII, pāpaçodhana.

प्रक्ततेऽपि ॥ तदेवंभूतं बोधिचित्तं कथं किमिति नाश्रीयते । न सेव्यते । अज्ञसत्त्वैः प्रज्ञाविकलैर्मूढजनैरित्यर्थः । आश्रयणीय-मेव तद्भवेदिति भावः ।

इदमपि तत्रैवोक्तं[1] । तद्यथा कुलपुत्र शूरसंनिश्रितः पुरुषः सर्व्वशत्रुभ्यो न बिभेति । एवमेव बोधिचित्तोत्पादशूरसंनिश्रितो बोधिसत्त्वः सर्वदुश्चरितशत्रुभ्यो न बिभेतीति ।

अपरमपि बोधिचित्तात्पापक्षयदृष्टान्तमाह ।

युगान्तकालानलवन्महान्ति
पापानि यन्निर्दहति क्षणेन ।

युगान्तकाले प्रलयसमये[2] । अनलो वह्निः सप्तसूर्योदय-समुद्भूतः[3] । यथा सर्वं कामधातुं सप्रथमध्यानं निर्दहति । निःशेषं दहति यथा भस्मापि नावशिष्यते ॥ तद्वत्पापानि । किंभूतानि । महान्ति । सुमेरुप्रख्यानि । महारौरवादिदुःखविपाकानि । यद्बोधिचित्तं निर्हरति । तद्विपाकोपघातान्निर्मूलयति । क्षणेन । न चिरेण । नाश्रीयते तत्कथमज्ञसत्त्वैरिति सम्बन्धः कार्यः ।

एतदपि तत्रैवोक्तं[4] । कल्पोद्दाहाग्निभूतं सर्वदुष्कृतनिर्दहन-तया । पातालभूतं सर्वाकुशलधर्मपर्यादान[करण]तयेति ॥

---

1 Hitherto not found in the Çikṣās.

2 Cf. Sp. Hardy, *Manual*, p. 30.

3 New use of the prefix "Sa" if the reading be correct. Buddhist sanskrit saha prathamadhyānāt, classic sahapūrvāhṇam (PĀṆ. 6, 3, 81, Comm.; W. K. F., s. voc., 3c).

4 This fragment occurs in *Çikṣās.* 177, 14, quoted from the *Āryamaitreya-vimokṣa*.

ननु कृतकर्माविप्रणाशवादी भगवान् । तत्कथमिदमभि-
धीयते ॥ सत्यमुच्यते । बोधिचित्तप्रसूते प्रतिक्षणमाकाशधातु-
व्यापके महति पुण्यौघेऽन्तर्भूततया लवणपलोपमन्यायेनाप्रज्ञाय-
मानत्वात् । बलवता प्रतिपक्षेणाभिभूतत्वाच्च । फलदानासमर्थं
5 दग्धमेव तदित्यदोषः ॥ यदि वा । निरुपायाभिसंधिना तदुक्तं ।
नाभुक्तं क्षीयते कर्मेति । इदं तु सर्वपापनिर्मूलने महानुपायः ।
तथा हि यदा बोधिसत्त्वः सर्वसत्त्वानाकाशधातुव्यापिनः सर्व-
दुःखात्समुद्धृत्य सर्वसुखसपन्नान् करिष्यामीत्यध्याशयेन विचि-
न्तयति । पूर्वकृतं च पापं विदूषणासमुदाचारादिभिः[1] क्षपयति ।
10 तदा बोधिचित्तबलादेव तत्संताने पापस्य कः सद्भावो येन
चोद्यस्यावकाशः स्यादिति सर्वं निराकुलं ॥ एतावता यदुक्तं

तत्क्षीयतेऽन्येन शुभेन केन । इति[2] ।

तदपि विस्पष्टीकृत ॥ अन्ये पुनरनियतविपाकापेक्षया सर्व-
मेतदुच्यते । नियतविपाकस्य तु कर्मणः केन चित्प्रतिषेद्धु-
15 मशक्यत्वा [9b] दित्याहुः ॥

इत्थमपि बोधिचित्तमुपादेयमित्याह ।

यस्यानुशंसानमितानुवाच

मैत्रेयनाथः सुधनाय धीमान् ॥ १४ ॥

यस्य बोधिचित्तस्य । अनुशंसान्[3] स्वाभाविकान् गुणान-

---

[1] Cf Çikṣas pp 160–171, and infra V 98.

[2] See supra p 11, [16].

[3] Cf. infra VII 81, but ad V 41 ānuçamsa the correct reading is āniçamsa (cf KERN, Saddh pund, 336, n 1, Pāli ānisamsa) cf anuçamsā, p 10, [17], anuçamsa, 15, [19]

मितानप्रमाणान् । मैत्रेयनाथः । भगवानजितः[1] । किंभूतो धीमान्[2] बोधिसत्त्व उवाच । उक्तवान् । सुधनाय सुधननाम्ने बोधिसत्त्वाय । तथा चार्[यगण्डव्यूह]सूत्रे वर्णितं । बोधिचित्तं हि कुलपुत्र बीजभूतं सर्वबुद्धधर्माणां । क्षेत्रभूतं सर्वजगच्छुक्लधर्मविरोहणतया । धरणिभूतं सर्वलोकप्रतिशरणतया । यावत्पितृभूतं सर्वबोधिसत्त्व[ा]रक्षणतया ॥ पेयालं ॥ वैश्रवणभूतं सर्वदारिद्र्यसंछेदनतया । चिन्तामणि[राज]भूतं सर्वार्थसाधनतया । भद्रघटभूतं सर्वाभिप्रायपरिपूरणतया । शक्तिभूतं क्लेशशत्रुविजयायेत्यादिविस्तरः[3] ॥

नाश्रीयते तत्कथमज्ञसत्त्वैरित्यत्रापि योजनीयं ॥

इदानीं बोधिचित्तस्य प्रभेदं दर्शयन्नाह ।

तद्बोधिचित्तं द्विविधं विज्ञातव्यं समासतः ।
बोधिप्रणिधिचित्तं च बोधिप्रस्थानमेव च[4] ॥ १५

तत्समनन्तरप्रदर्शितानुशंसं बोधिचित्तं द्विविधं । द्विप्रकारं । विज्ञातव्यं । वेदितव्यं ॥ [5]गोत्रभूम्यादिगतानेकप्रकारसंभवेऽपि कथं द्विविधमित्याह । समासतः । अपरप्रकारसंभवेऽपि संक्षेपतः

---

1 On this surname of Maitreya, see KERN, Saddh. pund, 18, n. cf. *Çikṣās*, 5, [20], (and 101, [18]) and infra ad I. 25

2 Epithet of the Bodhisattvas, see Pentaglotte DE HARLEZ, T'oung-pao, VII. 4

3 Fragment of the text quoted Çikṣās. 5, [20], with the same omissions

4 cf. Çikṣās. 8, [15]

5 cf. supra p. 14, n. 4

इदं द्विविधमित्युच्यते ॥ द्विविधमपि कथं । [1]बोधिप्रणिधि-
चित्तमित्येकं । बोधिप्रस्थानमिति द्वितीयं ॥ बोधौ प्रणिधि-
स्तदेव चित्तं तत्र वा चित्त । यच्चित्तं प्रणिधानादुत्पन्नं
भवति दानादिप्रवृत्तिविकलं च । तत्प्रणिधिचित्तं । तद्यथा
5 सर्वजगत्परित्राणाय बुद्धो भवेयमिति प्रथमतर प्रार्थनाकारा
चेतना ॥ प्रस्थाने चित्तं । प्रस्थानमेव वा चित्तं चित्तस्य
तत्स्वभावत्वात् । पूर्वकमनस्कारपुर.सरमेव यतः प्रभृति [10a]
संवरग्रहणपूर्वकं संभारेषु प्रवर्तते । तत्प्रस्थानचित्तमिति उक्त-
क्रमेण द्वैविध्यं ॥ इयानेव भेद इत्येवकारेण प्रतिपादयति ॥
10 चकारद्वयं परस्परसमुच्चये द्वयोरपि बोधिचित्तत्वं दर्शयति ।
तेन पूर्वकं बोधिचित्त न भवतीति शङ्कां निरस्यति ॥

शूरङ्गमसूत्रे[2] शाठ्योत्पादितस्यापि बोधिचित्तस्य बुद्धत्वहेतु-
त्वाभिधानात् । तथार्यगण्डव्यूहे[3] प्योक्त । दुर्लभाः कुलपुत्र ते
सत्त्वाः सत्त्वलोके[4] ये ऽनुत्तरस्यां सम्यक्संबोधौ चित्तं प्रणिदधति ।
15 ततोऽपि दुर्लभतमास्ते सत्त्वा येऽनुत्तरां सम्यक्संबोधिमभि-
संप्रस्थिता इति ॥

इदानीमुक्तमेव प्रभेदमुदाहरणेन व्यक्तीकुर्वन्नाह ।

गन्तुकामस्य गन्तुश्च यथा भेदः प्रतीयते ।
तथा भेदोऽनयोर्ज्ञेयो याथासंख्येन पण्डितैः ॥ १६

[1] Ms bodhicittapra°
[2] cf Çikṣās p. 8, 19
[3] cf. *ibidem*, p 8, 16–19.
[4] Çikṣās has sarva°

यथा कश्चित्पुरुषोऽभिमतदेशप्राप्तये गन्तुकामो गमनाभिप्रायो न तु पुनर्गच्छत्येव । अन्यः पुनस्तत्प्राप्तये प्रस्थितो गच्छत्येव । यद्वद्यथा तयोर्भेदो विशेषः प्रतीयतेऽवगम्यते । तद्वत्तथा भेदो नानात्वमनयोर्बोधिप्रणिधिप्रस्थानचेतसोर्ज्ञेयोऽवबोद्धव्यः पण्डितैर्विचक्षणैः । कथं । याथासंख्येन । स्वार्थेऽयण्[1] । प्राक्तनं प्रणिधिचित्तस्य निदर्शनं पश्चात्तनं[2] प्रस्थानचेतस इति सङ्क्षेपार्थः ॥ तदेतत्प्रणिधिचित्तं प्रतिपत्तिविकलमपि[3] संसारे महाफलं भगवता वर्णितमित्याह । 5

बोधिप्रणिधिचित्तस्य संसारेऽपि फलं महत् ।

यदि नाम तत्प्रतिपत्तिविकलं तथापि तस्यास्तां तावद् 10 बुद्धत्व[4] संसारेऽपि देवमनुष्योपपत्तिस्वभावं सुखसम्पत्तिलक्षण फलं महत् । अन्यस्मात् कुशलाद् बृहत् । सतत फलतीत्यादिविशेषणविशिष्टत्वात् । तथा चोक्तमार्यमैत्रेयविमोक्षे[5] । तद्यथापि नाम कुलपुत्र भिन्नम[10b]पि वज्ररत्नं सर्वप्रतिविशिष्टं सुवर्णालंकारमभिभवति । वज्ररत्ननाम च न विजहाति । 15 सर्वदारिद्र्यं च[6] विनिवर्तयति । एवमेव कुलपुत्र प्रतिपत्तिभिन्नमपि[7] सर्वज्ञताचित्तोत्पादवज्ररत्नं सर्वश्रावकप्रत्येकबुद्धगुण-

---

[1] W K F yathā° (Whitney 1313, c, Speyer, S Syntax, 255) — Gramm note deest in Tib.

[2] Paçcāttana, the word seems new

[3] The corresponding expression in Çikṣās is caryāvikala (9, 7), āçayapratipatti? (10) (cf. infra p 27, 7)

[4] Tib. has buddhatvahetutvam

[5] Cf Çikṣās, 9, 8-12

[6] Çikṣās omits ca

[7] Ibidem āçayapratipatti°.

सुवर्णालंकारमभिभवति । बोधिचित्तनाम च न विजहाति । संसारदारिद्र्यं[1] च विनिवर्तयतीति ॥

तस्माद्योऽपि पारमितासु सर्वेण सर्वं सर्वथा शिक्षितुमसमर्थः । तेनापि बोधिचित्तमुत्पादनीयं । एवमुपायपरिग्रहेण महाफलत्वात् ॥

यथोक्तमार्य[ापर]राजाववाद[क]सूत्रे[2] । यस्मात्त्वं महाराज बहुकृत्यो बहुकरणीयः । असहः सर्वेण सर्वं सर्वथा[3] दानपारमितायां शिक्षितुं । यावत्प्रज्ञापारमितायां शिक्षितुं । तस्मात्तर्हि त्वं महाराज । एवमेव संबोधिच्छन्दं श्रद्धां प्रार्थनां प्रणिधिं च । गच्छन्नपि तिष्ठन्नपि निषण्णोऽपि शयानोऽपि जाग्रदपि भुञ्जानोऽपि पिबन्नपि सततसमितमनुस्मर । मनसिकुरु । भावय । सर्वबुद्धबोधिसत्त्वप्रत्येकबुद्धार्यश्रावकपृथग्जनानामात्मनश्च अतीतानागतप्रत्युत्पन्नानि कुशलमूलानि पिण्डयित्वा तुलयित्वाऽनुमोदयस्व । अग्रयाऽनुमोद[न]या[4] । अनुमोद्य च सर्वबुद्धबोधिसत्त्वप्रत्येकबुद्धार्यश्रावकाणां पूजाकर्मणि[5] निर्यातय । निर्यात्य च सर्वसत्त्वसाधारणानि कुरु । ततः सर्वसत्त्वानां यावत्सर्वज्ञताप्रतिलम्भाय सर्वबुद्धधर्मपरिपूरणाय दिने दिने त्रैकाल्यमनुत्तरायां सम्यक्संबोधौ परिणामय । एवं खलु त्वं

---

1 Çikṣās and Tib. sarvasaṃsāra. 2 Cf Çikṣās 9, 12 cf infra Chap III.
3 Read sarvathā sarvadā, with Tib.—Çikṣās has Yasmāc ca tvam ... sarveṇa sarvaṃ sarvathā sarvaṃ sarvadā.
4 With more developments in the Çikṣās.
5 Çikṣās has °karmaṇe.

महाराज प्रतिपन्नः सन् राज्यं च कारयिष्यसि[1] । राज्य[11a]कृत्यानि [च] न हापयिष्यसि । बोधिसंभारांश्च परिपूरयिष्यसि ॥ इत्यादिकमुक्त्वाह[2] । स खलु पुनस्त्वं महाराज सम्यक्संबोधिचित्तकुशलमूलविपाकेन[3] । अनेकशो देवेषूपपन्नोऽभूः । अनेकशो मनुष्येषूपपन्नोऽभूः । सर्वासु च देवमनुष्योपपत्तिष्वाधिपत्यं कारयिष्यसीति[4] विस्तरः । 5

इति चर्याविकलेऽपि बोधिचित्ते नावमन्यना कार्या । तस्याप्यनन्तसंसारे सुखप्रसवनात्[5] । यत्पुनः प्रतिपत्तिसारं बोधिचित्तं तदतितरां विपुलफलमेवेति सिद्धमित्याह ।

न त्वविच्छिन्नपुण्यत्वं यथा प्रस्थानचेतसः ॥ १७ 10

न तु । न पुनः । यथा प्रस्थानचित्तस्याविच्छिन्नपुण्यत्वं निरन्तरशुभप्रवाहवाहित्वं । न तथा अस्येति भावः ॥ इदमेवाविच्छिन्नपुण्यत्वं वृत्तद्वयेन प्रसाधयन्नाह ।

यतः प्रभृत्यपर्यन्तसत्त्वधातुप्रमोक्षणे ।
समादत्ते तच्चित्तमनिवर्त्येन चेतसा ॥ १८ 15
ततः प्रभृति सुप्तस्य प्रमत्तस्याप्यनेकशः ।
अविच्छिन्नाः पुण्यधाराः प्रवर्तन्ते नभः समाः ॥ १९

---

[1] Ms. pratipannaḥ san [illegible]

[2] Instead of "ityādikam uktvāha" the Çikṣā has "[illegible] vipāka [illegible]"

[3] Çikṣā has tasya samyaksambodhicittasya kuśalakarmaṇo vipākena.

[4] Çikṣā has kāra[illegible]

[5] Read with Tib. [illegible]sukha[illegible]. Cf. Çikṣā [illegible] where Çāntideva has written kartavyā anantasaṃsārasukhaprasavanatvāt.

यतः प्रभृति यस्मादारभ्य । न विद्यते पर्यन्त इयत्तास्येत्य-
पर्यन्तस्य । आकाशधातुव्यापिनः सत्त्वधातोः । प्रमोक्षणे प्रमोक्षे
सर्वदुःखोपशमनिमित्ते । समाददाति तच्चित्तं । सम्यक्संबोधि-
चित्तं समादाय वर्तते । कथं । अनिवर्त्येन चेतसा । अ[प्रवृत्ति-
5 भ]ङ्गेन[1] मनसा ।

ततः प्रभृति तदादिं कृत्वा । सुप्तस्य मिद्धाक्रान्तचित्तस्य
प्रमत्तस्य विक्षिप्तचित्तस्यापि । उभयत्रापि संबध्यते । उपलक्षणं
चैतत् । गच्छतोऽपि तिष्ठतोऽपि निषण्णस्यापि भुञ्जानस्यापि
मूर्च्छाद्यवस्थायामपीत्यादि द्रष्टव्य॥ अनेकश इति । प्रतिक्षण-
10 मनेकवार॥ अविच्छिन्नाः पुण्यधाराः । निरन्तरसततयः
शुभवेगाः प्रवर्तन्ते । नभःसमाः । प्रतिक्षणमाकाशधातुप्रमाणाः ॥
तस्मात्प्रतिपत्तिसारेण बोधिसत्त्वेन भवितव्यं ।

आर्यसमाधिराजे चोक्तं[2] । [11^b]तस्मात्प्रतिपत्तिसारो भवि-
ष्यामि । इत्येव कुमार शिक्षितव्यं । तत्कस्य हेतोः। प्रतिपत्ति-
15 सारस्य कुमार न दुर्लभा भवत्यनुत्तरा सम्यक्संबोधिरिति ॥

अविच्छिन्नपुण्यत्वमस्य भगवतैवोक्तं । इत्युपदर्शयन्नाह ।

इदं सुबाहुपृच्छायां सोपपत्तिकमुक्तवान् ।
हीनाधिमुक्तिसत्त्वार्थं स्वयमेव तथागतः ॥ २०

[1] Three or four akṣaras illegible.—Tib. ḥjug pa-ḥyams pa med par sems kyis.

[2] Quoted with variants from Chap X, p. 32, 24 (edited by ÇARAT CHANDRA DAS and HARIMOHAN VIDYABHŪSHAN).

इदमेवाप्रमेयपुण्यत्वं स्वयमेवात्मनैव तथागतो बुद्धो भगवानुक्तवान् कथितवान् । क । सुबाहुपृच्छायां । सुबाहुपृच्छानाम्नि सूत्रे[1] । कथं सोपपत्तिकं सयुक्तिकं[2] । किमर्थं हीनाधिमुक्तिसत्त्वार्थं । हीनश्रावकप्रत्येकबुद्धयानेऽधिमुक्तिः श्रद्धा छन्दो वा येषां ते । ते सत्त्वाश्च । तेभ्य इदं । तदर्थं । तत्प्रयोजनमुद्दिश्येत्यर्थः ॥ तथा हि ये ऽनियतगोत्रा[3] स्थिरतरकालेन बहुतरसंभारोपार्जनभीता महायानाच्चित्तं व्यावर्त्य लघुतरकालेनाल्पतरसंभारसाध्ये श्रावकप्रत्येकबुद्धयाने चित्तमुत्पादयन्ति । तद्व्यावर्तनार्थं भगवानुपपत्तिमाह । तामेवोपपत्तिं वृत्तद्वयेन कथयन्नाह ।

शिरःशूलानि सत्त्वानां नाशयामीति चिन्तयन् ।
अप्रमेयेण पुण्येन गृह्यते स्म[4] हिताशयः ॥ २१
किमुताप्रमितं शूलमेकैकस्य जिहीर्षतः ।
अप्रमेयगुणं सत्त्वमेकैकं च चिकीर्षतः ॥ २२

कतिपयजनानां मस्तकपीडां नाशयामि मन्त्रेणागदेन वा[5] । इत्येव मनसि कुर्वन्नप्रमाणेन सुकृतेनासौ कल्याणाभि-

---

1 *Subahupariprccha*, K F 216, NANJIO 23, 26 [A D 384-417], 23, 87 (= 50) [A D 265-316], 531, 822 M Vyut 65, 69

2 Sayuktika, new word

3 Aniyatagotra, *Cf supra* p 14, n 4—Cf *Lankav* p 66

4 Tipp grhyate smeti pūrvaval lat (*Cf* Pan 3, 2, 123, 118 and ... *ad* I, 9)

5 Tipp mantrenauṣadhena vā

प्रायो गृहीतो द्रष्टव्यः ॥ किं पुनरप्रमाणं समारदुःखं प्रति-
सत्त्वमप्रमाणस्य जगतो हर्तुमिच्छत । अपि च तच्छूलमपनीय
सर्वसत्त्वान् सर्वगुणसमङ्गिनः कर्तुमिच्छत । किमप्रमेयं पुण्यं न
भवति । इति विभक्तिविपरिणामेन योजनीयं । अविच्छिन्नाः
5 पुण्यधारा. किमुत तस्य न प्रवर्तन्ते नभःसमा इति[1] ॥
तस्माद्यथा समारबाहुल्यमा[2]ध्यं बुद्धत्व । तथा संसारवैपुल्ये-
ऽपि[2] प्रतिक्षणमिति हेतुविशेषादत्रैव महायाने महान् लाभः ।
अतो नास्माच्चित्तमभयस्थाने कातरतया विनिवर्तनीयमित्युप-
दर्शितं भवति । वक्ष्यति ।

10 क्षपयन् पूर्वपापानि प्रतीच्छन् पुण्यसागरान् ।
बोधिचित्तबलादेव श्रावकेभ्योऽपि शीघ्रगः ॥ इति ।[3]

यस्त्वेवं सर्वसत्त्वानां हितसुखार्थमुद्युज्यते स देवादिभ्योऽप्य-
साधारणगुणत्वात् प्रशस्य इत्युपदर्शयन्नाह ।

कस्य मातुः पितुर्वापि हिताशंसेयमीदृशी ।
15 देवतानामृषीणां[4] वा ब्रह्मणां वा भविष्यति ॥ २३

कस्य सत्त्वस्य । मातुर्जनन्या कस्य पितुर्वा जनकस्य
देवतानां सोमवरुणादीनामृषीणां वा वसिष्ठगौतमादीनां
ब्रह्मणां वा वेधसां । इयमीदृशी हिताशंसा । हितोपसंहार-
मतिर्यादृशी समनन्तरं प्रतिपादिता बोधिसत्त्वस्य । भविष्यति ।

---

1 *Supra* I 19   2 Ms vaipulyam...
3 *Infra* VII 29
4 ... Minaev and Text Mss have devanam ... vā

इति । आस्तां तावत् भूता भवति[1] वा । भविष्यत्यपि[1] नैव कस्य चिद्बोधिसत्त्वमन्तरेणान्यस्य ॥ कुत. पुनरेतदित्याह ।

तेषामेव च सत्त्वानां स्वार्थेऽप्येष मनोरथः ।
नोत्पन्नपूर्वः स्वप्नेऽपि परार्थे संभवः कुतः ॥ २४

तेषां माचादीनां । स्वार्थेऽपि । आत्मनः कृतेऽपि । एष मनोरथ· सर्वदुःखमपहर्तुं । अप्रमाणगुणानाधातुं । नोत्पन्नपूर्वः । अभूतपूर्व· । स्वप्नेऽपि । आस्तां तावज्जाग्रदवस्थायां बुद्धिपूर्वकमुत्पन्नः ॥ परार्थे कदा चिदुत्पद्यत इत्याह । परार्थे संभव· कुतः । आत्मा हि वल्लभो लोकस्य परस्मात् । तत्रैव चेन्नास्ति । परार्थे संभावनापि कुतः ॥ अथ वा । स्वप्नेऽपि परार्थे संभव· कुतः इति योज्यं ।

तदेवमसाधारणत्व बोधिसत्त्वस्य प्रतिपाद्योपसंहरन्नाह ।

सत्त्वरत्नविशेषोऽयमपूर्वो जायते कथं[2] ।
यत्परार्थाशयोऽन्येषां न स्वार्थेऽप्युपजायते ॥ २५

एवमत्यद्भुतकर्मकारितया दुर्लभोत्पादात् सत्त्व एव रत्नविशेषः । अपूर्वः अनुपलब्धपूर्व. । अयमिति यादृशगुणोऽत्र कथित · [12b] । जायते कथ । कथमित्यद्भुते ॥ कस्मात्पुनरेवमुच्यते । आह । यत्परार्थेति । यस्य महात्मनः परार्थाशयोऽन्येषां सत्त्वानामुक्तक्रमेण न स्वार्थेऽप्युपजायत इत्यस्मात् ॥

[1] Ms has bhavanti, bhaviṣyanti   [2] Minaev and Text Mss kutaḥ

अत्र चान्येऽपि बोधिचित्तोत्पादकस्य गुणा वक्तव्याः ।
यथार्यगण्डव्यूहे[1] भगवतार्यमैत्रेयेण सुधनमधिकृत्योद्भाविताः ।
ते चातिविस्तरेण शास्त्रकृता शिक्षासमुच्चये दर्शितास्तु तत्रैवा-
वधारयितव्याः ॥

5 पुनरपि बोधिचित्तानुशंसाद्वारेण बोधिसत्त्वस्याप्रमेयपुण्यत्व-
माह ।

जगदानन्दबीजस्य जगद्दुःखौषधस्य च ।
चित्तरत्नस्य यत्पुण्यं तत्कथं हि प्रमीयतां ॥ २६

सर्वसत्त्वानां सर्वप्रामोद्यकारणस्य देवादिसर्वसंपत्तिनिदान-
10 भूतत्वात् । चित्तरत्नस्य बोधिचित्तस्य यत्पुण्य तत्कथं हि प्रमी-
यतां । केन प्रकारेण नाम सङ्ख्येयतां । अतिविपुलतया प्रमातु-
मशक्यत्वात् ॥ एतदुक्तमार्यवीरदत्तपरिपृच्छायां[2] ।

बोधिचित्ताद्धि यत्पुण्य तच्च रूपि भवेद्यदि ।
आकाशधातुं सपूर्य भूयश्चोत्तरि तद्भवेत् ॥ इति ।

15 *यदि नाम सामान्येन निर्देशस्तथापि प्रस्थानचित्तस्येति*
द्रष्टव्यं । तस्यैव प्रकृतत्वात् ॥ पुनरपि तस्यैव विशेषणमाह ।
जगद्दुःखौषधस्य चेति । सर्वप्राणभृतां कायिकचैतसिकसर्व-
दुःखनिवर्तनतया सर्वव्याधिहरणमहागदस्वभावत्वात् । तदने-

---

[1] Cf. Çikṣās. 5, 20, and supra 1, 14

[2] A Vīradattaparipṛccha (prose) is quoted in Çikṣās. 34, 16. 230, 10

[3] New word = prāṇabhṛt

नाभ्युदयनिःश्रेयसहेतुत्वं बोधिचित्तस्य प्रतिपादितं॥ अतो युक्तमेवास्यासंख्येयपुण्यत्वमित्युक्तं भवति। कथं पुनरेतद्युक्तमित्याशङ्क्य प्रतिपादयन्नाह।

हिताशंसनमात्रेण बुद्धपूजा विशिष्यते।
किं पुनः सर्वसत्त्वानां सर्वसौख्यार्थमुद्यमात्[1]॥ २७ 5

सर्वजगत्परित्राणाय बुद्धो भवेयमित्यध्याशयेनाशंसनात् प्रार्थनात् केवलात्प्रतिपत्तिविकलाद्बोधिचि[13a]त्तादित्यर्थः। यत्पुण्यं भवति तद्बुद्धपूजामतिशेते। इत्यागमाद्भवत्येव पुण्यस्कन्धप्रसवहेतुः। इति प्रथमस्य बोधिचित्तस्य[2] माहात्म्यमुक्तं। एतदपि तत्रैवोक्तं। 10

गङ्गावालिकसंख्यानि बुद्धक्षेत्राणि यो नरः।
दद्यात्सद्रत्नपूर्णानि लोकनाथेभ्य एव हि॥
यश्चैकः प्राञ्जलिर्भूत्वा चित्तं बोधाय नामयेत्।
इयं विशिष्यते पूजा यस्यान्तोऽपि[3] न विद्यते॥ इति।

किं पुनः सर्वदुःखितजनानां सर्वदुःखमपनीय सर्वसुखसंपन्नान् करिष्यामीत्युद्योगकरणादतिशयवत्पुण्यं न भवति॥ 15

ननु हिताहितप्राप्तिपरिहारयोः स्वयमेव सत्त्वा विचक्षणाः। तत्कुतोऽयमस्योपयोग इति वृत्तत्रितयेन परिहरन्नाह।

---

[1] Tipp has udyamāt prasthānacetasaḥ.
[2] Cf. Mhv I, 80, 1
[3] Sic Ms

दुःखमेवाभिधावन्ति दुःखनिःसरणाशया ।
सुखेच्छयैव संमोहात् स्वसुखं घ्नन्ति शत्रुवत् ॥ २८
यस्तेषां सुखरङ्काणां पीडितानामनेकशः ।
तृप्तिं सर्वसुखैः कुर्यात्सर्वाः पीडाश्छिनत्ति च ॥ २९
5 नाशयत्यपि संमोहं साधुस्तेन समः कुतः ।
कुतो वा तादृशं मित्रं पुण्यं वा तादृशं कुतः ॥ ३०

दुःखान्निःसरणाभिप्रायाः प्राणातिपातादिभिरकुशलैः कर्मभिः क्षुधादिदुःखप्रतीकारमिच्छन्तः । दुःखमेव नरकादिप्रपातवेदनास्वभावं । अभिधावन्ति तदभिमुखाः प्रवर्तन्ते । दुःखमेव प्रवि-
10 शन्तीत्यर्थः । शलभा इव दीपशिखामिति ॥ अत एव सुखेच्छयैव सुखाभिलाषेणैव स्वसुखं घ्नन्ति शत्रुवत् । आत्मसुखघाताय कथमात्मनैव शत्रवो भवन्ति । इति चेत् । समोहाद्विपर्यासवशात् हिताहितप्राप्तिपरिहारयोः परिज्ञानाभावात् ॥

अतो यः पुण्यात्माऽकारणवत्सलः । तेषां विपर्यस्तानां
15 सुखरङ्काणां सुखाभिलाषुकाणां सर्वशोऽलब्धसुखानां पीडितानां दुःखितानां । अनेकश इति । अनेकैर्दुःखशतैर्बहुधा बाधितानां । तृप्तिमाप्यायन सर्वसुखैः कुर्यात् [13b] कायिकचैतसिकैः । यदि वा । अनेकशोऽनेकप्रकारं तृप्तिं सर्वसुखैः कुर्यात् । इति योजनीयं ॥ न सुखतृप्तिमात्रं जनयति । किं तर्हि सर्वाः पीडाः
20 समस्ता दुःखा वेदनाश्छिनत्ति च शमयति च ॥

न केवलं दुःखप्रशान्तिं सुखतृप्तिं च करोति । नाशयत्यपि समोहं । अपरिज्ञानमपि निवर्तयति ।

अपथमिदमेष पन्था भयमत इत एत गात[1] मासादं ।
इति हेयोपादेयमार्गप्रकाशनात् ॥ यश्चैवं परव्यसननिवर्तनपरतन्त्रो
हितसुखविधानतत्परश्च सर्वभूतानां । साधुस्तेन समः कुतः ।
तेन महात्मना तुल्यः साधुः कुतः । नैव कुतश्चिद्विद्यते ।
अकारणपरमवत्सलस्वभावत्वात् । कुतो वा तादृशं मित्रं । 5
हितसुखोपसंहारप्रवणमानसं परमविश्वासस्थानं तादृशं तत्समं ।
सुहृत्कुतो नैव संभवति । पुण्यं वा तादृशं कुतः । एवं विहरतो
बोधिसत्त्वस्य यत्पुण्यमुपजायते तदपि न केन चित्पुण्येन समानं ॥

कृते यः प्रतिकुर्वीत सोऽपि तावत्प्रशस्यते ।
अव्यापारितसाधुस्तु बोधिसत्त्वः किमुच्यतां ॥ ३१ 10

पूर्वं भयसंकटव्यसनेषूपकृतमनेन । इत्युपकृते सति प्रत्युपकारं
करोति यः । सोऽपि तावत्प्रशस्यते । लोकेन स्तूयते साधुरय-
मिति । यः पुनरव्यापारितसाधुः । अनभ्यर्थितकल्याणोपनेता
बोधिसत्त्वः किमुच्यतां । किमपरमभिधीयतां । तस्य प्रशंसा
कर्तुमशक्येत्यर्थः[2] ॥ 15

दृष्टव्यवहारमपेक्ष्यापि[3] बोधिसत्त्वस्य पुण्यमाहात्म्यमुद्भाव-
यन्नाह ।

कतिपयजनसत्त्रदायकः
कुशलकृदित्यभिपूज्यते जनैः ।

---

[1] Metre āryā—gā clearly, ta, sec. manu.—Tib. kuta māsādam = sgyid lug par ni mi byed cig.—āsada is new with this meaning.

[2] Tipp. has kim ucyatam kim tasya māhātmyam ucyatām avāggocaratvāt.

[3] Confirmed by Tib.—Ms. apekṣyamapi.

स्रुणमशनकमात्रदानतः
सपरिभवं दिवसार्धयापनात् ॥ ३२

5 प[रि]मितसत्त्वानामाहारपानमात्रदानसमादानमादिशन्[1] पुण्यकर्मायमिति पूज्यते [14a] सत्क्रियते जनैः सत्कर्मरतैर्लोके । तदपि दानं क्षणं न सकलमहः । तदर्धं वा । अपि तु मुहूर्तमेकं । अशनकमात्रदानत इति । कुत्सितमशनमशनकं[2] । अप्रणीतं भोजनं । तदेव केवलं तन्मात्रं[3] । तथाविधव्यञ्जनरहितं[4] ।
10 तस्य दानतः त्यागतः । कथं सपरिभवं । क्रियाविशेषणमेतत् । सतिरस्कारं नमस्कार[ा]पुरःसरं हठात्सत्त्वागारं प्रविशतः खटचपेटादिना प्रहृत्येति यावत् । पुनः किंभूतात् । दिवसार्धयापनात् । प्रहरद्वयोपस्तम्भनात् । मध्याह्ने भुक्त्वा सायं पुनराहारान्वेषणात्[5] ॥

15 बोधिसत्त्वस्य पुनरेतद्विपरीतं दानं । इति प्रतिपादयन्नाह ।

किमु निरवधिसत्त्वसंख्यया
निरवधिकालमनुप्रयच्छतः ।
गगनजनपरिक्षयाक्षयं
सकलमनोरथसंप्रपूरणं ॥ ३३

---

[1] Ms °mātram samānadānatodiśan, na is erased —samādāna = nityakarman (Hem), Cf SENART, Mhv III, 131, 13

[2] This word is new

[3] Tipp has mātrena vastrādidānavyavacchedah

[4] Old reading tathāvidham

[5] Tipp has tena ca prakarsena divasārdham yāpyate / madhyāhne … . karane cāyam lyut (Pan 3, 3, 117)

न विद्यतेऽवधिरियत्ता । इयद्भ्यः शतसहस्रलक्षकोटिसंख्येभ्यो दास्यामि ततः परं नेति । न सत्त्वानां गणनया ददाति । किं तु निरवधिसत्त्वसंख्यया ॥ नापि नियतकालं । अपि तु निर- 5
वधिकालं । कल्पशतसहस्रलक्षकोटिशत यावद्दास्यामि ततः परं नेति सावधिकं न ददाति ॥ गगनेति । गगनमिव जनाः । गगनजनाः । यथाकाशमपर्यन्त तथा जनोऽपीत्यर्थः । यदि वा गगनं च जनाश्च ते गगनजनाः । तेषां परिक्षयः पर्यवदानं । यावदाकाशधातुर्यावच्च सत्त्वा न परिनिर्वृताः तावदवधिकं । 10
यदक्ष्यति ।

आकाशस्य स्थितिर्यावद्यावच्च जगतः स्थितिः । इति ।

तावन्मम स्थितिर्भूयात्[1] ।

तस्मादक्षयं । न विद्यते क्षयः पर्यन्तोऽस्येति कृत्वा । अय-
मभिप्रायः । ग[14ᵃ]गनजनपरिक्षयावधि यद्दानं तद्वस्तुतोऽक्षय- 15
मेव । तेषां परिक्षयाभावात् ॥ नापि प्रतिनियत वस्तु । अपि तु सकलमनोरथसम्प्रपूरणं । यद्यस्याभिमतं तत्सर्वमनवद्यमभि-प्रायाह्लादनकरं परमप्रेमगौरवसत्कारप्रियवचनपुरःसर प्रमुदित-मनसानुप्रयच्छतो बोधिसत्त्वस्य किं पुनः पूजा न युज्यते । तस्य सुतरां युज्यत इति योज्य । 20

यदुक्तं नारायणपरिपृच्छायां[2] । न तद्वस्तूपादातव्यं यस्मिन् वस्तुनि नास्य त्यागचित्तमुत्पद्येत[3] । न त्यागबुद्धिः क्रमेत ।

---

[1] *Cf infra* X, 55 [2] Cf *Çikshâs*, 21, 1-6 12, and *infra ad* III, 21.

[3] Çikṣas has 'pidyate.

यावत् । अयं ममात्मभावः सर्वसत्त्वेभ्य उत्सृष्टः परित्यक्तः । प्रागेव बाह्यानि वस्तूनि । यस्य यस्य सत्त्वस्य येन येन यद्यत्कार्यं भविष्यति तस्मै तस्मै तत्तद्दास्यामि । सत्संविद्यमानं हस्तं हस्तार्थिकेभ्यो दास्यामि । यावत् । शिरः शिरोर्थिकेभ्यः परित्यक्ष्यामि । कः पुनर्वादो बाह्येषु वस्तुषु । यदुत धनधान्यजातरूपरजतरत्नाभरणहयरथ[1]गजवाहनग्रामनगरनिगमजनपदराज्यराष्ट्रराजधानीपत्तनदासीदासकर्मकरपौरुषेयपुत्रदुहितृपरिवारेष्विति विस्तरः ॥

एवं च गुणरत्नसमुच्चयस्थाने परहितसुखविधानैकपरममहाव्रते बोधिसत्त्वे स्वात्महितकामैः स्वचित्तं रक्षितव्यं प्रयत्नतः[2] । इत्युपदर्शयन्नाह ।

इति सत्त्वपतौ जिनस्य पुत्रे
कलुषं स्वे हृदये करोति यश्च ।
कलुषोदयसंख्यया स कल्पान्
नरकेष्ववसतीति नाथ आह ॥ ३४

इत्येवमुक्तक्रमेण सत्त्वपतौ सर्वदा सुखदानपतौ जिनस्य पुत्रे सुगतस्य सुते । बोधिसत्त्व इत्यर्थः । कलुषं पापचित्तं स्वे हृदये आत्मचित्तसंताने करोत्युत्पादयति दुरात्मा यः स नरकेष्वावसति । इति नाथो बुद्धो भगवानाह ब्रूते ॥ उपाल्यध्याहृतस

---

1 Ibidem °rathah ry °

2 Tipp has evambhūte bodhisattve parārthaikarase prasādāprasādau sukhaduḥkhaheta iti yatnataḥ svikartavyāparihartavyau iti darçayati

इति कर्मत्वे प्राप्तेऽधिकरण[15a]विवक्षा[1] ॥ कियद्यावत् कलुषो-
दयसंख्यया कल्पान् । यावतः क्षणांस्तत्संताने[2] कलुषचित्तमुत्प-
द्यते । तावतः कल्पान् कलुषचित्तक्षणसंख्यान्नरकेषु तिष्ठति ।
इति भावः ।

यदुक्तं प्रशान्तविनिश्चयप्रातिहार्यसूत्रे[3] । यावन्ति मञ्जुश्री- 5
र्बोधिसत्त्वो बोधिसत्त्वस्य[ान्तिके] प्रतिघचित्तान्युत्पादयति ।
अवमन्यनाचित्तानि [वा] । तावतः कल्पांस्तेन[4] सनाहः संन-
द्धव्यः । वस्तव्यं मया[5] महानरकेष्विति ॥

ननु तथागतस्य दुष्टचित्तेन रुधिरमुत्पादयतो नावीचौ
चित्तोत्पादनक्षणसंख्यया कल्पानवस्थितिरुक्ता । न तथागतात्कश्चि- 10
दधिकतरः संभवति त्रैलोक्ये । तत्कथमिदमतिदुर्घटं नीयते ॥
सत्यं । न खलु यथाभूतमस्मिन्नये वस्तुतत्त्वव्यवस्था । सर्वस्य
प्रवचनस्य नयनीतार्थतया व्यवस्थापनात् । न हि कश्चित्तथागते
सदेवकोऽपि लोको दुष्टचित्तमुत्पादयितुं क्षमते । अनल्पकल्प-
संख्ययाभ्यासेन सर्वसत्त्वेषु मैत्रचित्तस्य सात्मीभावात् । नास्य 15
काये शस्त्रं क्रमतीति मैत्रचित्तस्यानुशंसकथनात् । न च
कर्मप्लुतिरिह[6] वस्तुतो दर्शिता । कर्मावरणस्य बुद्धानां प्रहीण-
त्वात् । तस्माद्वैनेयजनाभिसंधिना तदुपदर्शितं । न परमार्थतः ॥

बोधिसत्त्वापकारे तु बुद्धत्वमेव समूलोपघातमुपहतं भवेत् ।

---

[1] Pan 1, 4, 48 —This clause deest in Tib [2] Ms. ksanah / tat°

[3] *Cf* Çiksās , 85, 13 [4] Çiksās omits "tena", but see Tib.

[5] Ms has °tavyam tathā , old reading and Tib ° tavyam mayā

[6] Tib las kyi nam par smin-pa (= °avarana)—*Cf.* Karmaploti, in *Div. Av*

तथा च सदेवकस्य लोकस्यार्थ उपहतो भवेत्[1] । यथागममिदमुक्तं । परमार्थमिह भगवानेव जानाति[2] । इदमुक्तं च श्रद्धाबलाधानावतारमुद्रासूत्रे[3] । यः कश्चिन्मञ्जुश्रीः कुलपुत्रो वा कुलदुहिता वा गङ्गानदीवालुकासमान्[4] स्तूपान् [वि]निपात-
5 येद्दहेद्वा[5] । यश्चान्यः कुलपुत्रो वा कुलदुहि[15b]ता वा महायानाधिमुक्तस्य बोधिसत्त्वस्य महासत्त्वस्य व्यापादखिलक्रोधचित्तमुत्पाद्याक्रोशयेत्[6] परिभाषयेत् । अयं ततोऽसङ्ख्येयतरं पापं प्रविशति । तत्कस्माद्धेतोः । बोधिसत्त्वनिर्जाता[7] हि बुद्धा भगवन्तो । बुद्धनिर्जाताश्च स्तूपाः सर्वसुखोपधानानि च सर्वदेव-
10 निकायाश्च । बोधिसत्त्वमसत्कृत्य सर्वबुद्धा असत्कृता भवन्ति । बोधिसत्त्व सत्कृत्य सर्वबुद्धा सत्कृता भवन्तीत्यादि ॥

यस्य पुनस्तत्र प्रसन्न चित्तमुत्पद्यते । तस्य कियत्पुण्यफलमुपजायते । इत्याह ।

अथ यस्य मनः प्रसादमेति
15 **प्रसवेत्तस्य ततोऽधिकं फलं ।**
महता हि बलेन पापकर्म
जिनपुत्रेषु शुभं त्वयत्नतः[8] ॥ ३५

---

1 Cf *infra* IV, 5

2 Cf *infra ad* I, 36, and V, 6
The theory seems not very consistent— *Cf* VI, 106

3 *Cf* Çikṣās 86, 6 ff

4 Çikṣās has °vālukā°.

5 *Ibidem* daheta vā

6 *Ibidem* utpādya k°

7 *Ibidem* niryāta—Tib has bkhruns pa, and *infra* hbyunba

8 Minaev has wrongly "çubhatvam yatnataḥ,—All Mss except L, have balena pāpakam (unmetrical)

यस्य पुनः पुण्यात्मनो मनः प्रसादमुपयाति बोधिसत्त्वे । प्रसवेत्तस्य ततोऽधिकं फलं । तस्य प्रसन्नचित्तस्य प्रसवेदुपजायेत । ततोऽधिकं (फलं)[1] तस्मात्पूर्वकपापफलाद्बहुतरं पुण्यकर्मफलं विपाकविशेषात्[2] । प्रसवेदुत्पद्येत ॥ यदि वा । तत्समधिक-विपाकफलाधायकं कर्मैव फलमुच्यते । अधिकतरफलजनकं कर्मोपजायत इति यावत् ।

उक्तं च नियतानियतावतारमुद्रासूत्रे[3] । सचेन्मञ्जुश्रीर्दशसु दिक्षु सर्वलोकधातुषु सर्वसत्त्वा उत्पाटिताक्षा भवेयुः परिकल्प-मुपादाय । अथ कश्चिदेव कुलपुत्रो वा कुलदुहिता वा तेषां सर्वसत्त्वानां मैत्रचित्तस्तान्यक्षीणि जनयेत् परिकल्पमुपादाय । योऽन्यो वा[4] मञ्जुश्रीः कुलपुत्रो वा कुलदुहिता वा महाया-नाधिमुक्तं बोधिसत्त्वं प्रसन्नचित्तः पश्येत् । अयं ततो ऽसंख्येयतरं पुण्यं प्रसवतीति ॥ तस्मादस्मिन्महति पुण्यक्षेत्रे शुभचित्तमेव करणीयमात्मज्ञैः[5] ।

अपि च । इतोऽपि शुभचित्तमेव कर्तुमुचितं । य[16a]स्मान्महता बलेन परमकृच्छ्रेण पापकं । पापमेव पापकं । कुत्सितत्वाद्वा । दुःकृतं कर्म । बोधिसत्त्वेषु क्रियते । तेषां सकलकायवाङ्मनःप्रचारस्य[6] प्रसादजनकत्वात् । बोधिचित्तप्रभा-वाच्च न बोधिसत्त्वेषु कस्य चिदपकारचित्तमुत्पद्यते ।

---

[1] Deest in Tib

[2] New reading viçeṣam —Tib puṇyavipākaphalaviçeṣa

[3] Cf Çikṣās 87, 16-18 (7 1).

[4] Çikṣās yo vānyo

[5] Âtmajña, Cf Kern (Jacobi) I, 522 —Tib. mkhas pa

[6] Ms. pracārasvāpli

एतदुक्तमार्यमञ्जुश्रीविमोक्षे । तद्यथा कुलपुत्र चिन्तामणि-
रत्नराजमुकुट[ाव]बद्धानां महानागराज्ञां नास्ति परोपक्रमभयं।
एवमेव बोधिचित्तमहाकरुणाचिन्तामणिरत्नराजमुकुटावबद्धानां
बोधिसत्त्वानां नास्ति दुर्गत्यपायपरोपक्रमभयमिति[1] ॥

5 अतः किमर्थमनर्थोपार्जनं कटुकफलं तेषु प्रयत्नतः प्रार-
भ्यते ॥ अत एव शुभ लयत्नतः । संग्रहवस्त्वादिभिः सर्वसत्त्व-
हितसुखकर्मकारित्वात् परिशुद्धकर्मकारितया । क्वचिदपि
स्खलिताभावाच्च । अप्रयत्नत एव प्रीतिप्रसादप्रामोद्यमुपजायते
तेषु । अतः कुशलं पुनरयत्नत एव प्रसूयते ॥

10 सांप्रतमुत्पादितबोधिचित्तेष्वतिशयवतात्मना[2] मनःप्रसाद-
माविष्कुर्वन् शास्त्रकारस्तान्नमस्यन्नाह ।

तेषां शरीराणि नमस्करोमि
यत्रोदितं तद्वरचित्तरत्नं ।
यत्रापकारोऽपि सुखानुबन्धी
15 सुखाकरांस्तां शरणं प्रयामि ॥ ३६

तेषां पुरुषकुञ्जराणां शरीराणि आत्मभावान् नमस्करोमि
प्रणिपत्य वन्दे । यत्र येषु[3] सतानेषु उदितमुत्पन्नं तदुक्तानुशंस
वरचित्तरत्नं । चित्तमेव रत्नं चिन्तामणिसदृशं । वर श्रेष्ठ सर्व-
दारिद्र्यदुःखापहारित्वात् । तच्च तद्वरचित्तरत्नं चेति विग्रहः ।
20 तदिति भिन्न वा । इय चाधिकगुणाधारस्य[4] सप्तमी ॥

---

[1] Hitherto not found in the Çikṣā — [2] Tib bdag ñyid-gyis çin tu yan
[3] Ex conj yeṣām —Tib de rnams Kyi [4] Ex conj —Ms ṇyañcādbiyaguṇa?.

अपरमपि तद्विशेषणमाह । यत्रापकारोऽपीति । येषु परम-
कल्याणहृदयेषु बोधिसत्त्वेषु । अपकारोऽपि पराभवोऽपि [16b]
कृतः । तत्कर्तुः सुखानुबन्धी परंपरया सुखमावहतीति ॥
अयमभिप्रायः । तत्रापकारः[1] कर्तुमशक्यः । संभवे वा कथं
चित्तदपकारमेव निमित्तं कृत्वा प्रवृत्तानां दुष्टाभिप्रायाणां 5
पुनः केन चिन्निमित्तेन तत्प्रसादसमुत्पादनात् । तत्रापकारो
निर्वाणे[2] सुखमनुबध्नाति । तद्यथा मैत्रीबलजातके[3] पञ्चका
नधिकृत्योक्तं । बोधिसत्त्वप्रणिधानाद्वा अपकारोऽपि सुखानु-
बन्धीत्युच्यते । यद्वक्ष्यति ।

अभ्याख्यास्यन्ति मां ये च ये चान्येऽप्यपकारिणः । 10
तत्प्रकाशकास्तथान्ये वा सर्वे स्युर्बोधिभागिनः ॥ इति[4] ।

अथ वा । यत्रापकारोऽपि येषामपकारोऽपि महाकरुणा-
ध्याशयात्प्रियपुत्रेण कृत इव दुःखहेतुरपि सुखमेव जनयति ।
यथा क्षान्तिपरिच्छेदे कथयिष्यामः[5] ॥ एवं सर्वथा सर्वसुख-
हेतुत्वात् सुखार्थिनां रत्नाकर इव रत्नार्थिनामाश्रयणीया 15
बोधिसत्त्वा इत्युपदर्शयति । सुखाकरांस्तां शरणं प्रयामि ।
सुखस्याकराः । सर्वसुखैकप्रभवत्वात् । तानुक्तक्रमेणापकारेऽपि
सुखहेतून् । शरणं प्रयामि । ते मम त्राणं भवन्त्विति भावः ॥

॥ प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां बोधि-
चित्तानुशंसाविवरणं प्रथमः परिच्छेदः[6] ॥ 20

---

1 Ms tatrāpakāran
2 According to Tib nirvāṇa?.
3 Cf *Jatakamala*, 51, 19.
4 *Infra* III, 16
5 Cf VI, 106, 107
6 Tipp has bodhicittānuçaṃsāparicchedaḥ smṛtiḥ

प्रज्ञाकरमतिकृता बोधिचर्यावतारपञ्जिकायां

द्वितीयः परिच्छेदः ।

सांप्रतमेवं क्षणसंपत्समागमं दुर्लभमधिगम्य विदितबोधिचित्तानुशंसः । बोधिचित्तग्रहणार्थं बुद्धबोधिसत्त्वानामुखीकृत्य वन्दनपूजनशरणगमनपापदेशनापुण्यानुमोदनबुद्धाध्येषणयाच-[17a] नाबोधिपरिणामनां[1] च कुर्वन्नाह ।

5 तच्चित्तरत्नग्रहणाय सम्यक्
पूजां करोम्येष तथागतानां ।
सद्धर्मरत्नस्य च निर्मलस्य
बुद्धात्मजानां च गुणोदधीनां ॥ १

तस्य समनन्तरप्रतिपादितानुशंसस्य चित्तरत्नस्य ग्रहणाय 10 स्वीकाराय । तदुत्पादयितुमित्यर्थः । तथागतानां बुद्धानां भगवतां पूजां करोमि । एषोऽहमिति बोधिचित्तग्राहकोऽयमात्मानं निर्दिशति । अयं बुद्धरत्नस्य निर्देशः ॥ सद्धर्मरत्नस्य चेति । आगमाधिगमलक्षणस्य । निर्मलस्येति । त्रिकल्याणतया

---

1 Cf Çiksās 13, 12, where occur the same readings °anumodana, °adhyesana, but yācana, °pariṇāmana—The text is of course incorrect, on these topics, of a capital importance in the Bodhisattva-ship, see, Ed CHAVANNES, Revue des Religions, XXXVI, 1, (from Chinese sources), *Dharmasaṃgraha*, XIV (The Bodhic is quoted by the Comm), and my "*Etudes et Materiaux*," pp 106, 226

त्रिकोटिशुद्धस्य प्रकृतिप्रभास्वरस्य च । सर्वदा सर्वमलानाम-
स्थानत्वात् । क्लेशानामागन्तुकत्वात् । समस्तमलापहरणपटुत्वाच्च ।
अयं च धर्मरत्नस्य निर्देशः ॥ तदात्मजानां च । बुद्धसुतानां ।
गुणोदधीनां गुणरत्नसमुद्राणां । आर्यावलोकितेश्वरमञ्जुघोष-
प्रभृतीनां । अयं तु संघरत्नस्य निर्देश ॥ इत्यादौ रत्नत्रयपूजा- 5
विधि. । पूजां करोमीति सर्वत्र सबन्धनीयं ॥ सम्यगिति ।
पूजाया एव विशेषणं । सम्यगविपरीतं यथा भवति । तीव्र-
चित्तप्रसादेन वा । ग्रहणस्य वा विशेषणं । सम्यग्ग्रहणाय ।
अतिशयप्रसन्नचित्तेन न परानुरोधादिना । यथा गृहीतं न
पुनर्भ्रंश्यति । इति ॥ पूजामेव कथयन्नाह । 10

यावन्ति पुष्पाणि फलानि चैव
भैषज्यजातानि च यानि सन्ति ।
रत्नानि यावन्ति च सन्ति लोके
जलानि च स्वच्छमनोरमाणि ॥ २

यत्परिमाणमेषामिति । यावन्ति निरवशेषानि पुष्पाणि 15
फलानि चैव । आकाशधातुप्रसरावधीनि सर्वाण्यपीमान्यपरि-
ग्रहाणि । आदाय बुद्ध्या मुनिपुंगवेभ्यो निर्यातयाम्येष सपुत्रकेभ्य
इति सर्वत्र पूर्वेषु योजनीय[1] । भैषज्यजातानि औष[17b]धप्र-
काराः । स्वच्छमनोरमाणीति रत्नानामपि विशेषणं ।

---

[1] Cf. *infra* Stanzas 5b and 6a.

महीधरा रत्नमयास्तथान्ये
वनप्रदेशाश्च विवेकरम्याः।
लताः सुपुष्पाभरणोज्ज्वलाश्च
द्रुमाश्च ये सत्फलनम्रशाखाः॥ ३

5 देवादिलोकेषु च गन्धधूपाः
कल्पद्रुमा रत्नमयाश्च वृक्षाः।
सरांसि चाम्भोरुहभूषणानि
हंसस्वनात्यन्तमनोहराणि॥ ४

महीधराः पर्वताः। रत्नमया रत्नस्वभावाः। विवेकरम्या
10 इति विवेकोपरम्या मनोहरा विवेकानुकूला इति यावत्।
सुपुष्पाभरणोज्ज्वलाश्चेति शोभनपुष्पाण्येवाभरणानि[1] मण्डनानि।
तैरुज्ज्वला अतिभ्राजिष्णवः। सत्फलनम्रशाखा इति। सन्ति च
शोभनानि वर्णगन्धरससम्पन्नानि। तानि फलानि चेति। तैर्नम्रा
अवनता भूमिलग्ना इव शाखा येषां ते कल्पद्रुमाः कल्पवृक्षाः।
15 अम्भोरुहभूषणानि। अम्भोरुहाणि पद्मान्येव भूषणानि येषां
तानि तथा। हंसस्वनात्यन्तमनोहराणि। हंसानां स्वनैः रुतैर-
त्यन्तमनोहराणि रमणीयानि। तानि तथा।

अकृष्टजातानि च शस्यजाता-
न्यन्यानि वा पूज्यविभूषणानि।

---

1 Ms puṣpāny .

आकाशधातुप्रसरावधीनि
सर्वाण्यपीमान्यपरिग्रहाणि ॥ ५

अकृष्टान्येव हलविलेखनमन्तरेणैव जातानि प्रादुर्भूतानि। शस्यजातानि व्रीहिविशेषाः। अन्यानि वा पूज्यविभूषणानि। पूज्यानामाराध्यानां विभूषणानि शोभाकराणि। अन्यान्यपराणि। 5 आकाशधातुप्रसरावधीनि। आकाशधातोः प्रसरोऽवकाशः। विस्तारो वा। तावदवधीनि तत्पर्यन्तानि। सर्वाण्यपीमानि। उक्तान्युक्तसदृशानि। अपरिग्रहाणि। अममानि। न केन चित्स्वीकृतानीत्यर्थः।

आदाय बुद्ध्या मुनिपुंगवेभ्यो 10
निर्यातयाम्येष सपुत्रकेभ्यः।
गृह्णन्तु तन्मे वरदक्षिणीया
महाकृपा मामनुकम्पमानाः ॥ ६

आदाय बुद्ध्या गृहीत्वा मनोविज्ञानेन[1]। मुनिपुंगवेभ्यो मुनिवृषभेभ्यो निर्यातयामि प्रयच्छामि। सपुत्रकेभ्यः सबोधि- 15 सत्त्वगणेभ्यः। गृह्णन्तु तन्मे स्वीकुर्वन्तु तदेतत्सर्वं मम पूजोपहार-वस्तु। वरदक्षिणीया अनुत्तरदक्षिणापात्राणि बुद्धबोधिसत्त्वाः। महाकृपाः सर्वस[18a]त्त्वहितसुखविधानैकमनसः। मां दीन-दुःखितसत्त्वमनुकम्पमानाः करुणायमानाः। ममानुग्रहायेति

---

[1] Tib. has only yid kyis

यावत् ॥ स्यादेतत् । किं पुनरेवं मनोमयपूजामात्रं विधीयते । यावता तत्तद्वस्तु मनोहरं साक्षादेव कस्मान्नोपनीयत इत्याशङ्क्याह ।

अपुण्यवानस्मि महादरिद्रः
5 पूजार्थमन्यन्मम नास्ति किं चित् ।
अतो ममार्थाय परार्थचित्ता
गृह्णन्तु नाथा इदमात्मशक्त्या ॥ ७

अकृतपुण्योऽस्मि । अत एव महादरिद्रः । पुण्ये सर्वोपकरणसंपत्तिर्भवति । तदभावात् पूजार्थमन्यदुपकरणं मम नास्ति 10 किं चित् । अतो ममार्थाय मम पुण्यकामतया भगवन्तश्च परार्थचित्ताः परहितसुखाभिलाषिणो महाकारुणिकत्वात् । अतो गृह्णन्तु नाथा इदमुक्तं पूजोपकरणं मया निर्यातितं । आत्मशक्त्येति स्वसामर्थ्येन ।

अयं पुनरात्मभावो ममायत्तोऽस्ति । तं निर्यातयामीत्याह ।

15 ददामि चात्मानमहं जिनेभ्यः
सर्वेण सर्वं च तदात्मजेभ्यः ।
परिग्रहं मे कुरुताग्रसत्त्वाः
युष्मासु दासत्वमुपैमि भक्त्या ॥ ८

आत्मानं च प्रयच्छामि जिनेभ्यः । सर्वेण सर्वं च सर्वप्रका- 20 रेण । आत्मस्वीकारं परित्यज्य । तदात्मजेभ्योऽपि ॥ मां प्रति-

गृह्णीत नरर्षभाः । युष्मासु दासत्वं दासभावं स्वीकरोमि । न जीविकादिलोभात् । अपि तु भक्त्या परमगौरवेण । श्रद्धान्वितेन चेतसेत्यर्थः ।

ननु कः पुनरत्र गुणोऽस्तीत्याह ।

परिग्रहेणास्मि भवत्कृतेन 5
निर्भीर्भवे सत्त्वहितं करोमि ।
पूर्वं च पापं समतिक्रमामि
नान्यच्च पापं प्रकरोमि भूयः ॥ ९

भवत्कृतेन युष्मदीयेन महदाश्रयेण विगतभयः संसारे लोकानां हितमर्थं सम्पादयामि । महदाश्रयेऽपि नाकुशल- 10
कर्मावृतस्य स्वहितकरणेऽपि सामर्थ्यमस्तीत्याह । पूर्वं चेत्यादि ।
पूर्वमपरिज्ञानात्कृतमकुशलकर्म समतिक्रमामि । विदूषणासमुदाचारादिभिर्निर्हरामि[1] । समतिक्रामतीत्युक्ते समतिक्रमामीत्युक्तं [2]शाब्दव्यवहारेष्वनादरात् । अर्थप्रतिसरणता[18a]
धा[तु]प्रधानत्वाच्च[3] । अपरं च पापं न पुनः करोमि । आयत्यां 15
पुनरकरणसंवरं विदधे ।

इति सर्वमात्मनिर्यातनाप्रभृतिपूजोपहारं निर्यात्य पुनर्विशेषेण पूजां[4] विधातुमाह ।

---

1 Cf. Çikṣās. 160, 3 and foll.

2 Çābda = çābdika = lexicograph, grammarian.

3 After "dhā" an illegible syllable written in margin. Deest gramm., expl. in Tib. The expression arthapratiçaraṇatā occurs in *Lalit. Vist.* p. 36, 7. cf. KERN, (JACOBI) I, 523.

4 *Cf. Svayambhūp.*, Bibl. Ind., pp. 74 and foll.

रत्नोज्ज्वलस्तम्भमनोरमेषु
मुक्तामयोद्भासिवितानकेषु।
स्वच्छोज्ज्वलस्फाटिककुट्टिमेषु
सुगन्धिषु स्नानगृहेषु तेषु॥ १०

रत्नैरिन्द्रनीलादिभिरुज्ज्वला: प्रभास्वरा ये स्तम्भा: तैर्मनोहरा: कमनीया:। तेषु स्नानगृहेषु स्नानं करोमीति योज्यं। पुन: किम्भूतेषु। मुक्तामया[1] मौक्तिकरचनाखचिता उद्भासिन उद्भास्वरा वितानां एव वितानका: येषु। ते तथा। तेषु। स्वच्छा: सुनिर्मला। उज्ज्वला दीप्तिमन्त:। स्फटिकस्येमे स्फाटिका:। कुट्टिमा: भूमिरचनाविशेषा येषु तेषु सुगन्धिषु। कृष्णागुरुचन्दनादिधूपितवासितेषु। स्नानाय गृहा:। तेषु।

मनोज्ञगन्धोदकपुष्पपूर्णै:
कुम्भैर्महारत्नमयैरनेकै:।
स्नानं करोम्येष तथागतानां
तदात्मजानां च सगीतवाद्यं॥ ११

उदकं च पुष्पाणि च मनोज्ञगन्धानि च तानि। तै: पूर्णा: कुम्भा घटास्तै:। महारत्नमयै:। महान्ति वैदूर्याणि च रत्नानि च तानि तत्स्वभावै:। अनेकै: शतसहस्रकोटिभि:। सगीतवाद्यं सह मनोहरगीतनृत्तमुरजादिवाद्यै:।

प्रधूपितैर्धौतमलैरतुल्यै-
र्वस्त्रैश्च तेषां तनुमुन्मृषामि[2]।

---

[1] MS muktāmanyā

[2] M alone has the correct reading unmrjami —unmrçāmi ?

ततः सुरक्तानि सुधूपितानि
ददामि तेभ्यो वरचीवराणि ॥ १२

प्रधूपितैरगुरुप्रभृतिधूपैः। धौतमलैः प्रक्षालितकल्मषैर्निर्मलैरित्यर्थः। अतुल्यैरप्रतिसमैः। वस्त्रैर्दुकूलैः। तेषां तथागतानां तदात्मजानां च। तनु शरीरं। उन्मृषामि संमार्जयामि ॥ ततस्तस्मादुन्मर्षणानन्तरं। सुरक्तानि शोभनरागैः सुष्ठु वा रक्तानि। शोभनधूपेन धूपितानि। ददामि तेभ्यो जिनेभ्यः। वरचीवराणि। अनुत्तराण्याच्छादनानि[1]।

दिव्यैर्मृदुश्लक्ष्णविचित्रशोभै-
र्वस्त्रैरलंकारवरैश्च तैस्तैः।
समन्तभद्राजितमञ्जुघोष-
लोकेश्वरादीनपि मण्डयामि ॥ १३

दिव्यैर्दिविभवैर्देवार्हैः। मृदूनि च सुकुमारस्पर्शानि श्ल[19a]क्ष्णानि च सूक्ष्माणि। विचित्रा नानावर्णकृता शोभा येषां तैर्वस्त्रैः। अलंकारवरैश्च। विभूषणप्रधानैः। तैस्तैरिति। मुकुटकटककेयूरहारनूपुरादिभिः। समन्तभद्राजितमञ्जुघोषलोकेश्वरादीनपि बोधिसत्त्वान् मण्डयामि। अलंकरोमि।

सर्वत्रिसाहस्रविसारिगन्धै-
र्गन्धोत्तमैस्ताननुलेपयामि।

[1] MS. has anuttaramācchādanāni.

सूत्तमसून्मृष्टसुधौतहेम-
प्रभोज्ज्वलान् सर्वमुनीन्द्रकायान् ॥ १४

सहस्रं चतुर्द्वीपिकानां तथा चन्द्रसूर्यमेरूणां प्रत्येकं कामदेवानां ब्रह्मलोकानां च साहस्रचूडिको मतः[1] । स एव
5 सहस्रगुणिते द्विसाहस्रः[2] । तत्सहस्र त्रिसाहस्रः[3] । शतकोटिः
चतुर्द्वीपिकानामित्यर्थः । एवं सर्वासु दिक्षु लोकधातुरनन्तोऽपर्यन्तश्च । सर्वत्रिसाहस्राणि विसृतं शीलं येषां ते तथा ।
तथाविधा गन्धाः परिमला येषां ते तथा । तैर्गन्धोत्तमैर्यच-
कर्दमहरिचन्दनादिभिः । तान्मुनीन्द्रकायाननुलेपयामि । समा-
10 लभे । किंभूतान् । सूत्तप्तं पुटपाकादिना परिशोधितान्तर्मलं
सून्मृष्टं रोषाणादिमणिसमार्जितं[4] । सुधौतं चाराम्ललवणादि-
प्रक्षालितबहिर्मलं । तथाभूतं च तद्धेमं चेति । तस्य प्रभा द्युति-
रित्यर्थः । तद्वदुज्ज्वलान् द्युतिमतः । एतच्च यथालोकप्रसिद्धितः
कथितं । न तु तथागतकायशोभाया लौकिकं किं चिदुप-
15 मानमस्ति ।

सांप्रतं माल्यपूजामुपक्षिपति ।

मान्दारवेन्दीवरमल्लिकाद्यैः
सर्वैः सुगन्धैः कुसुमैर्मनोज्ञैः ।

[1] A regular pāda—Ms has sāhasrī cūtikāmatah —Tib ston spyi-phud du hdod li The reading cūdika (d=ch=t), is confirmed by cuda=klein, gering (W K F) in M Vyut and Div (opposed to mahasāhasra)—Tib phud= cūdā—See CHILDERS, s voc culla, cūla

[2] Tib adds bar-ma cf m Vyut 153, 2

[3] Ms tatsahasram tri?—Cf SENART, Mhv. , 433, S LEFMANN, Lalita-vistara, p 208, CHILDERS, s. voc Sahassī.

[4] =rosana°

अभ्यर्चयाम्यर्च्यतमान्मुनीन्द्रान्
स्रग्भिश्च संस्थानमनोरमाभिः ॥ १५

मान्दारव देवेषु पुष्पविशेषः । इन्दीवरमुत्पलं । मल्लिका वार्षिकी । एतत्प्रमुखैः सर्वैः शोभनगन्धैः पुष्पैर्मनोहारिभिः पूज्यतमान् मुनीन्द्रान् पूजयामि । स्रग्भिश्च मालाभिश्च ग्रथन- 5
रचनाविशेषकमनीयाभिः ॥

धूपपूजामाह ।

स्फीतस्फुरद्गन्धमनोरमैश्च
तान् धूपमेघैरुपधूपयामि ।

स्फीता मांसलाः । स्फुरन्तश्च दिगन्तव्या[19b]पिनः । 10
बहलगन्धोद्गारिणो वा । तादृशा गन्धा येषां धूपमेघानां ते तथा तैः । धूपा मेघा इवाम्बरतलावलम्बिबिम्बाः । उपमितं व्याघ्रादिभिरिति समासः[1] । धूपानां वा मेघास्तैर्मेघवद्गच्छ- द्भिरित्यर्थः । तानिति मुनीन्द्रानुपधूपयामि ॥ नैवेद्यपूजामाह ।

भोज्यैश्च खाद्यैर्विविधैश्च पेयै- 15
स्तेभ्यो निवेद्यं च निवेदयामि ॥ १६

भोज्यं यन्मुखमापूर्य भुज्यते । खाद्यं यत् कवड[शः][2] छेद्य घृतपूरादि । पेयं यत्पीयत एव पानकादि । एभिर्विविधैर्नाना- प्रकारोपसंस्कृतैः । तेभ्यो मुनीन्द्रेभ्यो निवेद्यं च निवेदयामि ॥

---

1 Pān 2, 1, 56

2 Doubtful Ms kavabhacchedya —Tib kham-du bcad nas.

दीपपूजामाह ।

रत्नप्रदीपांश्च निवेदयामि
सुवर्णपद्मेषु निविष्टपङ्क्तीन् ।
गन्धोपलिप्तेषु च कुट्टिमेषु
5 किरामि पुष्पप्रकरान्[1] मनोज्ञान् ॥ १७

रत्नमयाः प्रदीपाः । तान् । निविष्टा पङ्क्तिर्माला येषां ते तथा । केति सुवर्णपद्मेषु । सापेक्षत्वेऽपि गमकत्वात्समासः[2] । गन्धोपलिप्तेषु । चन्दनकुङ्कुमादिगन्धैश्चर्चितेषु ।

प्रलम्बमुक्तामणिहारशोभान्
10 आभास्वरान्दिग्मुखमण्डनांस्तान् ।
विमानमेघान् स्तुतिगीतरम्यान्
मैत्रीमयेभ्योऽपि निवेदयामि ॥ १८

प्रलम्बैर्मुक्तामणिहारैः शोभा येषां तान् विमानमेघान विमानसमूहानालोककारिणः सर्वदिक्शोभाकरान् ।

15 सुवर्णदण्डैः कमनीयरूपैः
संसक्तमुक्तानि समुच्छ्रितानि ।
प्रधारयाम्येष महामुनीनां
रत्नातपत्राण्यतिशोभनानि ॥ १९

---

1 Sic L², M, Min has °prakā°.

2 Deest in Tib

कनकमयदण्डैः कान्तिमत्संस्थानैः। मुक्ताखचितानि रत्नमयानि छत्राणि। समुच्छ्रितानीति उद्दण्डितानि।

इदानीं पूजोपहारमुपसंहरन्नाह।

अतः परं प्रतिष्ठन्तां पूजामेघा मनोरमाः।
तूर्यसंगीतिमेघाश्च सर्वसत्त्वप्रहर्षणाः॥ २० 5

इतः प्रभृति। एते पूजामेघा[1] मया निर्यातिताः। अन्ये वा देवादिभिरुपनीताः कल्पं वा कल्पावशेषं वा प्रतिष्ठन्तां। प्रकर्षवृत्तिस्थिता भवन्तु। तूर्यसंगीतिमेघाश्च। तूर्याणि मुरजादिवाद्यानि। संगीतयः समेत्य गीतयः समुदायगीतानीत्यर्थः। अथ वा संगीतकानि नृत्तगीतवादितानि समुदितान्युच्यन्ते। 10 तेषां मेघाः। अनेकसमुदायाः। ते च सर्वसत्त्व[20a]प्रहर्षणाः। सर्वसत्त्वानां प्रमोदकारिणः। न पुनरशक्यश्रवणाः। प्रतिष्ठन्तामिति संबन्धः॥

सामान्येनाभिसंक्षिप्य सद्धर्मादिषु पूजामाह।

सर्वसद्धर्मरत्नेषु चैत्येषु प्रतिमासु च। 15
पुष्परत्नादिवर्षाश्च प्रवर्तन्तां निरन्तरं॥ २१

द्वादशाङ्गप्रवचनात्मकेषु सर्वसद्धर्मरत्नेषु। रत्नमिव रत्नं वस्तुतत्त्वालोककारित्वात्। परमनिर्वृत्तिहेतुत्वाच्च। स्तूपेषु भगवच्चैत्येषु। प्रतिमासु चेति। बुद्धबोधिसत्त्वविग्रहप्रतिकृतिषु। पुष्पवृष्टयो रत्नवृष्टयश्च। आदिशब्दाच्चन्दनचूर्णवस्त्रादिवर्षाः। निर- 20 न्तरमिति। आसंसारमनवच्छिन्नं।

---

[1] Cf Lankāv, p. 17, 7

[1]अनुत्तरपूजामतिदिशन्नाह ।

मञ्जुघोषप्रभृतयः पूजयन्ति यथा जिनान् ।
तथा तथागतान्नाथान् सपुत्रान्पूजयाम्यहं ॥ २२

मञ्जुघोषसमन्तभद्राजितलोकनाथप्रमुखा[2] दशभूमीश्वरा बो-
5 धिसत्त्वाः । यथा येनाध्याशयेन[3] तथागतान् पूजयन्ति । तथा
तेनाधिमोक्षेणाहमपि तथागतान् सह पुत्रैर्बोधिसत्त्वगणैः
पूजयामि ॥

स्तुतिपूजामाह ।

स्वराङ्गसागरैः स्तोत्रैः स्तौमि चाहं गुणोदधीन् ।
10 स्तुतिसंगीतिमेघाश्च संभवन्त्वेष्वनन्यथा ॥ २३

स्वराः सप्त गान्धारादयः । तेषामङ्गानि प्रभेदाः कामोदा-
दयः । तेषां सागरवदतिबाहुल्यात् सागराः । तैः स्तोत्रैः ।
स्तुतय एव संगीतयः । स्तुतीनां वा संगीतयः समुदायाः ।
तासां मेघाः संभवन्तु । उपतिष्ठन्तां । एषु बुद्धबोधिसत्त्वेषु ।
15 अविपरीता यथा मयोपकल्पितास्तथैवेत्यर्थः ॥

बुद्धधर्मसघरत्नेषु प्रणामपूजामाह ।

सर्वक्षेत्राणुसंख्यैश्च प्रणामैः प्रणमाम्यहं[4] ।
सर्वत्र्यध्वगतान् बुद्धान् सहधर्मगणोत्तमान् ॥ २४

---

1 Cf. Dharmasaṃgraha, XIV

2 Cf. supra, p. 51, 12, lokeçvara—See Dh. S., XII

3 adhyāçaya, Cf. SENART, Mhv. I. 136

4 Here begins the classical formula of vandana, cf. Dh. S., XIV (saptavidhānuttarapūjā)

यावन्ति दशसु दिक्षु बुद्धक्षेत्राणि[1] । तेषु यावन्तोऽणव: । तत्संख्यै: प्रणामै: । सर्वत्र्यध्वगतानिति । अतीतप्रत्युत्पन्नानागतान् तथागतान् । किंभूतान् । सहधर्मगणोत्तमान् । गणानामुत्तमो ऽग्रभूतो बोधिसत्त्वगण: । धर्मश्च गणोत्तम[20b]श्च ताभ्यां सह ॥

तथागतस्तूपेषु प्रणाममाह । 5

सर्वचैत्यानि वन्देऽहं बोधिसत्त्वाश्रयांस्तथा ।

नम:करोम्युपाध्यायानभिवन्द्यान्यतींस्तथा ॥ २५

ऊर्ध्वतिर्यगधस्तासु[2] दिशासु विदिशासु च । सशरीराशरीरेषु स्तूपेषु प्रणमाम्यहमित्यर्थ: । बोधिसत्त्वाश्रयानपीति[3] । जातकावदानजन्मादिस्थानानि ॥ अभिवन्द्यानिति वृद्धान् वन्दनार्हान् ॥ तदनेन पूजावन्दनाविधिरुक्त: । 10

अय च पूजाविधिस्त्रिसमयराजे[4] कथित: । यथोक्तं । स्थलजा रत्नपर्वता: । जलजा रत्नपर्वता: । स्थलजजलजानि रत्नानि दशदिगवस्थितानि । अममान्यपरिग्रहाणि देयानीत्युक्तं । अनया च दिशा सर्वभैषज्यानि सर्वरसायनानि सर्वसलिलानि । अनवद्यानि अम्भण्डलानि[5] । सर्वकाञ्चनमण्डलानि । विवृत्तेषु वा लोकधातुषु परमरसस्पर्शसंपन्ना भूपर्यटका अमृतलता । अकृष्टोप्ता: शालय: । सर्वोत्तरकुरुद्वीपेषु च परिशुद्धेषु च लोक- 15

1 The MS L has the gloss yatra tathāgatah sthitah

2 More correctly adhastana

3 Api (Tib. dan) varia lectio

4 = Çiksas. 290, 13—Prof. Bendall says probably the same as the Trisamayavyuha (A M.G 309)

5 MS. āmandala.

धातुषु ये रमणीयतराः परिभोगाः ॥ यथार्यरत्नमेघे[1] चाह ।
स यानीमानि सूत्रान्तेषूदाराणि पूजोपस्थानानि शृणोति
तान्याशयतस्तीव्रेणाध्याशयेन बुद्धबोधिसत्त्वेभ्यः परिणामयति ।
5 तथा स विविधानि पूजोपस्था[ना]न्यनुविचिन्तयति । इति ॥

सांप्रतं रत्नत्रयशरणगमनपूर्वकं पापदेशनामाह[2] ।

बुद्धं गच्छामि शरणं यावदा बोधिमण्डतः ।
धर्मं गच्छामि शरणं बोधिसत्त्वगणं तथा ॥ २६

त्राणार्थं शरणार्थं । गमनं तदाज्ञापरिपालन । यो हि यं
10 शरणं गच्छति स तदाज्ञां नातिक्रामतीति भावः । बोधि-
मण्डत इति । मण्डशब्दोऽयं सारवचनं घृतमण्ड इति यथा[3] ।
तथा च सति बोधिप्रधान यावत् । यावत्सम्यक्संबोधिं नाधि-
गच्छामि । इत्यर्थः ।

विज्ञापयामि संबुद्धान् सर्वदिक्षु व्यवस्थितान् ।
15 **महाकारुणिकांश्चापि बोधिसत्त्वान् कृताञ्जलिः[4] ॥ २७**

विज्ञापयामीत्यनेन बुद्धबोधिसत्त्वानामग्रगतमात्मानं ख्या-
[21ᵃ]त्वा । अध्याशयेनैतद्वक्तव्यं इत्युपदर्शित । कृताञ्जलिरिति
कायविज्ञप्तिरुक्ता । अञ्जलि । करद्वयेन सपुटं कृत्वेत्यर्थः ।

---

1 See Çikṣās , *ibidem.*

2 The whole of this paragraph (down to II 31) has been curiously adapted in *Svayambhūpurāna* (Bibl Ind), pp 116 ₃-117 ₉ where we have ...abodan çaranam yāmi svayambhūm jagadiçvaram *Cf* p 59, n 3

3 *Cf* SENART, *Legende du Buddha*, p 200, and reference to Lal Vist 452, 3 (bodhivara) , KERN, *Lotus* pp XVII, XLI 155 , *Etudes et Mat* 207, n 3 The Tib "(byan chub) sñin po " is the exact equivalent of sāra

4 *Svayambhūp* ...mahākārunikāmç cāpi pañca tathāgatān api

अनादिमति संसारे जन्मन्यत्रैव वा पुनः।
यन्मया पशुना पापं कृतं कारितमेव वा ॥ २८

यच्चानुमोदितं किंचिदात्मघाताय मोहतः।
तदत्ययं देशयामि पश्चात्तापेन तापितः ॥ २९

अनादिमतीति। पूर्वजन्मपरंपरासु। जन्मन्यत्रैवेति। 5
अस्मिन्नपि जन्मनि। न केवलं पूर्वं च। पशुनेति। मोहबहुल-
तामात्मनो दर्शयति। त्रिविधं कर्म। कायवाङ्मनोभिस्त्र कृतं।
त्रिभिरपि कारितमिति॥ वाङ्मनोभ्यामनुमोदितमित्यपि।
आत्मघातायेति। तत्पापकर्मफलस्य ममात्मन्येव विपाकात्।
तदत्ययमिति। तदापत्तिं देशयामि प्रकाशयामि उत्तानी- 10
करोमि। न प्रच्छादयामि। पश्चात्तापेनेति। अकुशलकर्मणो
नरकादौ दुःखविपाकश्रवणात्।

अधुना यथाप्रधानमत्ययदेशनामाह।

रत्नत्रयेऽपकारो यो मातापितृषु वा मया।
गुरुष्वन्येषु वा [1]क्षेपात्कायवाग्बुद्धिभिः कृतः॥ ३० 15

रत्नत्रय इति। अनुत्तरगुणक्षेत्रे। मातेत्यादिना। उप-
कारिक्षेत्रे[2]। तत्रापकारस्य विस्तरतीव्रदुःखविपाकत्वात्।

अनेकदोषदुष्टेन मया पापेन नायकाः।
यत्कृतं दारुणं पापं तत्सर्वं देशयाम्यहं[3] ॥ ३१

---

[1] kṣepāt = tib ñon mons-sgo nas = kleçāt [2] Cf V, 81

[3] Compare the method of confession, or more exactly the Vidūṣaṇasamudācāra, illustrated in the Çikṣā from the *Suvarṇaprabhāsottamasūtra*, (pp 160–162) Many stanzas are identical with ours.

अनेकदोषदुष्टेनेति । रागादिक्लेशदूषितेन । न स्वतन्त्रेणे-
त्यर्थः ॥ पापकर्मणि संवेगमाह ।

कथं च निःसराम्यस्मात्परित्रायत सत्वरं ।

केन प्रकारेण । अस्मादशुभात् । सत्वरं शीघ्रं ॥ केय त्वरा
5 भवत इत्याह ।

मा ममाक्षीणपापस्य मरणं शीघ्रमेष्यति ॥ ३३[1]

यावत्पापक्षयं न करोमि । तावन्मम मृत्युर्भविष्यति न[2] ।
अन्यथा दुर्गतिगमनभयात् । ननु चाकृतपापपरिक्षयस्य भवतो
मृत्योः कोऽवकाश इत्याह ।

10 **कृताकृतापरीक्षोऽयं मृत्युर्विश्रम्भघातकः ।**
स्वस्थास्वस्थैरविश्वास्य आकस्मिकमहाशनिः ॥ ३४

इदं कृतमिदमकृतं तावत्तावदिति न परीक्षते मृत्युः ।
विश्रम्भो विश्वासः । तेन घातकः । नापि नीरोगोऽहं युवा
बलवत्कायो वेति विश्वसनीयं । कुत' । आकस्मिकमहाशनि-
15 रिति । अचिन्तितवज्रपातसदृशः ॥ यद्येवं पापाद्भयं किमर्थं
तर्हि तत्कृतमित्याह [22b]

प्रियाप्रियनिमित्तेन पापं कृतमनेकधा ।
सर्वमुत्सृज्य गन्तव्यमिति न ज्ञातमीदृशं ॥ ३५

---

[1] It is fairly probable that the stanza 32 of the Text MSS (omitted only in M of Minaev-edition, but wanting also in Tib translation) has been interpolated, it runs as follows

kathaṃ ca niḥsarāmy asmān nityodvigno'smi nāyakāḥ ।
mā bhūn me mṛtyur acirād akṣīṇe pāpasaṃcaye ॥

[2] The Tib has de-srid du bdag hchi-bar ma gyur cig çes pa sto । gzan-du-na = na bhaved iti । anyathā (bhavet) durgati bhayaṃ.

प्रिय आत्मा आत्मीयश्च । अप्रियस्तदपकारी । प्रियस्य हितसुखमप्रियस्य च तद्विपरीतमिच्छता कृतं पापमनेकधा । प्राणातिपाताद्दत्तादानादिभेदेनानेकप्रकारं । ननु सर्वमेतन्न चिरेण परित्यज्य गन्तव्यं । तत्किमिति निरर्थकं पापकमुपचीयत इत्याह । सर्वमित्यादि । सर्वं प्रियमप्रियं वा उत्सृज्य 5 विहाय गन्तव्यं । एतत्तु न मया मुग्धेन परिभावित ॥ किमिदानीं परिशिष्टमवस्थितमित्याह[1] ।

तत्तत्स्मरणतां याति यद्यद्वस्त्वनुभूयते ।
स्वप्नानुभूतवत्सर्वं गतं न पुनरीक्ष्यते ॥ ३७

यद्यद्वस्त्विति सुखहेतुर्दुःखहेतुर्वाऽनुभूयते संवेद्यते । कथं 10 पुनरेवमित्याह । स्वप्नानुभूतवदिति यथा स्वप्नावस्थायामुपलब्धं विनष्टं न पुनरीक्ष्यते । तत्र स्मरणमात्रमेवावशिष्यते । तथान्यदपि सर्वं [2]प्रियादिभगतमस्थिरमस्मिन्नेव जन्मनीत्युपदर्शयन्नाह ।

इहैव तिष्ठतस्तावद्गता नैके प्रियाप्रियाः । 15
तन्निमित्तं तु यत्पापं तत्स्थितं घोरमग्रतः ॥ ३८

तिष्ठत आसीनस्यैव मम पश्यतः । गता अनित्यतया ग्रसिताः ॥ यद्येवं तर्हि तदर्थं कृत पापमपि तैः सह यास्यती-

---

[1] The stanza 36 of the Text MSS omitted by the Vṛttikāra, but not by the Tib translator, runs as follows

apriyā na bhaviṣyanti priyo me na bhaviṣyati ।
aham ca na bhaviṣyāmi sarvam ca na bhaviṣyati ॥

[2] Tib mdza-ba la sogs pa dan bgrogs pa.

त्याह । तन्निमित्तमित्यादि । तेषां प्रियादीनां निमित्तं तदर्थं यत्कृतं पापं तत्पुनरग्रत एव स्थितं मे । तन्मया सह यास्यतीत्यर्थः ॥ नन्वेवं पश्यन्नपि कथ मूर्च्छितो[1]ऽसीत्याह ।

एवमागन्तुकोऽस्मीति न मया प्रत्यवेक्षितं ।
5 मोहानुनयविद्वेषैः कृतं पापमनेकधा ॥ ३९

नाहं कस्य चित्परितः[2] । न मे कश्चित् । इत्येवं [न] मया प्रत्यवेक्षितं विचारितं । तेन कारणेन । अनुनय आसक्तः । आत्मन्यात्मीये च । विद्वेषः प्रतिघः । तत्प्रतिकूलमाचरति ॥ चिरतरमतिदीर्घायुषो भवतः का मरणाशङ्का । तत्किमेवं 10 बिभेषि इत्याह ।

रात्रिंदिवमविश्राममायुषो वर्धते व्ययः ।
आयस्य चागमो नास्ति न मरिष्यामि किं न्वहं ॥ ४०

अहर्निशं । आयुषो वर्धते व्ययः । आयुःसंस्काराः क्षीयन्ते । अविश्राममिति । क्षणमपि न व्ययविच्छित्तिरस्ति । आगमन15 मागमः । अनुप्रवेशः । स च आयस्य उपचयस्य लेशतोऽपि न संविद्यते । तदहमेवं किं नु न मरिष्यामि । अपि तु चिरमपि स्थित्वा जीवितं मरणपर्यवसानमिति[3] ॥ स्यादेतत् । यन्निमित्तं

---

[1] Ex conj —The MS has mṛkhito, but Tib bslus

[2] Na paritah = auf keine Weise

[3] See Dhammapada, 148, Udânavarga, 1, 35, and references apud Max Muller, transl p 42

कृतं पापं तेऽपि ते[न][1] नरकादिषु त[22a]त्फलदुःखानुभव-
काले संविभागिनो भविष्यन्ति। तत्किमिति कातरभावमव-
लम्बस इत्यत्राह। आस्तां तावत्परलोके।

इह शय्यागतेनापि बन्धुमध्येऽपि तिष्ठता।
मयैवैकेन सोढव्या मर्मच्छेदादिवेदना॥ ४१ 5

इह अस्मिन्नेव भवे मरणान्तिकादिदुःखबाधायां स्वजन-
परिजनमध्यगतेनापि। मर्मच्छेदादिवेदनेति। पिपासागात्र-
संतापादिदुःखं मयैवैकेन सोढव्यं। न तत्राणीयानपि भागो-
ऽन्यस्य संभवति॥ किं पुनर्नरकादावित्याह।

यमदूतैर्गृहीतस्य कुतो बन्धुः कुतः सुहृत्। 10
पुण्यमेकं तदा त्राणं मया तच्च न सेवितं॥ ४२

कालदूतैर्गृहीतस्याधिष्ठितस्य। गलपाशेन बद्धस्य। मुद्गरै-
राकोट्यमानस्य[2]। अटवीकान्तारगहनकण्टकविषमशिलाशकलै-
र्वितुद्यमानचरणस्य। असहायस्य। कर्मानुभवभूमिं नीयमा-
नस्य। कुतो बन्धुः कुतः सुहृत्। इति तत्र न केचित्सहाया- 15
स्त्राणं संभवन्ति। पुण्यमेकैकं तदा त्राणं स्यात्। मया तच्च न
सेवितं। तच्च पुण्यं त्राणभूतं मया नोपार्जितं॥ पुनरपि
पापात्संवेगमाह।

---

1 According to the Tib de yan de dan lhan-cig-tu skal ba len par gyur-te.

2 *M. Vyut. 281, 57*

अनित्यजीवितासङ्गादिदं भयमजानता ।
प्रमत्तेन मया नाथा बहु पापमुपार्जितं[1] ॥ ४३

अस्थायिनि जीविते । आसङ्गादाग्रहात् । इदमागामि नरकादिदुःखभयमजानता । अपश्यता । प्रमत्तेनेति । यौवन-
5 रूपधनाधिपत्यादिमदमत्तेन ॥ किं पुनरेवं संवेगवङ्कतो भवानित्याह ।

अङ्गच्छेदार्थमप्यद्य नीयमानो विशुष्यति ।
पिपासितो दीनदृष्टिरन्यदेवेक्षते जगत् ॥ ४४

अत्यल्पमिदं करचरणादिच्छेदज दुःखं नरकदुःखात् ।
10 तथापि तत्रेयमवस्था भवति । विशुष्यति । सर्वात्मना शोषमुपयाति । पिपासितस्तृष्णार्तः । दीनदृष्टिरिति कृपणदृष्टिः । अन्यदेवेति विपरीत[2] ॥ नरकदुःखस्यातिशयमाह ।

किं पुनर्भैरवाकारैर्यमदूतैरधिष्ठितः ।
महात्रासज्वरग्रस्तः पुरीषोत्सर्गवेष्टितः ॥ ४५
15 कातरैर्दृष्टिपातैश्च त्राणान्वेषी चतुर्दिशं ।

भैरवाकारैरिति भयंकररूपैः । अधिष्ठित आत्ममात्कृतः । म[22b]हात्रासनज्वरस्तेन ग्रस्तो गृहीतः । पुरीषमुच्चारः ।

---

[1] The MS M of the Min edition and Dev 85 have bahu duhkham — But Tib sdig-pa

[2] Tib. gzan-du-ni bzlog par ro Cf Viparitam idam sarvam pratibhāti sma, Mbh 6 3333, 3 1736, 2126 (P W s voc sma)

तस्योत्सर्गो विनिर्गमः । तेन वेष्टितो विलिप्तः ॥ कातरैरिति दीनैः । चतुर्दिशं त्राणान्वेषी । कथमित्याह ।

को मे महाभयादस्मात्साधुस्त्राणं भविष्यति[1] ॥ ४६

साधुरकारणवत्सलः । त्राणं परित्राता ।

त्राणशून्या दिशो दृष्ट्वा पुनः संमोहमागतः । 5
तदाहं किं करिष्यामि तस्मिन् स्थाने महाभये ॥ ४७

एवमपि यदा कुत्र चिदपि त्राण न पश्यति । तदा त्राणाभावात् पुनः संमोहमागतः । तदा तस्मिन् काले किं करिष्यामि । सर्वक्रियास्वसमर्थः सन् तस्मिन् स्थाने प्रतापनादिनरकभूमौ[2] ॥ तस्मादिदानीमेव प्रतीकारानुष्ठानं युक्तमि- 10 त्याह ।

अद्यैव शरणं यामि जगन्नाथान् महाबलान् ।
जगद्रक्षार्थमुद्युक्तान् सर्वत्रासहरान् जिनान् ॥ ४८

जगतां नाथान् सर्वाश्वासनिर्वृतिस्थानभूतान् नायकान् । महाबलानिति सर्वत्राप्रतिहतसामर्थ्यान् । जगद्रक्षार्थमुद्युक्तानिति 15 सर्वसत्त्वपरित्राण[ार्थ]मुद्युक्तान् ॥ एवमपि[3] त्राणानाश्रित्य भयोपशमो न स्यात् । तदा किं शरणगमनेनेत्यत्राह । सर्वत्रासहरानिति । सर्वव्यसनापहर्तॄन् ॥ धर्मसंघशरणगमनमाह ।

---

[1] Minaev has karisyati, but the MSS M and L² of his edition bhavisyati

[2] Cf Mhv I 9, 9 15, 7, 12

[3] Sic Ms secunda manu, with nā in margin.—Tib *de la brten nas* van = *tam (tān) āçrityāpi* Fairly probable

तैश्चाप्यधिगतं धर्मं संसारभयनाशनं ।
शरणं यामि भावेन बोधिसत्त्वगणं तथा ॥ ४९

तैर्बुद्धैर्भगवद्भिः । अधिगत[1] साक्षात्कृतं । धर्मं निर्वाणमित्यर्थः[2] । संसारभयनाशनं सर्वक्लेशप्रतिपक्षत्वात् । भावेनेति 5 परमप्रसादेन न मायाशाठ्येन[3] विचिकित्सया वा । बोधिसत्त्वगणमिति सघं[4] । तथेति भावेन ॥ इदानीं यथाप्रधानं बोधिसत्त्वेभ्य आत्मनिर्यातनं[5] कुर्वन्नाह ।

समन्तभद्रायात्मानं ददामि भयविह्वलः ।
पुनश्च मञ्जुघोषाय ददाम्यात्मानमात्मना ॥ ५०

10 समन्तभद्राय बोधिसत्त्वाय । आत्मानं ददामि निर्यातयामि । भयविह्वलो नरकादिभयव्याकुलः । पुनश्च मञ्जुघोषाय मञ्जुनाथाय । आत्मनेति न परप्रेरणया । स्वयमेव प्रसन्नचित्त इत्यर्थः ।

तं [23a] चावलोकितं नाथं कृपाव्याकुलचारिणं ।
15 **विरौम्यार्तरवं भीतः स मां रक्षतु पापिनं ॥ ५१**

आर्यावलोकितेश्वरं । कृपया व्याकुलं चरितं शीलमस्येति कृपाव्याकुलचारिणं इति तस्यैव विशेषणं । विरौमि । आरवं करोमि । आर्तरवमिति क्रियाविशेषणं । दुःखदीनकातरस्वरं । भीतः त्रस्तः पापकर्मफलात् । स भगवानवलोकितः । मां 20 रक्षतु पापिनं कृतपापं मां त्रायतां ।

---

[1] MS adhikṛtam, Min and Text MSS adhigatam
[2] A well known identification
[3] MS gadhyena
[4] Cf Mhv II 293
[5] Alias °niryatanā

आर्यमाकाशगर्भं च क्षितिगर्भं च भावतः ।
सर्वान् महाकृपांश्चापि त्राणान्वेषी विरौम्यहं ॥ ५२

आर्यमाकाशगर्भं च बोधिसत्त्व । क्षितिगर्भं च बोधिसत्त्वं विरौमीति परेण संबन्धः । सर्वान् महाकृपांश्चापि । येऽपि न नामग्रहणेनोदाहृतास्तानपि परमकारुणिकान् परदुःखदुःखिनः । 5

यं दृष्ट्वैव[1] च संत्रस्ताः पलायन्ते चतुर्दिशं ।
यमदूतादयो दुष्टास्तं नमस्यामि वज्रिणं ॥ ५३

यस्य दर्शनमात्रेण यमदूतादयः । आदिशब्दादन्येऽपि यक्षराक्षसादयो दुष्टा भीताः सन्तः पलायन्ते दूरमपगच्छन्ति । तं नमस्यामि नमस्करोमि । वज्रिणमिति । वज्रमस्यास्तीति 10 वज्रपाणि बोधिसत्त्व[2] ॥ तदनेन शरणगमनादिना पापक्षयार्थमाश्रयबलमुपदर्शितं[3] ॥ यदुक्तं चतुर्धर्मकसूत्रे[4] । तत्राश्रयबलं बुद्धधर्मसंघशरणगमनमनुत्सृष्टबोधिचित्तता च । स बलवत्संनिश्रयेण[5] न शक्यते पापेनाभिभवितुं । इति ॥

पुनरन्यथात्वशङ्का[6] निराकर्तुमाह । 15

अतीत्य युष्मद्वचनं सांप्रतं भयदर्शनात् ।
शरणं यामि वो भीतो भयं नाशयत द्रुतं ॥ ५४

---

[1] Msn has drstraivam [2] Cf infra Chap X 11

[3] The Āçrayabala is the fourth dharma by which the bodhisattva can overcome the accumulated sins (cf Çiksās, 160, 5)

[4] = Çiksās, p 160, 9, see infra V, 98

[5] Çiksās has subalavat' but Tib de stobs dan ldan pa li brten nas

[6] Tib yan gzan du dogs pa

अतिक्रम्य युष्मदाज्ञां । सांप्रतमिदानीं । भयदर्शनात् । तदतिक्रमे[1] यस्मादनिष्टफलसंभवदर्शनात् । वो युष्मान् शरणं यामि भीतः । अनिष्टफलादुत्रस्तः । तस्मात्पुनरन्यथात्वशङ्का न कर्तव्या । अतो भयं नाशयत । पूर्वकृतपापाद्भयमपनयत । द्रुतं
5 शीघ्रं । ममेत्यध्याहार्यं ॥ नन्वे[23b]वमपि कः प्रत्येष्यति त्वद्-वचनादित्याशङ्क्य पुनरत्रार्थे दृढतामाह ।

इत्वरव्याधिभीतोऽपि वैद्यवाक्यं न लङ्घयेत् ।
किमु व्याधिशतैर्ग्रस्तश्चतुर्भिश्चतुरुत्तरैः ॥ ५५

इत्वरो गत्वरो नश्वरोऽचिरस्थायीत्यर्थः । लघुर्वा । स चासौ
10 व्याधिश्चेति । तस्माद्भयेन । वैद्यवाक्यं न लङ्घयेत् । वैद्योपदेशं नातिक्रमेत् । मायं व्याधिर्मम वृद्धिमुपगच्छेत् ॥ किमु किं पुनः । व्याधिशतैर्ग्रस्तो लङ्घयेत् । चतुर्भिश्चतुरुत्तरैरिति । चतुरधिकैश्चतुर्भिः शतैरित्यर्थः[2] । शतमकालमृत्यूनां । एकं कालमरणमित्येकोत्तरं शतं मृत्यूनां । ते च प्रत्येकं वातपित्त-
15 श्लेष्मकृतास्तत्संनिपातकृताश्चेति चतुरुत्तराणि चत्वारि शतानि भवन्ति । इति कारणभेदात्कार्यभेदः । कार्यभेदाच्च कारणभेद-व्यवस्था ॥ ननु तथापि किमत्र भयकारणं यन्नास्तीत्याह[3]

एकेनापि यतः सर्वे जम्बुद्वीपगता नराः ।
20 नश्यन्ति येषां भैषज्यं सर्वदिक्षु न लभ्यते ॥ ५६

---

[1] Old reading kramya

[2] Cf JAESCHKE, Tib Dict, p 302, s. voc. nad

[3] Tib de lta na yan gan zig med pa de-la cu-phyir hjigs-par byed ce na | de cig gis kyan zes bya ba—Ms has yan nāsti pratītyāha

एकेनापि व्याधिना कुपितेन। [1]यस्मात्सर्वे जम्बुद्वीपगता नराः। प्राणिनो नश्यन्ति म्रियन्ते॥ अन्यच्च। येषां व्याधीनां भैषज्य-मौषधं चिकित्सार्थं क्व चिदपि न प्राप्यते॥ अत्र काशिराज-पद्मजातकमुपनेयं[2]। तद्यथानुश्रू[य]ते। बोधिचर्यां चरन्नयमेव भगवानतीतेऽध्वनि पद्मो नाम काशिराजो बभूव। तस्मिन् 5 समये सर्वे जम्बुद्वीपका मनुष्या महता रोगेण विकलीभूता म्रियन्ते च। तैरिदमालोचितं। अयमेवास्माकं स्वामी राजा परमकारुणिकः प्रतीकारं विधास्यतीत्यस्यैवात्मदुःखं निवेद-यामः॥ ते चैवमवधार्य मिलित्वा। भो महाराज भवति स्वामिनि परमहितैषिणि संविद्यमानेऽपीयमवस्थास्माकमिति 10 तस्मिन् राजनि दुःखमाविष्कृतवन्तः। स च राजा करुणाप-रवशहृदयस्ते[24b]षां दुःखमसहमानः शीघ्रममीषां रोगपी-डामपनयतेति वैद्यानाज्ञापयामास। तेऽपि तथेति प्रतिश्रुत्य चिकित्साशास्त्राणि व्यवलोक्य [3]सद्योरोहितमत्स्यमांसादन्यद्भैष-ज्यमलभमानास्तथैव राज्ञः प्रत्युक्तवन्त इति विस्तरः॥ इदमेव 15 जातकं भवोपलक्षणं दर्शितं॥

तत्र सर्वज्ञवैद्यस्य सर्वशल्यापहारिणः।
वाक्यमुल्लङ्घयामीति धिग्मामत्यन्तमोहितं॥ ५७

[1] Tipp has yata iti yesu vyādhisu | yesām ca vyādhīnām

[2] Quotation, for once, not borrowed from the Çiksās, but cf the Avadāna çataka, Nr 31 where the king is called "Padmaka"—See Prof SPEYER 'Akad van Wetenschappen at Amsterdam, Versl en Meded Afd Lett IV. R III, 370 foll

[3] Cyprinus rohita Tib has ro hi ta—sadyomāmsa hphral-gyi ça—Feer, p 116, 2 "ils se mirent à decouper les chairs (de ce poisson) encore vivant"

कायिकमानसिकानेकशल्योद्धारिणः । आत्मानं जुगुप्सते । धिग्मामत्यन्तमोहितमिति । एवं जानन्नपि यदि तथागताज्ञाया वैमुख्यमासेवे । तदा मम मोहस्य पर्यन्तो नास्ति । कुत्सनीयोऽस्मीत्यर्थः ॥ किं पुनरेवमित्याह ।

5 अत्यप्रमत्तस्तिष्ठामि प्रपातेष्वितरेष्वपि ।
किमु योजनसाहस्रे प्रपाते दीर्घकालिके ॥ ५८

पर्वतादिप्रपातेषु । अल्पतरेषु । यत्रास्थिभङ्गमात्रं मरणमात्रं वा दुःखं स्यात् । किमु योजनसाहस्र इति । योजनसहस्रपरिमाणमस्येत्यण्[1] । अनेकयोजनसहस्रपरिमाणे । अवी-
10 च्यादिकप्रपात इत्यर्थः । दीर्घकालिक इति यत्रान्तरकल्पादिभिरायुषः क्षयः ॥

सद्यो मरणमदृष्ट्वैव किमकाण्डे कातरतया सुखासिकां जहामीत्याशङ्कामपनुदन्नाह ।

अद्यैव मरणं नैति न युक्ता मे सुखासिका ।
15 अवश्यमेति सा वेला न भविष्याम्यहं यदा ॥ ५९

अवश्यमिति निश्चितमेतत् ॥ तथापि भयमयुक्तमित्याह ।

अभयं केन मे दत्तं निःसरिष्यामि वा कथं ।
अवश्यं न भविष्यामि कस्मान्मे सुस्थितं मनः ॥ ६०

---

[1] Pan 5, 1, 27

अभयं मा भैरिति केन सत्पुरुषेण मम दत्तं येन निर्भयो विहरिष्यामीति भावः ॥ यदि वा निःसरणोपायोऽपि[1] यदि भवेत् तथापि भयमयुक्तं । तदपि नास्ति । निःसरिष्यामि वा कथं ततो दुःखात् ॥ अवश्यं न भविष्यामीति । सर्वं जीवित मरणपर्यवसानमित्युक्तं भगवता[2] ॥ 5

इत्थमपि न युक्ता मे सुखासिका इत्याह । [24b]

पूर्वानुभूतनष्टेभ्यः किं मे सारमवस्थितं ।
येषु मेऽभिनिविष्टेन गुरूणां लङ्घितं वचः ॥ ६१

अभिनिविष्टेनेति आसक्तेन । गुरूणामिति बुद्धबोधिसत्त्वकल्याणमित्राणां ॥ तस्मादिदमहर्निशं मम मनसि कर्तुमुचितमित्याह । 10

जीवलोकमिमं त्यक्त्वा बन्धून् परिचितांस्तथा ।
एकाकी क्वापि यास्यामि किं मे सर्वैः प्रियाप्रियैः ॥ ६२

जीवलोकं सत्त्वलोकं । इमं मनुष्यादिसभागतालक्षणं[3] । एकाकीत्यसहायः । क्वापीत्यनिश्चितस्थानं ॥ 15

इयमेव तु मे चिन्ता युक्ता रात्रिंदिवं सदा ।
अशुभान्नियतं दुःखं निःसरेयं ततः कथं ॥ ६३

---

[1] Api not translated in Tib. [2] Cf. p. 62, n. 3

[3] Sabhagata cf. Senart, Mhv. I, 595. — Tib. mi li-sogs pa rigs mthun-pa mthsan-ñid ... — mi rigs menschengeschlecht

अशुभादिति अकुशलात्कर्मणः। तत इत्यशुभात्॥ सांप्रतं कृतकर्मफलसंबन्धनिश्चयो[1] महताभिनिवेशेन पुनरत्ययदेशना-मारभत इत्याह।

[2]मया बालेन मूढेन यत्किंचित्पापमाचितं।
5 प्रकृत्या यच्च सावद्यं प्रज्ञप्त्यावद्यमेव च॥ ६४
तत्सर्वं देशयाम्येष नाथानामग्रतः स्थितः[3]।
कृताञ्जलिर्दुःखभीतः प्रणिपत्य पुनः पुनः॥ ६५
अत्ययमत्ययत्वेन प्रतिगृह्णन्तु नायकाः।

बालेनेति अजानता। मूढेनेति मोहान्धेन। यत्किंचिदिति
10 कायेन वाचा मनसा वा। प्रकृतिसावद्यं प्राणातिपातादिदशा-कुशलस्वभावं। प्रज्ञप्तिसावद्य यद्भगवता गृहीतसंवराणामेव प्रज्ञप्तमकालभोजनादिरूपं॥ देशयामीति वाग्विज्ञप्तिमुत्थाप-यति। कृताञ्जलिरिति कायविज्ञप्तिः। प्रणिपत्य [पुनः] पुनरिति अतिशयवच्चित्तसंवेगमुपदर्शयति॥ [4]अति यतत्यनेन
15 नरकादिष्वित्यत्ययः। अशुभं कर्म। तमत्ययत्वेन दोषत्वेन प्रति-गृह्णन्तु जानन्तु पश्यन्तु विदन्तु व्यक्तीकृतं मया[5]। अनावरण-

---

1 "Having got a firm persuasion of the dependence of the fruit on the Karman formerly done", Cf 22, 1

2 Comp *Svayambhūp* 117, 7 and *Çikṣās* pp 161 and foll

3 *Svayambhūp* Svayambhuvo 'gratah sthitah [çambhuva a°]

4 Yatati khede, *Dhātup* Tib çin-tu ltun bar-byed pas ltun bao — (ati patati)

5 Cf *Çikṣās.* 162, 16 (Atyayam pratigṛhnantu) 163, 12 (na cchādayāmi tat pāpam)

चित्तेन । न [1]प्रच्छादनात्र ममास्तीति भावः ॥ पुनःस्खलितशङ्कामपाकर्तुं पुनरकरणसंवरं कुर्वन्नाह । न भद्रकमित्यादि ।

[2]न भद्रकमिदं नाथा न कर्तव्यं पुनर्मया ॥ ६६

यदार्यकान्तं विशुद्धप्रशस्तं न भवति तदभद्रकं गर्हितमनार्यं कर्मेत्युच्यते । तदद्यप्रभृति जानता पश्यता बुद्धिपूर्वकं संचिन्त्य पुनर्मया न कर्तव्यं । आयत्यां पुनरकरणसंवरमापत्स्य इत्यर्थः । एतच्च चित्तस्कन्धप्रवर्तनप्रस्तावे व्यक्तीकरिष्यते[3] ॥ 5

॥ इति प्रज्ञाकर[25a]मतिविरचितायां बोधिचर्यावतारपञ्जिकायां द्वितीयः परिच्छेदः ॥

---

[1] Commonly pracchādanam

[2] Min has abhadrakam but MSS L[2] M and Tipp na bhadrakam —*Svayambhūp* na bhadrakam idam nātha na .

[3] See *infra* V, 98, 99

प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां बोधिचित्तपरिग्रहः तृतीयः परिच्छेदः।

अधुना पापदेशनानन्तरं[1] पुण्यानुमोदनामाह।

अपायदुःखविश्रामं सर्वसत्त्वैः कृतं शुभं।
अनुमोदे प्रमोदेन[2] सुखं तिष्ठन्तु दुःखिताः॥ १

नरकादिगतौ दुःखमनुभवन्तो हि परिश्रान्ताः सुकृतवि-
5 पाकमधिगम्य प्रतिलब्धसुखा विश्राम्यन्ति कियत्कालं। अनुमोदे
प्रसादेनेति। संप्रहर्षयामि प्रसन्नचित्तः॥ अनुमोदनापि त्रिविधा
मनसा कायेन वाचा च। तत्र प्रसन्नचित्तः संप्रहर्षयति मनसा।
कायेन रोमहर्षाश्रुपातगात्रकम्पादिकमनुभवन्। अनुमोदते
वाचा च संप्रहृष्टचेतनस्तथाविधामेव वाचमुच्चारयन्। साधुकृतं

---

1 The third anuttarapūjā according to Dh. saṃgraha XIV. See pp. 44, n. 1, 56, 1. The stanzas 1–3, 4, 5 are quoted in Svayambhūp. pp. 117, 19–118, 5, 118, 10, 118, 19. With variants: ad 4 caturdikṣu sthitān buddhān dharmapradīpān, ad 5 ... çambhunātham ... yācanām. Follows the exact specification of each 'formule' (puṇyānumodanā, ...) as in the Bodhic. Mss.— All these canonical verses (cf. *Bouddh. Et. et Mat.* p. 106 and foll.) are parts of the method of repentance (or confession) as attested by Chinese authorities, see CHAVANNES quoted in loco and the Tib. Sdig pa-thams cad bçags pai gtor-chos (SCHLAGINTWEIT, *Buddh. in Tib.*: the clauses translated p. 127, 2-5 = our st. 1 and 4, the last one has been misunderstood).

2 So all the MSS. of the text. According to the Commentary "prasādena," a reading probably influenced by the gloss "prasannacittaḥ" (cf. *infra* 79, 17).

सुकृतं भद्रकं कृतमिति ॥ सुखं तिष्ठन्तु दुःखिता इति । यदर्थं तैस्तत्कर्म कृतं तदपि तेषां सम्पद्यत्विति भावः ।

लौकिकं कर्मानुमोद्य लोकोत्तरमनुमोदमानः प्राह ।

संसारदुःखनिर्मोक्षमनुमोदे शरीरिणां ।
बोधिसत्त्वत्वबुद्धत्वमनुमोदे च तायिनां[1] ॥ २

दुःखनिर्मोक्षमिति । श्रावकबोधिः प्रत्येक[बुद्ध]बोधिर्वा[2] । चित्तं वा तदर्थमुत्पादितं तथोच्यते । [3]तदा बोधिद्वयगतमपि तद्ग्राह्यः[4] । शरीरिणामिति । प्राणिनां ॥ बोधिसत्त्वत्वबुद्धत्वमिति । बोधिसत्त्वत्वं भगवतो हेत्ववस्था । बुद्धत्वं फलावस्थामिति । तायिनामिति[5] । स्वाधिगतमार्गदेशकानां । यदुक्तं तायः स्वदृष्टमार्गोक्तिरिति[6] । तद्विद्यते येषामिति । अथ वा । ताय संतानार्थे[7] । आसंसारमप्रतिष्ठितनिर्वाणतयावस्थायिनां ॥ [बोधिसत्त्वानां] पुण्यानुमोदनां कुर्वन्नाह ।

चित्तोत्पादसमुद्रांश्च सर्वसत्त्वसुखावहान् ।
सर्वसत्त्वहिताधानाननुमोदे च शासिनां[8] ॥ ३

---

[1] Tib skyob pa rnams kyi byaṅ chub daṅ rgyal sras-sa la

[2] Tib raṅ sans rgyas kyi [3] Tib de la de skad ces bya'o

[4] From a second hand old reading "tathā" — Tib de thse The tipp has nirmokṣo bodhidvaya (then a lacune)—cf infra IV 6 —tadgrāhaḥ. Tib —gnas pa de an bzun no

[5] On "tāyin," see Lotus in fol 16ª, Nāmasamgīti, 144, 80, Childers, s. voc tādi, Kern, Saddh pund, 25, Senart Mhv II 543

[6] I do not know from what source this gloss is quoted —"Sva' deest in Tib —cf p 3, 5

[7] See the classical definition saṃtānapālanayoḥ

[8] Tib. omits "çāsinām"

चित्तोत्पादाः प्रतिक्षणभाविनोऽपर्यन्तागाधतया समुद्रा इव समुद्राः। तान् किंभूतान् सर्वसत्त्वसुखावहान्। सर्वसत्त्वानां सुखमावहन्तीति। तद्धेतुकनिज[25b]स्वभावानित्यर्थः। सर्वसत्त्वहिताधानानिति हितविधायकान्। शासिनामिति। शासन शासः बुद्धत्वोपायाभ्यासस्तदर्थत्वादुपचारात्[1]। तद्विद्यते येषामिति शासिनो बोधिसत्त्वाः। तदुक्तं।

उपायाभ्यास एवाय तदर्थाच्छासन मतमिति[1]।

अथ वा। शासितुं शीलं येषामिति शासिनः। बोधिसत्त्वा हि दानादिभिः संग्रहवस्तुभिः सत्त्वान् संगृह्य सन्मार्गेऽवतारयन्ति।

एतावतानुमोदना[2] कथिता॥ अध्येषणां[3] कथयन्नाह।

सर्वासु दिक्षु संबुद्धान् प्रार्थयामि कृताञ्जलिः।
धर्मप्रदीपं कुर्वन्तु मोहाद्दुःखप्रपातिनां॥ ४

धर्मप्रदीप कुर्वन्त्विति। अज्ञानतमोवृतानां सत्त्वानां मार्गामार्गविशेषपरिज्ञानविकलानां धर्मदेशनात्मकमालोकं कुर्वन्तु।

एतावता चाध्येषणा कथिता॥ [4]याचनामुपदर्शयन्नाह।

निर्वातुकामांश्च जिनान् याचयामि कृताञ्जलिः।
[5]कल्पाननन्तांस्तिष्ठन्तु मा भूदन्धमिदं जगत्॥ ५

कृतकृत्यतया परिनिर्वाणं गन्तुमनसः। अपर्यन्तकल्पान्

---

1 From unknown sources —cf *Madh vṛtti* initio 2 Tib rjes su yi-raṅ-ba.
3 Tib bskul ba 4 Tib gsol ba
5 L³ M kalpān analpāṃs , Tib grans med, —cf *supra* I, 7

स्थितये याचयामि । मा भूदन्धमिति । पूर्ववन्मार्गाज्ञाननिषे-
तन मा भूत् । अनेनापि याचना प्रोक्ता ॥ याचनानन्तरमिदानीं
[1]परिणामनामाह ।

एवं सर्वमिदं कृत्वा यन्मयासादितं शुभं ।
तेन स्यां सर्वसत्त्वानां सर्वदुःखप्रशान्तिकृत् ॥ ६ 5

एवमुक्तक्रमेण सर्वमिदं पूजापापदेशनापुण्यानुमोदनादि कृत्वा विधाय यन्मयासादितं प्राप्तं शुभं सुकृतं । तेन शुभेन स्यां भवेयं सर्वसत्त्वानां समस्तप्राणभृतां सर्वदुःखप्रशान्तिकृदिति निःशेषव्यसनप्रशमनसमर्थो भवेयं ॥ इति सामान्येन परिणमय्य पुनर्विशेषेणाह । 10

ग्लानानामस्मि भैषज्यं भवेयं वैद्य एव च ।
तदुपस्थायकश्चैव यावद्रोगापुनर्भवः[2] ॥ ७

तेनेति सर्वत्र यथायोगं संबन्धनीयं । ग्लानानामिति व्याधिपीडितानां । भैषज्यमित्यौषधं । वैद्यश्चिकित्सकः । तदु-पस्थायकः तस्य ग्लान[स्य] परिचारकः[4] । [26a] रोगापुनर्भव 15
इति यावद्व्याधिनिवृत्तिः स्यात्[5] ।

---

[1] Tib yoṅs su bsno ba

[2] So Min , M has rogaḥ punarbhave L² rogo punarbhavaḥ —Tib nad-sos gyur gyi bar du ni

[3] Tib nad-gyog

[4] There is no trace of a lacuna in the MS —Tib nad pa dei rim-gro byed-pa —See Jaschke, s voc

[5] Corrected in margin nivṛttir na syāt A preferable reading suggesting the conjecture yāvad rogapunarbhavaḥ (Cf. *infra* 85, 8),—but not confirmed here by Tib.

क्षुत्पिपासाव्यथां हन्यामन्नपानप्रवर्षणैः ।
दुर्भिक्षान्तरकल्पेषु भवेयं पानभोजनं ॥ ८

क्षुद्बुभुक्षा । पिपासा तृष्णा । तयोर्व्यथा । ताभ्यां वा व्यथा । तां हन्यां निवर्तेय । अन्नपानप्रवर्षणैः प्रबन्धाहारपान-
5 संपादनैः । दुर्भिक्षान्तरकल्पेष्विति ।

कल्पस्य शस्त्ररोगाभ्यां दुर्भिक्षेण च निर्गमः ।

[इति] । तत्र दशवर्षायुषि प्रजायामन्तरकल्पपर्यन्ते दुर्भिक्षेण[1] सवर्तः प्रादुर्भवति वर्षान् सप्त मासान् सप्त दिवसानपि सप्तैव । यदुक्त ।

कल्पस्य शस्त्ररोगाभ्यां दुर्भिक्षेण विनिर्गमः[2] ।
10 दिवसान् सप्त मासांश्च वर्षां[स्त्रै][3]व । यथाक्रमं ॥ इति ।

तत्रान्नपानाभावादन्योन्यमांसास्थिभक्षणमेवाहार. । तदपि केचिदलभमाना आहारवैकल्याच्च म्रियन्ते । तत्र भवेय पान-भोजन ।

दरिद्राणां च सत्त्वानां निधिः स्यामहमक्षयः ।
15 नानोपकरणाकारैरुपतिष्ठेयमग्रतः ॥ ९

[1] MS durbhikṣaç ca There are three saṃvartas (tejo°, āpo°, vāyo°), 'previous to the destruction by water, cruelty prevails men are cut by weapons to that by fire, licentiousness men are cut off by disease, and previous to that by wind, ignorance men are cut off by famine" (SP HARDY, *Manual*, 33, and *M Vyut* 253, 64–70)

[2] Thus Tipp —Tib mu-ge dag gis thsar phyin-byed.

[3] Tipp has varṣāṇi ca.—Better reading, cp. *M. Vyut* 253 60

दरिद्राणामिति धनविकलानां। अक्षय इति। आक्षय्यमाणधनोऽपि यो न क्षीयते। नानोपकरणाकारैरिति। शयनासनवसनभोजनाभरणविलेपनप्रभृति यद्यदभिलषन्ति सत्त्वास्तैस्तैरुपकरणविशेषाकारैरहमेवोपतिष्ठेय प्रत्युपस्थितो भवेयं। तेषां दरिद्राणां सत्त्वानामग्रतः पुरतः।

इदं च परिणामनमार्यवज्रध्वजसूत्रे[1] विस्तरेण प्रतिपादितं। तत्रेदमुक्तं। स तानि कुशलमूलानि परिणामयन्नेवं परिणामयति। अनेनाहं कुशलमूलेन सर्वसत्त्वानां लयनं भवेयं सर्वदुःखस्कन्धविनिवर्तनतया। सर्वसत्त्वानां त्राणं भवेयं सर्वक्लेशपरिमोचनतया। सर्वसत्त्वानां शरणं भवेयं सर्वभयारक्षणतया। सर्वसत्त्वानां गतिर्भवेयं सर्वभूम्यनुगमनतया। सर्वसत्त्वानां परायणं भवेयमत्यन्तयोग- 26b -[क्षेम]प्रतिलम्भनतया[2]। सर्वसत्त्वानामालोको भवेयं वितिमिरज्ञानसदर्शनतया। सर्वसत्त्वानामुल्का भवेयमविद्यातमोऽन्धकारविनिवर्तनतयेत्यादिविस्तरः॥

॥ इदमुक्त्वा पुनरिदमाह। तद्याध्याशयतः परिणमयति[3] न वचनमात्रेण। तद्योदग्रचित्तः परिणामयति। हृष्टचित्तः परिणामयति। प्रसन्नचित्तः परिणामयति। प्रमुदितचित्तः स्निग्धचित्तः परिणमयति। मैत्रचित्तः प्रेमचित्तोऽनुग्रहचित्तो हितचित्तः [सुखचित्तः] परिणामयतीति विस्तरः॥

1 = Çıksas. 29, $_{13\ 21}$ 213, $_{3}$ 274, $_{3}$ —and *infra ad* III, 21, VII, 46

2 Tib çın-tu grub pa dan bde ba thob-pai

3 The Çikṣās. has parināmayati.

इदानीमात्मभावादिपरित्यागं कुर्वन्नाह ।

आत्मभावांस्तथा भोगान् सर्वत्र्यध्वगतं शुभं ।
निरपेक्षस्त्यजाम्येष सर्वसत्त्वार्थसिद्धये ॥ १०

आत्मभावानिति सर्वगतिच्युत्युपपत्तिषु सर्वकायान्[2] । निरपेक्षः सर्वप्रकारेण निरासङ्ग इत्यर्थः । त्यजामि उत्सृजामि ददामीत्यर्थः । भोगानिति उपभोग्यवस्तूनि । [3]हयगजरथप्रासादाद्याश्रयस्रक्चन्दनवस्त्राभरणकन्यादीनि । सर्वत्र्यध्वगतं शुभमिति सर्वत्रैधातुकसंगृहीतं पुण्यानेञ्ज्यस्वभावं[4] । यदि वा दानशीलादिप्रसूतं भावनामयं च । त्र्यध्वगतमतीतानागतप्रत्युत्पन्नं । स्यादेतत् । अनागतस्यासत्स्वभावस्य कोऽयमुत्सर्गो नाम । सत्यं । किं तु तत्संभवकाले तत्रासङ्गनिवारणार्थमेवमुच्यते ।

---

[1] Bhogapuṇyotsarga, cf Çikṣās 17 , and infra IX 19

[2] Ātmabhāva lus cf p 42 16 The word "âme" has in French the same meaning (body life) Bossuet *Sermons* III p 149 7 (Garnier) "Ne voyez vous pas qu'ils jettent leurs biens et qu'ils sont prets de donner leurs âmes ?"—A different meaning *Bodhic* IX 18 (261 8) see *ibid* p 108 n 4 , M Muller ad *Vadjacchedika*, 13

[3] °prāsādādyāçraya° confirmed by Tib Khan-bzans la sogs pai gnas dan —Cp Çikṣās 27, 12

[4] The "ānemjya" is curiously enough looked upon as analogous to the "çubha" On this word, whose spelling considerably differs in various MSS see Senart *Mhv* I 399 Childers s voc ānejja, ānañja (Addenda, saṅkhāro) Bendall, Çikṣās 223 n 1 237, 1, who refers to H Warren, *Buddhism*, 179 180 M Kern writes to me the following lines "Je ne veux pas cacher mon opinion que l'etymologie de ce mot en sanscrit bouddhique est tout à-fait autre que celle des scholiastes palis , ānejya et āniñja n'ont rien de commun, sauf le son, avec iñj ing Ce sont des taddhitas formés du vieux mot védique (et par là méconnu) anedya, sanscrit anindya Il est clair que āniñjehi vihārehi immediatement apres divyehi v° (Mhv I, 34, 11) donnerait un contre sens si le mot était dérivé de iñj. Vous avez bien vu qu'il est à peu près synonyme de çubha "

इदानीमेव तत्परित्यागात् । आशयस्य विशुद्धिवर्धनार्थं च । एतदेवाह । निरपेक्ष इति । तद्विपाकस्य स्वार्थेऽनपेक्षः ॥ किमर्थमेवमनुष्ठीयत इत्याह । सर्वसत्त्वार्थसिद्धये इति । सर्वसत्त्वानां त्रैधातुकवर्तिनामभ्युदयनिःश्रेयसलक्षणार्थनिष्पत्तये ॥

अतीतानागतशुभोत्सर्गस्त्वार्याक्षयमतिसूत्रेऽभिहितः[1] । यदुक्तं । कुशलानां च चित्तचैतसिकानामनुस्मृतिः । अनुस्मृत्य [27a] च बोधिपरिणामना । इदमतीतकौशल्यं । या अनागतानां कुशलमूलानां निध्यप्तिर्बोधेरामुखीकर्मसमन्वाहारः[2] । ये मे उत्पत्स्यन्ते कुशलाश्चित्तोत्पादास्ताननुत्तरायां सम्यक्संबोधौ परिणामयिष्यामि । इदमनागतकौशल्यमिति विस्तरः ॥ ॥ सर्वत्यागाधिमुक्तिं परिपूर्य[3] परित्यागचित्तवेगात्तेन[4] कायप्रयोगेणोत्सृष्टसर्वपरिग्रहः । [सर्व]परिग्रहमूलाद्भवदुःखादिमुक्तो मुक्त इत्युच्यत इति विस्तरः ॥

ननु चात्मार्थमपि किं चिद्रक्षितुमुचितमिति मात्सर्यं निराकुर्वन्नाह ।

सर्वत्यागश्च निर्वाणं निर्वाणार्थि च मे मनः ।
त्यक्तव्यं चेन्मया सर्वं वरं सत्त्वेषु दीयतां ॥ ११

---

[1] This passage is quoted in Çikṣās. 33, 13–34, 2, and again 282.

[2] °Karaṇe, from a second hand.—The Çikṣās. has yo 'nāgatānām ... nidhyaptibodher ... See notes of BENDALL on nidhyapti and āmukhīkṛ, pp. 19, 20, 33, 15, 190, 19; Samādhirāja, 13, 21 and ... "nidhyaptacitta." Tib. ... gan ma ons pa'i dge ba'i rtsa ba ... sems ... byan chub ... mnon du phyogs-pa'i las sems pa ste.

[3] Paripūrye is written in margin; read with Çikṣās. ... paripūrye tyāga°.

[4] Çikṣās. has ...vegāpannena, but Tib. ... lus kyi spyod pa des.

सर्वेषां साश्रवात्मभावादीनां निर्वाणं मोक्षः । तदर्थि च मे मनः । तदर्थि च मम चित्तं । त्यक्तव्यं चेदिति । निर्वाणसमये यदि सर्वमात्मभावादि अवश्यं परित्यज्य यातव्यं मया तदा वरं सत्त्वेषु दीयतां । किमनेन मात्सर्यहेतुना विष्टतेनेति[1] भावः ॥

5 [2]तस्मादिदमिहानुरूपमित्याह ।

[3]यथासुखीकृतश्चात्मा मयायं सर्वदेहिनां ।

यथाकामंगमकारितायां नियुक्तो मयायमात्मा कायः । सर्वदेहिनां सर्वसत्त्वानां कृते ॥ एतदेव दर्शयन्नाह ।

घ्नन्तु निन्दन्तु वा नित्यमाकिरन्तु च पांसुभिः ॥ १२

10 क्रीडन्तु मम कायेन हसन्तु विलसन्तु च ।

दत्तस्तेभ्यो मया कायश्चिन्तया किं ममानया ॥ १३

कारयन्तु च कर्माणि यानि तेषां सुखावहं ।

दण्डादिभिस्ताडयन्तु वा । अवर्णवादैर्जुगुप्सन्तु । आकिरन्तु च पांसुभिः धूलिभिरवकिरन्तु ॥ दत्तस्तेभ्यो मया काय इति

15 सर्वः सर्वेण मया तेषां परित्यक्तः[4] । किं मम समविषम-चिन्तया ॥ कारयन्तु कर्माणीति । अनवद्यानि । एतदेवाह ।

अनर्थः कस्य चिन्मा भून्मामालम्ब्य कदा चन ॥ १४

अनिष्टं कस्य चित्प्राणिनो मा भूत् । मामाश्रित्य कदा चन । इह परत्र वा ।

[1] Tib ıgyu hdıs bzun la cı zig

[2] Tib de lta-bas na hdı dag la hdı hthsam pa yın-no

[3] Minaev has yathā sukhī°

[4] Ms has sarvam parityaktam.

येषां क्रुद्धाप्रसन्ना[1] वा मामालम्ब्य मतिर्भवेत् ।
तेषां स एव हेतुः स्यान्नित्यं सर्वार्थसिद्धये[2] ॥ १५

येषां क्रुद्धा येषामप्रसन्ना वा मतिश्चित्त भवेत् । तेषां क्रुद्धाप्रसन्नमतीनां । स एव हेतुः स्यात् । क्रुद्धाऽप्रसन्ना मतिरेव । पुंस्त्वं तु तच्छब्दस्य हेतुसमानाधि[27ª]करणतया । 5
सर्वार्थसिद्धय इति । आत्मपराभ्युदयनिःश्रेयसनिष्पत्तये ।

अभ्याख्यास्यन्ति मां ये च ये चान्येऽप्यपकारिणः ।
उत्प्रासकास्तथान्येऽपि[3] सर्वे स्युर्बोधिभागिनः ॥ १६

अभ्याख्यास्यन्तीति मिथ्यारोपितदोषेण दूषयिष्यन्ति । अन्येऽपि ये कायिकं मानसिकं वाऽपकारं करिष्यन्ति । उत्प्रासका 10
इति उपहासकाः विडम्बकारिणो वा । तथान्येऽपीति । उदासीनाः प्रसन्नाश्च । सर्वे भवेयुर्बुद्धत्वलाभिनः ।

अनाथानामहं नाथः सार्थवाहश्च यायिनां ।
पारेप्सूनां च नौभूतः सेतुः संक्रम एव च ॥ १७

अनाथानामिति सानाथ्यान्वेषिणां । सार्थवाहश्च यायिना- 15

---

1 Minaev has yeṣām kruddhā pra° — On this important topic of the doctrine, see Chap VI, 47 and foll

2 Minaev has sa eva teṣām hetuḥ sarveṣv asiddhaye,—but L³ teṣām sa eva, M L² sarvārtha°

3 Minaev and Text Mss anyo vā This çloka is quoted *supra ad* I 35, with the same reading anyo vā, but the ṭipp has tathānye'pi udāsīnāḥ prasannāḥ

मिति सार्थमुख्यो मार्गप्रपन्नानां । पारेप्सूनामिति नद्यादीनां पारिमकूलं[1] गन्तुकामानां ।

दीपार्थिनामहं दीपः शय्या शय्यार्थिनामहं ।
दासार्थिनामहं दासो भवेयं सर्वदेहिनां ॥ १८

5 दीपार्थिनामिति अन्धकारावस्थितानां । शय्यार्थिनामिति शयनाभिलाषिणां । दासार्थिनामिति उपस्थानार्थं ये भृत्यकर्मकरादीनिच्छन्ति[2] ।

चिन्तामणिर्भद्रघटः सिद्धविद्या महौषधिः ।
भवेयं कल्पवृक्षश्च कामधेनुश्च देहिनां ॥ १९[3]

10 चिन्तामणिरिति चिन्तितफलदाता रत्नविशेषः । भद्रघट इति यद्यदस्त्वभिलषितमभिसंधायास्मिन् हस्तं प्रक्षिपेत् तत्तदेव संपद्यते । सिद्धविद्येति सिद्धमन्त्रः । यद्यत्कर्म तया क्रियते तत्तदेवं सिध्यति । महौषधिरिति यदेकैव सर्वोपद्रवपीडाप्रशमनहेतुः । कल्पवृक्षश्चेति कल्पितार्थसंपादनो वृक्षविशेषः । काम-
15 धेनुश्चेति या वाञ्छितदोहं दुह्यते ।

पृथिव्यादीनि भूतानि निःशेषाकाशवासिनां ।
सत्त्वानामप्रमेयाणां यथा भोगान्यनेकधा[4] ॥ २०

---

[1] Not P W, but CHILDERS pārimo, and *Mhv* I 574

[2] Same ideas *Çikṣās* 23, 7 35, 7

[3] Cp *Çikṣās* 155, 8 and n. 3

[4] M KERN prefers a reading bhogya, bhoga being rather doubtful as an adjective

एवमाकाशनिष्ठस्य सत्त्वधातोरनेकधा।
भवेयमुपजीव्योऽहं[1] यावत्सर्वे न निर्वृताः॥ २१

पृथिव्यादीनीति। पृथिवी वसुधरा। आदिशब्दादापस्तेजो वायुरिति चत्वारि महाभूतानि। तानि यथा शयनाशनवस्त्रफलमूलाद्याधारतया। तथा यानावगाहनादिहेतुतया[2]। एवमन्यत्रापि योज्यं। अनन्ताकाशधातुव्यापिनामसंख्यानां सत्त्वानां परिभोगमुपयान्ति। एवमेवाहमपि सर्वसत्त्वानामने[28a]कप्रकारेणोपभोग्यो भवेयं। यावत्सर्वे न निर्वृता इति यावत्सर्वे न संसारदुःखविनिर्मुक्ताः॥

तस्मादेषामात्मभावादीनामुत्सर्गः कार्यः बोध्यर्थिना॥ एतच्च दानमतिविस्तरेण शिक्षासमुच्चये प्रदर्शितं[3]। तद्यथा। तत्रैव बोधिसत्त्वप्रातिमोक्षे कथितं। पुनरपरं शारिपुत्र बोधिसत्त्वः सर्वधर्मेषु परकीयसंज्ञामुत्पादयति। न कं चिद्भावमुपादत्ते। तत्कस्य हेतोः। उपादानं हि भयमिति॥ ॥ इदमुक्त्वा तत्रैव पुनरिदमुक्तं। तथा चित्तशूराः खलु पुनः शारिपुत्र बोधिसत्त्वा भवन्ति। यावत्स्वहस्तपरित्यागी भवति। पादपरित्यागी नासापरित्यागी शीर्षपरित्यागी अङ्गप्रत्यङ्गपरित्यागी। यावत्सर्वस्वपरित्यागीति॥

एवं नारायणपरिपृच्छायामप्यभिहितं[4]। न तद्वस्तूपादातव्यं

---

[1] Cp *Gaganagañjasūtra* quoted Çikṣās p 270, $_{18}$

[2] Tipp has tathā dhāraṇayānāvagāhaçītatāpāpanodādiprakāreṇa

[3] See Çikṣās 18, $_{17}$, 20 $_{18}$ [4] See Çikṣās 21 $_{1, 2, 5, 6}$, and *supra* I, 33

According to Prof BENDALL, "ativ° refers to that fearfully long passage beginning at *Çikṣās* 22, $_{5}$-33, $_{10}$ — tadyathā = *exempli gratia*"

यस्मिन् वस्तुनि नास्य त्यागचित्तमुत्पद्येत । न त्यागबुद्धिः क्रमेतेति यावत् । अपि तु खलु पुनः कुलपुत्र बोधिसत्त्वेन [महासत्त्वेनैव] चित्तमुत्पादयितव्यं । अयं ममात्मभावः[1] सर्वसत्त्वेभ्य उत्सृष्टः परित्यक्तः । प्रागेव बाह्यानि वस्तूनीति विस्तरः ।

5 तथाऽर्याक्षयमतिसूत्रेऽपि देशितं[2] । अय मया कायः सर्वसत्त्वानां किंकरणीयेषु क्षपयितव्यः । तद्यथेमानि चत्वारि महाभूतानि पृथिवीधातुरब्धातुस्तेजोधातुर्वायुधातुश्च नानासुखैः नानापर्यायैः नानारम्बणैः नानोपकरणैः नानापरिभोगैः सत्त्वानामुपभोगं गच्छन्ति । एवमेवाहमिमं चतुर्महाभूतसमुच्छ्रय काय

10 नानासुखैः नानापर्यायैः नानारम्बणैः नानोपकरणैः [28b] नानापरिभोगैर्विस्तरेण सर्वसत्त्वानामुपजीव्यं करिष्यामीति विस्तरः ॥

तच्चित्तरत्नेत्याद्यारभ्य[3] सर्वमिदं पूर्वकं बोधिचित्तसवरग्रहणाय प्रयोगो वेदितव्यः । तदेव पूजादि विधायात्मभावादिदानमुत्सृज्य प्रतिपन्नबोधिचित्तानुशंसः क्षणसंपदं परम-

15 दुर्लभामवेत्य[4] श्रद्धामूलं दृढमुपस्थाप्य सत्त्वानत्राणानपरायणान् करुणायमानः स्वसुखनिरपेक्षः परदुःखदुःखी तत्समुद्धरणाश्रयाभिप्रायो बुद्धत्वमेव तदुपाय समुत्पश्यंस्तत्र बद्धसंनाहः ।

---

[1] Ms has mayātmabhāvaḥ

[2] Çikṣās 21, 23, with readings ayam eva mayā tadyathāpi nāmemāni bāhyāni catvāri satvānām nānopabhogam gacchanti, evam evāham imam kāyam sarvasatvānām upabhogyam kariṣyāmi

[3] *supra* II, 1

[4] See Çikṣās 5, 13 Tipp has kṣaṇasampado durlabhatām bodhicittotpādasya mahānuçaṃsatām avagamya *tac cittety ādinā* pūjām ātmabhāvādidānam ca vidhāya prayogasampanno yathā gṛhītam ity ādinā bodhicittam utpādayati

यदात्मनः परेषां च भयं दुःखं च न प्रियं ।
तदात्मनः को विशेषो यत्तं रक्षामि नेतरं ॥ इति[1] ।

तेनात्मनः सत्त्वधातोश्च

दुःखान्तं कर्तुकामेन सुखान्तं गन्तुमिच्छता ।
श्रद्धामूलं दृढीकृत्य बोधौ कार्या मतिर्दृढा ॥ इति[2] । 5

सम्यक्संबोधिचित्तमुत्पादयितुमुपक्रमते ।

यथा गृहीतं सुगतैर्बोधिचित्तं पुरातनैः ।
ते बोधिसत्त्वशिक्षायामानुपूर्व्या[3] यथा स्थिताः ॥ २२

येनाशयेन सर्वसत्त्वानां सर्वदुःखप्रहाणार्थं । यदि वा यथा गृहीतं तदेव[4] भगवन्तो जानन्ति ॥ बोधिचित्तमिति बोधि- 10 र्बुद्धत्वं सर्वावरणप्रहाणात्[5] सर्वधर्मनिःस्वभावताधिगमः । एतच्च सप्रचयं[6] प्रज्ञापरिच्छेदे वक्ष्यामः । तत्र चित्तमध्याशयेन तत्प्राप्तये मनसिकारः । बुद्धो भवेयं सर्वसत्त्वहितसुखसंपादनायेत्यर्थः[7] ॥

---

1 This stanza occurs *infra* VIII, 96, read yadā mama, with the printed text and Çikṣās 2, 10

2 This passage (since 87, 1) occurs in Çikṣās 2, 10-11 Cf. *ibidem* 5, 13

3 Minaev has anupūrvyā

4 Ms has gṛhītamiti eva, and in margine, after mi, the syllabe ti" Tib. yan na ji-ltar bzun ba de ñid bcom ldan-hdas-kyis mkhyen pao.

5 "By the abandoning of the two āvaraṇas (kleça°, jñeya°)"

6 Tib spros pa dan bcas pai = saprapañcam = vistareṇa

7 The tipp has bodhicittam parārthāya samyaksambodhikāmatā

इति पूर्वार्धेन बोधिचित्तोत्पादं प्रतिपाद्य शिक्षासंवरग्रहणं प्रतिपादयन्नाह। ते बोधिसत्त्वेत्यादि। बोधिसत्त्वशिक्षा यदुत्पादितबोधिचित्तेन बोधिसत्त्वेन सदा करणीयं। तच्चेत्यर्थः। आनुपूर्व्येति। अनु[29][1] + + + + + + + + + +

---

[1] Here a lacune of ten leaves in our Ms. See in the Appendice the Tibetan translation of the missing fragment (III 22^b—IV 46)

प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां बोधिचित्ताप्रमादश्चतुर्थः परिच्छेदः।

[40a] नाय। न तु क्लेशशत्रोः। न तस्येतरशत्रुवत्समाचारो[1] दृश्यते। कुतः पुनरेवमिच्छया लभ्यत इत्याह।

क्वासौ यायान्मन्मनःस्थो निरस्तः
स्थित्वा यस्मिन्मद्वधार्थं यतेत।
नोद्योगो मे केवलं मन्दबुद्धेः 5
क्लेशाः प्रज्ञादृष्टिसाध्या वराकाः॥ ४६[2]

मम चित्तान्निर्वासित। असौ क्लेशरिपुः कुत्र गत्वावस्थानं कुर्यात्। यत्रावस्थितिं कृत्वा मम वधाय यत्नमारभेत। नैव तत्स्थानमुत्पश्यामि। निर्मूलितस्य पुनरुत्थानायोगादिति भावः। अहमेव तु केवलमनुत्साही। अपटुबुद्धिप्रचारत्वात्। क्लेशाः 10 पुनरिमे निर्मूलत्वात्परमार्थतत्त्वदर्शनमात्रप्रहेयास्तपस्विनः। एतदेव प्रसाधयन्नाह।

न क्लेशा विषयेषु नेन्द्रियगणे नाप्यन्तराले स्थिताः
नातोऽन्यत्र कुह स्थिताः पुनरिमे [4]मथ्नन्ति कृत्स्नं जगत्।

---

[1] Ms samādhāro, Tib spyod-pa

[2] Metre Çālinī

[3] = tib ñon-mons = kleça, vyasana, etc infra (p 90 15) varāka = brdzun pa = alīka

[4] Minaev has punar ime but M ami, Cp infra 90, 13

मनोज्ञादिविषयदर्शनेऽपि केषांचित्संवृतेन्द्रियाणां क्लेशा-
नुत्पत्तेः परमाणुशो विचारेऽपि तत्त्वादर्शनात् । न विषयेषु ।
नापि चक्षुरादीन्द्रियगणे पूर्ववत् । धर्मचिन्ताद्यवस्थायामिन्द्रिय-
सद्भावेऽप्यनुपलब्धेः । नापि विषयेन्द्रिययोरन्तराले मध्ये तिष्ठन्ति ।
5 दृश्यानामनुपलब्धेरेव[1] । न चैतेभ्योऽन्यस्मिन् स्थाने क्वचिदवस्थिता
निश्चिताः[2] । अतो निर्मूलतया तत्त्वशून्या आगन्तुका एव ।
[3]अभूतपरिकल्पमात्रप्रसूतत्वात् ॥ तथाभूता अपि जगदशेषं
मथ्नन्ति ॥ तथा च किमत्र समुचितमस्याह ।

मायैवेयमतो विमुञ्च हृदय त्रासं भजस्वोद्यमं
10 **प्रज्ञार्थं किमकाण्ड एव नरकेष्वात्मानमाबाधसे[4] ॥ ४७**

यथा हि माया हस्त्याकारतया तदाकारशून्यापि मन्त्रौ-
षधप्रभावादिदंप्रत्ययतया[5] मन्त्रेण[6] तत्त्वरहितापि प्रतिभासते ।
तथाऽमी अपि क्लेशा विपर्याससनिमित्ता अयोनिशो मनसिकार-
समुद्भूता इदंप्रतीत्यतामात्रतो[7] निस्तत्त्वा एव प्रकाशन्ते । अतो
15 बिभेषि हि हृदय त्रास क्लेशेभ्यः । के नामामी वराकाः[8]
परमार्थतो विचार्यमाणाः[9] । अतो भजस्वोद्यम । उत्साह कुरुष्व ।

1 Cp *Nyāyabindu* 104, 10　　2 Tib nes-pa med do

3 But Tib yan dag pa yin pai　　4 Metre Çārdūlavikrīdita

5 Idampratyayatā, this word occurs frequently, for instance in the *Madhyamakavṛtti* (p 3, 10, 50, 7 of the *Buddhist Text S* edition), and in Chap IX of this book Cf *Etudes et Matériaux*, p 395, CHILDERS, s voc idappaccayā

6 Not translated in Tib and improbable Ex conj pratyayatāmātreṇa (de rkyen hdi tsam gyis) (Cp *Sarvadarçanas* 21, 1, *Bhāmatī*, (1891) 354, 7)

7 Tib rkyen hdi dag-tsam-gyis

8 = brdzun-pa = alika

9 The "paramārthato vicārāsahatvam" of every thing is one of the essential tenets of the Mādhyamika philosophy. Cp Chap IX, *Bhāmatī* 383, 17, etc

प्रज्ञार्थं तत्त्वप्रविचयाधिगमाय । किमकाण्ड एव निष्प्रयोज[10b]नमेव नरकेषु संघातादिषु क्लेशवशगतयात्मानमाबाधसे[1] । पीडयसि ॥

इदानीं प्राक्तनमर्थमशेषमुपसंहरन्नाह ।

एवं विनिश्चित्य करोमि यत्नं
यथोक्तशिक्षाप्रतिपत्तिहेतोः ।
वैद्योपदेशाच्चलतः कुतोऽस्ति
भैषज्यसाध्यस्य निरामयत्वं[2] ॥ ४८ 5

एवं समनन्तरमकलपरिच्छेदप्रतिपादितमर्थं विनिश्चित्य दृढीकृत्य । अनन्तरमायास्वभावतां[3] वा । करोमि यत्नं । 10 किमर्थं । यथोक्तशिक्षाप्रतिपत्तिहेतोः । यथोक्तशिक्षा बोधिसत्त्वस्य तेषु तेषु सूत्रान्तेषु याः करणीयतया प्रतिपादिताः । इहैव वा शास्त्रे संक्षेपेण तत्र तत्रोपदर्शितास्तासां शिक्षणार्थं ।

[4]उक्तानि च भगवता सूत्रान्तेषु बोधिसत्त्वशिक्षापदानि । यथोक्तमार्यरत्नमेघे । कथं च कुलपुत्र बोधिसत्त्वो बोधिसत्त्व- 15 शिक्षासंवरसंवृतो भवति । इह बोधिसत्त्व एवं विचारयति । न प्रातिमोक्षसंवरमात्रकेण[5] मया शक्यमनुत्तरां सम्यक्सम्बोधिमभि-

---

[1] Abstract in °tā (vaçaga°) is new

[2] Cp II, 55, V, 109

[3] Tib anantarapratipāditām māyā°

[4] 91, $_{14}$—93, $_{2}$ = Çikṣās , 17, $_{5-19}$

[5] M Kern has given the true etymology and meaning of the important and difficult word prātimokṣa, *Manual*, p 74, n 5

संबोद्धुं । किं तर्हि यानीमानि तथागतेन तेषु तेषु सूत्रान्तेषु बोधिसत्त्वसमुदाचारा बोधिसत्त्वशिक्षापदानि प्रज्ञप्तानि तेषु[1] मया शिक्षितव्यमिति विस्तरः ॥ तस्मादस्मद्विधेन मन्दबुद्धिना दुर्विज्ञेयो विस्तरोक्तत्वाद् बोधिसत्त्वस्य संवरः । ततः किं युक्तं ।

5 मर्मस्थानान्यतो विद्याद्येनानापत्तिको भवेत् ।

कतमानि च तानि मर्मस्थानानि[2] । यदुत ।

आत्मभावस्य भोगानां त्र्यध्ववृत्तेः शुभस्य च ।

उत्सर्गः सर्वसत्त्वेभ्यस्तद्रक्षाशुद्धिवर्धनं ॥ इत्युक्तं[3] ।

एष बोधिसत्त्वसंवरसंग्रहो यत्र बोधिसत्त्वानामभ्यासविश्रामेऽप्याप-

10 पत्तयो व्यवस्थाप्यन्ते ॥

यथोक्तं बोधिसत्त्वप्रातिमोक्षसूत्रे[4] । यो बोधिसत्त्वेन मार्गः परिगृहीतः सर्वसत्त्वानां कृते[5] दुःखक्षयगामी । स चेद्बोधिसत्त्वस्य तं मार्गं परिगृह्यावस्थितस्य [41a] अपि कल्पकोटेरत्ययेन एकं[6] सुखचित्तमुत्पद्यत । अन्तशो निषद्याचित्तमपि[7] । तत्र बोधि-

---

1 teşu, twice in Çikṣās

2 The Çikṣās adds yāni hi sūtrānteṣu mahāyānābhiratānām arthāyoktāni

3 "Ityuktam" is wanting in the Çikṣās —On these metrical quotations (Cp *infra ad* V, 1, 54, 80), which seems collectively to form the skeleton, the mūlasūtra, of the Çikṣāsamuccaya, see Prof BENDALL's Introduction —See V, 106

4 °sūtra wanting in Çikṣās

5 *Çikṣas* kṛtena —Çikṣās Ms. has duḥkhakṣa gāmi (C B). Tib , in both works zad par hgyur-bai lam

6 Tib hdug pa tsam gyi bde-ba hdod-pai sems cig

7 Ms has niçadyā°, the Ms of the *Çikṣās* niṣadyā —Niṣadyā is given from Lexx only in P W , but see APTE and *M Vyut* 261, 31, *Mhv* II, 398, 20, 403, 1 (C B)—Tib (see n 6) = niṣadyā mātrasukhecchācittam ekam

सत्त्वेन एव चित्तमुत्पादयितव्यं। सर्वसत्त्वानामात्ययिक परिग्टह्य एतदपि मे बहु[1] यन्निषीदामीति।

अत एवाह। वैद्योपदेशादिति। यथा वैद्योपदेशम-कुर्वाणस्य। भैषज्यं साध्य करणीय यस्य भैषज्येन वा साध्यस्य रोगिणः कुतोऽस्ति निरामयत्वं नीरोगता। तथा सर्वज्ञमहा- 5 वैद्योपदिष्टशिक्षाप्रतिपत्तिमकुर्वतः कुतो निरामयत्वं। कर्म-क्लेशोपजनितजात्यादिदुःखमहाभयादिमुक्तिः।

[2]तदेव समात्तसंवरस्य सामान्यमापत्तिलक्षणमुच्यते। येनापत्ति-लक्षणेन युक्त वस्तु स्वयमप्युत्प्रेक्ष्य परिहरेत्। न चापत्तिप्रति-रूपकेष्वनापत्ति[प्रति]रूपकेषु च संमुह्येत्। बोधिसत्त्वः सर्वसत्त्वानां 10 वर्तमानानागतसर्वदुःखदौर्मनस्योपशमाय वर्तमानानागतसर्वसुख-सौमनस्योत्पादाय च निःशाथतः कायवाङ्मनःपराक्रमैः प्रयत्न न करोति[3]। तत्प्रत्ययसामग्रीं नान्वेषते। तदन्तरायप्रतीकाराय न घटते। अल्पदुःखदौर्मनस्य बहुदुःखदौर्मनस्यप्रतीकारभूत नोत्पादयति। महार्थसिद्ध्यर्थं वा ऽल्पहानिं [न] करोति[4]। 15 क्षणमप्युपेक्षते। सापत्तिको भवति। संक्षेपतोऽनापत्तिः स्वशक्त्य-

---

1 *Çikṣas* (printed text) me varjayan niṣīdāmi, but Mr BENDALL informs me that the Ms. which is broken here probably had the same reading as ours, also that his Tib Version reads bdag hdi ltar hdug pa ni sems can thams cad la gnod skyur-ro, thus giving no equivalent for bahu—See *infra* the *Additions*—Tib hdug pa gan yin pa de yan m[an po] yin-no.

2 From *Çikṣas* 15, 1-13—Ms samāditum samvarasya

3 Confirmed by Tib —*Çikṣās* has prayatnam karoti / yadi tu [ta]tpratya ya°

4 *Cp. Dhp.* v 166.

विषयेषु कार्येषु । तत्र निष्फलतया शिक्षाप्रज्ञप्त्यभावात्[1] । प्रकृतिसावद्यतया[2] वान्यदृष्ट्यत एव । यत्र तु स्वशक्यगोचरेऽपि [4]योगसामर्थ्यादापत्तिः स्यात्तत्र चिन्त्य । सामान्यपापदेशनान्तर्भा-वात्ततो मुक्तिः ॥ एतत्समासतो बोधिसत्त्वशिक्षाशरीरं । विस्तर-
5 तस्त्वप्रमेय[41b]कल्प[ा]पर्यवसाननिर्देश[5] ।

अथ वा सङ्क्षेपतो द्वे बोधिसत्त्वस्यापत्ती । यथाशक्त्या[6] युक्ता-युक्तमसमीक्ष्यारभते । न निवर्तते । उपेक्षते वा । सापत्तिको भवति । निरूप्य यथार्हमतिक्रामत्यन्तशस्त्वण्डालदासेनापि चोदितः सापत्तिको भवति[7] । [8]यः पुनरेतदभ्यासार्थं व्युत्पादमिच्छति
10 तेन[9] शिक्षासमुच्चये तावच्चर्यामुखमात्रशिक्षणार्थमभियोगः कर-णीयः । [10]शिक्षणारम्भस्यैव महाफलत्वात् ॥ यथोपवर्णितं प्रशान्त-विनिश्चयप्रतिहार्यसूत्रे ॥

इति बोधिसत्त्वशिक्षा समासतो यथोपदेशतः कथितेति ॥

इति प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां
चतुर्थः परिच्छेदः[11] ॥

---

[1] Çikṣās çikṣya° [2] Ibid tvanyad

[3] Ibid Yatra ova? [4] Ibid. tyaga? Tib brtson-pa ni çugs kyis

[5] Cp infra V, 97

[6] Çikṣās Yathāçakti [7] Ends the quotation, Çikṣās 15, 12

[8] From Çikṣas 16, 1-2, where the correction vyutpāditam, suggested by the non occurrence of the form vyutpāda (Tib bye brag-tu rtogs pa)

[9] Ibid tenātra [10] Ibid Çikṣās?

[11] Sic Tib —Mss of the Text bodhicittāpramādo nāma caturthaḥ -Tipp caturthe smṛtiḥ

प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां संप्रजन्यरक्षणं पञ्चमः परिच्छेदः ।

एवमात्मभावादीनामुत्सर्गं[1] रक्षां च प्रतिपाद्य पुनर्विस्तरेण रक्षाशोधनवर्धनानि प्रतिपादयितुमुपक्रमते । उत्पादितबोधिचित्तेन हि बोधिसत्त्वेनोत्सृष्टस्यापि चात्मभावस्य रक्षाशोधनवर्धनानि कार्याणि[2] । यस्मात् ।

> परिभोगाय सत्त्वानामात्मभावादि दीयते । 5
> अरक्षिते कुतो भोगः किं दत्तं यन्न भुज्यते ॥
> तस्मात् सत्त्वोपभोगार्थमात्मभावादि पालयेत्[3] ।
> कल्याणमित्रानुत्सर्गात्[4] सूत्राणां च सदेक्षणात्[5] ॥

तच्चात्मभावादिपरिपालनादि शिक्षारक्षणादेव स्यात् । अन्यथा नरकादिविनिपातगमनात् तन्न स्यात् । अत इदमभिधीयते । 10

शिक्षां रक्षितुकामेन चित्तं रक्ष्यं प्रयत्नतः ।
न शिक्षा रक्षितुं शक्या चलं चित्तमरक्षता ॥ १

शिक्ष्यते उपादीयते गृहीतसंवरेणेति । विहितेषु करणीयता । प्रतिषिद्धेष्वकरणं शिक्षा ॥ तां रक्षितु परिपालयितु । कामेन ।

---

1 Ātmabhava = Tib lus-po

2 Cp *supra ad* IV, 48 (*Çikṣā*. 17, 13, and Chap VI (Ātmabhāvarakṣā) VII (*Bhogapuṇyarakṣā*) —*puṇyavṛddhi*, *infra* V, 101, 102

3 = Çikṣās 34, 11

4 *Ibidem*, 34, 18 Cp V, 103

5 *Ibidem*, 41, 10 Cp. *Supra*, p. 92, n. 3

6 Tib sems-can-dmyal-ba

इत्युक्तता बोधिसत्त्वेन । आत्मचित्तं रक्षितव्यं [12ᵃ] । प्रयत्नत इति कथयिष्यमाणात् ॥ अथ शिक्षारक्षणाधिकारे किमिति चित्तं रक्ष्यत इत्याह । न शिक्षेति । अन्यथा शिक्षैव रक्षितुमशक्या चलमनायत्तं चित्तमरक्षता । चित्तस्य चलतायां
5 शिक्षायाः स्थैर्यायोगात् ॥

इतोऽपि चित्तमेव रक्षणीयमित्याह ।

अदान्ता मत्तमातङ्गा न कुर्वन्तीह तां व्यथां ।
करोति यामवीच्यादौ मुक्तश्चित्तमतङ्गजः[1] ॥ २

अपरिकर्मिता मत्तवरवारणा न जनयन्ति तां पीडामिह-
10 लोके । परलोके ऽवीच्यादौ यां करोति स्वच्छन्दचारितयावस्थितं । चित्तमेव मतङ्गज एव[2] । तथागताज्ञाङ्कुशेन कथं चित्
वशीक्रियमाणत्वात् ॥

तस्यायत्तीकरणे गुणमाह ।

बद्धश्चेच्चित्तमातङ्गः स्मृतिरज्ज्वा समन्ततः ।
15 भयमस्तंगतं सर्वं कृत्स्नं कल्याणमागतं ॥ ३

यदि बद्धः कथं चिद्भवेत् । स्मृतिर्वक्ष्यमाणलक्षणा । सैव रज्जुर्बन्धनोपायत्वात् । समन्ततः सर्वथासत्पक्षे प्रचारनिरोधात् । तदा भयमस्तगतं प्रत्यस्तमितं सर्वमशेषं । सर्वं कल्याणं ।

---

1 See Çikṣās 118, 12, and *infra* V, 40

2 Ms matangajameva

3 Cp *infra ad* V 23, Çikṣās Chap VI.

अभ्युदयनिःश्रेयसलक्षणं । आगतमप्राप्तं । देवश्चेद् वृष्टो निष्पन्नाः शालय इति यथा[1] ॥

ननु बहवश्च मृगव्यालादयोऽप्युपद्रवकारिणः सन्ति । तेभ्यः कथं चित्तस्य वशीकरणाद्भयं न भविष्यतीत्याह ।

व्याघ्राः सिंहा गजा ऋक्षाः सर्पाः सर्वे च शत्रवः । 5
सर्वे नरकपालाश्च डाकिन्यो राक्षसास्तथा ॥ ४
सर्वे बद्धा भवन्त्येते चित्तस्यैकस्य बन्धनात् ।
चित्तस्यैकस्य दमनात् सर्वे दान्ता भवन्ति च ॥ ५

सुबोधं ॥ कुतः पुनरेवमित्याह ।

यस्माद्भयानि सर्वाणि दुःखान्यप्रमितानि च । 10
चित्तादेव भवन्तीति कथितं तत्त्ववादिना ॥ ६

सर्वे [ह्ये][ते] कर्माक्षेपवशादनिष्टदायका भवन्ति । कर्म च चित्तमेव चेतना कर्मेति वचनात्[2] । वाक्कायकर्मणोरपि चित्तमेव समुत्थापकं । तदन्तरेण तयोरनुत्पत्तेः । चेतयित्वा कर्मेति वचनात्[2] । तस्मात्सर्वमिह कर्मनिर्मितमेव । तच्च चित्तान्नान्यत्[3] । 15
तदाह ।

---

[1] Quoted *ad* III, 22.

[2] Quoted *infra ad* IX, 73 (p. 30? of the printed text). *Madhy. vṛtti* XVII, 2 cetanā cetayitvā ca karmoktaṃ paramarṣiṇā. See the first words of the Bodhisattvāvatāra ... quoted by ... (*Dh. sm.* §§ 4–5).

[3] *See* but Tib. de yin sems las gzan ma med pa phyir ro = tac ca cittād ananyatvāt.

कर्मजं लोकवैचित्र्यं चेतना तत्कृत च तत्[1]।
चेतना मानसं कर्म तज्जे वा[12b]कायकर्मणी ॥ इति ।

न चानपकारचित्तस्य के चिदपकारिणो नाम[2]। यस्मात् ।

निवृत्तपापचित्तस्य नास्ति लोके भयं द्विष ।
5 सुखहानिर्न तस्यास्ति यस्य चित्त वशे स्थितं ॥

अत इदमुक्त।

चित्तस्य दमन साधु चित्त दान्त सुखावह । इति[3] ॥

तत्त्ववादी भगवान् वस्तुतत्त्वकथनशीलत्वात् । तेनेद तत्त्व कथितं प्रकाशित। सर्वं चित्तप्रसूतमिति। अत: सर्वत्र चित्तमेव
10 प्रधान ॥

इत्थमेवैतन्नान्यथा । इति प्रसाधयन्नाह ।

शस्त्राणि केन नरके घटितानि प्रयत्नतः ।
तप्तायःकुट्टिमं केन कुतो जाताश्च ताः स्त्रियः॥७

नरकपालाना कुन्तासिमुसलादीनि। असिपत्त्रवनमसुद्भूतानि
15 वा। केन कृतानि। न तत्र कश्चित्कर्तास्ति ईश्वरादि। तत्कर्तृत्वस्यान्यत्र निषिद्धत्वात् । इहापि निषेत्स्यमानत्वात्[4] ॥ तप्तलोहमयी च भूमि केन घटिता। ताश्च स्त्रियः कुतः कारणसामग्रीतो जाता याः पारदारिकै शाल्मलीवृत्तस्याधस्ता-

---

[1] Tib de m sems pa dan des byas —This Stanza is quoted IX 73 (p 305 18)
[2] Cp supra ad I, 34, 36
[3] Quoted Chap IX, (312, 8) and notes in loco (cp Dhammapada, 25)
[4] Cp Chap IX, 119-126

दुपरि च दृश्यन्ते। स च शाल्मलिर्वा । अतो नान्यत्कारणमत्र चित्तादुपकल्पनीयं। यदुक्तं ।

सत्त्वलोकमथ भाजनलोकं
चित्तमेव रचयत्यतिचित्रं ।
कर्मजं हि जगदुक्तमशेषं 5
कर्म चित्तमवधूय च नास्ति ॥[1] इति ॥

तस्माच्चित्तमेवात्र कारणं नान्यदित्यत आह ।

पापचित्तसमुद्भूतं तत्तत्सर्वं जगौ मुनिः ।
तस्मान्न कश्चित्त्रैलोक्ये चित्तादन्यो भयानकः ॥ ८

पापकर्मोपस्कृतं चित्तमेव तेषां कारणं भगवान् कथितवान् । 10
नापरं किं चित् ॥ यत एव तस्मान्न त्रिजगति पापचित्तादपरः कश्चिद्भयहेतुरस्ति । तस्माच्चित्तमेव वशीकर्तव्यं ॥ यदुक्तमार्यरत्नमेघे[2] । चित्तपूर्वंगमाः सर्वधर्माः । चित्ते परिज्ञाते सर्वधर्माः परिज्ञाता भवन्ति ॥ अपि च

चित्तेन नीयते[3] लोकः [13a] चित्तं चित्तं न पश्यति[4] । 15
चित्तेन चीयते कर्म शुभं वा यदि वाशुभं ॥

चित्तं भ्रमतेऽलातवत् । चित्तं विभ्रमते तरङ्गवत्[5] । चित्तं दहते दवाग्निवत् । चित्तं रोहयते[6] महाम्बुवदिति च । एवं

---

[1] Quoted ad IX 73 (p 305, 2,) and Pañcakramaṭ, 10, 1 39

[2] Quoted Çikṣās 121, 12 Cp Dhammapada I.

[3] Mss citte vicivate, but Tib confirms the reading of the Çikṣās — Cp Lankav 52, 15 cittena cīyate karma manasā ca vidhīyate

[4] Cp IX, 17

[5] Mss turangi, but Tib rlabs

[6] Çikṣās hanate (Tib bskyed)

व्युपपरीक्षमाणश्चित्ते सूपस्थितस्मृतिर्विहरति । न च चित्तस्य वशं गच्छति । अपि तु चित्तमेवास्य वशं गच्छति । चित्तेनास्य वशीभूतेन सर्वे धर्मा वशीभवन्तीति ॥

स्यादेतत् । दानपारमितादिषु कथमिव चित्तं प्रधानं[1] । सा 5 हि सर्वसत्त्वानां दारिद्र्यापनयनलक्षणेत्याह ।

अदरिद्रं जगत्कृत्वा दानपारमिता यदि ।
जगद्दरिद्रमद्यापि सा कथं पूर्वतायिनां ॥ ९

दारिद्र्यं हि नाम मात्सर्यसुखभोगतृष्णया चित्तकार्पण्यं उपकरणवैकल्यं वा । तदपनीय जगतो यदि दानपारमिता-10 परिपूरिर्भवतीत्युच्यते[2] । तदा सा कथं । न कथं चिदपि । पूर्वतायिनां पूर्वमभिसंबुद्धानां भगवतां युज्यते । कुतः । जगद्दरिद्रमद्यापि । नाद्यापि यावज्जगद्दारिद्र्यमुपशाम्यति ॥ यद्येवं नेष्यते । कथं तर्हि सा भवतीत्याह ।

फलेन सह सर्वस्वत्यागचित्ताज्जनेऽखिले[3] ।
15 **दानपारमिता प्रोक्ता तस्मात्सा चित्तमेव तु ॥ १०**

सर्वस्वं बाह्याध्यात्मिकं सर्वं वस्तु दानं[4] दानफलं च सर्व-

---

1 Cp supra 98, 10

2 Paripūri, Cf M Vyut 214 71, SENART, Mhv I 373

3 So L2 M and Tib sems kyis, Dev 85 B 90 °sv atyāgacittam, Min sarvasvam —It is worth remark that the "puṇya" produced by the "puṇya-dāna" is only to be desired, for the welfare of beings (Çikṣās 147, 5) the doctrine of Manu IV, 32

4 So Tib and Ms

सत्त्वेभ्यः परित्यजतोऽभ्यासेन प्रकर्षगमनात्[1] यदापगतमात्सर्यमलं निरासङ्गतया चित्तमुत्पद्यते । तदा दानपारमिता निष्पन्नेत्युच्यते । तस्मात् सा चित्तमेव नान्या दानपारमिता ॥ शीलपारमिता तु सुतरां चित्तमेवेत्यत आह ।

मत्स्यादयः क्व नीयन्तां मारयेयं यतो न तान् ।
लब्धे विरतिचित्ते तु शीलपारमिता मता ॥ ११

प्राणातिपातादिसर्वावद्यविरतिचित्तमेव हि शीलं । न पुनस्तदाश्रयभूतबाह्यविषयनिवृत्तिस्वभावं । यदि पुनर्वधादिविषयवस्त्वभावेन तद्वधाद्यभावाच्छीलं स्यात् । तदा ते मत्स्यादयः[2] क्व नीयन्तां यत्र तेषां दर्शनं न स्यात् । अन्यथा 10
तद्वधाद्युपक्रमे शीलं न स्यात् । न चैवं । तस्मात्तेषु विद्यमानेष्वपि लब्धे विरतिचित्ते निवृत्तिमनसिकारे[3] शीलपारमिता मता संमता तत्स्वभावविदां । तस्मात्सा चित्तमेव ॥ क्षान्तिपारमितापि न चित्ताद्भिन्नेत्याह ।

कियतो मारयिष्यामि दुर्जनान् गगनोपमान् । 15
मारिते क्रोधचित्ते तु मारिताः सर्वशत्रवः ॥ १२

परापकारादिसंभवेऽपि चित्तस्याकोपनता क्षान्तिः । अन्यथा

---

[1] On this expression and the connected one prakarṣaparyanta°, see Nyāyabinduṭīkā, 14 22, and Chap. ix of this book.

[2] Tib. adds gzan gyi bdog pa dan bud-med dan chan la sogs pa parasvaṃ ca striyaç ca madyādi ca.

[3] Tib. sems ldog par yid la byed pa.

यदि सर्वशत्रूणां तद्विनिपातनेन[1] वैरनिर्यातनं कृतवतः केन चिद्वैराभावादुपशान्तवैरस्य न कश्चिदपकारी स्यात् । इति मर्षणं क्षान्तिः ।[2] तदेतदशक्यानुष्ठानं । शत्रवो हि गगनसमत्वादपर्यन्ताः[3] । तेषां मारणमशक्यं । तस्मात् क्रोधादिनिवृत्तिचित्तमेव तेषामुपायेन मारणमिव । तत्कृतापकारस्यागणनात्[4] । जन्मान्तरवैरासम्भवाच्च[5] । मारितप्रायास्ते ॥ अत्राशक्यतायामप्युपायेन प्रवृत्तौ दृष्टान्तोपदर्शनेन शक्यतामाह ।

भूमिं छादयितुं सर्वां कुतश्चर्म भविष्यति ।
उपानच्चर्ममात्रेण छन्ना भवति मेदिनी ॥ १३

कण्टकाद्युपघातरक्षणार्थं पृथ्वी छादयितुमुचिता । न चैतच्छक्यं । तावतश्चर्मणोऽभावात् । भावेऽपि छादनस्याशक्यत्वात् । उपायेन पुनः शक्यं । उपानहश्चर्मणा केवलेन सर्वा भूमिश्छादिता भवति ॥ दृष्टान्तोक्तमर्थं प्रकृते योजयन्नाह ।

बाह्या भावा मया तद्वच्छक्या वारयितुं न हि ।
स्वचित्तं वारयिष्यामि किं ममान्यैर्निवारितैः ॥ १४

शत्रुप्रभृतयो भावा मया वारयितुमशक्याः । तद्वत् मेदिनीचर्मच्छादनवत् । अपकारक्रियायाः । अतः स्वचित्तमेव शक्यं वारयिष्यामि । अन्यवारणस्यापार्थकत्वात् । स्वचित्त-

---

1 Hitherto only "das zur Fehlgeburt bringen" (W K F)

2 Ms tad etad, Tib der these de

3 See *supra* I, 33

4 Agaṇana is new, cp W K F s voc gaṇana, agaṇayant

6 There an application of the principle, *supra* p 98 n 2

वारणादेव तत्सिद्धेः। तस्मात्सा चित्तमेव ॥ वीर्यपारमिता तु कुशलोत्साहस्वभावाऽतिविस्पष्टं चित्तमेवेत्याह[14a]।

सहापि वाक्छरीराभ्यां मन्दवृत्तेर्न तत्फलं।
यत्पटोरेककस्यापि चित्तस्य ब्रह्मतादिकं ॥ १५

वचनकायसहितस्यापि चित्तस्य कुशलपक्षे मन्दप्रचारस्य न 5
तादृशं फलमुपजायते । यादृश ध्यानादिविषये पटुप्रवृत्तेरेकाकिनोऽपि चित्तस्य फल ब्रह्मभूयादिक। तस्मात् सा चित्तमेव ॥ ध्यान तु चित्तैकाग्रतालक्षणं चित्तादन्यथा वक्तुमशक्यमित्याह ।

[1]जपास्तपांसि सर्वाणि दीर्घकालकृतान्यपि ।
अन्यचित्तेन मन्देन वृथैवेत्याह सर्ववित् ॥ १६　　10

मन्त्राद्यावर्तनलक्षणा वचनव्यापारा जपा । तपांसि चेन्द्रियदमनलक्षणाः कायिका । तान्यतिबहुकालमभ्यस्तान्यपि । अन्यत्र सक्तचित्तेन मिद्धाद्युपहतचित्तेन[2] वा । समानपाटवविकलेनेत्यर्थ । वृथैव निष्फलमेव । अत्यर्थकृशफलत्वात् । अभिमतार्थेऽनुपयोगाद्वा । पुत्रोऽप्यपुत्र एव पुत्रकार्याकरणाद्यथा । इत्याह 15
भगवान् सर्वज्ञः। तस्माद् ध्यानपारमितापि चित्तमेव ॥ प्रज्ञा तु निर्विवादा चित्तमेवेत्याह ।

---

1 See J R A S 1895, p 435 and *Ādikarmapradīpa* in (*Études et Mat.*, p 203)
tathā coktam *Vidyādharapiṭake* japas tapāṃsi … anyacittena mandena sarvaṃ bhavati niṣphalam (Cf. *Çikṣas* 142, 12)

2 As observed by KERN (*Saddh. puṇḍ.* p 319) 'middha is a would be Sanskrit form it ought to be mṛddha from Vedic mṛdhyati'

3 So Ms., But Tib. bsam gtan la gsal = dhyānapaṭava, or samādhi?

दुःखं हन्तुं सुखं प्राप्तुं ते भ्रमन्ति मुधाम्बरे[1] ।
यैरेतद्धर्मसर्वस्वं चित्तं गुह्यं[2] न भावितं ॥ १७

पञ्चगतिससारजात्यादिदुःखं प्रहातु तत्प्रहाणे निर्वाणसुख-
मधिगन्तुं ते सत्त्वा मुधा निरर्थका एव भ्रमन्ति अम्बरे कामी-
5 पुष्पमिव[3] निष्फल ससारे । यदनुष्ठित क चिदपि न लग्नमिति
तदेवमभिधीयते पञ्चाग्निसेवाग्निरोलुञ्चनादिव्रतं । के पुनरेवं
भ्रमन्ति । यैः ससारभयभीरुभिः सुखार्थिभिश्च धर्मसर्वस्व
सर्वलौकिकलोकोत्तरधर्मनिदानभूत चित्त बालानामगोचर-
स्वभावतया गुह्य न भावितं तत्त्वचित्ततया[4] पुनः पुन
10 स्थिरीकृतं ॥

तस्मादियमतितरां चित्तमेव । यथोपवर्णितमार्यगण्डव्यूहे[5] ।
स्वचित्ताधिष्ठान सर्वबोधिसत्त्वचर्या । स्वचित्ताधिष्ठान सर्वसत्त्व-
[परि]पाकविनयः[6] ॥ पेयालं ॥ तस्य मम कुलपुत्र एव भवति
स्वचित्तमेवो[14b]पस्तम्भयितव्य [सर्व]कुशलमूलै । स्वचित्तमेव
15 परिस्यन्दयितव्य[7] धर्ममेघै. । स्वचित्तमेव परिशोधयितव्य-
मावरणीयधर्मेभ्यः[8] । स्वचित्तमेव दृढीकर्तव्य वीर्येणेत्यादि[5] ॥

इति चित्तस्वभावतां सर्वत्र प्रतिपाद्योपसहरन्नाह ।

---

1 Sic Dev., Burn., Minaev has ˚ti adhambare

2 Minaev has cittaguhyam

3 *Kiśu Moringa pterygosperma (W. K. F.), Tib. me tog ki çib m du

4 tattvacittatatvā [ta]yā the italicised syllables marqued in Ms. as suspect, the syllable [ta], supplied in margine. Tib. de kho na nyid kyi sems kyis = tattvatvacittena

5 5 = Çikṣās. 122, 11–14 6 Cf. Lal. Vist. 217. b

7 Çikṣ. has ˚evibhūṣayitavyam, Tib. yons su

8 ibid. āvaraṇavo dh. See supra, p. 16, n. 1

तस्मात्स्वधिष्ठितं चित्तं मया कार्यं सुरक्षितं ।
चित्तरक्षाव्रतं मुक्त्वा बहुभिः किं मम व्रतैः ॥ १८[1]

एवमुत्पादितबोधिचित्तेन शिक्षारक्षणे यत्नवता मनसि कर्तव्यं । स्वधिष्ठितं स्मृत्या सुरक्षितं सम्प्रजन्येन वक्ष्यमाणरीत्या मया स्वचित्तं कर्तव्यं तदेकाग्रमानसेन । अत्रैव सर्वेषामन्तर्भावात् । अतश्चित्तरक्षणमेव प्रधानं व्रतं । तद्विहाय किमन्यैर्व्रतैर्बहुभिरपि मम प्रयोजनं । न किंचित्तद्रहितस्य निष्फलत्वात् । 5

[2]एतावती चेयं बोधिसत्त्वशिक्षा यदुत चित्तपरिकर्म एतन्मूलत्वात्सर्वसत्त्वार्थानां[3] ।

तद्यथा धर्मसंगीतिसूत्रे कीर्तितं[4] । मतिविक्रमबोधिसत्त्व आह । योऽयं धर्मो धर्म इत्युच्यते । नायं धर्मो देशस्थो न[5] प्रदेशस्थोऽन्यत्र स्वचित्ताधीनो धर्मः । तस्मान्मया स्वचित्तं स्वाराधितं स्वधिष्ठितं सुपरिजितं[6] सुसमारब्धं सुनिगृहीतं कर्तव्यं । तत्कस्य हेतोः । यत्र चित्तं तत्र गुणदोषाः[7] । तद्बोधिसत्त्वो दोषेभ्यश्चित्तं निवार्य गुणेषु प्रवर्तयति । तदुच्यते । चित्ताधीनो धर्मो धर्माधीना बोधिरिति[8] ॥ 10 15

[1] Quoted infra ad V, 58

[2-2] from Çikṣās. 121 ... See infra V. 58

[3] Tib. seems cons... [illegible]

[4-4] See Çikṣ. 112 ...

[5] Tib. [illegible]

[6] This word is wanting in Çikṣā

[7] Tib. adds ... cittam tatra na guṇadoṣāḥ

[8] Çikṣās. has ... tatra

एव चित्तायत्ततां सर्वत्र निश्चित्य चित्तदृढतायामुदा-
हरणमाह ।

यथा चपलमध्यस्थो रक्षति व्रणमादरात् ।
एवं दुर्जनमध्यस्थो रक्षेच्चित्तव्रणं सदा ॥ १९

5 असमाहितजनमध्ये पुनरुपघातभयात्तद्गतमनसा यथा व्रणं
रक्षति कश्चिदप्रमत्त । एव तथा शिक्षारक्षणकामः । अका-
रणवैरिबालजनमध्ये सवसन् तत्परश्चित्त व्रणमिव रक्षेत् [54]
सर्वकाल ॥ यथाप्रसिद्धित इदमुदाहरण । न तु पुनर्मनागपि
सादृश्यमस्तीत्याह ।

10 **व्रणदुःखलवाद्भीतो रक्षामि व्रणमादरात् ।**
संघातपर्वताघाताद्भीतश्चित्तव्रणं न किं ॥ २०

ईषन्मात्रं दुःख दु खलवो व्रणकृत । तस्माद्भीतो रक्षामि
व्रण । प्रकृतानुरोधे रक्षतीति पाठो युक्त[1] । आदरात्
तात्पर्येण । सघातनरकप्रभवादनेकवर्षसहस्रानुभूयमानदुःखात्[2]
15 पर्वताघातात्सर्वतो व्याप्तिप्रहारात् । भीत । चित्तव्रण न किं
रक्षेदिति प्रकृतेन संबन्धः । यदि वा । अहं तु किं न
रक्षामीति परिणामेन योजनीय । अथ वा । एवमुत्पादित-
बोधिचित्तेन मनसा चिन्तयितव्यमित्यवतार्यते । तदा रक्षा-
मीति ॥ क पुनरेवं सति गुण स्यादित्याह ।

[1] Ms yodbarı yuktum , This clause ı wan ng m Tib
[2] Cp. Mh (See Jndon pa) I, 13, n
[3] Tib der-thse bsrun bar bya o zes gdon an sbyar-bar-bya o = iti patho yojaniyah

अनेन हि विहारेण विहरन् दुर्जनेष्वपि ।
प्रमदाजनमध्येऽपि यतिर्धीरो न खण्ड्यते ॥ २१

यस्मादेवमनभिकारेण[1] विचरन् वनिताजनमध्येऽपि प्रासादपृष्ठे ऽयमनिवार्योऽतिशयेन कामरागेषु । तेनेदमुक्तं यतिर्धीर इति । अस्मिन्ननभिकारे निध्यप्तचित्तः[2] । न खण्ड्यते । शिक्षारक्षणमनभिकारान्न स्खलति । पुनरेव करणीयमित्यत्रार्थे दृढमभिनिवेशं दर्शयन्नाह ।

लाभा नश्यन्तु मे कामं सत्कारः कायजीवितं ।
नश्यत्वन्यच्च कुशलं मा तु चित्तं कदाचन ॥ २२

चीवरपिण्डपातादयो नश्यन्तु विनाशं यान्तु मम कामं यथेष्टं । सत्कारो गौरवेणासनदानपादवन्दनादिपूजा । कायो जीवितं च । सर्वमेतन्नश्यतु । अन्यदपि यत्किंचित्सुखसौमनस्यनिमित्तं । तदपि नश्यतु । कुशलं पुनर्मम चित्तं मा कस्मिंश्चिदपि काले नङ्क्षीदिति ॥ अत्र पुनरादरमुत्पादयितुं प्राञ्जलिकार आह ।

चित्तं रक्षितुकामानां मयैष क्रियतेऽञ्जलिः ।
स्मृतिं च संप्रजन्यं च सर्वयत्नेन रक्षत ॥ २३

अञ्जलिं कृत्वा प्रार्थयामि[4] । विमर्श[3] । स्मृतिं च संप्रजन्यं

[1] This word is new, cf. supra ad III. 10 [illegible] 152, [illegible]—Tib. yid la byed pa [illegible] [illegible] (ne- pa = [illegible])

[2] See L² M., Minaev has mā [illegible] cittam—Tib. [illegible]

[3] Minaev has sarvam [illegible]—samprajanya = Tib. [illegible]

[4] This pregnant meaning of the word añjali is to be noted cf. supra III, 4

च । न केवलां स्मृतिं । नापि केवलं [151] सप्रजन्यमिति
परस्परापेक्षया चकारद्वयं ।[1] तत्र स्मृतिरार्यरत्नचूडसूत्रेऽभि-
हिता । यया स्मृत्या सर्वक्लेशानां प्रादुर्भावो न भवति । यया
स्मृत्या सर्वमारकर्मणामवतारं न ददाति । यया स्मृत्या उत्पथे
5 कुमार्गे वा न पतति[2] । यया स्मृत्या दौवारिकभूतया सर्वे-
षामकुशलानां चित्तचैतसिकानां धर्माणामवकाशं न ददाति ।
इयमुच्यते सम्यक्स्मृतिरिति[3] ॥

संक्षेपतः पुनरियं स्मृतिरुच्यते । विहितप्रतिषिद्धयोर्यथा-
योगं स्मरणं स्मृतिः[4] । यच्चाह । स्मृतिरालम्बनासंप्रमोष इति ॥
10 [6] सप्रजन्यं तु प्रज्ञापारमितायामुक्तं । चरंश्चरामीति प्रजा-
नाति । स्थितः स्थितोऽस्मीति प्रजानाति । [7] निषण्णो निषण्णो-
ऽस्मीति प्रजानाति । शयानः शयितोऽस्मीति प्रजानाति ।
यथा यथाऽस्य[8] कायः स्थितो भवति तथा तथैनं[9] प्रजानाति ॥
पेयालं ॥ सोऽतिक्रामन् वा [प्रतिक्रामन् वा] संप्रजानचारी[10]

---

1 Ll. = Çikṣās. 120, [illegible] 2 sic Ms. from a second hand [illegible]

3 Cp. infra V. 33 (Bendall).

4 I have not found this quasi-metrical definition (See infra ad V. [illegible]) of the Smṛti in the Çikṣ.—from which Prajñākaramati derived all his materials.

5 Cp. for the meaning Çikṣās. 123, [illegible] and infra V. 29.—Tib. [illegible] gang gi phyir [illegible] zes bstan pa [illegible] = (yasmāt [illegible] iti deçitam)

6 See ibid. 120, 11-15. 7 Here the Çikṣ. has [illegible]

8 ibid. yathā [illegible]

9 ibid. tathaiva—enam (or ena) is wanting in Tib.

10 So Ms.: the Çikṣās. has jānīte [illegible] °jānanācārī. Prof. Bendall reads [illegible], and writes to me: [illegible] is out of the question; °[illegible] might do. I prefer my reading which allows for the utter ignorance of sandhi on the part of scribes.

भवति । आलोकिते विलोकिते संमिञ्जिते[1] प्रसारिते संघाटीपटपात्रचीवरधारणे अशिते पीते खादिते निद्राक्लम-[प्रति]विनोदने आगते गते स्थिते निषण्णे सुप्ते जागरिते भाषिते तूष्णीभावे प्रतिसंलयने संप्रजानचारी भवतीति[2] ॥

इदमेव वक्ष्यति ।

एतदेव समासेन संप्रजन्यस्य लक्षणं ।
यत्कायचित्तावस्थाया प्रत्यवेक्षा मुहुर्मुहुः ॥ इति[3] ॥

कः पुनरनयोर्व्यतिरेके दोषः । येनैते यत्नेन रक्षणीये कथिते इत्याह ।

व्याध्याकुलो नरो यद्वन्न क्षमः सर्वकर्मसु ।
तथाभ्यां व्याकुलं[4] चित्तं न क्षमं सर्वकर्मसु ॥ २४

रोगोपहतसामर्थ्यो यथा पुरुषः सर्वकर्मसु गमनभोजनादिष्वकर्मण्यो [16b] भवति । तथा स्मृतिसंप्रजन्याभ्यां विकलं चित्तं सर्वकर्मसु ध्यानाध्ययनादिलक्षणेषु ॥ अनयोः समुदायाभावे दोषमुक्त्वा प्रत्येकमभावे कथयितुमाह ।

असंप्रजन्यचित्तस्य श्रुतचिन्तितभावितं ।
सच्छिद्रकुम्भजलवन्न स्मृताववतिष्ठते ॥ २५

1 See Senart, Mvu., I, 118, and [illegible] 173, 5, Bendall.
2 Ends the quotation from Çiksas.
3 See infra V, 108, and Çiks., 118, [illegible] Burnouf, Lotus, 342.
4 Tib. [illegible]
5 Tib. [illegible]

न विद्यते संप्रजन्यं यस्मिंस्तदसंप्रजन्यं । तच्चित्तं यस्य तस्य । श्रुतचिन्ताभावनामयप्रज्ञापरिनिष्ठितं वस्तु न स्मरणमधिवसति । तन्मूलं च सर्वं कल्याणं । किमिव । यथा सच्छिद्रकुम्भे सुख-प्रक्षिप्तमुदकमधस्ताद्गच्छति नावतिष्ठते ॥ इदमपरं तद्व्यतिरेके 5 दूषणमाह ।

अनेके श्रुतवन्तोऽपि श्राद्धा यत्नपरा अपि ।
असंप्रजन्यदोषेण भवन्त्यापत्तिकश्मलाः ॥ २६

बहवोऽपि बहुश्रुताः । तथा श्रद्धावन्तो यत्नपरा शिक्षाया-मादरकारिण[1] । असंप्रजन्यदोषेणापत्तिकलुषिता भवन्ति । काय-10 चित्तप्रचाराप्रत्यवेक्षणात् ॥ अपरमपि तदभावे दूषणमाह ।

असंप्रजन्यचौरेण स्मृतिमोषानुसारिणा ।
उपचित्यापि पुण्यानि मुषिता यान्ति दुर्गतिं ॥ २७

असंप्रजन्यमेव संप्रजन्याभावः[2] क्लेशस्वभावश्चौरः कुशल-धनापहरणात् । तेन स्मृतिमोषानुसारिणा । रक्षपालभूताया 15 स्मृतेः प्रमोषमभावमनुसृत्य । मुषिता विलुप्तकुशलधनाः सन्तः । उपचित्यापि पुण्यानि कुशलधनानां सञ्चय कृत्वापि । दुर्गति-परायणा भवन्ति ॥ कुत. पुनरेवमित्युक्तमेवार्थं स्पष्टयन्नाह ।

क्लेशतस्करसंघोऽयमवतारगवेषकः ।
प्राप्यावतारं मुष्णाति हन्ति सद्गतिजीवितं ॥ २८

---

1 See *supra*, p 5 n 1
2 Cp M Vyut 9 . . . u.

तस्कराश्चौराः । तेषां सघातः । अवतारगवेषकः पिशाच-
वदवतारमार्गप्रेक्षी छिद्रान्वेषणतत्पर इत्यर्थः । प्राप्यावतारं
प्रवेशमार्गमासाद्य मुष्णाति । ततो हन्ति शोभनगतये
जीवितप्रतिलम्भं । कुशलपाथेयाभावात् ॥

स्मृतिमधिकृत्याधु[16b]ना प्राह । 5

तस्मात्स्मृतिर्मनोद्वारान्नापनेया कदाचन ।
गतापि प्रत्युपस्थाप्या संस्मृत्यापायिकीं व्यथां ॥ २९

यतः स्मृतेरभावे दूषणमेव स्यात् तस्मादिदमत्र दोष
पश्यता । स्मृतिरालम्बनासंप्रमोषलक्षणा[1] । मनोद्वारान्मनोगृह-
प्रवेशमार्गात्[2] । नापनेया नापसार्या सदावस्थापयितव्येत्यर्थः । 10
अथ कदाचित्प्रमादतस्ततोऽपगच्छेत् । तदा गतापि पुन-
र्निवर्त्योपस्थाप्या । तत्रैवारोपयितव्या । कथ । संस्मृत्य मनसि
विधाय आपायिकीं नरकादिदुर्गतिव्यथां ॥

तत्र द्वादशेमाः स्मृतयो निष्फलस्यन्दवर्जनाय[3] तथागता-
ज्ञा[न]तिक्रमानुपालनविपाकगौरवस्मृतिप्रभृतयः शिक्षासमुच्चये[4] 15
प्रदर्शिताः । तत एव विवेकेनावधार्याः ।

सापि स्मृतिस्तीव्रादादरात्समुत्पद्यते । आदरोऽपि शमथ-

---

1 Cp supra, 108, 6

2 Manogrha = cittanagara, Çiksas 123, infra V 33

3 Ms. nisphalāsy°, See infra V, 38 54 Çiksas 44, 19 116, 12, n 4, and M Vitti xvii, 4

4 p 118 4

माहात्म्यमवगम्य[ा]तापेन[1] जायते । एतच्च यथावसरं वक्ष्यामः[2] ॥

केषां चित्पुनरन्यथापि स्मृतिरुत्पद्यते । तदुपदर्शयन्नाह ।

उपाध्यायानुशासिन्या भीत्याप्यादरकारिणां ।
धन्यानां गुरुसंवासात्सुकरं जायते स्मृतिः ॥ ३०

आचार्योपाध्यायसंनिधौ । तदन्यतमाराध्यसब्रह्मचारिसंनिधौ वा संवसतां । तदनुशासिन्या । भीत्या तद्भयेनापि । आदरः कार्येषु सर्वभावेनाभिमुख्यमवज्ञाप्रतिपक्षो धर्मः । तत्कारिणां यत्नवतां सुकृतिनां तदनुशासनीं[4] हिताहितविधिप्रतिषेधनियमनमनुगृह्णतामकृच्छ्रेणैव स्मृतिरुत्पद्यते ॥ इत्थमपि विहरन् स्मृतिमनसिकारबहुलविहारी भवतीति कारिकाद्वयेन दर्शयन्नाह ।

बुद्धाश्च बोधिसत्त्वाश्च सर्वत्राव्याहतेक्षणाः ।
सर्वमेवाग्रतस्तेषां तेषामस्मि पुरः स्थितः ॥ ३१
इति ध्यात्वा तथा तिष्ठेत्त्रपादरभयान्वितः ।
बुद्धानुस्मृतिरप्येवं भवेत्तस्य मुहुर्मुहुः ॥ ३२

[1] Cp. *Çikṣās.* 119, 13. Tib. [illegible] khoṅ du chud nas ltun bas [illegible]. Notwithstanding the readings of the Çikṣās. and of our text (*infra* stanzas *ad* V, 54), our reading is confirmed by Çikṣās. 119, 1 and foll. (and Tib. *in loco*): "idam [illegible] avagamya [illegible] bhavati [illegible] ten[illegible] udāro bhavati [illegible]" (Cf. *infra* 42, 12).

[2] See *infra ad* V, 54.

[3] — *Çikṣās.* 119, 2.

[4] Cp. *Çikṣās.* 122, 1, 2, 8, 36, 2, 6; *M. Vyut.* 16, *infra* V, 71, 103, where occurs the form anuçāsanī.

सर्वदा बुद्धबोधिसत्त्वानां समस्तवस्तुविषयाप्रतिहतज्ञान[47a]-चक्षुषां सर्वमेव वस्तुजातं पुरतोऽवस्थितमेव। अहमपि तेषां पुरोऽवस्थित एव। सर्ववस्तुवत्। इति मनसि निधाय तथैव सयतात्मा तिष्ठेत्। त्रपादरभयान्वितः। अप्रतिरूपे कर्मणि त्रपा लज्जा। शिक्षायामादरः। तदतिक्रमे भय। बुद्धबोधि- 5
सत्त्वेष्वेव वा त्रपादयः॥ एव सत्यपरोऽपि विशेष स्यादित्याह। बुद्धेत्यादि। तदेव विहरतस्तस्य प्रतिक्षणमकामत एव बुद्धानु-स्मृतिरपि स्यात्[1]॥

संप्रजन्यस्योत्पत्तिस्थैर्ययोः स्मृतिरेव कारणमिति कथयन्नाह।

संप्रजन्यं तदायाति न च यात्यागतं पुनः। 10
स्मृतिर्यदा मनोद्वारे रक्षार्थमवतिष्ठते॥ ३३

यदा स्मृतिर्मनोगृहद्वारि क्लेशतस्करसघातानुप्रवेशनिवा-रिणी दौवारिकवदवस्थिता भवति। तदा संप्रजन्यमयत्नत एवो-त्पद्यते। उत्पन्न च सत्स्थिरीभवति॥ एवं तावदनयोरन्वय-व्यतिरेकाभ्यां गुणदोषावभिधाय अनर्थविवर्जनार्थं निष्फलस्पन्द- 15
वर्जनमाह[2]।

पूर्वं तावदिदं चित्तं सदोपस्थाप्यमीदृशं।[3]
निरिन्द्रियेणेव मया स्थातव्यं काष्ठवत्सदा॥ ३४

---

[1] Cf Dharmasamgraha, LIV

[2] See supra p 111 n 3

[3] But Tib re zig dan por hdi-hdrar sems ni de ni skyon bcas ces bzag-nas l (skyon-bcas = jñātvā sadosam idr̥çam)

प्रथमं तावत् इदं चित्तमित्यध्यात्मनि चिन्तयति । सर्व-
कालमीदृशमुक्तक्रमयुक्तमुपस्थापयितव्यं । ततः परं निष्फलस्पन्द-
वर्जनार्थमपगतकरणग्रामेणेव निष्फलरूपादिविषयग्रहणसर्वविक-
ल्पोपसंहारात् । मया स्थातव्यं । किमिव । काष्ठवत् । चक्षु-
5 रादिव्यापारशून्यत्वात् ॥ इदमेव व्यनक्ति ।

निष्फला नेत्रविक्षेपा न कर्तव्याः कदा चन ।[1]
[2]निध्यायन्तीव सततं कार्या दृष्टिरधोगता ॥ ३५

ईषन्मुकुलितपक्ष्मयुगला नासाग्रविनिवेशिता युगमात्रव्यव-
लोकिनी[3] वा कार्या दृष्टिः ॥ प्रथमारम्भिणः संतताभ्यासेन
10 क्लेशस्य परिहारार्थमाह ।

दृष्टिविश्रामहेतोस्तु दिशः पश्येत्कदा चन ।
[4]आभासमात्रं दृष्ट्वा च स्वागतार्थं विलोकयेत् ॥ ३६

दृष्टिचित्तपरिखेदपरित्यागाय [47b] । कदा चित्कर्हि
चित् । दिशो व्यवलोकयेत् । अथ कदाचित्कश्चित्तत्समीपमा-
15 गच्छेत् तदा तस्य प्रतिच्छायामात्रं[5] विदित्वा स्वागतवादेन

---

1 Cp. Manu, IV. 177: na netracapalo.

2 So M. Dev., Burn. L²: ...tīva; Minaev has ...yatīva. Tib.: nes par sems pas rtag-tu mig ni ... = sthiracittena satatam.

3 See Childers s. voc. Yuga; M. Vyut. 163, ...

4 Ābhāsa, cp. Çikṣās. 129, ... — Tib.: ... zig mig lam snaṅ-ba na ... bltas-nas ons pa legs zes brjod = Kadā cit cakṣurmārge ābhāse bhūte dṛṣṭvā svāgatam iti vadet.

5 Tib.: ... ons pai zal ... tsam (?) — ... ons pai = tasya āgacchataḥ, zal = ...ndha.

संतोषणार्थं विलोकयेत्[1] । अन्यथा तत्र तस्यावध्यानेनाकुशलं प्रसवेत् ॥ मार्गेऽपि [2]तथादृष्टेर्गच्छत उपघातपरिहारार्थमाह ।

मार्गादौ भयबोधार्थं मुहुः पश्येच्चतुर्दिशं ।
दिशो विश्रम्य वीक्षेत परावृत्त्यैव पृष्ठतः ॥ ३७

भयहेतुचौरादिप्रतिपत्त्यर्थं । चतुर्दिशमिति क्रमेण । अन्यथात्मभावस्य रक्षा कृता न स्यात् । सर्वदिग्व्यवलोकनं तु क्रियमाणमौद्धत्योपघातपरिहारार्थं स्थित्वा कर्तव्यं[4] । पृष्ठतो व्यवलोकनं परावृत्त्य पश्चान्मुखीभूय ॥ असमाधानस्य च रक्षणायाह ।

[5]सरेदपसरेद्वापि पुरः पश्चान्निरूप्य च ।
एवं सर्वास्ववस्थासु कार्यं बुद्ध्वा समाचरेत् ॥ ३८

सरेत्पुरः । अपसरेत्पश्चात् । प्रपाताद्युपघातं निरीक्ष्य च । एवमित्युक्तक्रमदिशा[6] स्वपरहितप्रयोजनमवगम्य[7] प्रतिपत्तिसारो भवेत् ॥

इदानीं संप्रजन्यकारितां शिक्षयितुमाह ।

कायेनैवमवस्थेयमित्याक्षिप्य क्रियां पुनः ।
कथं कायः स्थित इति द्रष्टव्यं पुनरन्तरा ॥ ३९

---

1 Cp. *infra* V, 80: ṛju paçyet sadā sattvān.

2 Tib.: de ltar lta ba-na = tathā dṛṣṭvā = tathā dṛṣṭer.

3 Minaev: diço'paçramya, L² viçramya, B viçramya, M viçrābhya — Tib.: nal sos — Schiefner: nal gso ba = nach Ermüdung ausruhen.

4 See *Çikṣās.* 106, 15, 118, 9, 198, 10.

5 So Burn., Minaev: sared. Tib.: 'gro am yaṅ.

6 Tib.: rim pai zun gyis.

7 Prayojana = dgos pa = kārya.

चतुर्णामीर्यापथानामन्यतमस्मिन्नीर्यापथे । कायेनैवमिति स्थितेन निषण्णेन वाऽवस्थेयमिति । तदनन्तरं स्वाध्यायादिक्रियामारभ्य पुनरन्तराले व्यवलोकयितव्यं कथ कायः स्थित इति तस्मिन्नेवेर्यापथे । उत भिन्न ईर्यापथे । भिन्ने पुनः पूर्ववदव-
5 स्थाप्य ॥ कायप्रत्यवेक्षामभिधाय चित्तप्रत्यवेक्षणामाह ।

निरूप्यः[2] सर्वयत्नेन चित्तमत्तद्विपस्तथा ।
धर्मचिन्तामहास्तम्भे यथा बद्धो न मुच्यते ॥ ४०

धर्मस्य स्वपरहितलक्षणस्य चिन्तैव महास्तम्भो बन्धनायत्तीकरणहेतुत्वात् । तस्मिन् बद्धोऽपि पुनः पुनर्निरूपणीय इत्याह ।

10 **कुत्र मे वर्तत इति प्रत्यवेक्ष्यं तथा मनः ।**
समाधानधुरं नैव क्षणमप्युत्सृजेद्यथा ॥ ४१

क्व पुनरिदं मनो [48a] मम वर्तते । पूर्वस्मिन्नालम्बने अन्यत्र वा गत । गतमवगम्य ततो निवर्त्य तत्रैव योजयितव्य । स्वरसवाहितायामुपेक्षणीयं । इति शमथधुरमेकमपि क्षणं यथा
15 न परित्यजति तथा धारयितव्यं ।

[3]एतावता शील हि समाधिसंवर्तनीयमित्युक्त भवति ॥ यथोक्तं चन्द्रप्रदीपसूत्रे

---

[1] See Çikṣās 51 9, 53, 14

[2] Minaev has nirūpya—cp Çikṣās 118, 12 cittamattadvipasya çamathastambhe nityabaddhasmṛtiḥ

[3] See Çikṣās 121, 15.

क्षिप्रं समाधिं लभते निरङ्गणं[1]
विशुद्धशीलस्य हि आनुशंसा इति[2] ।

अतोऽवगम्यते । ये केचित्समाधिहेतवः प्रयोगास्ते शीले अनुगता[3] इति ॥ तस्मात्समाध्यर्थिना स्मृतिसंप्रजन्यशीलेन भवितव्यं । तथा शीलार्थिनापि समाधौ यत्नः कार्य इति ॥[4]

समाधानपरित्यागावकाशमाह ।

भयोत्सवादिसंबन्धे यद्यशक्तो यथासुखं ।
दानकाले तु शीलस्य यस्मादुक्तमुपेक्षणं ॥ ४२

अग्निदाहादिभयं । तथा रत्नत्रयपूजादिकृत उत्सवः[5] । समधिकतरः सत्त्वार्थादिर्वा[6] । तत्संभवे यदि स्यातुमशक्तः । तदा कामचार इत्यनुज्ञातः । सापत्तिको न भवतीत्यर्थः ॥ कुतः पुनरयमनियमो लभ्यत इत्याह । दानेत्यादि । शीलं यद्यपि दानात्प्रकृष्टं । तथाप्यवरशिक्षायां शिक्ष्यमाणस्य तदनन्तरमेवोत्तरशिक्षावस्थितस्याभ्यासपाटवाभावात् कथं चित्तावत्कालं ततो

---

1 Ms libhata —Niranginā, cp Burnouf, *Lotus* 865 Rhys Davids, *J R A S*, 1898, p 191 (Bendall)

2 Ms has ānu *Çikṣās* °smina ānu° çamsa, Prof Bendall reads °çīle'sminnānuçamsa See Kern, *Lotus*, p 330 ānuçamsa = guṇa (=pāli-ānisamsa), "not limited to Buddhist writings as we see from the inscription at Bassac in Camboja, st 18"

3 *Çikṣās* çīlāntargata iti—but Tib rjes su son pa

4 Ends quotation from *Çikṣās*

5 Ms kṛtanutsavaḥ

6 So Ms possibly corrupt —See *Çikṣās* 167, 2 —(Tib has here de bas tato)

निवर्तमानस्यापि नापत्तिः ॥ दानस्यासौ कालो न शीलस्य ॥ अत एवोक्तं । यद्यशक्त इति । एतावन्मात्रेणेदमुदाहरणं । यथोक्तं[1] । तत्रैकस्यां शिक्षायां निष्पाद्यमानायामशक्तस्येतरशिक्षानभ्यासादनापत्तिः ।

5 आर्याचयमतिसूत्रेऽप्येवमवोचत्[2] । दानकाले शीलोपसंहारस्योपेक्षे[18b]ति विस्तरः । न चातः शिथिलेन भवितव्यं ॥

यत्र कुशलपक्षसंचारेऽपि क्व चित्समाधानविघातः स्यात्तन्नोपादेयमित्याह ।

यद्बुद्धा कर्तुमारब्धं ततोऽन्यन्न विचिन्तयेत् ।
10 तद्देव तावन्निष्पाद्यं तद्गतेनान्तरात्मना ॥ ४३[3]

स्वयमेव तु युक्त्यागमाभ्यां कल्याणमित्रवचनाद्वा यथाबलमवधार्य यत्किं चित्कर्म कर्तुमारब्धं ध्यानाध्ययनादिकं । प्रथमतस्तदेव तावन्निष्पत्तिं नेयं तन्निष्ठेन मनसा । न पुनस्तदनिष्पन्नमेव परित्यज्य परमारम्भणीय ॥ किं पुनरेवं स्याद्यदि न
15 स्यादित्याह[4] ।

एवं हि सुकृतं सर्वमन्यथा नोभयं[5] भवेत् ।
असंप्रजन्यक्लेशोऽपि वृद्धिं चैवं गमिष्यति ॥ ४४[3]

---

1 *Çiksās* 11, 7, where occurs instead of nispādyamānāyam çiksanayām — See *ibid* 167, 12, and *infra* V 84

2 Ms sūtre hy , but Tib has kyan, (= api) and *Çiksas* api *Çiksās* has na câtra

3 Cp *infra*, VII 47, 49

4 So Ms , but Tib yady evam na syat ko dosah

5 Minaev has no bhayam bhavet

यस्मादेवमनुतिष्ठतः सर्वं सुश्लिष्टं कृतं स्यात् । तद्विपर्यये पुनर्दुःश्लिष्टमुभयं पूर्वं चान्त्यं पश्चात्त्वलीकृतं[1] च स्यात् । चलप्रवृत्तेरसंप्रजन्यं स्यात् । प्रवेशे वृद्धिः स्यात् ॥

इत्यमपि निष्फलं वर्जयेदित्याह ।

नानाविधप्रलापेषु[2] वर्तमानेष्वनेकधा । 5
कौतूहलेषु सर्वेषु हन्यादौत्सुक्यमागतं ॥ ४५

अनेकप्रकारेऽसंबद्धाभिधानेऽपरोपाधिके[3] प्रवर्तमाने । आश्चर्यवस्तुषु च समस्तेषु स्वयमपि तत्क्रियायां दर्शनश्रवणाय वा[कृ]चित्तस्य[4] तारतम्यं निवारयेत् ॥

अपरमपि निष्फलवर्जनाय प्रातिमोक्षोद्दिष्टमाचरेत् । 10
इत्याह ।

मृन्मर्दनतृणच्छेदरेखाद्यफलमागतं ।
स्मृत्वा ताथागतीं शिक्षां भीतस्तत्क्षणमुत्सृजेत् ॥४६[5]

भूमिफलकादिषु नखदण्डादिना रेखाकर्षणलेखनादि । निष्प्रयोजनमागतमापतितं विवर्जयेत् । भगवताच निवृत्ति- 15

---

[1] Tib. sna khas blans pa dan phyis dam bcas pa

[2] On the sambhinnapralāpa, see *Çikṣās.* 73, 15

[3] Tib. g-an-dag gis byas-pa la hjug pa para-kṛta pravartamāna

[4] Tib. rin-gis kyan bya-ba de la blta ba dan mñan par phyir nag dan sems rugs-pa las bzlog-par bya o | —ṅag = vākya, etc

[5] Minaev has tatkṣaṇād bhūta utsṛjet,—but cp infra 120, 1.—Cp *Manu*, IV. 50, 55, 70, *Patimokkha* ed Min, p 12

राज्ञेति मत्वा। तदतिक्रमविपाकफलभयात्। तत्क्षणमिति न तत्र कालपरिलम्बं कुर्यात्॥

संक्लेशसमुदाचारे संप्रजन्यकारितां यदेत्यादिभिः सप्तभिः श्लोकैः शिक्षयितुमाह।

5 **यदा चलितुकामः स्याद्वक्तुकामोऽपि वा भवेत्।**
स्वचित्तं प्रत्यवेक्ष्यादौ कुर्याद्धैर्येण युक्तिमत्[1]॥ ४७

प्रथमत एव स्वचित्तं निरूप्य। उक्तं। असंक्लिष्टावस्थायां कर[19a]णीयमुक्तं। एतदेव दर्शयति।

अनुनीतं प्रतिहतं यदा पश्येत्स्वकं मनः।
10 **न कर्तव्यं न वक्तव्यं स्थातव्यं काष्ठवत्तदा॥ ४८**

रक्तं द्विष्टं वा स्वचित्तं यदा पश्येत्। तदा हस्तपदादिचलनमात्रकमपि न कर्तव्यं। नापि वचनोदीरणं। अन्यथा तदुत्थापिते कायवाग्विज्ञप्ती[2] अपि संक्लिष्टे[3] स्यातां। अतो बहिरिन्द्रियव्यापारविकल्पावुपसंहृत्य[4] स्थातव्यं काष्ठवत्तदा।
15 सर्वव्यापारविरहान्निर्व्यापाराः सर्वधर्मा इति मनसि निधाय॥

अपरमाह।

उद्धतं सोपहासं वा यदा मानमदान्वितं।
सोत्प्रासातिशयं वक्रं वञ्चकं च मनो भवेत्॥ ४९

---

1 So Min, M yuktimān—Tib rigs pa ldan-par bya

2 On "vijñapti" and "avijñapti," see *Madhyamakavṛtti*, XVII, 4

3 Ms samkrsto Tib ñon-mons ldan

4 Tib has no dual form (vikalpam).

उद्धतमिति । सद्धर्मादिश्रवणप्रमादात् । अपि । उद्धतं विक्षेपबहुलमित्यर्थः । सोपहास । वाग्विहेठनारम्भक । तथा युक्त वा । मानश्चित्तस्योन्नतिः । मद' स्वधर्मे[1] चित्तस्याभिनिवेशः । ताभ्यामन्वितं तत्सम्प्रयुक्त । उत्प्रास' कायिकी विहेठना[2] । तेन सहोत्कटं । वक्रं कुटिलं शठं वा । वञ्चकं प्रतारकं मायावि वा । 5 यदि मनो भवेत् । स्थातव्यं काष्ठवत्तदेति सबन्धः ।

यदात्मोत्कर्षणाभासं[3] परपंसनमेव च ।
साधिक्षेपं ससंरम्भं स्थातव्यं काष्ठवत्तदा ॥ ५०

आत्मोत्कर्षण । स्वगुणातिशयप्रकाशनं । तदाभास[4] तत्प्रतिभासं तद्विकल्पनात् । परपसनं[5] परविगर्हः दोषाविष्करणं वा । 10 तद्युक्तं । अधिक्षेपः परस्य वचनतिरस्कारः । संरम्भः सदाकलिविवादनिमित्तचित्तप्रदोषः । उभयत्र सह तेन वर्तत इति विग्रहः । एव यदा पश्येत्स्वकं मनः स्थातव्यं काष्ठवत्तदेति सामान्योक्तमभिसबध्यते ।

लाभसत्कारकीर्त्यर्थि परिवारार्थि वा पुनः । 15
उपस्थानार्थि मे चित्तं तस्मात्तिष्ठामि काष्ठवत् ॥ ५१

---

1 Svadharma should the reading be right, is not the svadharma of Manu, but synonymous to svapakse atmany

2 Hitherto vihethanam

3 Tib bstod lhur len pa = atmastutiparāyanah

4 = der snan ba ni

5 Cf *Çikṣas* 10, n 4, and *M Vyut* 127, 4 paraparnsaka —*Ibid*, ātmotkarsa, kutila-citta, etc

कीर्तिर्यशः । परिवारः । दासीदासकर्मकरादिः । उपस्थानं पादधावनमर्दनादि । एभिर[र्]थे तदभिलाषं मम चित्तं तस्मात्तिष्ठामि काष्ठवत् ।

परार्थरूक्षं[1] स्वार्थार्थि परिषत्काममेव वा ।

5 **[2]वक्तुमिच्छति मे चित्तं तस्मात्तिष्ठामि काष्ठवत् ॥ ५२**

परार्थरूक्ष परार्थविमुखं । स्वार्थार्थि स्वा[^19b]र्थाभिनिविष्ट । परिषत् । मिथ्यान्तेवासिप्रभृतिजनसमाजः । तदभिलाषि । तत्परिवारार्थि ।

असहिष्ण्वलसं भीतं[3] प्रगल्भं मुखरं तथा ।

10 **स्वपक्षाभिनिविष्टं च तस्मात्तिष्ठामि काष्ठवत् ॥ ५३**

असहिष्णु असहनशील । अलस क्रियास्वकर्मण्य कुसीदमित्यर्थः । भीत कायजीवितभीरु[4] । भयहेतुभ्यो वा । प्रगल्भ धृष्ट । मुखर दुर्वचस्क । युक्तायुक्तमनपेक्ष्याभिधायक वा । स्वपक्षे मिथ्यान्तेवासिज्ञातिमात्रोपहितादौ अभिनिविष्ट पक्षपातातिशयवत् ॥

15 सांप्रतं प्रतीकारनिर्देशमाह ।

एवं संक्लिष्टमालोक्य निष्फलारम्भि वा मनः ।

निगृह्णीयाद् दृढं शूरः प्रतिपक्षेण तत्सदा ॥ ५४

---

[1] Minaev has °rūkṣyam —Tib uses periphrasis gzan don y il bar hdod-pa dan i r in don gñer bar hdod-pa dag and does not translate the second pada

[2] So M[2] and Tib , Minaev vartum , L[2] kartum

[3] Minaev asahiṣṇulasambhitam

[4] Tib lus dan htbso..

उपदर्शितक्रमेण सक्लिष्टं संक्लेशसंप्रयुक्तं निष्फलव्यापारं वा ज्ञात्वा स्वचित्त सर्वप्रवृत्तिनिरोधेन प्रभावमन्दतां विधाय निगृह्णीयादभिभवेत् । दृढं यथा पुनरपि समुदाचारधर्मकं न भवति[1] । क्लेशादिसंग्रामे विजयाय कृतपरिकरः शूरो बोधिसत्त्वः । प्रतिपक्षेण यो यस्मिन् प्रतिपक्ष उक्तः । यथा रागादावशुभादि । तेन तद्विपरीतविधानेनेत्यर्थः । सदा सर्वकालं । यदा यदा सक्लिष्टं प्रतीयते । 5

[2]उग्र[परि]पृच्छायां गृहिणं बोधिसत्त्वमधिकृत्योक्तं । तेन सुरामैरेयमद्यप्रमादस्थानात् प्रतिविरतेन भवितव्यं । अमत्तेनानुन्मत्तेन । अच[प]लेनाचञ्चलेनाभ्रान्तेनामुखरेणानुन्नतेन[3] । अनुद्धतेन । उपस्थितस्मृतिना[4] । समंप्रजन्येनेति ॥ अत्रैव च प्रव्रजित बोधिसत्त्वमधिकृत्योक्तं । स्मृतिसंप्रजन्यस्याविक्षेप इति ॥[2] 10

तथार्यतथागतगुह्यसूत्रे दर्शितं[5] । न खलु पुनः कुलपुत्र बोधिसत्त्वस्य वागरक्ता वा [दुष्टा वा मूढा वा][6] क्लिष्टा [50ᵃ]

---

[1] "So that it shall not be again an object for the samudācāra" There are two "samudācāra," the vidūṣaṇā (chap II) and the pratipakṣa° (Çikṣas 171, 8—176, 209, 6—infra V, 81) methods to the "purification from sin" (pāpaçodhana)

[2] = Çikṣas 120, 5-6

[3] See M Vyut 127, 10, 11 The lectio difficilior "unnada" adopted by Prof BENDALL is confirmed by the Pali "unnala" (cf 120, n 2)– The Tib (mi-rgod), so far as I know, is not decisive (=anuddhata) Prof BENDALL kindly gives me references to Çikṣās 105, 9, 108, 12 (unnāma) and MORRIS, J P T S, 1887 p 120 121

[4] Çikṣas has upasthitasmṛtisampra°

[5] = Çikṣas 126 5-9

[6] mūḍhā, from Çikṣās, sdan-ba = dviṣṭa

वा क्षणव्याकरणो[1] वा स्वपक्षोत्कर्षणवचना वा परपक्षनिग्रह-
वचना वा आत्मवर्णानुनयवचना वा परवर्णप्रतिघातवचना[2]
प्रतिज्ञोत्तारणवचना[3] वा आभिमानिकव्याकरणवचना वेति[1] ॥

एवं निष्फलस्पन्दवर्जनेनानर्थादात्मभावस्य रक्षा प्रतिपा-
5 दिता भवति । [4]तस्मान्मया शैलसुस्थितेनाप्रकम्पेनाग्रथितेन
भवितव्यमिति[4] । एतच्च समाहितचित्तस्य सिध्यति । [5]अत इदं
शमथमाहात्म्यमवगम्य तात्पर्येण भावयितव्य[6] । अनेन तीव्र
आदरो भवति शिक्षासु । तेनापि स्मृतिरुपतिष्ठते । उप-
[स्थित]स्मृतिर्निष्फलं वर्जयति । तस्यानर्था न सम्भवन्ति । तस्मा-

---

1-1 Ms has ksına° and so Tıb skad cig (= ksana) gsal bar byas pa am Prof BENDALL reads ksnnna, according to the Ms of the Çiksas for apparently ksūna, and Tıb in loc thogs pa (= prat hata) —Çiksās °vyākarana more correctly (cp WHITNEY, 1150, f)

On this word, M KERN writes the following observation "Je pense que la forme prākrite primitive etait *akkhana*, qui dans le composé pāli *akkhanavedhin* est expliquee par *avıraddhavedhin* (Jataka, III 322, IV 494, V 129, Ang Nik, I 284, II 171 On en a fait en sanscrit bouddhique aksunavedhin [°dha°, Divyāv Index, C BENDALL] Le Pāli comme le sanskrit bouddhique ont correctement interprete le sens du mot " (touchant infailliblement la marque de tir" mais en ont ignoré l'etymologie (= sansk *akhana vedhin*)—Il n'est pas impossible qu on ait deduit, par abstraction, de *akkhana* un mot *Khana* le contraire de akkhana "—MORRIS T P T S 1885

The reading of our Ms *Ksana*, being confirmed by the Tib, is possibly good, being a sanskritised form of this *Khana*

2 *Çiksas* pratigha°, confirmed by VI, 62 pratighacitta, etc

3 Ms pratijñānut°

Tib khı og tu lus la brus par mı byed pai thsig-gım = *pratıjña* uttārana ātmabhāva-aparīksā vacanamvā

4-4 From the *Dharmasamgīti*, cf *Çiksās* 119, 14

5 With some omissions and variants = *Çiksās* 119, 16—120, 4—See *supra* ad V, 29

6 *Çiksās* ātapo bhāvayitavyah —Tib de ltun blans te = ātapa

दात्मभावं रक्षितुकामेन स्मृतिमूलमन्विष्य नित्यमुपस्थितस्मृतिना भवितव्यं[1] ॥ एतदेवाह ।

तत्रात्मभावे का रक्षा यदनर्थविवर्जनं[2] ।
केन तल्लभ्यते सर्वं निष्फलस्यन्दवर्जनात्[3] ॥
एतन्निष्येत्सदा स्मृत्य[ा][4] स्मृतिस्तीव्रादराद्भवेत्[5] । 5
आदरः शममाहात्म्यं ज्ञात्वा तात्पर्येण जायते[6] ॥ इति

शमथमाहात्म्य तु यथावसरमिहैव कथयिष्यते[7] ॥ अयमत्र पिण्डार्थोऽनर्थविवर्जनार्थमवधारयितव्य[8] इति वृत्तचितयेनोपदर्शयन्नाह ।

सुनिश्चितं सुप्रसन्नं धीरं सादरगौरवं । 10
सलज्जं सभयं शान्तं पराराधनतत्परं ॥ ५५
परस्परविरुद्धाभिर्बालेच्छाभिरखेदितं ।
क्लेशोत्पादादिदं ह्येतदेषामिति दयान्वितं ॥ ५६

---

1 = Çikṣas 119 ₁₅—120 ₂

2 Çikṣas 14 ₁₀—ātmarakṣā, cp Dhammapada, 157

3 Ibid 116 ₁₂ cf supra, p 113, ₁₅

4 Ibid 118 ₅

5 Ibid 119, ₁ and supra, p 112, ₁

6 Ibid 119, ₂ with the reading çamatha (cf ibid 1 3 kas tāvad ayam çamo nāma, and 123 ₁₅) The fourth pāda is unmetrical —Tib has brtun, for which the Lal Vist, according to FOUCAUX, has ātapa,° in —Ex conj jñātvātāpena jāyate — cf IV, 48 V 1

These four lines are the 7th and the 8th Kārikas of the Çikṣāsamuccayakārikās See Prof BENDALL's Introduction to the Çikṣas

7 See ibid 119 ₉ and foll and chap IX ₁ of this book (p 237)

8 Cp Çikṣas 127, ₅ asya tu granthavistarasyāyam piṇḍārtho bodhisattvena manasā nityam dhārayitavyaḥ |—Then occur the stanzas Bodhic V, 55, 57, with the reading suniçcalam (BENDALL, 127, n 1).

आत्मसत्त्ववशं नित्यमनवद्येषु वस्तुषु।
निर्माणमिव निर्मानं धारयाम्येष मानसं॥ ५७

सुनिश्चितं सन्देहविपर्यासरहित। सुप्रसन्न सदा प्रीतिसौमनस्यबहुल। धीरमचञ्चलं। आदरः कथित एव। गौरव 5 आराध्येषु चित्तस्य नम्रता। ताभ्यां सह वर्तते। सलज्जं पूर्ववत्। सभय स्खलित --- लोके भीत[2]। शान्तं सयतेन्द्रिय। सत्त्वाराधनयत्न[50b]वत्।

यदेकस्य रुचिजनक तदन्यस्य विपरीतं। अन्योऽन्यविरुद्धाभिः पृथग्जनेच्छाभिरखेदितमविप्रतिसारि। कथ दयान्वितं। 10 हेतुपदमेतत्। कुतः। यस्मात्क्लेशोत्पादान्न स्वातन्त्र्यादिदमेतत् परस्परविरुद्धचरितं एषां बालानामिति मत्वा[3]।

आत्मसत्त्ववशं स्वपरायत्तं सर्वकालं। किं सर्वत्र। न। अनवद्येषु वस्तुषु। [4]उभयसावद्यशून्येषु। किवत् निर्माणमिव[5]। निर्मितवत्। विगतमान[6] मानसं धारयामि। एषोऽहमिति 15 बोधिसत्त्वो [7]मनसि निवेशयेत्।

अस्मादपि सर्वेगमनसिकाराच्चित्तस्यानर्थविवर्जनेन रक्षा विधातव्येत्याह।

---

1 Minaev nirmānam, Tib sprul pa bzin du na med-par = nirmitavat

2 Ms skhalita tyaj alokya bhītam, Tib ḥkhrul pa ḥbyun bas ḥjig-rten-la ḥjigs pa —Cf supra 113, 5

3 Cp infra VI, 25

4 Prakṛtyā, prajñaptyā avadyam

5 See the note to Çikṣās 127, 13

6 Cp Çikṣās 153, 19 Sattvesu nirmanatā.

7 *Ex conj* Ms has tvena manasi

चिरात्प्राप्तं क्षणवरं स्मृत्वा स्मृत्वा मुहुर्मुहुः ।
धारयामीदृशं चित्तमप्रकम्प्यं सुमेरुवत् ॥ ५८

अतिचिरतरेण कालेन लब्धमुक्तं क्षणवरं । स्मरणेन चेतसि कृत्वा पुनः पुनरन्तरं स्थिरीकरोमीदृशमुक्तस्वभाव । अप्रकम्प्यं कम्पयितुमशक्य कामादिवितर्कपवनैः पर्वतराजवत् ॥ 5

[1]एवमेताभ्यां च शीलसमाधिभ्यामन्योन्यसंवर्धकाभ्यां चित्तकर्मपरिनिष्पत्ति ।[2] तस्मादवस्थितमेतत् चित्तपरिकर्मैव बोधिसत्त्वशिक्षेति[2] । तेन यदुक्तं ।

चित्तरक्षाव्रत मुक्त्वा बहुभिः किं मम व्रतैः । इति[3] । तत्परिनिश्चित ॥ 10

पुनस्तदेकान्तमवधारयितुं कायप्रत्यवेक्षामाह ।

गृध्रैरामिषसंगृद्धैः कृष्यमाण इतस्ततः ।
न करोत्यन्यथा कायः कस्मादत्र प्रतिक्रियां ॥ ५९

कायस्य सर्वथा क्व चिदपि व्यापारो नास्ति । स्वात्मन्यपि सामर्थ्याभावात् । अन्यथा चित्तरहितो मृतस्य कायः । गृध्रादिभिर्विप्रलुप्यमान[4] इतस्ततः प्रतिकारमात्मरक्षणार्थं किमिति न करोतीति पृच्छति [51a] । सर्वसामर्थ्यविकलत्वात् ॥ 15

---

[1] *Çikṣās* 121 ₁₇

[2] *Ibid* 123, ₁₆ (tasmad vyavasthitam evam) parikarma = yons su sbyan ba — Cp Kern, *Lotus*, p 295

[3] *Supra* V, 18

[4] Cp *Mbh*, II 356, ₉ 412 ₁₃ etc

अत एव चित्तपरिकर्मैव साध्य । तस्मिन् परिकर्मिते[1] काय-स्यायत्नत एव परिकर्मसिद्धेः । तत्परतन्त्रत्वात्तस्येत्युक्तं भवति ॥

एव सर्वथानुपयोगिनि काये सापेक्षतां निरस्यन्नाह ।

रक्षसीमं मनः कस्मादात्मीकृत्य समुच्छ्रयं ।
5 **त्वत्तश्चेत्पृथगेवायं तेनाच तव को व्ययः ॥ ६०**

हे मनः । अनात्मकमेवात्मत्वेन स्वीकृत्य मांसास्थिपुञ्ज कायसंज्ञकं कस्मात्कारणात्त्वं रक्षसि । किमेवमिति चेत् । भवतो यदि भिन्न एवायं कायः । तेन अस्यापचये तव किमपचीयते ॥

पूर्वमेव चिरं स्वीकृत इति चेदाह ।

10 **न स्वीकरोषि हे मूढ काष्ठपुत्तलकं[2] शुचिं ।**
अमेध्यघटितं यन्त्रं कस्माद्रक्षसि पूतिकं ॥ ६१

हे मूढ मोहविजृम्भितमेतद्भवत[3] । शुचिं पवित्र । अयं चाशुचिः । इदमेवाह । अमेध्येति । पूतिक शातनधर्मकं[4] ॥

स्यादेतत् । किमन्यस्मिन्नसत्यपि दोष उच्यत इत्यत्राह ।

---

1 New and curious

2 Min ev has °likam L², M Dev, B Takam

3 Vijrmbhita (hgyin b , Jaschke, s voc sgyin = to yawn, gape almost exclusively used in describing the attitude of a dying lion, and so also the dying attitude of Buddha) cp. *Mhv* I, 495, Foucaux, Musée Guimet, XIX, p 26

4 Çatana according to Cowell and Neil = cutting (*Divyav* 183, 23, 281, 30 . sarvasamskāragatih çatanapatanavikiranavidhvamsanadharmatay parāhatya ,)—But = caduc, according to Prof Kern, "A peu près synonyme de patana Çat = çad = latin cado En sanskrit il n'y a que le causatif çatayati, considéré comme le causatif de çad (= cotai)"

इमं चर्मपुटं तावत्स्वबुद्ध्यैव पृथक् कुरु।
अस्थिपञ्जरतो मांसं प्रज्ञाशस्त्रेण मोचय॥ ६२
अस्थीन्यपि पृथक् कृत्वा पश्य मज्जानमन्ततः[1]।
किमत्र सारमस्तीति स्वयमेव विचारय॥ ६३

चर्ममयं पुटं। स्वमतिविशेषेण। पृथक् कुरु। स्वकायादपसारय। अस्थिघटितपञ्जराद्यन्मात् प्रज्ञात्मकेन शस्त्रेण मांसकर्तनेन। तदनन्तरमस्थीन्यपि खण्डशः पृथग्भिन्नानि कृत्वा मज्जानं पश्य। अवलोकय यद्यन्तर[2] कायः। चतुर्महाभूतिकः[3]। मातापित्रशुचिकललसम्भूतः। दुःखमयः। कृतघ्नश्चेति विस्तरेण प्रतिपादयिष्यतीति[4]। किमत्र सारमस्ति विज्ञप्रशस्तं न्याय्यं वा। इत्यात्मनैव विचारय।

एवमन्विष्य यत्नेन न दृष्टं सारमत्र ते।
अधुना वद कस्मात्त्वं कायमद्यापि रक्षसि॥ ६४

एवं कथितनयेन। साधूक्तमिति चेत्। अधुना वद कस्मात्त्वमद्यापि सर्वगुणविकलमपि कायं रक्षसि। एवं विद्वानपि॥ तथाप्यस्ति किं चिदत्रोपादेयमिति चेदाह [51b]।

---

1 = down to, see *Divyavadana*, s voc antaças — So Tib rkan gi bar du lta-bya-in

2 So Ms but Tib lus-kyi nan gan yin pa = yat kayasyantar asti

3 The regular vrddhi omitted

4 See chap IX, 58 60, 79-88, *Çiksa* 209 and foll

न खादितव्यमशुचि[1] त्वया पेयं न शोणितं ।
नान्त्राणि चूषितव्यानि किं कायेन करिष्यसि ॥ ६५

यदस्ति न तदुपयुक्तमिति संक्षेपार्थः । अतः किमनुपयोगिना कायेन करिष्यसि । अत्रासङ्गो न युक्त इत्यर्थः ।
5 अन्यप्रयोजनाभावादिदमेवोचितमुत्पश्यामः । इत्याह ।

युक्तं गृध्रशृगालादेराहारार्थं तु रक्षितुं[2] ।
[3]कर्मोपकरणं त्वेतन्मनुष्याणां शरीरकं ॥ ६६

यस्मात्कर्मणि केन चित्सहकारिभावेनोपयुज्यत इति रक्ष्यते[4] । तथापि नात्राभिनिवेशः कार्य इत्याह ।

10 एवं ते रक्षतश्चापि मृत्युराछिद्य निर्दयः ।
कायं दास्यति गृध्रेभ्यस्तदा त्वं किं करिष्यसि ॥ ६७

आछिद्येति बलाद्भवतो[5] गृहीत्वा निष्कृपो मृत्युस्तव कायं गृध्रेभ्यो दास्यति । तदापि न कश्चित्प्रतिकारो भविष्यति । इत्यभिप्रायः ॥ स्यादेतद्यद्यप्येवं तथापि भक्ताच्छादनादिमात्रेणापि परिपालनीय इत्यत्राह ।
15

---

1 So Dev., Burn.,—Minaev has açucim

2 So M. L², Minaev has rakṣitam.—There is no commentary on this line

3 I prefer the reading of L², M., but Minaev has "° karaṇatvam tan ..." and Tib. bkol-bar bya ba nyid du zad = karmopakaraṇatve eva.—See P. W. sub voc. K°

4 Tib. has sbyar bar bya yin pas na mkho-bas ni chags-par-byao ze na / de lta mod kyi / hdi-la = yujyate, upayuktatvād eva āsangaḥ kāryaḥ / naivam / nātra abhiniveçaḥ

5 Bhavato (?), not translated in Tib.

न स्थास्यतीति भृत्याय न वस्त्रादि प्रदीयते।
कायो यास्यति खादित्वा कस्मात्त्वं कुरुषे व्ययं॥६८

यदि नाम भृत्यकर्मकरणं[1]। तथापि तत्रानवस्थायिस्वभावे विचक्षणो ज्ञात्वैव प्रवर्तते। एवं प्रकृतेऽपि तद्धर्मिणि केनाभिप्रायेण हे मनस्त्वं कुरुषे व्ययमुपकरणोपचयं। तत्किं सर्वथैव 5 निरवकाशोऽयं कर्तव्यो। नेत्याह।

दत्त्वास्मै वेतनं तस्मात्स्वार्थं कुरु मनोऽधुना।
न हि वैतनिकोपात्तं सर्वं तस्मै प्रदीयते॥ ६९

वेतनं कर्ममूल्य। तावन्मात्रं दत्त्वास्मै गलरशरीराय कर्मोपकरणत्वात्। स्वप्रयोजनमनुविधेयं हे मनः। अनेनैवोपार्जितं 10 कस्मादस्मै न दीयत इति चेत्। न हि यस्माद्यत्किं चित्कर्मकरेणोपात्तं तस्मै कर्मकराय प्रदीयत इति न्यायोऽस्ति। तस्मादेवमुपस्तम्भमात्रं दत्त्वा।

काये नौबुद्धिमाधाय गत्यागमननिश्रयात्[2]।
यथाकामंगमं कायं कुरु सत्त्वार्थसिद्धये॥ ७० 15

काये नौबुद्धिं कृत्वा प्रवृत्तिनिवृत्तिहेतोः। इच्छायत्तं कायं

---

[1] Tib bhṛtyādi°

[2] Cp. Pāli nissāya, nissayo —Tib rten tsam du —The simile of the ship is a classic one, see Çikṣā 55, 5

कुरु सत्त्वार्थानुष्ठानाय निष्पत्तये वा हे मन इति प्रकृतमभिसंबध्यते ॥

इति कायप्रत्य[52a]वेक्षया तत्स्वभावमुपयोगं च विचार्य परिनिश्चितकायप्रयोजन उपसंहरन्नाह।

5 एवं वशीकृतस्वात्मा[1] नित्यं स्मितमुखो भवेत्।
त्यजेद्भृकुटिसंकोचं[2] पूर्वाभाषी जगत्सुहृत् ॥ ७१

उक्तनीत्या। आयत्तीकृतः। आत्मा चित्तकायलक्षणः। सर्वदा प्रसन्नवदनो भवेत्। भ्रूललाटसंकोचं च प्रसादहानिकरं त्यजेत्। पूर्वमेवासंचोदित एव परेण स्वागतादिवादैः संतोषणशीलो भवेत्। सर्वसत्त्वानामकारणबान्धवश्च ॥ इत्यपि शिक्षानर्थविवर्जनाय कार्यत्याह।

सशब्दपातं सहसा न पीठादीन् विनिक्षिपेत्।
नास्फालयेत्कपाटं च स्यान्निःशब्दरुचिः सदा॥ ७२

सहसा त्वरितमेव निष्प्रयोजनं। हस्तदण्डादिना कपाटं च नाकोटयेत्। संक्षेपतः सततं निःशब्दाभिरतिर्भवेत् ॥ क एवं सति गुणः स्यादित्याह।

बको बिडालश्चौरश्च निःशब्दो निभृतश्चरन्।
प्राप्नोत्यभिमतं कार्यमेवं नित्यं यतिश्चरेत् ॥ ७३

[1] L2, M, Dev BURN °kṛtaç cātmā
[2] M Vyut 126, 68 apagatabhrūkuṭika Cp Visuddhimagga (B T S) 17, 11
[3] Cp Manu IV, 64

सर्वे एते निःशब्दा अनुद्धताश्च विहरन्तो विवचितमर्थं लभन्ते । व्रतिनापि तथैव समाधानकण्टकपरिहारेण विहर्तव्यं ॥ इत्यपि शिचितव्यमित्याह ।

[1]परचोदनदक्षाणामनधीष्टोपकारिणां ।
प्रतीच्छेच्छिरसा वाक्यं सर्वशिष्यः सदा भवेत् ॥ ७४ 5

कौशल्यविनोदनाववादानुशासिनीसमर्थानां[2] विनयादिकोविदा[नां] । अप्रार्थितहितैषिणां हितविधायकं वचनं मूर्ध्ना गृह्णीयात् । न तेषु क्वचित्त दूषयितव्यं । नाण्वमन्यना[3] कार्येति भावः । सर्वसत्त्वेषु गुरुगौरवधिया समाचरितव्यमिति सर्वं सर्वेभ्यः शिचेत् ॥ ईर्ष्यामलप्रक्षालनामाह[4] । 10

सुभाषितेषु[5] सर्वेषु साधुकारमुदीरयेत् ।
पुण्यकारिणमालोक्य स्तुतिभिः संप्रहर्षयेत् ॥ ७५

परकीयगुणवर्धनवचनेषु तत्परितोषणाय साधु साधु भद्रकमिदमिति शब्दमध्याशयेनोच्चारयेत् । कुशलकर्मकारिणमपि दृष्ट्वा । साधुकृतं धन्यो [52b] भवान् सुकृतकर्मकारीत्यादिभिः 15 स्तुतिवचनैः प्रोत्साहयेत् ॥ [6]लपनाशङ्कां निरस्यन्नाह ।

---

[1] BURN. parāc° —This stanza is quoted with variants Çikṣās p 361, 11

[2] On anuçāsanī, see supra ad V 30, and Samadhirāja, 6 4

[3] See Çikṣās 9, 7

[4] Prakṣālanā The form in ā is new

[5] New, as a synonym to varṇana, praise

[6] M Vyut 127, 63—W K F = Geklatsch commérages = gossip, but Khagsig = Schmeichelei, flatter adulation better meaning so far as I see Cp Çikṣās 268 note 1, with reference to Rāṣṭrapāla

परोक्षं च गुणान्[1] ब्रूयादनुब्रूयाच्च तोषतः।
स्ववर्णे भाष्यमाणे च भावयेत्तद्गुणज्ञतां॥ ७६

परगुणान् सद्भूतानपि परोक्षं ब्रूयान्न समक्षं। अन्यथा लपनां कश्चिन्मन्येत। परेण तु तत्समक्षमन्यस्य गुणे भाष्यमाणे
5 तदनुवादकतया[2] समक्षमपि ब्रूयात्। अन्यथा नास्य रुचिरचेति मत्वा स्वचित्तं प्रदूषयेत्परः। स्वगुणे पुनः केन चिद्गुणपक्षपातिना प्रसङ्गेन समक्षं परोक्षं च कीर्त्यमाने। चित्तस्योन्नतिं निवारयंस्तस्यैव गुणाभिधायकस्य गुणानुरागितां मनसि कुर्यात्॥ परगुणामर्षणं वारयन्नाह।

10 **सर्वारम्भा हि तुष्ट्यर्थाः[3] सा वित्तैरपि दुर्लभा।**
भोक्ष्ये[4] तुष्टिसुखं तस्मात्परश्रमकृतैर्गुणैः॥ ७७

सर्वेषां हीनमध्योत्कृष्टानां सत्त्वानां। सर्वे वा। उपक्रमाः। दुःखपरिहारेण तुष्ट्यर्थाः। सर्वारम्भपरिश्रमेण तुष्टिरेवोत्पादयितव्येत्यर्थः। सा च तुष्टिर्धनविसर्गैरपि दुर्लभा। स्याद्वा न
15 वेति। इह पुनरयत्नसिद्धोपस्थिता कस्मात्परिहीयत इति मत्वा भोक्ष्ये अनुभविष्यामि सतोषसुखं। अन्ययत्ननिष्पादितैर्गुणैरुपनामितं। न हि प्रियपुत्रगुणैरक्षमा युक्ता। इति भावनया परगुणश्रवणाच्चित्तकार्कश्यमपकुर्यात्॥ अत्रैवोपचयमाह।

[1] So M., L², Burn., Dev., Minaev guṇam, Tib. has no plural sign.
[2] The abstract in °tā is new. The meaning given in P. W. is too narrow. See Apte anuvādaka = conformable to, in harmony with.
[3] Minaev tuṣṭyarthā, L¹, M. °rthaḥ.
[4] So M., L², Burn., Minaev bhokṣya.

न चात्र मे व्ययः कश्चित्परत्र च महत्सुखं।
अप्रीतिदुःखं द्वेषैस्तु महद्दुःखं परत्र च ॥ ७८

नैवास्मिन्नर्थे प्रवृत्तिमतो मम। इहलोके वा। उपचय-लेशोऽपि संभवति। उपचयः पुनर्विद्यत एवेति दर्शयति। परत्र च महत्सुखं परगुणाभिनन्दनात् ॥ एवमक्रियमाणे पुन-रपचयो दृश्यते। उभयलोकेऽपि दुःख परगुणासहनात् ॥ 5 तस्मात्सर्वकल्मषप[53ᵃ]रित्यागेनेयमुचिता कर्मकारिता शिक्ष-णीयेत्याह।

विश्वस्तविन्यस्तपदं विस्पष्टार्थं मनोरमं।
श्रुतिसौख्यं कृपामूलं मृदुमन्दस्वरं वदेत् ॥ ७९ 10

सर्वाविद्यविनिर्मुक्तत्वाद्विश्वस्त[1]। आनुपूर्व्या व्यवस्थितपदं। असंदिग्धार्थं। मनःप्रह्लादनकर। श्रवणाप्यायक[2]। करुणारस-निष्यन्दभूत[3] न रागादिनिदान। मृदुस्वरमकर्कशवचनं। [4]मन्द-स्वरं। यावता ध्वनिना प्रतिपाद्यस्य प्रतीतिः स्यात्। न ततो न्यून नातिरिक्तं उदीरयन्। 15

ऋजु पश्येत्सदा सत्त्वांश्चक्षुषा संपिबन्निव।
एतानेव समाश्रित्य बुद्धत्वं मे भविष्यति ॥ ८०[5]

---

[1] Viçvasta = yid-phebs —phebs par smra ba = "höflich und verbindlich sprechen" (Schmidt)

[2] āpyāyaka, not in P W, but Kādambarī ghrāṇāpyāyaka (KERN)

[3] Nisyanda (pâli nissanda), cp SENART, Mhv II, 516, Çiksa 138, 11, 181, 10 —Tib has rol rgyu-mthun-pa las byun ba

[4] M Vyut 126, 19 mandabhāṣyo bhavati

[5] Cp infra, VI, 48 112 and foll.

अवक्रमकुटिलं परमप्रीतिरसभरावनतेन चक्षुषा तृषित इव शीतलजलं परमाह्लादकरं सपिबन्निव सत्त्वान् व्यवलोकयन् । न रक्तेन न दुष्टेन न मुग्धेन । परमोपकारका ह्येते । कुतः यस्मादेतान् सत्त्वान् समासाद्य दुर्लभलाभ बुद्धत्वं मे भविष्यति ।
5 उत्पत्स्यते । एव च विहरन् । [1]अयत्नेऽपि सत्त्वार्थसमर्थो भवत्येव । यदुक्तं ।

सर्वत्राचपलो मन्दमितस्निग्धाभिभाषणात् ।
आवर्जयेज्जनं भव्यमादेयश्चापि जायते ॥ इति[2] ।

एतदेव च बोधिसत्त्वस्य कृत्य यदुत सत्त्वावर्जन नाम[3] । यथा
10 धर्मसंगीतिसूत्रे आर्यप्रियदर्शनेन बोधिसत्त्वेन परिदीपितं । तथा तथा भगवन् बोधिसत्त्वेन प्रतिपत्तव्यं यत्सहदर्शनेन सत्त्वाः प्रसीदेयुः । तत्कस्माद्धेतोः । न भगवन् बोधिसत्त्वस्यान्यत्करणीयमस्त्यन्यत्र [सत्त्वावर्जनात्] । सत्त्वपरिपाक एव इयं भगवन् बोधिसत्त्वस्य धर्मसंगीतिरिति ।

15 एवमक्रियमाणे को दोष इति चेत्[4] ।

अनादेय[5] तु तं लोकः परिभूय जिनाङ्कुर[6] ।
भस्मच्छन्नं यथा वह्निं पच्येत नरकादिषु[1] ॥ इति[2] ।

1-1 From Çikṣās. 124, 9 ff. with some variants: sattvārthakṣamo bhavaty eva, prasādakaratvāt / katham / sarvatra. The Ms. of the Çikṣās. has in margin the following glosses: vinā smitisamprayuktam and ...

2 The two stanzas are the 10th and 11th of the *Çikṣāsamuccayakārikās*, see BENDALL's Introduction and *supra* note *ad* IV, 48.

3 nāma is wanting in *Çikṣās.*

4 *Çikṣā.* evam punar doṣa ity āha.

5 ādeya (gzun os), anādeya; the present use of this word seems new. See SENART, *Mhv.* I, 580 on "ādeyavacana".

6 = buddhāṅkura (*Çikṣās.* 159, 21) = bodhisattva.

तस्मात्सत्त्वाराधन[53b]मेव बोधिसत्त्वस्य कर्म । उपकारिक्षेत्रमसाधारणं पुण्यप्रसूतिहेतुरिति ॥ तत्प्रसङ्गेनान्यदपि दर्शयन्नाह ।

सातत्याभिनिवेशोत्थं प्रतिपक्षोत्थमेव[1] च ।
गुणोपकारिक्षेत्रे च दुःखिते च[2] महच्छुभं ॥ ८१ 5

समादानेन क्रियमाणं । अभिनिवेशोत्थ तीव्रप्रसादजनितं । प्रतिपक्षोत्थं । क्लेशप्रतिपक्षशून्यतादिभावनाप्रसूतं । गुणक्षेत्रं[4] बुद्धबोधिसत्त्वादि । उपकारिक्षेत्रं मातापित्रादि । दुःखिता ग्लानादयः । एतेषु स्वल्पमपि कृतमप्रमेयशुभहेतुरुपजायते ॥

इदमपि बोधिसत्त्वेनाभ्यसनीयं । इत्याह । 10

दक्ष उत्थानसंपन्नः स्वयंकारी सदा भवेत् ।
नावकाशः प्रदातव्यः कस्य चित्सर्वकर्मसु ॥ ८२[5]

---

1 Minayev and Tesr Mss pratipakṣotthaṃ Our Ms has pratipakṣorthaṃ with r erased The gloss prasūtaṃ and Tib 'bslan' are decisive —The technical meaning of 'pratipakṣa' (See V, 51, *Çikṣās*, 209, 5) was unknown to the copyists, and the 'adversaries' are wrongly assimilated to the benefactors, etc —Min has [illegible] —Tib has "rtag par," as an equivalent to sātatya (cp *Çikṣās* 51, 9)

2 So Minaev L² has duḥkhiteṣu, but no plural sign in Tib —See Comm

3 See *Mhv*, s voc samādāna samādāya, and *upra*, p 36, n 1 —Tib has, "yid dam du byas-pa" as an epithet to [illegible] —As there is in Nep Ms a mark above the line I should conjecture that the correct reading is abhiniveçotthaṃ / samādānena kriyamāṇaṃ

4 Cp *infra*, VI, 112 and foll

5 Cp Chap VII, and *M Vyut* 126 47

18

दक्षः सर्वत्र पटुप्रचारः। उत्थानसंपन्नः कौसीद्यापनयना-द्वीर्यसमन्वागतः। अत एव स्वयमेव सर्वं करणीयं। न परा-पेक्षा क्वचिदपि कर्मणि कार्या। इदमेव नावकाश इत्यादिना दर्शयति॥

5 पारमिताभ्यासेऽनर्थविवर्जनायानुपूर्वकारितामाह।

उत्तरोत्तरतः श्रेष्ठा दानपारमितादयः।
नेतरार्थं त्यजेच्छ्रेष्ठामन्यत्राचारसेतुतः॥ ८३[1]

उपर्युपरितः। दानाच्छीलं श्रेष्ठ। शीलात्क्षान्तिरित्यादयः। अतोऽवरपारमिताहेतोरुत्तर न त्यजेत्। तद्विरोधेन न सेवेतेति

10 भावः॥ किं सर्वथा नेत्याह। अन्यत्रेति। बोधिसत्त्वानां य आचारः शिक्षासंवरलक्षणः स एव कुशलजलरक्षणाय सेतुबन्धो विहितः। तस्मादन्यत्र। त विहाय। स यथा न भिद्यत इत्यर्थः।

तस्मात्सभारमुपादित्सुना करुणापरतन्त्रेण सर्वं करणीय-

15 मुक्तमित्याह।

एवं बुद्धा परार्थेषु भवेत्सततमुत्थितः।
निषिद्धमप्यनुज्ञातं कृपालोरर्थदर्शिनः॥ ८४

एवमनुत्तर ज्ञात्वा सत्त्वानां हितसुखविधानाय नित्य-मारब्धवीर्यो भवेत्। प्रतिषिद्धार्थे प्रवृत्तौ [51b] कथं न साप-

---

[1] See App. at V. 12

त्तिक इति चेत् । न[1] । क्वचित्निषिद्धमपि सत्त्वार्थविशेष-प्रज्ञाचक्षुषा पश्यतः करणीयतयाऽनुज्ञातं भगवता । सनिःसरणं[2] च भगवतः शासनं । तच्चापि न सर्वस्य । अपि तु कृपालोः करुणाप्रकर्षप्रवृत्तितया तत्परतन्त्रस्य परार्थैकरसस्य स्वप्रयोजन-विमुखस्य । इति प्रज्ञाकरुणाभ्यामुद्भूतपरार्थवृत्तेरुपायकुशलस्य[3] प्रवर्तमानस्य नापत्तिः ।

अत्र चोपालिपरिपृच्छायामापत्त्यनापत्तिविभागो वेदि-तव्यः[4] । तथोपायकौशल्यसूत्रे ज्योतिष्कमाणवकाधिकारे[5] ॥

एषा रक्षात्मभावस्य भैषज्यवसनादिभिः ।[6]

इत्येतत्प्रतिपादयितुमाह ।

विनिपातगतानाथव्रतस्थान् संविभज्य च ।
भुञ्जीत मध्यमां मात्रां त्रिचीवरबहिस्त्यजेत् ॥ ८५[7]

भैषज्यवसनादिभिरात्मभावो हि परिपालनीयः परार्थो-पयोगित्वात् । यथोक्तं प्राक्[8] । तत्र द्विविधं भैषज्यं सततभैषज्यं

---

1 Wanting in Tib

2 See *Mhv* I, 433, *infra*, ad IX, 106 (339 ₈) Tib Las nes par hbyun-ba = nihsarana

3 See the important definition (Karunā upāyakuçalāh) *Çiksās* 165, ₂₋₄, where the mutual connexion of Prajñā with Kṛpā is clearly elucidated

4 See *infra* ad V, 98 On this book, see the notes of BENDALL, 164 (3) and Add Note on 178, ₉ The fragments referred to are quoted 164, ₈ 168, ₁₃

5 Cp *Çiksās* 167 ₃ jyotirmanavakam adhikrtya — Tib. illegible bram-zei khyeu

6 *Ibid* 127, ₈, ₁₄, 138, ₁₄ 143, 1—The 13th Kārikā, first part —Cp *supra* note ad IV, 48, V 1, V 24.

7 Cp *M Vyut* 126, ₂₅₋₂₆

8 *Supra* V, 69

ग्लान[प्रत्यय]भैषज्य च[1]। तत्र सततभैषज्यमोदनादि। तदर्थं पिण्डाय गोचरे चरता ग्रामप्रवेशे यथोक्तशिक्षायां स्मृतिमाधाय चरितव्यं। ततो लब्धात्पिण्डपातात्। चतुर्भागविभक्तात्। विनिपातगतानाथव्रतस्थान् संविभागिनः कुर्यात्[2]। एकं प्रत्यंशं विनिपातिनां। द्वितीयमनाथानां। तृतीयं सब्रह्मचारिणां दत्त्वा चतुर्थमात्मना परिभुञ्जीत। स परिभुञ्जानो न रक्तः परिभुङ्क्ते। असक्तो। अगृद्धो। अनध्यवसितः। अन्यत्र यावदेवास्य कायस्य स्थितये यापनायै॥ मध्यमां मात्रां। तथा च परिभुङ्क्ते यथा नातिसंलिखितो भवति। नातिगुरुकायः। तत्कस्य हेतोः। अतिसंलिखितो हि [51b] कुशलपक्षपराङ्मुखो भवति। अतिगुरुकायो मिद्धावष्टब्धो भवति। तेन तं पिण्डपातं परिभुज्य कुशलपक्षाभिमुखेन भवितव्यं। इत्यार्यरत्नमेघे ऽभिहितं[3]।

आर्यरत्नराशावपि[4]। परिभुञ्जता चैवं मनसिकार उत्पादयितव्यः। सन्त्यस्मिन् काये ऽशीतिकृमिकुलसहस्राणि। तान्यनेनैवौजसा सुखं विहरन्तु[5]। इदानीं चैषामामिषेण संग्रहं

---

1 *Çikṣās.* 127, 14 15; 131, 15; 135, 9 — "pratyaya" is wanting in our Ms. So *infra* (141, 13). Tib. na bai gsol sman no.

2 From *Çikṣās.* 127, 18—128, 2, with some variants at the beginning: *pratyaṃça (bgo skal), ekam sabrahmacāriṇām, dvitīyam duḥkhitānām, tṛtīyam vinipatitānām.*

3 See the note of Bendall, 127, 2 (= kṛça, cp. Childers s. v. sallekhiyam).

4 *Çikṣās.* 129, 7 9.

5 *Ibid.* sukhaṃ phāsuṃ viharantu. See note of Bendall.

करिष्यामि । बोधिप्राप्तश्च पुनर्धर्मेण संग्रहं करिष्यामीति विस्तरः ।

पुनरत्रैवोक्तं[1] । द्वयोरहं काश्यप श्रद्धादेयमनुजानामि । कतमयोर्द्वयोः । युक्तस्य मुक्तस्य चेति[1] । [2]अनया दिशा सर्वपरिभोगाः सत्त्वार्थमधिष्ठातव्याः । अन्यथा ।

आत्मतृष्णोपभोगात्तु क्लिष्टापत्तिः प्रजायते । इति

यथोक्तं चन्द्रप्रदीपसूत्रे ।

ते भोजनं स्वादुरसं प्रणीतं
लब्ध्वा च भुञ्जन्ति अयुक्तयोगाः ।
तेषां स आहारु वधाय भोती
यथ हस्तिपोतान विसा अधौतकाः[4] ॥ इति[2]

विस्तरेण चैतच्छिक्षासमुच्चये द्रष्टव्यं ।

ग्लानभैषज्यं तु यामिकं साप्ताहिकं यावज्जीविकमिति त्रिविधं । एतच्च भिक्षुविनये प्रतिपादितं । तत्रैवावधार्यं[5] ।

वसनादिभिरात्मरक्षामाह । त्रिचीवरबहिस्त्यजेत् इति ॥

---

1 1 *Çiksa* 138, 2—Yul t v=ld m pa

2 2 *Çiksas* 137, 9 18

3 Ms upabhogat / t kh ' Cp *Çiksas* 113, --See note ad IV, 18 —The 13th K rik ā, second part

4 The Ms of the Çiksās has visi adh utikā —The Tib p d rtsa (padma—kanda)=bisa —M *Vyut* 211 —v dh ya =dug tu= vis ya

Candrapradipa=Samādhir ja See Ch IX, ad fin =R As S Hodgson 4, fol 37b2 This Ms also reads *bisa a dhautaka* The Calcutta edit (32) prints here mere gibberish (C BENDALL)

5 See Çiksās p 135 9 (*Çrāvakavinaya*)—and the *Bhiksuprakirnaka* quoted p 151, 17

सचेदागत्य कश्चिद्बोधिसत्त्वं पात्रचीवरं याचेत । तेनातित्यागो[1] न कर्तव्यः । किं तु यत्तदनुज्ञातं भगवता । त्रिचीवरं श्रमणकल्पः[2] । ततोऽतिरिक्तं च यद्भवेत्त्यक्तव्यमर्थिने । नान्यथा । [3]उक्तं च बोधिसत्त्वप्रातिमोक्षे । सचेत्पुनः कश्चिदागत्य पात्रं वा
5 चीवरं वा याचेत [55a] सचेत्तस्यातिरिक्तं भवेद्बुद्धानुज्ञातात्त्रिचीवरात् । यथा परित्यक्तं दातव्यं । सचेत्पुनस्तस्य ऊनं[4] त्रिचीवरं भवेत् । यन्निश्रित्य ब्रह्मचर्यावासः[5] । तन्न परित्यक्तव्यं । तत्कस्य हेतोः । अविसर्जनीयं हि त्रिचीवरमुक्तं तथागतेन । सचेच्छारिपुत्र बोधिसत्त्वस्त्रिचीवरं परित्यज्य याचनकगुरुको[6]
10 भवेत् । [7]न तेनाल्पेच्छता आसेविता भवेत्[3] । इति ॥ अतित्यागं निषेधयन् पुनरात्मरक्षामुपदर्शयन्नाह ।

सद्धर्मसेवकं कायमितरार्थं[8] न पीडयेत् ।
एवमेव हि सत्त्वानामाशामाशु प्रपूरयेत् ॥ ८६ ॥

सतां सत्पुरुषाणां बोधिसत्त्वानां धर्मः । लौकिकलोकोत्तर-
15 परहितसुखविधानं । तत्सेवकं कायं । अन्यार्थनिमित्तं न

---

1 Atityaga new word
2 Cp Minaev, *Recherches* 173, n ,
3 3 *Çikṣās* 144, 17—145 ,—The following omitted V, -
4 *Ibid* civar ini
5 *Ibid* °caryavasah
6 °guruko bhavet = gtso bor byed - na
7 Negation wanting in Tib
8 For the actual meaning of itara see Comm and Tib phran thsogs ched-du gnod mi bya = kunciidartham ksudrakārtham (according to Bilingual Voc) Some compound of mita (mitārthārtham) seems probable

पीडयेत् । अन्यथा महतोऽर्थराशेर्हानिः स्यात् । अत एव पूर्वस्मिन् हेतुपदमेतत् । कुतः पुनरेवं । यस्मादनेनैव सुकुमारोपक्रमेण सवर्धमानः शीघ्रमेव सत्त्वानां हितसुखरूपादनसमर्थो भवति ॥ यत एवं । तस्मात् ।

त्यजेन्न जीवितं तस्मादशुद्धे करुणाशये । 5
तुल्याशये तु तत्त्याज्यमित्थं न परिहीयते ॥ ८७

स्वशरीरशिरोदानादि न कर्तव्यमिति निषिद्धं । कदा । अशुद्धे मित्रामित्रेतरसर्वव्यसनिजनसाधारणप्रवृत्ते[1] कृपाचित्ते[2] । अत्यारम्भेन[3] हि वीर्येण स्वपरहितार्थस्य बाधा स्यात् । समप्रवृत्ते पुनराशये स्वपरात्मनोऽतिरिक्ते वा न निषिध्यते । 10

यदुक्तं[4] । तथा स्वपरबोधिपक्षश्रुताद्यन्तरायकरौ त्यागात्यागौ न कार्यौ । अधिकसत्त्वार्थशक्तेस्तुल्यशक्तेर्वा बोधिसत्त्वस्याधिकतुल्यकुशलान्तरायकरौ त्यागात्यागौ न कार्याविति सिद्धं भवति ।

इदमेव च सधाय बोधिसत्त्वप्रातिमोक्षेऽभिहितं । यस्तु खलु 15
पुनः शारिपुत्राभिनिष्क्रान्त[55b]गृहावासो बोधिसत्त्वो बोध्यङ्गैरभियुक्तस्तेन कथं दानं दातव्यं । कतरं दानं दातव्यं । कियत्-

---

1 Ms °janasādhāraṇa°, the ā being erased —vyasanin = phons pa = poor, needy

2 Ms has kṛpācittā, but no sign of interpunction

3 See the definition of the śūnyatā ... Çikṣās 51, 9

4 Çikṣā 144, 5-17 — The following supra (V, 5) 142, 3

द्रूपं दानं दातव्यं ॥ पेयालं ॥ धर्मदायकेन भवितव्यं[1] । यश्च
शारिपुत्र गृही बोधिसत्त्वो गङ्गानदीवालिकासमानि बुद्ध-
क्षेत्राणि सप्तरत्नपरिपूर्णानि[2] तथागतेभ्यो ऽर्हद्भ्यः सम्यक्संबुद्धेभ्यो
दानं दद्यात् । यश्च शारिपुत्र प्रव्रज्यापर्यापन्नो बोधिसत्त्व एकां
5 चतुष्पदिकां गाथां प्रकाशयेत् । अयमेव ततो बहुतरं पुण्यं
प्रसवति । न शारिपुत्र तथागतेन प्रव्रजितस्यामिषदानमनु-
ज्ञातं ॥ पेयालं ॥ यस्य[3] पुनः शारिपुत्र पात्रागतः पात्रपर्या-
पन्नो लाभो भवेद्धार्मिको धर्मलब्धः । तेन साधारणभाजिना
भवितव्यं सार्धं सब्रह्मचारिभिरिति[4] ।

10 तत्रैवाह । यस्तु खलु पुनः शारिपुत्रानभिनिष्क्रान्तगृहा-
वासो बोधिसत्त्वः । तेन धर्म आसेवितव्यः । तत्र तेनाभियुक्तेन
भवितव्यमिति ॥ अन्यथा ह्येकसत्त्वार्थसंग्रहार्थं महतः सत्त्व-
राशेस्तस्य च सत्त्वस्य बोधिसत्त्वाशयपरिकर्मान्तरायान्महतो ऽर्थस्य
हानिः कृता स्यादिति[5] ॥

15 अनेनोपायकौशलेन विहरन्न बोधिमार्गात्परिभ्रश्यते ॥
अयमभिप्रायः[6] । दत्तः पूर्वमेवानेनात्मभावः सर्वसत्त्वेभ्यः । केवल-

---

[1] *Çikṣas.* and Tib. add dharmadānapatinā.
[2] *Ibid.* °pi dānam [illegible] kṛtvā.
[3] Ms. yasya ca punaḥ. *Çikṣas.* yasya khalu punaḥ.
[4] Ends the quotation *Çikṣas.* 141, [illegible].
[5] *Ibid.* 145, 8. — Follows the quotation ad V, [illegible].
[6] Cp. *Çikṣas.* 51, 11. — The whole of this theory (ātmatyāga) is summarized in the following line: sukṛtānām bhūmi bhāvyam maitrī [illegible]cittena ca sarvataḥ (143, 15. See 51, 7 and foll.). Kārikā 11 of the Çi. — Contrast the doctrine of the Dhammapada 166, 220 which is rather self-centred.

मकालपरिभोगात्परिरक्षणीयः । अतो न मात्सर्यस्यावकाशः । नापि प्रतिज्ञातार्थहानिरिति । यदुक्तं ।

भैषज्यवृक्षस्य सुदर्शनस्य
मूलादिभोग्यस्य यथैव बीजं ।
दत्त्वापि संरक्ष्यमकालभोगात्
मवृद्धभैषज्यतरोस्तथैव ॥ इति[1] ॥ [१०७]

सत्त्वाशयरक्षणादप्यात्मा रक्षितव्य इत्याह ।

धर्मं निर्गौरवे स्वस्थे न शिरोवेष्टिते वदेत् ।
सच्छत्रदण्डशस्त्रे च नावगुण्ठितमस्तके ॥ ८८[2]

देवमनुष्यपूजितो हि भगवतो धर्मः । ततो ऽवध्यायन्ति 10 देवतादयो गौरवमकुर्वतो धर्मप्रकाशनात् । निषिद्धं चैतद्भगवता । इति । तदाज्ञातिक्रमे सापत्तिको भवेत् ॥ न वस्त्रादिबद्धशिरसि । सच्छब्देन त्रिष्वपि सबन्धः । तथोक्तरेवादिना पिहितशीर्षे । प्रत्येकं स्वस्थ इति सबन्धनीयं । ग्लाने पुनरनापत्तिः ॥ उपलक्षणं चैतत् । न स्थितेन सुप्ताय निषण्णाय वा । 15 न निषण्णेन सुप्ताय[3] । न चा[न]सनेन निषण्णाय[4] । नोत्पथ-

[1] Quoted ibid 51, 17

[2] See Pratimoksasutra (ed. Min.) p. 23 and M. Vyut 263, ... , avagunthita', 263, 17, 88 (oguntthitasisassa agilanassa)

[3] To the "Supta" (ñal ba) of our text, answers the nipanna' of the M Vyut 263, 70

[4] Ms na casanannam (na erased n, secunda manu), Tib stan med-pas kvan —stan = mat carpet, cushion asana Therefore nirasanena, or rather anasanena but these forms are not supported so far as I know, by Lexx or literature —Rather anasannena

याचिना मार्गयायिने । नाग्रगामिने पृष्ठगामिना । नाप्यल-
ङ्कारयुक्तायेत्यादयो ऽपि द्रष्टव्या इति[1] ।

इदमप्यनर्थविवर्जनाय[2] मूलापत्तिकारणमकरणीयमित्याह ।

गम्भीरोदारमल्पेषु न स्त्रीषु पुरुषं विना ।

5 गम्भीरो दुर्मेधसामगाधत्वात् । उदारश्च प्रकर्षपर्यन्तत्वात् । तादृशं च धर्ममल्पेषु असंस्कृतबुद्धिषु हीनाधिमुक्तिषु वा न वदेदिति प्रकृतेन सबन्धः ॥ न मातृग्रामस्यैकाकी रहोगतो धर्मं वदेत् । वदन् सापत्तिको भवति । न दोषः पुरुषो यदि स्यात् ।

10 **हीनोत्कृष्टेषु धर्मेषु समं गौरवमाचरेत् ॥ ८९**

श्रावकयानभाषितेषु वा महायानभाषितेषु वा धर्मेषु तुल्य चित्तप्रसादादिकं कुर्यात् । अन्यथा सद्धर्मप्रतिक्षेपः स्यात्[3] ।

नोदारधर्मपात्रं च हीने धर्मे नियोजयेत् ।
न चाचारं परित्यज्य सूत्रमन्त्रैः प्रलोभयेत्[4] ॥९०

15 गम्भीरोदारधर्मभाजनं च सत्त्वं निमित्तैर्ज्ञात्वा न श्रावकयानादिधर्मेष्ववतारयेत् । न चाचारं शिक्षासंवरकरणीयतां

---

[1] See M. Vyut. 263 [illegible] — some variations [illegible]

[2] Ms. visarjanīya

[3] Cp. Minaev, Recherches pp. 22–2[illegible]

[4] Tib. hdrid — to deceive, to cheat

मुक्ता सूत्रान्तादिपाठेनैव तव शुद्धिर्भविष्यति। इति धर्मकाम प्रभावयेत् ॥

आह चात्र[1]। पुनरपरो ऽनर्थो रत्नकूटे दृष्ट। [56b] अपरिपाचितेषु सत्त्वेषु विश्वासो बोधिसत्त्वस्खलित[2]। अभाजनीभूतेषु सत्त्वेषूदारबुद्धधर्मप्रकाशना बोधिसत्त्वस्खलितं। उदाराधिमुक्तिकेषु सत्त्वेषु हीनयानप्रकाशना बोधिसत्त्वस्खलितमिति ॥ 5

आर्यसर्वधर्मवैपुल्यसंग्रहे सूत्रो ऽप्यनर्थ उक्तः। सूक्ष्मं हि मञ्जुश्रीः सद्धर्मप्रतिक्षेपकर्मावरणं। यो हि कश्चिन्मञ्जुश्रीस्तथागतभाषिते धर्मे कस्मिंश्चित् शोभनसंज्ञां करोति। क चिद्शोभनसंज्ञां। स सद्धर्मं प्रतिक्षिपति। तेन सद्धर्मप्रतिक्षेप्ता[6] तथागतो ऽभ्याख्यातो भवति। सङ्घो ऽपवदितो भवति। य एवं वदति। इदं युक्तमिदमयुक्तमिति विस्तरः ॥ 10

[6]आर्याकाशगर्भसूत्रे च मूलापत्तिप्रस्तावे चोक्तं। पुनरपरमादिकर्मिको बोधिसत्त्वः केषांचिदेव वक्ष्यति। किं भोः 15

---

[1] The author, Çāntideva, in his Çikṣās. 51, 11

[2] Çikṣā has here and infra [illegible]

[3] Çikṣās has samprakāçanāt, nā—The form in °nā is new—Tib. has no ablative sign

[4] So our Ms., Tib. has samgrahe'pi sukṣmo, Çikṣās. 95 11 14, with the usual reading samgrahasūtre pi marthe

[5] Çikṣās. dharmam pratikṣipati

[6] Ibid. 61 13—14, Minaev Recherches p. 92. Cp. anand XI. 103—but see Çikṣā 172, 10 and foll.

[7] Çikṣās. kasya [illegible] (better)

प्रातिमोक्षविनयेन शीलेन सुरक्षितेन । शीघ्र त्वमनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादयस्व । महायान पठ । यत्ते किं चित्कायवाङ्मनोभिः क्लेशप्रत्ययादकुशलं कर्म समुदानीतं तेन ते शुद्धिर्भविष्यत्यविपाक[1] । यावद्यथा पूर्वोक्त । इयमादिकर्मि-
5 कस्य बोधिसत्त्वस्य तृतीया मूलापत्तिरिति ॥

अत इदमपि प्रातिमोक्षनिषिद्ध नाचरणीयमित्याह ।

दन्तकाष्ठस्य खेटस्य विसर्जनमपावृतं ।
नेष्टं जले स्थले भोग्ये मूत्रादेश्चापि गर्हितं ॥ ९१[2]

खेटस्य श्लेष्मणो विसर्जनमपावृत न कुर्यात् । जले स्थले
10 भोग्य[3] उपभोग्ये मूत्रपुरीषादेरपि कुत्सित । अत्रापि देवताद्यवध्यानादपुण्यं प्रसवेत् ।

मुखपूरं न भुञ्जीत सशब्दं प्रसृताननं ।
प्रलम्बपादं नासीत न बाहू मर्दयेत्समं ॥ ९२[5]

मुखं पूरितं कृत्वा महत्कवलग्रहणात् [57ᵃ] । सशब्दं सुक-

---

1 Corrected by a second hand bha isyatitvapi pathah

2 Cp *Çikṣās* 125, 5, and the note referring to BEAL, *Catena*, p 236 —*M Vyut* 263, 103 and foll , *Prātimokṣa* (ed MIN) p 23, 73 75 , *Manu*, IV , 45

3 According to Tib bhogya, epithet of jala sthala ; sthala = than,—Cp the "saharita pradeça" of *M Vyut* 263, 105

4 This compound is new , Cp udarapūram, etc —BENDALL, 125, n 5

5 Quoted in *Çikṣās* 125, 11 "This precept (pralambapādam nāsīta) which has no parallel in the Prātimokṣas illustrates a familiar posture for laymen found in Buddhist art (FERGUSSON, *Tree and Serpent Worship*, p 193)" (C B) One may add reference to I-TSING, p 122, last line "On sitting down, one's feet touch the ground"—Foucher, *Iconographie* 67, n 5

शुनिकादिशब्देन[1] । दूरं विदारितमुखं । प्रलम्बपादं भूम्यादावलग्नपादं खट्वाद्यारोहणे सति नासीत । द्वावपि बाहू सममेकस्मिन् काले न मर्दयेत्[2] । क्रममर्दने न दोषः । सति प्रत्यये[3] ॥

नैकयान्यस्त्रिया कुर्याद्यानं शयनमासनं[4] ।

एकया अद्वितीयया अन्यस्त्रिया । गृहिप्रव्रजितयोरिदमिह साधारणमित्यन्यग्रहणं । न कुर्याद्यानादि ॥ संक्षेपेण संकलय्य दर्शयन्नाह । 5

लोकाप्रसादकं सर्वं दृष्ट्वा पृष्ट्वा च वर्जयेत् ॥ ९३[5]

लोकानां यदप्रसादजनकं न भवति तत्सर्वं दृष्ट्वा शास्त्रे व्यवहारे वा । पृष्ट्वा विज्ञान्[6] । वर्जयेत् । अनेनैतद्दर्शितं भवति । 10 दृष्टेऽपि [7]यद्वा[धा]करमेवंविधं तद्वर्जयेत् । आपत्तिर्भवतीति । यदुक्तं ।

[8]रत्नमेघे जिनेनोक्तस्तेन संक्षेपसंवरः ।
येनाप्रसादः सत्त्वानां तद्यत्नेन परित्यजेत्[9] ॥ इति

---

1 Tib cag cag la sogs

2 See a cognate precept, Manu, IV, 32—mardana = gño-ba mñe ba

3 According to Tib the clause "sati pratyaye" refers to the Com of the following stanza

4 Tib bzon pa mal stan gnas (dag tu —Cp *Dhammapada*, 185 pantam sayanāsanam secretus cubandi locus, and ref *in loco*

5 Cp *Çikṣas* 125, 13

6 *Vajracched* 28 18 (P W)

7 Tib gan gnod pa byed pai rnam pa de lta bu

8 *Çikṣās* 124 15—The 12th Kārikā

9 *Çikṣās* has vivarjayet

[1]यथाह । कतमे च [ते] बोधिसत्त्वसमुदाचाराः । यावदिह बोधिसत्त्वो नाध[ः]स्थाने[2] विहरति । नाकाले । नाकाले भाणी भवति । नाकालज्ञो भवति । नादेशज्ञो भवति । यतोनिदानमस्यान्तिके सत्त्वा अप्रसादं प्र[ति]वेदयेयुः । स सर्वसत्त्वानुरक्षया आत्मनश्च बोधिसंभारपरिपूरणार्थं सम्यगीर्यापथो भवति । मृदुभाणी । मन्दभाणी । असंसर्गबहुल[ः] । प्रविवेकाभिमुखः । सुप्रसन्नमुख इति ॥

न बोधिसत्त्वेनावमन्यना क्व चिदपि कर्तव्येत्याह ।

नाङ्गुल्या कारयेत्किं चिद्दक्षिणेन तु सादरं ।
समस्तेनैव हस्तेन मार्गमप्येवमादिशेत् ॥ ९४

एकया अङ्गुल्या तर्जन्यादिकया न किं चिदुपदर्शयेत् । अपि तु समस्तेन समग्रेणैव हस्तेन । दक्षिणेन । न वामेन । मार्गमपि कथयेत् । आस्तां तावत् [6]सगौरवमन्य[त्]द्वस्तु ॥

लोकाप्रसादनिवारणायाह ।

न बाहूत्क्षेपकं किं चिच्छब्दयेदल्पसंभ्रमे ।
अच्छटादि तु कर्तव्यमन्यथा स्यादसंवृतः ॥ ९५

---

[1] Çikṣas 124, 15–19
[2] Ibid nasthāne Tib gnas dma bar ...
[3] Ms pravidaseyuh (da erased) Tib sma b...
[4] Çikṣas has sampanneryāpatho , probably correct as the ... of ... written by a second hand in our Ms
[5] Cp Çikṣas 9 , 02 8
[6] Tib ... gamayam, fairly probable

न भुजमुत्क्षिप्य कंचिदाह्वयेत् । अल्पप्रयोजनतारतम्ये । महति पुनरदोषः ॥ अच्छटादिशब्दं तु कुर्यात् । तदकरणे ऽसमाहितचारितायाममंवृतः स्यात् । एतावता औद्धत्यपरिहारो ऽपि दर्शितो भवति ॥ [1]स हि शय्यां परिकल्पयन्नेव परिकल्पयेदित्युपदर्शयन्नाह ।   5

नाथनिर्वाणशय्यावच्छयीतेप्सितया दिशा ।
संप्रजानँल्लघूत्थानः प्रागवश्यं नियोगतः ॥ ९६

भगवतो महानिर्वाणशय्यामिव शय्यां परिकल्पयेत् । अभिमतया दिशा शिरो विधाय दक्षिणेन पार्श्वेन । पादस्योपरि पादमाधाय । दक्षिणं बाहुमुपधानं[2] कृत्वा वामं च प्रसार्य । 10 जङ्घोपरि निवेश्य । चीवरैः सुसंवृतकायः । स्मृतः । संप्रजानानः । उत्थानसंज्ञी । आलोकसंज्ञी । शयितः । [4]नाचित्तकमिद्धावष्टब्धः । न च निद्रासुखमास्वादयेत् । न च पार्श्वसुखं[5] अन्यच्च यावदे[वै]षां महाभूतानां स्थितये यापनायै । इति ॥ लघूत्थानः शीघ्रमेवोत्तिष्ठेत् । न तु जृम्भिकां गात्रमोटनं

---

[1] On this § see the Ratnamegha quoted in Çikṣās. 137 b.

[2] Upadhāna = snas = cushion — Cp. [illegible] pp. 203, 230, [illegible]

[3] So Tib. Çikṣ. has [illegible]

[4] So Ms., Tib. [illegible]

[5] [illegible]

कुर्वन्नालास्योपहतस्थिरेण । एतेभ्य एव सर्वेभ्यः पूर्वमेव ॥

इदमपरमभिसंक्षिप्य कथयन्नाह ।

आचारो बोधिसत्त्वानामप्रमेय उदाहृतः ।
चित्तशोधनमाचारं नियतं तावदाचरेत् ॥ ९७[2]

आचारः शिक्षणीय । अप्रमेयो ऽसंख्येयः । बोधिसत्त्वप्रातिमोक्षादिषु प्रदर्शित । तत्संग्रहरूप प्रथमतः चित्तशोधनमेवाचारमाचरेत् । नियतं अवश्यतया ॥

सामान्यापत्तिशोधनायाह ।

रात्रिं दिवं च त्रिस्कन्धं त्रिष्कालं च प्रवर्तयेत् ।
शेषापत्तिशमस्तेन बोधिचित्तजिनाश्रयात् ॥ ९८

त्रिष्कृत्वो रात्रेः । त्रिष्कृत्वो दिवसस्य । त्रिस्कन्ध[3] । त्रयाणां स्कन्धानां पापदेशनापुण्यानुमोदनाबोधिपरिणामनानां समाहारः । त्रिस्कन्ध प्रवर्तयेत् ; शेषा मूलाया अन्याः । अ[158a]थ वा सचित्य कृता याः प्रतिकृता[4] । ताभ्यो ऽन्याः स्मृतिसप्रमोषेण असप्रजानता वा कृता[4] । तासां प्रशमः प्रतिकरणं तेन त्रिस्कन्धपरिवर्तनेन[5] बोधिचित्तस्य जिनानां च भगवतां समाश्रयणाच्च ॥

एतेन विदूषनासमुदाचारादयो दर्शिता भवन्ति ।

---

[1] Ms et reve lib de dag thams cad kyan
[2] See supra V, 17
[3] The abstract (of concept) is new and irregular
[4] See the note of BENDALL (Çiksas 171,) and Hint. of Mat 214
[5] Hdon pa - hersagen vorlesen

[1]तत्र पापशोधन चतुर्धर्मकसूत्रे देशितं । चतुर्भिर् मैत्रेय धर्मैः समन्वागतो बोधिसत्त्वो महासत्त्वः कृतोपचितं पापमभिभवति । कतमैश्चतुर्भिः । यदुत । विदूषणासमुदाचारेण । प्रतिपक्षसमुदाचारेण । प्रत्यापत्तिबलेन । आश्रयबलेन च ॥ तत्र विदूषणासमुदाचारः । [2]अकुशलं कर्म कृत्वा विप्रतिसारकृतात्मविगर्हणा पापदेशना । तदनुष्ठानं तत्समुदाचारः । तत्र प्रतिपक्षसमुदाचारः । अकुशलप्रतिपक्षः कुशलं । तत्समुदाचारः । कृत्वाप्यकुशलं कर्म कुशले कर्मण्यत्यर्थमभियोगः । तत्र प्रत्यापत्तिबलं । संवर[समादानादकरणसंवर]लाभः । तत्राश्रयबलं । बुद्धधर्मसंघशरणगमनं । अनुत्सृष्टबोधिचित्तता च । स बलवत्संनिश्रयेण न शक्यते पापेनाभिभवितुं । एभिर्[3] मैत्रेय चतुर्भिर्धर्मैः समन्वागतो बोधिसत्त्वो महासत्त्वः कृतोपचितं पापमभिभवतीति ॥

[4]विशेष[त]स्तु बोधिसत्त्वापत्तीनां गुर्वीणां लघ्वीनां च देशनार्थोपालिपरिपृच्छायामुक्ता[4] । ताः शिक्षासमुच्चये द्रष्टव्याः ।

[5]सर्वापत्तयो बोधिसत्त्वेन पञ्चत्रिंशतां बुद्धानां भगवता-

---

[1] See *Çikṣās* 160, 4-11 and Additional Notes (reference to A. M. Guimet V 197)

[2] *Çikṣās* akuçalam karmādhyācarati tatraiva ca vipratisārabahulo bhavati / tatra pratipakṣasamudācāraḥ kṛtvāpy ... In our Ms. glosses are mixed up with the text

[3] Ms. etan maitreya

[4-4] *Çikṣās* 164, 8

[5] *Çikṣās* 169, 4-7 Some variants occur, stūpāpattiḥ saṃghāpattiḥ tathānyāç cāpattayo bodhisattvena

मन्तिके रात्रिं दिवसमेकाकिना [1]देशयितव्याः । तत्रेयं देशना । अहमेवंनामा बुद्धं शरणं गच्छामीत्यारभ्य यावत्संघं शरणं गच्छामि । नमः शाक्यमुनये तथागतायार्हते सम्यक्संबुद्धाय । नमो वज्रप्रमर्दिने[2] । इत्यारभ्य यावत् ।

5 उपैमि सर्वान् शरणं कृताञ्जलिः[3] ॥

इति विस्तरमुक्त्वाह । [4]इति हि [58b] शारिपुत्र बोधिसत्त्वेनेमान् पञ्चत्रिंशतो बुद्धान् प्रमुखान् कृत्वा सर्वं तथागतानुगतैर्मनसिकारैः पापविशुद्धिः कार्या । तस्यैवं पापविशुद्धस्य त एव[5] बुद्धा भगवन्तो मुखान्युपदर्शयन्ति[6] । पेयालं । न तत्[7]

10 शक्यं सर्वश्रावकप्रत्येकबुद्धनिकायैरापत्तिकौकृत्यस्थानं[8] विशोधयितुं यद्बोधिसत्त्वस्तेषां बुद्धानां भगवतां नामधेयधारणपरिकीर्तनेन रात्रिं दिवं त्रिस्कन्धकधर्मपर्यायप्रवर्तनेन आपत्तिकौकृत्यान्निःसरति समाधिं च प्रतिलभते[4] ॥

एतत्साकल्येन शिक्षासमुच्चये वेदितव्यं ।

15 उक्तो विदूषणासमुदाचारः । प्रतिपक्षसमुदाचारप्रत्यापत्तिबले अपि विस्तरेण शिक्षासमुच्चयादेव द्रष्टव्ये ।

---

1 Here *Çikṣās* has gurvyo

2 Ends quotation from *Çikṣas* 196, 7

3 *Ibid* 170, 10

4 *Ibid* 171 1–8

5 I prefer this reading to the "tatra ca" of the *Çikṣas*

6 Abridged from the *Çikṣas*.

7 "Tat" wants in the *Çikṣās*

8 On *kaukṛtya*, Prof BENDALL refers to *Çikṣas* p. 142 Pāli kukucca, *Mhv.* III, 175, 9

[1]आर्यमैत्रेयविमोक्षे तु बोधिचित्तेन पापविशुद्धिरुक्ता। तच्चोक्तमेव प्राक्[2]।

जिनाश्रयात् पापविशुद्धौ सूकरिकावदानमुदाहार्यं[3]।

ये बुद्धं शरणं यान्ति न ते गच्छन्ति दुर्गतिं।

प्रहाय मानुषान् कायान् दिव्यान् कायान् लभन्ति ते[4]॥ 5

एवं धर्मं संघं चाधिकृत्य पाठः[5]। अनेन चाश्रयबलमुक्तं॥

पुनरनियमेन दर्शयन्नाह।

या अवस्थाः प्रपद्येत स्वयं परवशोऽपि वा।
तास्ववस्थासु याः शिक्षाः शिक्षेत्ता एव यत्नतः॥ ९९

स्वयमात्मना परायत्तो वा सत्त्वार्थक्रियायां प्रवृत्तः॥ किं 10 पुनरेवमनियमेनाभिधीयत इत्याह।

न हि तद्विद्यते किं चिद्यन्न शिक्ष्यं जिनात्मजैः।
न तदस्ति न यत्पुण्यमेवं विहरतः सतः॥ १००

यस्मात् सर्वाकारं सर्ववस्तुतत्त्वमधिगम्य सर्वेषां हितसुख-विधानार्थं उद्यच्छद्भिर्बुद्धसुतैः न तदस्ति किं चिद्यन्न शिक्षि- 15

---

[1] *Çikṣās* 177, 14

[2] *Supra*, ad I, 10, 14

[3] *Çikṣās* 177, 10-14

[4] See *Ādikarmapradīpa*, p 187 and *Divyāvadāna*, p 195 26 (with the reading kāyān upāsate)—Cp Samyutta N 1, p 27, Sumangalavil. I., p 233, Jātaka, I 9, p 97

[5] The *Çikṣās* has °kṛtya pāpakṣayaḥ But our reading is confirmed by Tib and *Divyā*

तव्यं । अन्यथा सर्वाकारः सर्वसत्त्वानामर्थः कर्तुमशक्यः । पुण्य-सं[58a]भारो ऽप्येव विचरतो ऽपर्यन्त एव स्यात् ।

इयमपि[1] शिक्षापदमुद्रावधारयितव्येत्याह ।

पारंपर्येण साक्षाद्वा सत्त्वार्थं नान्यदाचरेत् ।
5 **सत्त्वानामेव चार्थाय सर्वं बोधाय नामयेत् ॥ १०१**

अन्ततः स्वयमाहारादिक्रियया परप्रेरणया ऽपरापरदूत-प्रेरणया[2] वा । साक्षात् स्वयमेवामिषदानादिना वा । यत्स-त्त्वानां हितसुखहेतुर्न भवति । तन्न कुर्यात् कारयेद्वा ।। न चैतदेव केवलं । किं चित् । सत्त्वानामेव संसारदुःखपतितानां
10 ततो निःसरणाय । सर्वं कुशलमूलमनुत्तरायां सम्यक्संबोधौ परिणामयेत् ॥

एतावता श्लोकद्वयेन पुण्यवृद्धिरुपदर्शिता भवति ॥

यदुक्तं । कल्याणमित्रानुत्सर्गादिति[3] । तदाह ।

सदा कल्याणमित्रं च जीवितार्थे ऽपि न त्यजेत् ।
15 **बोधिसत्त्वव्रतधरं महायानार्थकोविदं ॥ १०२**

कल्याणकर्मण्यभ्युदयनिःश्रेयसप्राप्तिलक्षणे मित्रमसाधारणो बन्धुः । तत्कायजीवितविप्रणाशभयभीतो ऽपि न त्यजेत् ॥

---

[1] Tib bslab-pai gźi rgyu hdi yan

[2] Tib brgyud-nas pho ña

[3] The third pāda of the 6th Kārikā of the Çikṣās.—Cp *Çikṣās.* 34, 17, (°anutsarjanāt), and 41, 10 (sūtrānām ca sadeksanāt)—*supra* ad V, 1, *infra*, p 158, l 13

कल्याणमित्रानुशंसाश्च[1] प्रज्ञापारमितायामार्याष्टसाहस्रिकायां सदाप्ररुदितपरिवर्तादेदितव्याः[2]। चतुर्धर्मकसूत्रे ऽप्युक्तं[3]। कल्याणमित्रं भिक्षवो बोधिसत्त्वेन महासत्त्वेन यावज्जीवं न त्यक्तव्यमपि जीवितहेतोरिति ॥[4]

अपरित्याज्यस्य कल्याणमित्रस्य लक्षणमाह। बोधिसत्त्वशिक्षासंवरे व्यवस्थितं। महायानार्थपण्डितं। एतादृशं सुदुर्लभं ॥ कल्याणमित्रस्य पर्युपासनपरिज्ञानार्थमाह।

श्रीसंभवविमोक्षाच्च शिक्षेद्गुरुवर्तनं।

श्रीसंभवविमोक्षात्। आर्यगण्डव्यूहपरिवर्तात् कल्याणमित्रपर्युपासनं शिक्षेत् जानीयात् ॥ यथोक्तमार्यगण्डव्यूहे आर्यश्रीसंभवेन। क[59b]ल्याणमित्रसंधारिताः [कुलपुत्र] बोधिसत्त्वा न पतन्ति दुर्गतिषु।[5] यावत्। संचोदकाः[6] कल्याणमित्रा अकरणीयानां। संनिवारकाः प्रमादस्थानात्। निष्कासयितारः संसारपुरात्। तस्मात्तर्हि कुलपुत्र एवंमनसिकाराप्रतिप्रश्रब्धेन[7]

1 See *supra*, p 22, note 3

2 *Çikṣās* 37, 13 where the parivarta is not named in the text (Ch XXX, pp 195, *sqq*)

3 *Çikṣās* 41, 18

4 *Çikṣās* 34, 10–36, 4 See the notes of the Editor on sampravedhana, lokadāsa, rajoharana

5 Three lines are omitted in our text

6 So the *Çikṣās*-Ms —The Hodgson Ms sambodhanāni—Tib Khon du chud pa = avabodh

7 °Manasikāra°, same reading in the *Çikṣās* Ms —The Editor reads °kārāt with the Hodgson Ms —But Tib has bya-ba rgyun-ma chad-pas

कल्याणमित्राण्युपसंक्रमितव्यानि । पृथिवीसमचित्तेन सर्वभारो-
द्वहनापरितसनतया[1] । वज्रसमचित्तेन अभेद्याशयतया । चक्र-
वाडसमचित्तेन सर्वदुःखासंप्रवेधनतया । लोकदाससमचित्तेन
सर्वकर्मसमादानाविजुगुप्सनतया । रजोहरणसमचित्तेन माना-
5 भिमानविवर्जनतया । यानसमचित्तेन गुरुभारनिर्वाहनतया ।
[2]अश्वसमचित्तेन [अकुप्यनतया । नौसमचित्तेन] गमनागमना-
परितसनतया[1] । सुपुत्रसदृशेन कल्याणमित्रमुखवीक्षणतया ।
आत्मनि च ते कुलपुत्रातुरसंज्ञोत्पादयितव्या । कल्याणमित्रे[षु]
च वैद्यसंज्ञा । अनुशासिनीषु[3] भैषज्यसंज्ञा । प्रतिपत्तिषु व्याधि-
10 निर्घातनसंज्ञा । आत्मनि च ते कुलपुत्र भीरुसंज्ञोत्पादयि-
तव्या । कल्याणमित्रेषु शूरसंज्ञा । अनुशासनीषु[4] प्रहरणसंज्ञा ।
प्रतिपत्तिषु शत्रुनिर्घातनसंज्ञा ॥[5]

यदुक्तं । सूत्राणां च सदेक्षणादिति[6] । तदुपदर्शयितुमाह ।

एतच्चान्यच्च बुद्धोक्तं ज्ञेयं सूत्रान्तवाचनात् ॥ १०३

15 एतदिह शास्त्रे प्रतिपादितं । अन्यदिह नोक्तं । बुद्धेन

---

1 1 *Çikṣās* sarvabhāravahana° but our Ms is corrected by a second hand —*tas* (utkṣepe) *Dhātup* 26, 103 (P W s voc , cp trams) *Çikṣās* Ms has °tasyanatayā, more probable See notes of BENDALL, in loco and ad 25, 7 (CHILDERS paritassanā)

2 So Ms., but Tib (*Khyi*) agrees with *Çikṣās* Read *Çvasamacittena*

3 *Çikṣās* Çāsanīṣu, cf V 30, 74

4 So Ms

5 Ends quotation from *Çikṣās* 36, 4

6 Cp *supra* V, 1 and p 156, n 3

भगवता बोधिसत्त्वानां करणीयतया निर्दिष्टं । तस्मात्सूत्रा-न्तार्थपरिचयाद् वेदितव्यं ॥ एतदेव दर्शयति

शिक्षाः सूत्रेषु दृश्यन्ते तस्मात्सूत्राणि वाचयेत् ।

शिक्षा बोधिसत्त्वानां हेयोपादेयलक्षणाः । सूत्रेषु महायान-सूत्रान्तेषु रत्नमेघादिषु[1] । य[60a]त एवं तस्मात् ॥ इदं तु विशेषनिर्देशमाह ।

आकाशगर्भसूत्रे च मूलापत्तीर्निरूपयेत् ॥ १०४

आर्याकाशगर्भसूत्रे क्षत्रियस्य मूर्द्धाभिषिक्तस्य पञ्च मूला-पत्तयो निर्दिष्टाः । तथा सामान्येन एका मूलापत्तिः । तथा आदिकर्मिकस्य बोधिसत्त्वस्याष्टौ मूलापत्तय इति[2] । तथा च तत्रोक्तं । [3]पञ्च कुलपुत्र क्षत्रियस्य मूर्द्धाभिषिक्तस्य मूलापत्तयः । याभिर्मूलापत्तिभिः क्षत्रियो मूर्द्धाभिषिक्तः सर्वाणि पूर्वाव-रोपितानि कुशलमूलानि झाषयति[4] । वस्तुपतितः पराजितः[5] सर्वदेवमनुष्यसुखेभ्यः[6] अपायगामी भवति । कतमाः पञ्च ।

---

[1] *Çikṣās* 7, 13, 17, 8, etc., *supra* IV, 48

[2] Cp *infra* 160, 18, *Çikṣās* 10, 14

[3] *Çikṣās* 59, 10–16 The text has pañca imāh

[4] On this word, see the note of the Editor — Our Ms has the easier reading çamayati, but Tib agrees with Çikṣās

[5] So our Ms, and the Çikṣās–Ms *infra*, here pārājika (see, Prātimokṣa, p. 3)

[6] *Çikṣās* has "°mukhebhyaḥ," but cp, p 60, 19, 61, 3 and Tib bde ba

[य] कुलपुत्र क्षत्रियो मूर्द्धाभिषिक्तः[1] स्तौपिकं[2] वस्तु अपहरति सांघिकं वा चातुर्दिश[संघे][3] निर्यातितं वा । [स्वयं वा] अपहरति हारयति वा । इय प्रथमा मूलापत्तिः[4] ॥

[5]एवं त्रियानभाषितधर्मप्रतिक्षेपात् । द्वितीया ।

5 प्रव्रजितस्य शीलवतो दुःशीलस्य वा काषायापहरणात् । गृहस्थकरणात्[6] । कायप्रहारात् । चारके प्रक्षेपात् । जीवितवियोजनाद्वा । तृतीया ।

पञ्चानन्तर्यस्यन्यतमकरणात् । चतुर्थी ।

मिथ्यादृष्टेः । दशाकुशलकर्मपथसमादानात् । परसमा-

10 दा[प]नाद्वा । पञ्चमीति ॥

तथा ग्रामभेदादिकरणात् सर्वेषां साधारणी चैका[7] ॥

[8]तत्रैवोक्त । आदिकर्मिकाणां महायानसंप्रस्थितानां कुलपुत्राणां कुलदुहितॄणां चाष्टौ मूलापत्तयः । याभिर्मूलापत्तिभिः स्खलिता आदिकर्मिका महायानसंप्रस्थिताः सर्वाणि पूर्वारो-

15 पितानीत्यादि पूर्ववत् ॥ कतमा [60b] अष्टौ । ये सत्त्वाः पूर्वदुश्चरितहेतुना अस्मिन् क्लिष्टे पञ्चकषाये लोक [9]उत्पन्नास्त

---

[1] *Çikṣās* kulaputro mūrddhābhisikta

[2] Cp *Çikṣās* p 63 15

[3] Ms cāturdiçam I follow the Tib (dge hdun la phul-ba hphrog gam)—Saṃghika = çāturdiças°, according MINAYEFF, *Recherches*, p 121

[4] Ends the quotation *Çikṣas* 59, 15

[5] The following freely abridged from *Çikṣas* 59, 15 60, 9

[6] Cp *infra* p 162, l 11 upapravrājana.

[7] Ex conj ekā —This distinction is not clearly marked in the *Çikṣas*

[8] *Çikṣas* 60, 9, 64, 13

[9] *Ibid* upapannah (better reading)

इत्वरकुशलमूलाः। यावत् तेषामिदं परमं गम्भीरं शून्यता-
प्रतिसंयुक्तं सूत्रान्तं यावद्विस्तरेणाग्रतः स्मारयन्ति प्रकाशयन्ति।
ते च्छ्रुतश्रमा बालपृथग्जनाः शृण्वन्त उत्त्रस्यन्ति। यावद्विवर्त-
यन्त्यनुत्तरायाः सम्यक्संबोधेश्चित्तं। श्रावकयाने चित्तं प्रणि-
दधति। एषा आदिकर्मिकस्य बोधिसत्त्वस्य मूलापत्तिः प्रथमा। 5
यथा मूलापत्त्या इत्यादि पूर्ववत्। तस्माद्बोधिसत्त्वेन परसत्त्वानां
परपुद्गलानां आशयानुशय प्रथमं ज्ञात्वा यथाशयानां सत्त्वाना-
मनुपूर्वेण धर्मदेशना कर्तव्येति।

सोपायायाः सम्यक्संबोधेर्विनिवर्त्य हीनयाने परस्य चित्त-
मुत्पादयतो द्वितीया। 10

प्रातिमोक्षशिक्षासंवरं विहाय महायाने चित्तोत्पादमात्रेण
तत्पठनेन चास्य शुद्धिप्रकाशनात्। तृतीया[1]।

श्रावकादियानस्य तत्फलस्य गोपननिन्दाप्रकाशनात्। महा-
याने सर्वशुद्धिप्रकाशनात्। परेषां तद्वचनकरणात्। चतुर्थी।

कीर्तिलाभादिहेतोः। महायानपठनादिना। तथा तत्प्रत्य- 15
यात्परेषां कुत्सानिन्दादिभाषणात्। आत्मोत्कर्षणात्। उत्तर-
मनुष्यधर्मोपगमात्। पञ्चमी।

पाठमात्रेण गम्भीरधर्माधिगमप्रकाशनात्। परेषां तथैव
समादापनात्। षष्ठी।

क्षत्रियस्य पुरोहितामात्यचण्डालैः ये भिक्षवो दण्डिता 20
अर्थदण्डेन सांघिकं स्तौपिकं वा चातुर्दिशसांघिकं वा द्रव्यमप-

1 Cp. *supra* V, 90

हृत्य ते[61a]भ्य एवोपनामयन्ति । ते च उभये ऽपि मूलापत्तिमापद्यन्ते । इयं सप्तमी ।

धर्माधर्मविवादनापूर्वं[1] शिक्षाप्रणयणात् तन्मूलाचारविपन्नानां सत्कारात् [2]प्रहाणिकानामुपभोगपरिभोगाद्यन्यत्र परिणामनात् । उभये ऽपि मूलापत्तिमापद्यन्ते । इयमष्टमी ।

आसां च मूलापत्तीनां सुखग्रहणार्थं शास्त्रकारोपदर्शिताः संग्रहकारिका उच्यन्ते[3] ।

रत्नत्रयस्वहरणाद् आपत्पाराजिका मता ।
सद्धर्मस्य प्रतिक्षेपाद् द्वितीया मुनिनोदिता ॥
दुःशीलस्यापि वा भिक्षोः काषायस्तैन्यताडनात् ।
चारके वा विनिक्षेपाद् अपप्रव्राजनेन च ॥
पञ्चानन्तर्यकरणान् मिथ्यादृष्टिग्रहेण च ।
ग्रामादिभेदनाद्वापि मूलापत्तिर्जिनोदिता ॥
शून्यतायाश्च कथनात् सत्त्वेष्वकृतबुद्धिषु[4] ।
बुद्धत्वप्रस्थितानां तु[5] संबोधेर्विनिवर्तनात् ॥
प्रातिमोक्षं परित्य[ा]ज्य महायाने नियोजनात् ।
शिष्ययान[6] न रागादिप्रहाणायेति वा ग्रहात् ॥

---

[1] Earlier hand vivekṣanī' Tib bzlog nas —Çikṣās (60 20) has vilekhanā
[2] Tib ñams par byed pa rnams kyi
[3] Çikṣās 66, 16—67, 1
[4] Tib blo-sbyans ma bya--akṛtabuddhisu
[5] Çikṣās va
[6] This expression, if not new, seems to be rare,—It is, of course, the Çrāvaka yāna opposed to the "bodhisattva" or 'mahāyāna'—See Chap IX. 41, 45, where the theory of Çāntideva is, by no means, different

परेषां ग्रहणाद्वापि पुनः स्वगुणकाशनात् ।
परपंसनतो लाभसत्कारश्लोकहेतुना ॥
[1]गम्भीरक्षान्तिकोऽस्मीति मिथ्यैव कथनात् पुनः ।
दण्डापयेद्वा श्रमणान् दद्याद्वा शरणत्रयात्[2] ॥
शक्षीयाद्धीयमान वा शमथत्याजनात्पुनः । 5
प्रतिसंलीनभोग च स्वाध्यायिषु निवेदनात्[4] ॥
मूला आपत्तयो ह्येता महानरकहेतवः ।
आर्यस्याकाशगर्भस्य स्वप्ने देश्याः पुरः स्थितैः ॥
बोधिचित्तपरित्यागाद् याचकायाप्रदानतः ।
तीव्रमात्सर्यलोभाभ्यां क्रोधाद्वा स[(5)]त्त्वताडनात् ॥ 10
[5]प्रसाद्यमानो यत्नेन सत्त्वेषु न तितिक्षते ।
क्लेशात्परानुवृत्त्या वा सद्धर्माभासवर्णनात् ॥ इति ॥

तस्मिन्नेव सूत्रे समुद्धरणमासामुक्तं[6] ॥

शिक्षासमुच्चये ऽपि बोधिसत्त्वानां करणीयमुपदिष्टमिति तदपि निरूपणीयमित्याह । 15

शिक्षासमुच्चयो ऽवश्यं द्रष्टव्यश्च[7] पुनः पुनः ।

---

1 On the technical meaning of *kṣānti*, Cp WASSILIEFF, p 101

2 = ratnatrayasvāt

3 *Çikṣās* çamathe t°

4 So *Çikṣās*, Tib yan dag hjog pai lons spyod rnams, kha ton byod-la sbyin pa-rnams

5 So *Çikṣās*.—Our Ms, being illegible, has been corrected by a second hand prasādyamānasya punah sattvasya

6 *Çikṣās* 64, 14

7 Minaev drastavyas tu

विस्तरेण सदाचारो यस्मात्तत्र प्रदर्शितः ॥ १०५

शिक्षासमुच्चयोऽपि स्वयमेभिरेव कृतः । अवश्यं नियमेन । द्रष्टव्यः पुनः पुनरसकृत् । अभ्यसनीय इति भावः । कुतः यस्मात् । सतां बोधिसत्त्वानां । आचरणमाचार इतिकर्त- 5 व्यता । तत्र शिक्षासमुच्चये । विस्तरेण प्रबन्धेन । प्रदर्शितः विस्पष्टीकृत्य प्रकाशितः । तस्मात् ॥

यदि तस्याभ्यासेऽशक्तिः । तदा

संक्षेपेणाथ वा तावत्पश्येत्सूत्रसमुच्चयं[1] ।

नानासूत्रैकदेशानां वा समुच्चयमेभिरेव[2] कृतं संक्षेपेण 10 पश्येत् । अवलोकयेत् । ग्रन्थतोऽर्थतो वा । अत्रापि पूर्वकमेव प्रयोजनं ॥ यदि वा

आर्यनागार्जुनाबद्धं द्वितीयं च प्रयत्नतः ॥ १०६

आर्यनागार्जुनपादैर्निबद्धं द्वितीयं शिक्षासमुच्चयं[4] सूत्रसमुच्चयं च पश्येत्प्रयत्नतः आदरतः । यदिह न दृश्यते तत्तत्र दृश्यत 15 इति भावः ॥

नियमेन शिक्षादर्शनेऽपि साकल्येन सर्वेषामुपयोगमाह ।

---

[1] Tib mdo rnams kun las btus pa See TARANATHA, 165, WASSILIEFF, p 208. mdo kun btus (Tandj Vol XXV)

[2] Tib bdag ñid-kyis, — Samksepena, according to Tib, refers to krtam

[3] Tib gzun (As Res XX, 479, Rnāyab, 17 22)

[4] Nothing as yet is known from Tib sources about a Çiksas by Nāgārjuna —See BENDALL's Introduction to his edition of the work —dvitīya refers to Sūtras, according to Tib and to the Text —See the Sutras by Nāgārjuna, Tandj Mdo XXX, 165 244

यतो निवार्यते, यत्र यदेव च नियुज्यते।
तल्लोकचित्तरक्षार्थं शिक्षां दृष्ट्वा समाचरेत्॥ १०७

यतो देयादकरणीयान्निवार्यते। न करणीयमेतदिति प्रतिषिध्यते। यत्र शिक्षासमुच्चये सूत्रसमुच्चये वा। यदेव कर्म कर्तव्यतया नियुज्यते विधीयते। तत्प्रसिद्धं विहितं वा। लोकानां चित्तमाशयः। तस्य रक्षार्थं। तद्यथा विकोपितं[2] न स्यात्। शिक्षां दृष्ट्वा शिक्षासमुच्चयादिषु। प्रतिपाद्य समाचरेत्। यत्र यद्यथा युज्यते तत्र तथा व्यवहरेत्। [62] अन्यथार्थसंमूढव्यवहारस्यापत्तिकश्मलता स्यात्।

एतावता आत्मभावस्य शुद्धिराख्याता[4]। यदाह।

[5]आत्मभावस्य का शुद्धिः पापक्लेशविशोधनं।
सबुद्धोक्त्यनुसारेण[6] यत्नाभावे त्वपायगः। इति॥

यदुक्तं। सदा स्मृतिसंप्रजन्यचारिणा भवितव्यमिति। ततः स्मृतेः स्वनाम्नैव स्वरूपं प्रतीतं[7]। संप्रजन्यस्य तु न ज्ञायते कीदृशमिति। तत्स्वरूपप्रतिपत्तये प्राह।

एतदेव समासेन संप्रजन्यस्य लक्षणं।
यत्कायचित्तावस्थायाः प्रत्यवेक्षा मुहुर्मुहुः॥ १०८

---

[1] L², M nirvāryate (Tib bkag, bzlog) Min nidhāryate

[2] New, but known from *Çikṣās* (Tib. ḥkhrug pa)

[3] Ms quite illegible, but Tib ... sñad kyi don ... mons pa mi ...

[4] See V, 1 where occurs "çodhana" instead of çuddhi (cp *Çikṣās* 158, 13)

[5] The 19th Kārikā. See *Çikṣās* 160, 2, 3, and *supra* note *ad* IV, 48 "This line is quoted from the *Çikṣās* by Dīpaṃkara (Atīça) in his *Bodhimārgadīpa-pañjikā* (Tanj M XXXI, 303a—C. B.)" BENDALL

[6] *Çikṣās* has sambuddhoktyarthaśīlena. Tib gsuṅs tshul du

[7] Tipp smṛter ālambanāsampramoṣarūpatayā prasiddhatvāt

यत्कायावस्थायाश्चित्तावस्थायाश्च सर्वेर्यापथेषु प्रत्यवेक्षा निरूपणं सर्ववार यथा प्रतिपादितं प्राक् ॥ सर्वमेतदृक्षशिक्षाकौशल कर्मणा निष्पादयितव्यं न वचनमात्रेणेति[1] नियमयितुमाह ।

5 **कायेनैव पठिष्यामि[2] वाक्पाठेन तु[3] किं भवेत् ।**
चिकित्सापाठमात्रेण रोगिणः किं भविष्यति ॥ १०९

मन पूर्वंगमत्वात्कायव्यापारस्य । सोऽप्यनेनैव प्रतिपादितः । प्रतिपत्त्या सर्वं संपादयिष्यामि[4] । न तु शब्दमात्रघोषणया निष्फलत्वादिति बोधिसत्त्वेन यतितव्यं । कथमिव । वैद्यक-
10 शास्त्राध्ययनमात्रेण तत्क्रियामकुर्वतो व्याधिग्रस्तस्य किं फलं निष्पत्स्यते । तावन्मात्रेण रोगस्य तस्याविनिवृत्ते. । न किंचिदिति भावः । तस्मात्सर्वमेतत्क्रियानुष्ठानेन निष्पादयितव्यमिति ॥

इति प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां
पञ्चमः परिच्छेदः[5] ॥

---

[1] Tipp sarvam etat karmanā sampādayitavyam nādhyayanasārena bhavitavyam iti —Cp estote factores verbi

[2] Cp *Dhammapada* 259 dhammam kāyena passati = he observes the law in his acts, but cp M Muller, *in loc* and Senart, J As, Sept 1898, p 216 (Ms Dutreuil de Rhins dhamu kaena phasai)—Tib has lus kyi [s] hdi-dag spyad par-bya i thsig tsam brjod-pas

[3] See *Minaev*, M ca

[4] Cp *ad* I, 17 pratipattivikala, °sāra, caryāvikala

[5] So Tib —The Mss and Tib translation of the Text have sampiajanyarakṣanah pañcamah , but M has çīlapāramitā

प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां क्षान्तिपारमिता षष्ठः परिच्छेदः।

तदेवं बहुधा शीलविशुद्धिं प्रतिपाद्य। आत्मभावादीनां रक्षां शुद्धिं च प्रतिपाद्य। शुभविशुद्धिं प्रतिपादयितुं। यथोक्तं

क्षमेत श्रुतमेषेत संश्रयेत वन ततः।
समाधानाय युज्येत भावयेदशुभादि[62ᵇ]कं॥[1]

इत्येतस्याभिधातुमुपक्रमते सर्वमित्यादिना। 5

सर्वमेतत्सुचरितं दानं सुगतपूजनं।
कृतं[2] कल्पसहस्रैर्यत्प्रतिघः प्रतिहन्ति तत्॥ १

सर्वमेतदिति शीलसंवरसमादानप्रसूतं। सुचरितं कुशलं कर्म। दानं त्रिविधं[3]। सामान्येन। सुगतपूजनमपि त्रिविधं[4]। कृत उपार्जितमनेकैः कल्पसहस्रैर्यत्। तत्सर्वं प्रतिघ सत्त्वविद्वेषः 10 प्रतिहन्ति निर्दहति वह्निलव इव तृणमघात।

---

1 This stanza is the 20th Kārikā of the *Çikṣasamuccayakārikā* (see Prof BENDALL's Introduction to his edition of the *Çikṣās*) and occurs *Çikṣas* 179, 5-10, where each part of the sentence (called "kleçaçuddher uddoçapadāni") is followed by a short commentary

Cp the stanza, *supra* 92 7 (4th Kārikā)

2 Minaev has karma°, but L², M Dev kalpa°, and Tib bskal

3 *Dharmasamgraha* CV—*Çikṣas* Chap XIX

4 So far as I know there is no exact reference to this classification Pujā is said to be saptavidhā (*Dharmas* XIV)

[1]आर्यमञ्जुश्रीविक्रीडितसूत्रे चाह। प्रतिघ प्रतिघ इति मञ्जुश्रीः[2] कल्पशतोपचितं कुशलं प्रतिहन्ति। तेनोच्यते प्रतिघ इति[1]।

[3]आर्यसर्वास्तिवादिना पठ्यते[4]। पश्यथ[5] भिक्षव एतं भिक्षुं केशनखस्तूपे सर्वाङ्गेन प्रणिपत्य चित्तमभिप्रसादयन्तं। एव भदन्त। अनेन भिक्षवो भिक्षुणा यावती भूमिराक्रान्ता। अधश्चतुरशीतियोजनसहस्राणि यावत् काञ्चनवज्रमण्डलान्तरे[6] यावन्त्यो वालिकाः। तावन्त्यनेन भिक्षुणा चक्रवर्तिराज्यसहस्राणि परिभोक्तव्यानि। यावदथायुष्मानुपालिर्येन भगवान् तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत्। यदुक्तं भगवता। अस्य भिक्षोरेव महान्ति कुशलमूलानि। कुत्रेमानि भगवन् कुशलानि तनुत्वं परिक्षयं पर्यादानं गच्छन्ति। नाहमुपाले एवं क्षतिमुपहतिं च समनुपश्यामि यथा [सब्रह्मचारी][7] सब्रह्मचारिणोऽन्तिके दुष्टचित्तमुत्पादयति। तत्रोपाले इमानि महान्ति कुशलमूलानि तनुत्वं परिक्षयं पर्यादानं गच्छन्ति।

---

1 1 = Çikṣās. 149, 5.

2 mañjuçrīḥ is wanting in Çikṣās., but confirmed by our Tib. version.

3 = Çikṣās. 148, 16—149, 4.

4 So Ms.—Çikṣās.-Ms. has °vidmīm api pathyate. Prof. BENDALL from Tib.: "Read °vidinīm (?)".— According to his Tib. version, I should read "°vidnam api pīthate". But our Tib. gives the correct equivalent of pathyate: gsuns te, the plural sign (rnams) is wanting.

5 Çikṣās.: paçyadhvam.

6 Cp. the reading of Çikṣās. - Tib.: gser-las grub pa la thug par bar na; Read: thugs pa (= munda, according to Foucaux).

7 Wanting in Ms., but our Tib. confirms the Çikṣā.

तस्मात्तर्ह्युपाले एवं शिक्षितव्यं। यद्दग्धस्थूणायामपि चित्तं न प्रदोषयिष्यामः। प्रागेव सवि[63a]ज्ञानके काय इति[1]॥

अत एव आह।

न च द्वेषसमं पापं न च क्षान्तिसमं तपः।[2]
तस्मात् क्षान्तिं प्रयत्नेन भावयेद्विविधैर्नयैः॥ २

न च द्वेषेण समं पापमशुभं। पुण्याभिभवहेतुरस्ति। न च क्षान्त्या तितिक्षया सम तुल्यं तपः। सुमहत्परिश्रमसाध्यत्वात्सुकृतं। यत एव तस्मात्। क्षान्तिं क्षमां सर्वतात्पर्येण भावयेदभ्यसेत्। विविधैर्नानाप्रकारैरुपायैर्वक्ष्यमाणैः[3]।

दृष्टधर्म एव द्वेषस्य दोषान् वृत्तत्रयेणोपदर्शयन्नाह।

मनः शमं न गृह्णाति न प्रीतिसुखमश्नुते।
न निद्रां न धृतिं याति द्वेषशल्ये हृदि स्थिते॥ ३
पूजयत्यर्थमानैर्यान् येऽपि चैनं समाश्रिताः।
तेऽप्येनं हन्तुमिच्छन्ति स्वामिनं द्वेषदुर्भगं[4]॥ ४
सुहृदोऽप्युद्विजन्तेऽस्माद् ददाति न च सेव्यते।
संक्षेपान्नास्ति तत्किंचित्क्रोधनो येन सुस्थितः॥ ५

---

1 Cp. infra ad VI, 51; Div. At. 197.25 [illegible] p. 413.
2 Cp. Dhammapada 124.
3 Minayev [illegible], Tib. [illegible] = Dev. [illegible]
4 Cp. Çikṣā. 265.12.
5 Cp. Aṅguttara, IV, p. 96 [illegible]

शमं प्रशम न गृह्णाति नाश्रयते। अनुपशान्त एव सदा द्वेषानलप्रज्वलितत्वात्। न प्रीतिसुख सौमनस्यसुखमश्नुते। आप्नोति। तेनैवाक्रान्तत्वात्। न निद्रां न धृतिं चित्तसुखं लभते। कायचित्तसंतापकारिणि द्वेषशल्ये हृदयनिवासिनि।

5 पूजयति सत्करोति लाभसत्कारैर्यान्। येऽपि चानुजीविनः। एव द्वेषिण स्वामिनमपकर्तुमिच्छन्ति। किमिति द्वेषदुर्भगं अप्रियमिति हेतुपदमेतत्।

सुहृदो मित्राण्यपि। उद्विजन्ते उत्त्रस्यन्ति। अस्माद्द्वेषिणः। दानोन्मुखोऽपि भृत्यवर्गेन सेव्यते नोपगम्यते। किं बहुना। 10 इदमिह सचेपेणावधार्यतां। नास्ति तदुपशमकारण किं चिद्येन कोपनः सुख लभेत।

चित्तस्य कर्कशावस्था द्वेषः। तस्योद्भूतवृत्तिस्तु क्रोधः। यद्वशाद्दण्डादिग्रहणं क्रियते। इत्यनयोर्भेदेऽपि द्वयोरपि परिहर्तव्यतया ऽभेदेनैव निर्देशः॥

15 एवमिह दृष्टधर्मेऽपि द्वेषदोषानवगम्य तत्परित्यागाय यत्नवता भवितव्यमित्याह।

एवमादीनि दुःखानि करोतीत्यरिसंज्ञया[1]।
यः क्रोधं हन्ति निर्बन्धात् स सुखीह परत्र च॥ ६

एवं यथोक्तप्रकारेण दुःखानि जनयति [63ᵇ] यस्मात्।

---

[1] Tib Kho-bai dgra yis de-la-sogs sdug bsnal dag ni byed par-hgyur = Krodhāriṇā evamādīni duḥkhāni kriyante

तस्मात् यः सुकृतात्मा। निर्बन्धात् गाढाभिनिवेशात् आरब्ध-वीर्य इत्यर्थः। स सुखी इहलोके परलोके च।

इदानीं द्वेषोपघाताय तत्कारणमुपहन्तुं व्यवस्थां कुर्वन्नाह।

अनिष्टकरणाज्जातमिष्टस्य च विघातनात्।
दौर्मनस्याशनं प्राप्य द्वेषो दृप्तो[1] निहन्ति मां॥ ७॥ 5
तस्माद्विघातयिष्यामि तस्याशनमहं रिपोः।

आत्मात्मीयग्रहप्रसूते इष्टानिष्टे। आत्मात्मीययोः सुख-साधनमिष्टं। तद्विपरीतमनिष्टं। इति कल्पनाकृतमेवैतत्। न तु परमार्थतः किं चिदिष्टमनिष्टं वा संभवति। तस्मान् मिथ्याभिनिवेशवासनावशात्। अनिष्टस्य करणाद् इष्टस्य 10 चोपहननाद् दौर्मनस्य मानसं दुःखमुपजा[य]ते। तस्मात् तत्कारिणि तद्विरोधिनि वा द्वेष उत्पद्यते। इति दौर्म-नस्यमेव बलवद्भोजनं लब्ध्वा लब्धसामर्थ्यः सन् द्वेषो निहन्ति मां इति निश्चित्य तत्पुष्टिकारणं च हनिष्यामि प्रथमतः। तस्मिन् हते सुखमेव तस्य हननात्। समूलघातं हतस्य पुनरु- 15 त्थानायोगाच्च।

ननु कोऽयमत्यर्थमभिनिवेशो भवत इत्याह।

यस्मान्न मद्वधादन्यत्कृत्यमस्यास्ति वैरिणः॥ ८॥

---

1 So Dev.—Minaev and his Mss. dṛpto—But Tib. rtas-te überflüssig, fett (SCHMIDT), brta ba = dick werden, brta-byed pa = nähren, brtas-pa = sphīta (FOUCAUX)—nus pa rtas pas = sambhṛtaçakti (supra ad IV, 45)

यस्मात् मम वध विहाय राचिदित्रमपरं न किं चिद्विषस्य वैरिणा करणीयमस्ति ॥

एवं द्वेषदोषान्विभाव्य सर्वोपायेन तद्विपक्षभूतां क्षान्तिमुत्पादयेत्। तत्र क्षान्तिस्त्रिविधा धर्मसंगीतिसूत्रेऽभिहिता। तद्यथा दुःखाधिवासनाक्षान्तिः। धर्मनिध्यानक्षान्तिः[2]। परापकारमर्षणक्षान्तिश्च[1] ॥ तत्र तावद्दुःखाधिवासनाक्षान्तिमधिकृत्याह।

अत्यनिष्टागमेनापि न क्षोभ्या मुदिता मया।
दौर्मनस्येऽपि[3] नास्तीष्टं कुशलं त्ववहीयते ॥ ९ ॥

[4]दुःखाधिवासनाक्षान्तिविपक्षोऽनि[64]ष्टागमप्राप्तदुःखभीरुता। इष्टविघातप्राप्तस्य सुखाभिष्वङ्गः। ताभ्यां दौर्मनस्यं। ततो द्वेषो लीनचित्तता[5] वा[4]।

[6]अत एवाह चन्द्रप्रदीपसूत्रे। सुखेऽनभिष्वङ्गः। दुःखेऽवैमुख्यमिति।

रत्नमेघसूत्रेऽप्युक्तं। य इमे आध्यात्मिका शोकपरिदेवदुःखदौर्मनस्योपायासाः। तान् क्षमते अधिवासयतीति[6] ॥

1.1 = *Çikṣās*, 179, 11, cp *Dharmasamgraha* CVII — On the first Kṣānti, VI, 9 34, on the third, 35 51, on the second, 52 We have adhivāsana, *infra ad* VI, 22

2 = Tib chos la nes par sems pai bzod pa

3 So M Dev, L[2] syāpi, Minaev °syena nāsti, See Commentary

4 4 = *Çikṣās* 179, 11 14

5 *Çikṣās* has līnatā ca

6.6 = *Çikṣās* 179, 16 17

अतो यदि नाम मम शिरः छिद्यते । तथापि न क्षोभ्या न विक्षोपयितव्या मुदिता मया। मुदिता हि दौर्मनस्य-प्रतिपक्षः । दुःखागमेऽपि प्रमुदितचित्तस्य दौर्मनस्यानवकाशात् । इति दौर्मनस्यनिरासाय मुदिता यत्नेन रक्षितव्या ॥ कुतः । दौर्मनस्येऽपि कृते इष्टविघाते सति नास्तीष्ट । नाभिलषितं 5 सेत्स्यति । अय तु विशेष स्यात् । कुशल पुनरुपहन्यते ।

[1]मुदिता चार्याक्षयमतिसूत्रे वर्णिता। तत्र कतमा मुदिता । या [बुद्ध]धर्माणामनुस्मरणात्[2] प्रीति. प्रसादः प्रामोद्य चित्त-स्यानवलीनता अनभ्यूद्यता अपरितर्षणता । सर्वकामरतीना-मपकर्षणात् सर्वधर्मरतीनां प्रतिष्ठान । चित्तस्य प्रामोद्यं । 10 कायस्यौद्बिल्य । बुद्धे सम्प्रहर्षण । मनस उत्प्लव. । तथागत-कायाभिनन्दनरतिरिति विस्तरः[1] ।

कि चेदमविचारयतो दौर्मनस्यमुत्पद्यत इत्याह ।

यद्यस्त्येव प्रतीकारो दौर्मनस्येन तत्र किं[3] ।
अथ नास्ति प्रतीकारो दौर्मनस्येन तत्र किं ॥ १० ॥ 15

यदि चेष्टनिघातनिवर्तनाय अनिष्टोपनिपातप्रतिषेधाय च प्रतीकार उपायान्तरमस्ति । तदा दौर्मनस्येन तत्र कि ।

---

[1] 1 = *Çikṣās* 183, 4‑7

[2] *Çikṣās* has yāvad dharmāṇ°, Tib gan sans rgyas

[3] This line occurs in *Çikṣās* 180, 3 the next one, written in margin, is necessary and is confirmed by Tib of Çi

तदेवानुष्ठीयतां । अथ नास्ति । तदापि दौर्मनस्येन तत्र किं । न कि चित्प्रयोजनं । उपायाभावात्सर्वथा[64b]गतमेतत् । इति विचार्य दौर्मनस्य निवर्तनमेव वर ॥

अभ्यासाद् दु:खमबाधकं भवतीति प्रसाधयितुमुपक्रमते ।

5 **दु:खं[1] न्यक्कारपारुष्यमयशश्चेत्यनीप्सितं ।**
प्रियाणामात्मनो वापि शत्रोश्चैतद्विपर्ययात् ॥ ११ ॥

दु:ख कायिकं मानसिक च । इति द्विविध । तत्र कायिक दण्डादिघातज । मानसिकं न्यक्कारादिनिमित्तं । तत्र न्यक्कारो धिक्कार:[2] । पारुष्यं मर्मघट्टनावचन[3] । अयशश्चाकीर्ति: वैगुण्य-
10 प्रकाशनं । इत्येतत्सर्वमनभिलषितं । यदि परेषां शिवं ननु । तदर्थमाह । प्रियाणां । आत्मीयत्वेन ये स्वीकृता: प्रेमस्थानं । तेषामात्मनश्च । दु:खादिकारकस्य पुन: शत्रोरेतद्विपर्ययात् । तस्य दु:खादिकमभीष्टमेव ।

तत्र दु:खासहिष्णुतां तावन्निराकर्तुमाह ।

15 **कथं चिल्लभ्यते सौख्यं दु:खं स्थितमयत्नत: ।**
दु:खेनैव च नि:सार:[4] चेतस्तस्माद् दृढीभव ॥ १२ ॥

---

1 Nyakkārapārusyam for metrical reasons —Tib bzñas dan thsig rtsub din The Khānti pāramı (*Jataka*, I 22, 24) sammānana avamānana ksama

2 Tib n in-pa byed pa

3 The compound is new —ghattanā, from Lexx only

4 Tib has, sdug bsnal med par des hbyun med = aduhkhena tena (duhkhena) apunarbhavah = Without difficulty by suffering is gained the not being reborn ——According to the Commentary nihsāra = das Herauskommen = It is by duhkha alone that one can escape from duhkha

महता प्रयत्नेन कुशलपक्षमुपसेव्य कदाचित्कर्हिचित्सु-
दुर्लभे संसारे साश्रवं[1] सुखं लभ्यते। दुःखं तु सर्वदा सुलभं।
अयत्नसिद्धत्वात्। इति तदभ्यासो न दुष्करः। सर्वदा परि-
चितत्वात्। किं च संसारनिःसरणोपायोऽपि दुःखमेव।
तथापि पाथेयरूपतया तत्परिग्रहो युक्त एव। यत एवं 5
तस्मात्। हे चित्त दुःखानुभवनाय दृढीभव। मा कातरता-
माश्रयस्व॥

अपि चेदं दुःखं महार्थसाधकत्वात् सोढुमुचितं। इति
मनसि कर्तव्यं। इत्याह।

दुर्गापुत्रककर्णाटा[2] दाहच्छेदादिवेदनां। 10
[3]वृथा सहन्ते मुक्त्यर्थमहं कस्मात्तु कातरः॥ १३॥

दुर्गापुत्रकाः चण्डीसुताः। महानवमीसमयादिषु[4] त्रिरात्र-
मेकाहं वा उपोष्य गात्रदाहच्छेदनभेदनं कुर्वन्तो दुःखां वेदनां
निष्फलमेवानुभवन्ति। तथा कर्णाटदेशादिसमुद्भूता[65a]
दाक्षिणात्या[5] उपरि[6] नाममिखनमात्राभिमानतः परस्परं 15

---

1 Cp Çikṣās

2 Dev Kārnāta

3 So M — Minaev mudhā, Tib has don med

4 Cp Āçvinaçuklanavamyām devīvratam, Aufrecht, Oxf Cat 258a

5 Cp Aufrecht, op cit, dākṣiṇātya, ācārya, tantra, karṇāṭadeça (258a) Weber, Vajrasūci, p 258, Roussel, Cosmologie Hindoue p 318 from Bhāgavata-purāṇa Bhakti narrates her life to Nārada "I was born in Dravida, I have grown up in Karnātaka"

6 Tib gon mai min = uttaranāma, upari = gon du

स्पर्धमाना अनेकाभिः कारणाभिर्दुःखमनुभवन्तो जीवित-
मप्युत्सृजन्ति । अहं तु स्वपरात्मनोः परमदुर्लभबुद्धत्वसाधनाय
कृतोत्साहः । दुःखैः कस्मात्कारणात् कातरीभवामि ॥

स्यादेतत् । अत्यल्पदुःखं कथं चित्सोढुं शक्यते । कर-
चरणशिरश्छेदनादिदुःखं नरकादिदुःखं वा मुक्त्यर्थं कथं तु
सोढव्यमित्यत्राह ।

न किं चिदस्ति तद्वस्तु यदभ्यासस्य दुष्करं[1] ।
तस्मान्मृदुव्यथाभ्यासात् सोढव्यापि महाव्यथा ॥ १४ ॥

शास्त्राभ्यासकलादि कौशलादि स्वदमध्यातिमात्रदुःखानु-
भवनादि वा । वस्तु न तद्विद्यते किं चिद्यदभ्यासगोचरो न
भवति । सर्वमेवाभ्यासादात्मसात्कर्तुं शक्यत इति भावः ।
यस्मात्तस्मात् । अत्यल्पतरादिव्यथाभ्यासान्नरकादिमहाव्यथापि
सोढुं ।

यथोक्तं[2] । तत्राल्पदुःखाभ्यासपूर्वकं कष्टकष्टतराभ्यासं सिध्यति ।
यथा चाभ्यासवशात्सत्त्वानां दुःखसुखसंज्ञा । तथा सर्वदुःखो-
त्पादेषु सुखसंज्ञाप्रत्युपस्थानाभ्यासात् सुखसंज्ञैव प्रत्युपतिष्ठते ।
एवं[3] निष्यन्दफलं[4] च सर्वधर्मसुखाक्रान्तं नाम समाधिं प्रति-
लभते[2] ।

---

1 Cp *Çikṣās* 180 [illegible], 265 [illegible] and note

2 2 = *Çikṣās* 181, [illegible]

3 The reading of *Çikṣas* is possibly better [illegible] but Tib [illegible] de ltar na

4 Tib rgyu-mthun pai hbras bu [illegible], According to Foucaux, same translation in *Lalita* [illegible] -(rgyu bu = srotas, [illegible] mthun [illegible], etc) —See Mahavastu II, 546

[1]उक्तं हि पितापुत्रसमागमे । अस्ति भगवन् सर्वधर्मसुखाक्रान्तो नाम समाधिः । यस्य समाधेः प्रतिलम्भाद्बोधिसत्त्वः सर्वारम्बणवस्तुषु सुखामेव वेदनां वेदयते । न दुःखां[2] । नादुःखासुखां । तस्य नैरयिकामपि वेदनां कार्यमाणस्य सुखसञ्ज्ञैव प्रत्युपस्थिता भवति । मानुषीमपि कारणां कार्यमाणस्य हस्तेष्वपि छिद्यमानेषु पादेष्वपि[3] कर्णेष्वपि नासास्वपि सुखसञ्ज्ञैव प्रत्युपस्थिता भवति । वेत्रैरपि ताड्यमानस्य अर्ध[103b]वेत्रैरपि कशाभिरपि ताड्यमानस्य सुखसञ्ज्ञा प्रवर्तते । बन्धनागारेष्वपि प्रक्षिप्तस्य[4] तैलपाचिकां वा क्रियमाणस्य । इक्षुकुट्टितिकं[5] वा कुट्ट्यमानस्य । नड़चिप्पितिकं[6] वा चिप्यमानस्य । तैलप्रद्योतिकं वा दीप्यमानस्य । यावत्कार्षापणच्छेदिकां[7] क्रियमाणस्य । पिष्टपाचनिकां वा पाच्यमानस्य । हस्तिभिर्वा मर्द्यमानस्य सुखसञ्ज्ञैव प्रवर्तते । इति विस्तरः ॥

स्यादेतद्यदि प्रथमत एव मृदुव्यथाभ्यासः स्यात् । यावता स एव नास्तीति । अत्राह ।

1 *Çikṣas* 181 12 182 8 —See notes and Pali references

2 Is wanting in *Çikṣas*

3 Ms pārçveṣu but [illegible]

4 *Çikṣas* has prakṣiptasya (per tails?).

5 *Çikṣās* —Ms kuttitakady[illegible] The last akṣara is doubtful

6 See Prof. BENDALL's notes on these difficult words —Our Ms .. vispidikam va vispamanasya

7 Yāvat supplies the sentences omitted by our author —*Çikṣa* has chedikam pacanikam (better reading)

उद्दंशदंशमशकक्षुत्पिपासादिवेदनां ।
महत्कण्ड्वादिदुःखं च किमनर्थं न पश्यसि[1] ॥१५॥

उद्दंशादिकृतदुःखमनर्थं किं न पश्यसि । तदर्थत्वसिद्धं मृदुव्यथाभ्यासनिमित्तमस्येव इति भाव ॥ पुनरन्यथा स्वचित्तं
5 दृढयितुमाह ।

शीतोष्णवृष्टिवाताध्वव्याधिबन्धनताडनैः ।
सौकुमार्यं न कर्तव्यमन्यथा वर्धते व्यथा ॥१६॥

सुकुमारतरचित्तस्य हि दुःखमतितरां बाधकं भवति । दुःखेऽपि दृढचित्तस्य विपर्ययः ॥ ननु दृढीकरणेऽपि चित्तस्य
10 दुःखमसह्यमेवेति । अत्राह ।

केचित्स्वशोणितं दृष्ट्वा विक्रमन्ते विशेषतः ।
परशोणितमप्येके दृष्ट्वा मूर्छां व्रजन्ति यत् ॥१७॥
तच्चित्तस्य दृढत्वेन कातरत्वेन चागतं ।
दुःखदुर्योधनस्तस्माद्भवेदभिभवेद् व्यथां[2] ॥१८॥

15 न खलु दृढचित्तस्य किंचिदशक्यं नाम । तथा हि केचिद्वीरपुरुषाः संग्रामभूमौ स्वशोणितमपि पश्यन्तोऽधिकतरं शौर्यमाभजन्ते । केचित्पुन कातरचित्तसंततयः पररुधिरदर्शनादपि मरणान्तिक दुःखमनुभवन्ति ।

---

[1] Tib don med sdug bsnal cis ma mthon anartham duhkham kasmān na drstam

[2] Tib de bas gnod pa khyad-bsad cin sdug bsnal rnams-kyis mi hsugs-byos = tasmād vyathām abhibhavan duhkhair adharsanīyo bhavet

एतदुभयमपि चित्तस्येतरेतराभ्यासविपर्ययात् । इति मत्वा दुःखदुर्योधनो [1]नाधिगम्यो भवेत् । दुःखैरप्रकम्प्यत्वात् । ततोऽभिभवेद्दुःखं । न पुनस्तयाभिभूयते ॥

इत्थमप्यभिभवेद्दुःखमित्याह ।

दुःखेऽपि नैव चित्तस्य प्रसादं क्षोभयेद् बुधः । 5
संग्रामो[2] हि सह क्लेशैः[1] युद्धे च सुलभा व्यथा ॥ १९ ॥

प्रसादं पूर्वोक्तं नावसादयेद्विचक्षणः । कुतः यस्मात् । क्लेशशत्रुभिः सह संग्रामोऽयमारब्धः । संग्रामे च व्यथा नाम न भवेदिति दुर्लभं । व्यथा सुलभैव ॥

न[66a]नु तथापि दुष्करमिदमतीव दृश्यत इति । अत्राह । 10

उरसारातिघातान्ये प्रतीच्छन्तो जयन्त्यरीन्[3] ।
ते ते विजयिनः शूराः शेषास्तु मृतमारकाः ॥ २० ॥

अभिमुखमभिभवन्तः[4] शत्रुं । तत्प्रहारान् वक्षःस्थलेन प्रतीच्छन्तो ये जयन्ति समरे रिपून् । ते ते शूरपुरुषाः [5]पररिपुविजयादिह लब्धविजया प्रशस्यन्ते । ये पुनरन्ये कल- 15

[1] So Ms (second hand) = °dhamo' nadhi°

[2] So L[2], M —Minaev has saṃgrāmo hi , and so Tib gyul hgyed la, but see Commentary —With saṃgrāma cp Çikṣas 361 13

[3] The Tib version is the following sdug bsṅal thams cad khyad bsad-nas ze sdaṅ-la-sogs dgra bjoms pa sarvaduḥkhāny abhibhūya dveṣādyariṃ jayanti

[4] Orig scribe °bhavanti , second scribe °bhavantā

[5] Tib mchog tu dgra , mchog-ma = para, uttama, parama, etc

प्रहारादिभिरभिभवन्ति शत्रुं। ते चाकिंचित्करतया मृतमारका[1] जुगुप्सनीया एव शूरैः॥

इतोऽपि गुणदर्शनाद्दुःखमधिवासयितव्यमित्याह।

गुणोऽपरश्च दुःखस्य यत्संवेगान्मदच्युतिः।
संसारिषु च कारुण्यं पापाद्भीतिर्जिने स्पृहा॥२१॥

अयमपरः शुभहेतुर्गुणो दुःखस्यास्य सबोधिमार्गानुकूलः। यद्दुःखस्य समावेशे मनसि संवेग उपजायते। तस्माच्च यौवनधनादिकृतस्य मदस्य च्युतिर्भङ्गो जायते। संसारिषु च संसारदुःखपीडितेषु करुणाचित्तं। पापस्य फलमिदमिति मत्वा पापाद्भयमकरणचित्तं च। बुद्धे च भगवति स्पृहा भक्तिः श्रद्धा चित्तप्रसादश्च। भगवानेव हि दुःखक्षयगामिनं मार्गमुपदिष्टवानिति॥

परप्रत्ययोत्पन्नदुःखाधिवासनाय परामृशन्नाह।

पित्तादिषु न मे कोपो महादुःखकरेष्वपि[2]।
सचेतनेषु किं कोपः तेऽपि प्रत्ययकोपिताः[3]॥२२॥

पित्तादिदोषत्रयात्मकमेव शरीरं। ते च तथाविधाहारविहारवैगुण्याद् विषमावस्थां प्राप्य व्याधीन् जनयन्तः सर्वदुःख-

---

[1] The compound is new

[2] Minaev has °duhkhākaresv but Comm janayanti

[3] Kopita translated by bskul ba = urged on, influenced (end, pra ii)
The pittādayah are said "kopita" when troubled (ksobhita)

हेतवो भवन्ति । तथापि न तेषु मम कोपः । अचेतनत्वात् ।
न ते सचिन्त्य दुःखदायकाः । किं तर्हि । स्वकारणसामग्री-
बलेन प्रकोपमुपगताः । यद्येवं सचेतनेषु किं कोपः । किं न
स्यादिति चेत् । तेऽपि पूर्वकर्मापराधात् स्वकारणसामग्रीप्रको-
पिता दुःखदायका भवन्ति । इति पित्तादिवत्तेष्वपि न युज्यते 5
मम क्रोधः ॥ [66b] उभयत्रापि समानं कारणाधीनत्वं ।

इत्युपदर्शयन्नाह ।

अनिष्यमाणमप्येतच्छूलमुत्पद्यते यथा ।
अनिष्यमाणोऽपि बलात्क्रोध उत्पद्यते तथा ॥ २३ ॥

स्वप्रत्ययोपजनितसामर्थ्येभ्यः पित्तादिभ्योऽनभिप्रेतमपि शूल- 10
मवश्यमुत्पद्यते यथा । तथा स्वहेतुपरिणामाधिगतशक्तिभ्यो
दौर्मनस्यादिभ्यः क्रोध उत्पद्यते । इति साधारणमनयोर्हेतु-
प्रत्ययाधीनत्वं ॥

अथ स्यात् । उक्तमत्र सचेतनाः संचिन्त्य तथाविधानिष्ट-
कारिणः । न तु पुनरितरे तथेत्याह । 15

कुप्यामीति न संचिन्त्य कुप्यति स्वेच्छया जनः[1] ।
उत्पत्स्य इत्यभिप्रेत्य क्रोध उत्पद्यते न च ॥ २४ ॥

तत्प्रत्ययसामग्रीमन्तरेण कुप्यामीत्येवं बुद्धिपूर्वकं संचिन्त्य
न जनः स्वैरं प्रकुप्यति । क्रोधोऽपि उत्पत्स्य इत्यभिसंधाय
स्वातन्त्र्येण नैवोत्पद्यते ॥ 20

1 M. ...naḥ.

तस्मादिदमेवात्र प्रमाणसिद्धमित्याह ।

ये के चिदपराधास्तु[1] पापानि विविधानि च ।
सर्वं तत्प्रत्ययबलात् स्वतन्त्रं तु न विद्यते ॥ २५ ॥

[2]इदम्प्रत्ययतामात्रसमुपस्थितस्वभावं सर्वमिदं । न तु स्वा-
5 तन्त्र्यप्रवृत्तं किं चिदपि विद्यते ।

न च प्रत्ययसामग्र्या जनयामीति चेतना ।
न चापि जनितस्यास्ति[3] जनितोऽस्मीति चेतना ॥२६॥

प्रत्ययसामग्र्यपि न स्वकार्यं जनयन्ती संचिन्त्य जनयति ।
सा हि स्वहेतुपरिणामोपनिधिधर्मतया तथाविध कार्यं
10 जनयति । न तु संचिन्त्य । न चापि जनितस्य कार्यस्यापि
अनया सामग्र्या जनितोऽस्मीति चेतना मनसिकारोऽस्ति[4] ।
तस्मान्निर्व्यापारतया सर्वधर्माणां । [5]अस्मिन् सति इदं भवति ।
अस्योत्पादादिदमुत्पद्यते । इतीदम्प्रत्ययतामात्रमिदं जगत्[6] ।
नात्र कश्चित्स्वतन्त्र' सम्भवति । हेतुप्रत्ययाधीनत्वात्सर्वधर्माणां ॥
15 स्यादेतत् । अस्त्येव स्वतन्त्र । यथा सांख्यानां प्रधान। आत्मा

---

1 So Minaev, M his ° iparādhaç ca

2 Cp Bodhic t note ad 219,12 (p 395), *Sarvadarçanas* 20,21 and Comm to Çamkara II 2, 19

3 L² janitasyāpi

4 Cp *Çālistambasūtra* on Pratītyasamutpāda bījasya naivam bhavati "aham ankuram nirvartayāmi" iti, ankurasya naivam bhavati aham bījena nirvartita" iti ' *Çiksās*, *Madhyamakavrtti*, *Bodhic* IX, *Abhidharmakoçav* *Bhāmatī*, p. 354

5 6 = *Madh vrtti*, 14,26, 50,11, *Mahāvastu*, II, 285 7, *Majjhimanikāya* III 63 26 *Bodhic t* 307, 9 *Abhidharmakoça*, (Soc As) fol 234-5

च नैयायिकादीनामाकाशादयः। तत्किमुच्यते न किं चित्स्व-
तन्त्रमिह विद्यते। [67a] इत्याशङ्क्याह।

यत्प्रधानं किलाभीष्टं यत्तदात्मेति कल्पितं।
तदेव हि भवामीति[1] न संचिन्त्योपजायते॥ २६॥

यत्तद्भवतां सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रधान- 5
मित्यभिमतं। किलेति प्रमाणासंगतमेतदित्यरुचिं प्रकाशयति।
यदपि तद्वस्तु किं चिदात्मेति कल्पितमध्यवसितं प्रमाणा-
संगतमेव। आह। यस्मात्तदेव स्वयमेव तदपरकारणाभावाद्
भवामि समुत्पद्य इति नाभिसंधाय[2] जायते॥ कुतः। यस्मात्

अनुत्पन्नं हि तन्नास्ति क इच्छेद्भवितुं तदा। 10

तत् प्रधानादि प्रागसदेव। असतश्च वन्ध्यासुतादेरिव का
भवितुमुत्पत्तुमिच्छा भवेत्। अथ नासदुत्पद्यते किं चित्।
केवलमव्यक्तावस्थातो व्यक्तावस्थायां परिणाममात्रं। यद्येवं परि-
णामोऽपि कथमसन्नुत्पद्यते व्यक्तावस्था वा। परिणामस्य
व्यक्तावस्थायाश्च तत्स्वभावत्वे तस्याप्युत्पत्तिप्रसङ्गः। व्यतिरेके 15
संबन्धाभावः। संबन्धकल्पनायां चानवस्था। परतो विस्तरेण
प्रधानं निराकरिष्यते[3]॥

स्यादेतत्। आत्मन्ययमदोष एव। न हि तस्य वयमुत्पाद-

---

[1] Dev bhavāmīti

[2] In margin abhiprāyīkṛtya, wanting in Tib

[3] IX, 127-135 For the present argumentation, see 136 vyaktasyāsata utpattir akāmasyāpi te sthitā.—Cp Madh vṛtti 6 ?

मिच्छामः । सर्वदा नित्यस्वभावतयानुत्पन्न एवासौ । भवतु नामैवं । तथापि सर्वथा खरविषाणकल्प एवासावुत्पादाभावात् । ततो नात्रापि निवर्तते

अनुत्पन्नं हि तन्नास्ति क इच्छेद्भवितुं तदा । इति ।

5 भावेऽपि वा नास्य स्वात्मन्यपि प्रभुत्वमस्ति । प्रकृत्युपनामितमेव हि विषयमपि स भुङ्क्ते । तदा च विषयोपभोगात्प्राक् तद्भोक्तृत्वमस्य नासीत् । पश्चादुत्पन्नं च तत्स्वभावमेव[1] । अन्यथा तस्य भोक्तृत्वायोगात् । तदुत्पादे च तस्याप्युत्पाद इति कथं नात्मन उत्पाद इष्यत इति । तदेव[1] [67b] पुन

10 अनुत्पन्नं हि तन्नास्ति क इच्छेद्भवितु तदा ।

इत्यायातं ॥

अपरमपि दूषणमत्राह ।

विषयव्यापृतत्वाच्च[2] निरोद्धुमपि नेहते ॥ २७ ॥

यद्यप्यसौ प्रधानोपहितविषयोपभोगाय प्रवर्तत इतीष्यते । 15 तदा प्रागप्रवृत्तस्य पश्चात्प्रवृत्तिर्न युज्यते । अथ कथं चित्प्रवर्तते । तदापि विषये व्यापृतस्य निवृत्तिर्न स्यात् । एतदेवाह । निरोद्धुमपि नेहते । विषयोपभोगान्निवर्तितुमपि नोत्सहते । तदा तस्य तत्स्वभावत्वात् । तस्य च नित्यतयानिवृत्तेः । निवृत्तौ वानित्यत्वप्रसङ्गात् । नैयायिकादीनामात्मनो व्यपदेशो नित्यत्वात् ।

20 विशेषमपि तस्याह ।

---

[1] So Ms

[2] Minaev and text Mss visayavyavrtatvāt - Tib yul la rtag tu gyens hgyur bas hgag pai

नित्यो ह्यचेतनश्चात्मा व्योमवत् स्फुटमक्रियः ।

अचैतन्य सांख्यादिह विशेषः । अन्यत्र समानता । तत्र नित्यः पूर्वापरकालयोरेकस्वभावः । अचेतनश्च अचित्स्वभावो जड़ इत्यर्थः । अन्यचैतन्ययोगाच्चेतयते । व्योमवत् व्यापी । अत एव स्फुटं व्यक्तमक्रियः । यदाह । 5

अन्ये पुनरिहात्मानमिच्छादीनां समाश्रय ।
स्वतो ऽचिद्रूपमिच्छन्ति नित्य सर्वगत तथा ॥
शुभाशुभानां कर्तारं कर्मणां तत्फलस्य च ।
भोक्तारं चेतनायोगाच्चेतन न स्वरूपतः ॥[1]

तथा चाकिंचित्कर एवासौ क्वचिदपि कार्ये ऽनुपयोगात् ॥ 10 अथापरसहकारिप्रत्ययसंनिधौ निष्क्रियस्यापि तस्य क्रियापगम्यते । यदुक्त

ज्ञानयत्नादिसंबन्धः कर्तृत्वं तस्य भण्यते । इति ।[2]

अत्राह ।

प्रत्ययान्तरसङ्गे ऽपि निर्विकारस्य का क्रिया ॥ २९ 15

ज्ञानयत्नादिप्रत्ययान्तरसंपर्के ऽपि नित्यत्वान्निर्विकारस्य पूर्वस्व[684]भावादप्रच्युतस्यात्मनः का क्रिया ॥ नैव क्रिया युज्यते ।

---

[1] Quoted ad ix 58 (p 295 20) naiyayikavad vaiçesika api

[2] Quoted ad ix 72 (p 301 26) Our MS has labhyate, but Tib bçad — The second line is the following Sukhaduhkhādisamvittisamavāyas tu bhoktrta — Those buddhistic quotations may perhaps be found in the *Tarkajvala* by Bhāvaviveka ?

य: पूर्ववत्क्रियाकाले क्रियायास्तेन किं कृतं।
तस्य क्रियेति संबन्धे कतरत्तन्निबन्धनं[1] ॥ ३०

यथा पूर्वमक्रियाकाले तथा क्रियाकाले ऽपि य:। तेन कारकस्वभावविकलेन क्रियाया: किं कृतं। येन प्रत्ययान्तरमङ्गे
5 तस्य क्रिया व्यवस्थाप्येत॥ अपि च। उभयसंबन्धाभावात् तस्यात्मन: क्रियेयमिति सबन्धे कतरत्तदन्यनिमित्त। नैवास्ति किं चित्॥

विस्तरेण चात्मनो निराकरिष्यमाणत्वादीश्वरस्य[2] च न स्वतन्त्र: कश्चिदपि संभवति। एवमस्वातन्त्र्यं सर्वत्र प्रसाध्योप-
10 संहरन्नाह।

एवं परवशं सर्वं यद्वशं[3] सो ऽपि चावश:।
[4]निर्माणवद्चेष्टेषु भावेष्वेवं क्व कुप्यते[5] ॥ ३१

एवमुक्तनयेन परवश परायत्तं सर्वं बाह्याध्यात्मिक वस्तुजात। तर्हि यद्वशे[6] तद्परायत्त भविष्यतीति चेत्। न। यद्वशं सो
15 ऽपि चावश: स्वहेतुपरतन्त्र। एव स हेतुरपि स्वहेतोरित्यना-

[1] Minaev kataratta nni, L katarantu Tib de yi bved pa bdi yin zes, hbrel bar hgyur ba gan zig yod = tasya kriyeyam iti (cp Comm.)

[2] On içvara, see IX 119 126, on ātman, IX, 58 60

[3] = yasya vaço sthitam sarvam, so 'pi

[4] Minaev has nirvāṇavad, L[2] nirmāṇa, so Tib de ltar çes na sprul lta bui dnos po kun la khro mi hgyur (= evam jñātvā nirmitasadṛçasarvabhāveṣu na kupyate) — Comm — MS has also nirvāṇa, p 187, 4, 10 (cp V 57 supra

[5] L [2] kupyase — According to the Comm kupyatām

[6] So MS clearly written the old sign of ç antecedıng

दिसंसारपरंपरायां न स्ववशिता[1] क चिदपि संभवति । अतो निर्व्यापाराः सर्वधर्मा इति । कः कस्मै द्रुह्यति परमार्थतः येनापराधिनि क चित्कस्य चिदपराधे तस्य द्वेषो युक्तः । इदमेवाह । निर्वाणवत् सर्वव्यापारकल्पनाविगमात् । अचेष्टेषु निरीहेषु सर्वधर्मेष्वेवं सत्सु क कुप्यतां । न युज्यते प्रेक्षावतां क चिदपि कोप इति भावः ॥ 5

स्यादेतत् । एवं श्लोकं समर्थयतो द्वितीय विघटत इत्याशङ्क्यन्नाह ।

वारणापि न युक्तैवं कः किं वारयतीति चेत् ।

समर्थितन्यायेनैव वारणापि निवर्तनमपि निर्वाणवदचेष्टेषु 10 भावेषु न युक्ता । एवमिति यदा किं चिदपि स्वतन्त्रं न दृश्य- [68b]ते । सर्वं प्रत्ययसामग्रीं प्रतीत्य जायते । तदा वारणापि न युक्ता । यदि वामेव तथापि कथ न युक्ता । को वारयति स्वतन्त्रः कर्ता किं निषेध्य स्वतन्त्रप्रवृत्त वारयतीति चेत् ॥ अयमभिप्रायः । न हि समाने ऽपि न्याये क चित्प्रवृत्तिः क 15 चिन्निवृत्तिर्युज्यते । एकत्र निवृत्तौ सर्वत्रैव निवृत्तिर्युक्ता न तु क चिदेव न्यायस्य सामान्यत्वात् । तस्मादयुक्तमेतत् । वारणा न युक्तेति । यद्येव मन्यसे ऽत्रोत्तरमाह ।

युक्ता प्रतीत्यता यस्माद्दुःखस्योपरतिर्मता ॥ ३२[2]

---

[1] svavaçin, ˆ çitā are new

[2] Tib de la bṛten nas sdug bsṅal rnams rgyun chad hgyur bdod mi rigs med = tat pratītya duhkhānām uparatir iṣṭā na ayuktā —Dev yuktāḥ tasmād

युक्ता वारणा । कुतः प्रतीत्यता[1] । इदं प्रतीत्येदमुत्पद्यत इति प्रतीत्यसमुत्पन्नता यस्मादस्ति निर्व्यापारेष्वपि भावेषु । अतो वारणा युक्ता । ततो न व्याघातः । एतदुक्तं भवति । यद्यपि निर्व्यापाराः सर्वधर्मास्तथापि प्रतीत्यसमुत्पादवशात्पारतन्त्र्यमुप-
5 दर्शितं । एवं परवशं सर्वमित्यादिवचनात्[2] । ततोऽविद्यादि-प्रत्ययबलादुत्तरोत्तरं कार्यप्रवाहः संस्कारादिरूपः प्रवर्तते । पूर्वपूर्वनिवृत्तौ निवर्तते । एतच्चोत्तरत्र[3] विस्तरेण प्रति-पादयिष्यते ॥ तस्माद् दुःखस्य संसारस्योपरतिर्निवृत्तिरभिमता[4] । अतो द्वेषादिपापप्रवृत्तिवारणा संगच्छते । तां प्रतीत्य तथा-
10 विधमभ्युदयनिःश्रेयसस्वभावं फलमुत्पद्यते ॥

सांप्रतं प्रकृतमेव योजयन्नाह ।

तस्मादमित्रं मित्रं वा दृष्ट्वाप्यन्यायकारिणं ।
ईदृशाः प्रत्यया अस्येत्येवं मत्वा सुखी भवेत् ॥ ३३

यस्मात्प्रतीत्यजं[5] सर्वं तस्मादमित्रेतरमपकारिणं[6] प्रतीत्य
15 सुखमेवालम्बनीयं । कुतः । ईदृशा अपकारकरणशीलहेतवो ऽस्य[1]मित्रस्येतरस्य वा । इत्येवं निश्चित्य सुखी भवेत् । दौर्मनस्यं न कुर्वीत [69a] ॥ किं च दुःखोपनिपातेन चित्तक्षोभेऽपि न दुःखस्य निवृत्तिरस्तीत्युपदर्शयन्नाह ।

---

1 Tib. brten nas so = pratitya
2 *Supra* VI, 31
3 IX, 75
4 We have yuktā vāranā, pratītyatā yasmād asti, tasmād ca samsārasya nivrttir abhimatā
5 Pratitya samutpannam
6 Tib mi mdza dan cig ços = amitram itaram ca

यदि तु स्वेच्छया सिद्धिः सर्वेषामेव देहिनां ।
न भवेत्कस्य चिद्दुःखं न दुःखं कश्चिदिच्छति ॥ ३४

न ह्यात्मेच्छामात्रेणानभिमतं निवर्तते अभिमतं चोपतिष्ठते हेतुमन्तरेण । तथात्वे सति न भवेत्कस्य चित्सत्त्वस्य दुःखं । किमिति । न दुःखमात्मनः कश्चिदिच्छति । स्वसुखाभिलाषिण एव हि सर्वसत्त्वाः ॥ 5

दुःखाधिवासनाक्षान्तिमभिधाय[1] इदानीं[2] परापकारमर्षण-क्षान्तिमुपदर्शयन्नाह ।

प्रमादादात्मनात्मानं बाधन्ते कण्टकादिभिः ।
भक्तच्छेदादिभिः कोपाद्दुरापस्त्र्यादिलिप्सया ॥ ३५ 10
उद्बन्धनप्रपातैश्च विषापथ्यादिभक्षणैः ।
निघ्नन्ति के चिदात्मानमपुण्याचरणेन च ॥ ३६
यदैवं क्लेशवश्यत्वाद् घ्नन्त्यात्मानमपि प्रियं ।
तदैषां परकायेषु परिहारः कथं भवेत् ॥ ३७

असमीक्षितकारिता प्रमादः । स्वयमेव स्वकाय कण्टक- 15 खाणुकठल्लपाषाणशर्करादिभिर्दुर्गमार्गेषु[3] कर्मप्रवृत्ताः । कण्टका-स्तरणशयनादिभिर्वा बाधन्ते । तथा भोजनपानपरिहारा-

---

1 VI, 8-34

2 VI, 35 50

3 khanu, cp Bendall's note ad *Çikṣas* 102 1, kathalla (?ly4), see *Mahavastu* (Burnouf, *Lotus*, 383)

दिभिः[1] । किमिति कोपात् । अगम्यपरदारधनादि लब्धु-
मिच्छया वा ।

उद्बन्धन ऊर्ध्वलम्बन । प्रपातः प्रपतन पर्वतादेः । जलाग्नि-
प्रवेशादिभिः । विषपथ्यादिभक्षणैः । अत्याहारातिपानादिभिः ।
5 निघ्नन्ति मारयन्ति के चिन्मोहपुरुषा[2] आत्मानं स्वकाय पर-
वधादिभिः । अपुण्यचरणेन च । परवधाभिप्रायाः संग्रामादिष्व-
कुशलक्रियया च ।

यदैवमुक्तक्रमेण क्लेशवश्यत्वात् क्लेशपरतन्त्रत्वादेते मत्त्वा
आत्मानमपि प्रिय वल्लभ घ्नन्ति पीड़यन्ति । तदेषां परकायेषु
10 परशरीरेष्वपकारविरतिः कथ स्यात् ॥

इत्थ च कृपापात्रमेवैते न द्वेषस्थान । इत्याह

क्लेशोन्मत्तीकृतेष्वेषु प्रवृत्तेष्वात्मघातने ।
न केवलं दया नास्ति क्रोध उत्पद्यते कथं ॥ ३८

पिशाचैरिव ग्रस्तेषु । एषु । अपकारकारिषु । उक्तनयेन
15 प्रवृत्तेष्वात्मघातने परापकारद्वारेण वा । न केवलं न तावत्
[69b] कृपा नास्ति । औदासीन्यमपि साधूनां तत्रायुक्तं । द्वेष
उत्पद्यते कथं । कृपास्थानेष्विति विपर्ययो महान् ॥

---

1 Parihāra, see *Childers*, s voc "Ab (Abhidhānappadīpikā) gives also to this word the meaning of vajjana, "avoiding," as in Sanskrit, but of this I have not as yet met with any example"—This meaning imposes itself in our text

2 Mohapurusa (not in P W) very common, *Lankav* 65, 15, 114, 9, etc Cp mohavarga, *ibid* 111, 16

एवमपि स्वचित्तं निवारयेदित्याह ।

यदि स्वभावो बालानां परोपद्रवकारिता ।
तेषु कोपो न युक्तो मे यथाग्नौ दहनात्मके ॥ ३९

तथा हि विकल्पद्वयमत्र बालानां पृथग्जनानां यद्येतादृश एव स्वभावः[1] परोपद्रवकारिता नाम । तदा न खलु स्वभावाः[2] पर्यनुयोगमर्हन्ति[3] किमिति परापकारं कुर्वन्ति ते । इति परिभाव्य तेषु द्वेषो न युक्तो मे । तद्यथाग्नौ दहनस्वभावे दाहकरणात् । अन्यथा तदभावे तत्स्वभावताहानिप्रसङ्गात् ।

द्वितीयं विकल्पमधिकृत्याह ।

अथ दोषो ऽयमागन्तुः सत्त्वाः प्रकृतिपेशलाः ।
तथाप्ययुक्तस्तत्कोपः कटुधूमे यथाम्बरे ॥ ४०

अथ दोषो ऽयमागन्तुरन्य एव न तत्स्वभावभूतः सत्त्वाः पुनः प्रकृतिप्रभास्वरचित्तसंतानतया[4] पेशला अकुटिलस्वभावाः । दोषा हि दुष्टस्वभावा न तत्स्वभावाः सत्त्वाः । तथाप्ययुक्तस्तेषु सत्त्वेषु पेशलस्वभावेषु कोपः । कस्मिन्निव । कटुधूमो यस्मिन्निवाम्बरे । न हि कटुता नाम निर्मलस्याकाशस्य स्वभावः । अपि तु धूमस्य । अतश्च तद्दोषेण धूम एव द्वेषो युज्यते । नाकाशे प्रकृतिपरिशुद्धे । तस्माद्दोषेष्वेव कोपो युज्यते न सत्त्वेषु ॥

[1] MS etādṛśa eva svabhāvaḥ. No plural sign in Tib.

[2] No sign of the plural in Tib.

[3] MS paryanupayogam.

[4] Cp. prakṛtinirmala,° prabhāsvaratā, *Bodhi.* IX, 269 14, prakṛtiprabhāsvaraviśuddhi (*Laṅkāv.* 80 3).

[5] MS doṣo.

अपि च यदेव हि प्रधानं दुःखकारणं तत्र युक्तो भवेत्कोपो नाप्रधाने। इत्याह।

मुख्यं दण्डादिकं हित्वा प्रेरके यदि कुप्यते।
द्वेषेण प्रेरितः सो ऽपि द्वेषे द्वेषो ऽस्तु मे वरम् ॥४१

5 काये हि दण्डप्रहारादभावितचित्तस्य दुःखं समुत्पद्यते। ततो दण्ड एव मुख्यं दुःखकारणमिति। तत्रैव कोपो युक्तः। अथ परप्रेरितस्य दण्डस्य को दोषः। तेन प्रेरक एव द्वेष्यो भवति। एवं तर्हि द्वेषेण सो ऽपि दण्डप्रेरकः [70b] प्रेरित इति द्वेषे द्वेषो मम युक्तो न प्रेरके॥

10 अपि च। नादृष्टं किं चिदुपभुज्यते सुखं दुःखं वा। इति विचिन्त्य परापकारे ऽपि न तत्र चित्तं प्रदूषयेत्। इत्याह।

मयापि पूर्वं सत्त्वानामीदृश्येव व्यथा कृता।
तस्मान्मे युक्तमेवैतत्सत्त्वोपद्रवकारिणः॥ ४२

15 पूर्वं जन्मान्तरे मयापि सत्त्वानामेवंविधैव पीडा कृता यस्मात्। ऋणपरिशोधनन्यायेनोचितमेव ममैतत्परापकारकारिणः। तत्कर्मफलपरिपाकादिति भावः॥

यद्यस्य कारणं तस्मादेतदुत्पद्यते। नान्यस्मात्। इति परामृश्य परापकारं मर्षयेत्। इत्युपदर्शयन्नाह।

तच्छस्त्रं मम कायश्च द्वयं दुःखस्य कारणं।
तेन शस्त्रं मया कायो गृहीतः कुत्र कुप्यते ॥ ४३

अविकलकारणसामग्री हि सर्वकार्यस्य कारणमिति प्रमाणपरिनिश्चितं। सा चात्र तथाविधा विद्यते। तथा हि तस्यापकारिणः शस्त्रं खड्गादि मम कायश्च। एतद्द्वयं सामग्रीरूपं दुःखस्य कारणं। इति समर्थकारणसद्भावेऽपि कार्यं कथं नोत्पद्येत। अन्यथा तत्तस्य कारणमेव न स्यात्। ततोऽन्यदपि तत्र[1] उत्पादयोगः। तस्माद्यदि कारणोपनायके कुप्यते तदा स्वात्मन्यपि कोपो युक्तः। यतः स्वयमपि दुःखकारणं वहत्युपनयति च भवान्। आत्मन्यकोपे परत्रापि न युक्त इति भावः॥

प्रकारान्तरेणोक्तमेवार्थं स्पष्टयन्नाह।

गण्डोऽयं प्रतिमाकारो गृहीतो घट्टनासहः[2]।
तृष्णान्धेन मया तत्र व्यथायां कुत्र कुप्यते ॥ ४४

शरीराकृतिरयं पक्वगण्डो[3] मया गृहीतः। सर्वदुःखहेतुत्वात्सर्वोपमर्दसहः। आकोटनताडनादिभिरप्यभेद्यत्वात्। दुःखपरिहाराय सुखप्राप्त्यै च या तृष्णाभिलाषः। तदन्धेन पिहितप्रज्ञालोचनेन तस्यां व्यथायां सत्यां कुत्र कुप्यते। न हि गण्डस्य कुड्यादि[70b]संपर्कजे दुःखे कश्चिद्विवेकतः कोपो युक्तः॥

---

[1] = tatsamagrito, ny id api kāranam syāt, tata ?

[2] Tib. çu-ba mi yi gzugs hdra ba reg-tu mi bzod sdug-bsnal-can = gandah (= abscess) puruṣa(= çarira)rūpasamah sparçana asahah duhkhī But Comm sarvopamardasahah abhedyatvāt On pratimā, see *Çikṣās* 358, [16], on ganda, *Ang Nikāya* IV, 386

[3] Ms pakṣa°, but Tib, çu-ba smin pa.

अपि च । यः कार्येणानर्थी[1] तेन तत्कारणमेव परिहर्तव्यं भवेत् । अहं तु विपर्यस्तमतिरिति विमर्शमुपदर्शयन्नाह ।

दुःखं नेच्छामि दुःखस्य हेतुमिच्छामि बालिशः ।
स्वापराधागते दुःखे कस्मादन्यत्र कुप्यते ॥ ४५

5 दुःख दण्डाद्यभिघातजं नेच्छामि । तस्य पुन. कारणं शरीरं प्रत्यपकारणं चेच्छामि बालिश इति बालधर्मो विपर्यासः । तस्मात्कारणात्स्वकाये यद्दुःख तत्स्वापराधागतमेव । इति कस्मादन्यत्र तत्सहकारिमात्रे कुप्यते ॥

आत्मवधाय स्वयं सत्कृतशस्त्रस्यैवान्यत्र मम कोपो न युक्त
10 इत्याह ।

असिपत्त्रवनं यद्वद्यथा नारकपक्षिणः ।
मत्कर्मजनिता एव तथेदं कुत्र कुप्यते ॥ ४६

असिपत्त्रवनं नरकसमुद्भवं । असय एव पत्त्राण्यस्येति कृत्वा । असिग्रहणं प्राधान्यात् । अन्यदपि शस्त्रं नारकदुःखहेतुर्यन्त्रं च[2] ।
15 वने तस्मिन्निवासिनो गृध्रोलूकवायसादयः पक्षिणो यथा मत्कर्मजनिता एव दुःखहेतवो भवन्ति । नान्यदत्र दुःखकारणमस्ति । तथेदमपि परशस्त्रादिकं दुःखहेतुर्मत्कर्मजनितमेव । इति कुत्र कुप्यते ।

---

1 Ms kāryenānadhī tena. , Tib hbras bu don du mi gñer pa des — (Byan chub don-du gñer = prārthayed bodhim). Should the conjecture be right, anarthin, with a new meaning = anabhilāsin

2 Ms yantram evanasya tannivāsino But Tib hkrul-hkhor dan mtshon cha gzan-dag kyan bzun no (= grhitāni). nags-thsal de na gnas ....

इत्थमपि विपर्यास एवायमित्युपदर्शयितुमाह ।

मत्कर्मचोदिता एव जाता मय्यपकारिणः ।
येन यास्यन्ति नरकान्मयैवामी हता ननु ॥ ४७

येन मदीयेन कर्मणा चोदिताः प्रेरिता एव मयि पूर्वकृतापकारे ऽपकारिणो जाताः सन्तो नरकान्यास्यन्ति । तेन मयैवामी अपकारिणो हता ननु । स्वचित्तं संबोधयति । नामीभिरहं हतः । अयमभिप्रायः । यदि नाकरिष्यमहमीदृशं कर्म तदैतेऽपि नापकारिणो ऽभविष्यन्निति । मत्कृतेनैव कर्मणापकारिणो भवन्ति ॥

उपकारिष्वेव [71ª] मोहादपकारिबुद्धिर्ममेति कारिकाद्वयेन दर्शयन्नाह ।

एतानाश्रित्य मे पापं क्षीयते क्षमतो बहु ।
मामाश्रित्य तु यान्त्येते नरकान् [1]दीर्घवेदनान् ॥ ४८
अहमेवापकार्येषां [2]ममैते चोपकारिणः ।
कस्माद्विपर्ययं कृत्वा खलचेतः प्रकुप्यसि ॥ ४९

एतानपकारिण आश्रित्य निमित्तीकृत्य । मम पापं पूर्वजन्मकृतपरापकारजनितं क्षीयते तद्दुःखानुभवनविपाकेन क्षयं याति । क्षमतः क्षान्तिमालम्बमानस्य । बहु अनेकपर्यायेण कृतं ।

---

[1] According to the Comm tīvra°
[2] So M. L² —Minaev mayaite

मामाश्रित्य मत्कर्मचोदिता एवमप्यपकारं कृत्वा पुनरेते नरकान् तीव्रवेदनान् दुःसहदुःखानुभवान् यान्ति ॥ अत उक्तक्रमेण अहमेवापकार्येषामित्यादि सुबोधं ॥

ननु यद्यपकारी भवान् तर्हि भवत एव नरकगमनमुचितं
5 न तेषामित्याह ।

भवेन्ममाशयगुणो[1] न यामि नरकान्यदि[2] ।
एषामत्र किमायातं यद्यात्मा रक्षितो मया ॥ ५०

या प्रत्यपकारनिवृत्तिनिष्ठा एतन्ममाशयमाहात्म्यं नरकगतिनिवृत्तिहेतुः । नरकान्न यामि तदात्माशयमाहात्म्यबलेन ।
10 न तु पुनरेषां दुराशयतया नरकेषु मज्जापतनमिति भावः । एतदेवाह । एषामित्यादिना ॥ अयमत्र समुदायार्थः । यद्यहमपकारी सन्नपि[3] केन चिदुपायकौशलेन नरकान्न यामि । तदैषामुपकारिणां[4] किमायात । किमपचीयते । का क्षतिरित्यर्थः। मया तावदेकेन [रक्षिता न] भवन्तामन्ये[5] रक्षित आत्मा च
15 भवेत् । न चैतावता किं चिदेषां न्यूनाधिक गुणदोषेषु स्यात् ॥

---

1 Minaesv āçrayaguno , Tib bsam-pa = M L8 āçaya?

2 Tib gal te bdag-la bsam-pa yi yon-tan yod na, dmyal mi hgro yadi mayy āçayaguno bhaven, narakaṁ na yāmi

3 As said *supra* l 3

4 Possibly apakāriṇām , but the *apakāriṇah* are said to be *upakāriṇah*

5 Ms illegible and from a second hand bhavatām anyam r° —Tib re-zig bdag-ñid gcig pas khyed cag gzan ni ma bsruns-la, bdag-ñid ni bsrun-ba yin te = tāvad ātmanā ekena anyasmin eva na rakṣite ātmā eva rakṣito bhavet —kyed-cag = plural of the pronoun of the second person the Tib translator failed to understand this clause —According to Prof Kern mayā tāvad ekena [na] bhavatā, manye, rakṣita ātmā ca bhavet

ननु यदि नामैवं तथापि भवतो ऽपि न युक्तमात्मरक्षण-
मुपकारित्वात्तन्नतया। इत्याशङ्क्याह।

अथ प्रत्यपकारी[1] स्यां तथाप्येते न रक्षिताः।
हीयते[2] चापि मे चर्या तस्मान्नष्टास्तपस्विनः॥ ५१

यदि दण्डादिघा[71b]तं कुर्वन्तु प्रत्यपकारी भवेयं। तथाप्येते न रक्षिता भवन्ति। न कश्चिदेषां प्रतीकारो नरकगमनादिषु कृतः स्यात्॥ प्रत्युत। ताड़ितेनापि मया न प्रतिताड़ितव्यं। तथा। सर्वसत्त्वेषु न मैत्रचित्त मया निक्षेप्तव्य[3]। अन्ततो न दग्धस्थूणायामपि प्रतिघचित्तमुत्पादयितव्यं[4]। इत्यादेर्बोधिसत्त्वचर्याया मम हानिरेव स्यात्॥ तस्मादेतर्हि प्रतीकारोपायाभावात्तपस्विनो वराका रक्षितुमशक्यत्वान्नष्टा दुर्गतिपतिता एव। इत्युपेक्ष्यन्ते[5] तावदिदानीं। पश्चात्तदुपायमधिगम्य तत्करिष्यामि यथैषां दुःखमणुमात्रकमपि न स्यात्॥

तदेवं परापकारमर्षणक्षान्तिं प्रतिपाद्य[6]। अधुना धर्मनिध्यानक्षान्तिमुपदर्शयितुमाह।

मनो हन्तुममूर्तत्वान्न शक्यं केन चित्क चित्।
शरीराभिनिवेशात्तु कायदुःखेन[7] बाध्यते॥ ५२

[1] Minaev pratyayakārī —L² syāt tathā

[2] L² kṣīyate

[3] Ms mayī niççitavyam, but Tib. spans-par mi-bya ba

[4] Cp VI, I, *in fine*

[5] Ex conj (=na sattvāpekṣā kriyate) Ms upeksante—Tib do ltar na re zig btan-sñoms su byas la evam tāvad upekṣām kṛtvā

[6] Cp ad VI 8 and 35.

[7] Ex conj —Minaev, M, L² cittam duhkhena, L¹ Dev kāyo —Tib lus hdi sdug bsnal-dag gis gnod = kāyo 'yam duhkhair bādhyate.

द्विविधं दुःखमविचारतो बाधकमुपजायते । कायिकं मानसिकं चेति । तत्र मनसि न कश्चिद्दण्डादिकं दातुं शक्तः । अमूर्तत्वान्मनसः । इति तदुद्भवं दुःखं परमार्थतो न संभवति । कल्पनाकृतं तु दौर्मनस्यादिक विद्यते । एतदेव दर्शयति ।
5 शरीरेत्यादिना । ममेदं शरीरमिति विकल्पाभ्यासवासनावशात् कायदुःखेन चित्त विहन्यते ॥

[1]तत्रापि प्रतिनियतमेव दुःखकारणमित्याह ।

न्यक्कारः[2] परुषं वाक्यमयशश्चेत्ययं गणः ।
कायं न बाधते तेन चेतः कस्मात्प्रकुप्यसि ॥ ५३

10 न्यक्कारादिगणः समूहः कायस्य दुःखहेतुर्न भवति । न हि कायस्यायं कं चिदुपघातं करोतीति येन तेन चेतः कस्माद्धेतोः प्रकुप्यसि ॥

अथापि स्यात् । यदि नाम न्यक्कारादयः कायस्य बाधका न भवन्ति [72a] तथापि तच्छ्रुत्वा मयि लोकानामप्रसन्नं चित्त-
15 मुत्पद्यते । इति मया नेष्यन्ते । इत्याशङ्क्याह ।

मय्यप्रसादो योऽन्येषां स किं मां भक्षयिष्यति ।[3]
इह जन्मान्तरे वापि येनासौ मे ऽनभीप्सितः ॥ ५४

भवतु नामैवं तथापि विचारणीयमेव । मयि न्यक्कारादिश्रवणाद्यो ऽयमप्रसादो जनानां स किं मां भक्षयिष्यतीहलोके

---

[1] tatra = kāye

[2] Minaev nyakkāraparuṣam vākyam—M. nyakkārah —Tib brñas dan thsig rtsub smra-ba dan

[3] Tib bdag-la za bar mi byed na, bdag ni çu phyu de mi hdod

परलोके वा । येनासौ लोकाप्रसादो ममाप्रियः । इति विचार्य न कर्तव्यो ऽत्राभिनिवेशः ॥

अस्ति वात्राभिनिवेशकारणं लाभविघातो नामेत्याह ।

लाभान्तरायकारित्वाद्यद्यसौ मे ऽनभीप्सितः ।
नङ्क्ष्यतीहैव मे लाभः पापं तु स्थास्यति ध्रुवं ॥ ५५ 5

तथा हि न्यक्कारादिश्रवणादप्रसादो लोकानां । तस्माच्च लाभोपनामनवैमुख्यं । ततो ऽसौ न्यक्कारादिर्गणो ममानिष्ट इति चेत् । तदयुक्तं । नङ्क्ष्यति विनश्वरधर्मतयापगमिष्यति । इहैव प्रतिनियतैरेव दिनैर्मम लाभः । न तु परलोकानुबन्धी भविष्यति । तन्निमित्त न्यक्कारादिकर्तृषु क्रुध्यतो यत्पापं तदेव 10 परं स्थास्यति । परलोकानुबन्धि भविष्यति । ध्रुवमिति अपरिभुक्ते तत्फले तस्याविनाशात् ॥

इदमपि चात्रालोचनीयं ।

वरमद्यैव मे मृत्युर्न मिथ्याजीवितं[1] चिरं ।
यस्माच्चिरमपि स्थित्वा मृत्युदुःखं तदेव मे ॥ ५६ 15

इदमेव वरं श्रेष्ठं यल्लाभाभावादस्मिन्नेवाहनि मे मरणमस्तु । न तु पुनः परापकारद्वारेण लाभप्रतिलम्भान्मिथ्याजीवितं[1] चिरं दीर्घकाल । कुतः । यस्माद्बहुतरकालमपि जीवित्वा मरणान्तं

[1] Mithyā-ājīva is well known, see *Çikṣās* 267, 11, *Saṃ. n* III, 239, *Majjh* III, 75

चिरं जीवितं[1] । इत्यवश्यंभाविनो मृत्योर्दुःखं तदेव मम । यत्पश्चादर्षशतात्यये भविष्यति तदेवेदानीं मम म्रियमाणस्य । इति चिरजीवितेष्वविशेषः ।

इतो ऽप्यविशेष एवेति श्लोकद्वयेन द[72b]र्शयन्नाह ।

5 स्वप्ने वर्षशतं सौख्यं भुक्त्वा यश्च विबुध्यते ।
मुहूर्तमपरो यश्च सुखी भूत्वा विबुध्यते ॥ ५७
ननु निवर्तते[2] सौख्यं द्वयोरपि विबुद्धयोः ।
सैवोपमा मृत्युकाले चिरजीव्यल्पजीविनोः ॥ ५८

यथा कश्चित्स्वप्नोपलब्धं वर्षशत सुखमुपभुज्य विबुध्यते ।
10 अन्यः पुनः क्षणमात्र । स तावन्मात्रेण सुखिनमात्मानं मन्यते । अनयोर्द्वयोरपि स्वप्नोपलब्धोपभुक्तसुखयोः प्रतिविबुद्धयोः सतो[3] तदुपलब्धं विनष्ट सुखं न निवर्तते । जाग्रदवस्थायां नानुवर्तते । स्मरणमात्रावशेषत्वात् । सैवोपमा स्वप्नोपलब्धसुखयोरिव पुरुषयोर्मृत्युकाले मरणसमये चिरजीविनो ऽल्पजीविनश्च ॥ ननु
15 निवर्तते सौख्यमिति । स्वार्थे ऽष्यण्[4] ॥

इत्यलं मिथ्याजीवितेन[5] ॥ अस्मादपि लाभालाभयोर्न कश्चिद्विशेष इत्युपदर्शयन्नाह ।

---

1 This formula which puzzled James d' Alwis (cp Max Muller, *Dhammapada*, 148) is common in Sanskrit and Pali books

2 Minaev na tan nivartate L[2] pravartate —See Commentary.

3 Ms tu

4 saukhyam = sukham

5 See VI, 56

लब्ध्वापि च बहूँल्लाभान् चिरं भुक्त्वा सुखान्यपि ।
रिक्तहस्तश्च नग्नश्च यास्यामि मुषितो यथा ॥ ५९

प्रचुरतरलाभान् लब्ध्वापि समासाद्य चिरकालमुपभुज्य सुखान्यपि । पुनर्मृत्युमधिगम्य रिक्तहस्तश्च तुच्छहस्तः । न तस्माल्लाभादीषदपि पाथेयं गृहीतं । नापि सुखात्किंचित्परिशिष्टमवस्थितं । कटिसूत्रकमात्रमपि[1] न परिशेषितमिति नग्नश्च चौरैः परिमुषित इवास्माल्लोकात्परं लोकं यास्यामि ॥ 5

स्यादेतत् । अस्त्येव विशेषो लाभस्य चीवरादीनामविघातादायुःसंस्काराणामुपस्तम्भाच्चिरतरकालं जीवितं स्यात् । ततश्च पूर्वकृतपापस्य विदूषणासमुदाचारादिना परिक्षयं शिक्षासंवरपरिरक्षणेन बोधिचित्तसेवनादिना च कुशलपक्षस्य च वृद्धिं कुर्यां । यदुक्तं । 10

यावच्चिरं जीवति धर्मचारी
तावत्प्रसूते कुशलप्रवाहं । इति [73a] ।[2]

अतो लाभान्तरायकारिणि युक्त एव प्रद्वेष इत्याशङ्क्यन्नाह । 15

पापक्षयं च पुण्यं च लाभाज्जीवन् करोमि चेत् ।

लाभादुक्तक्रमेण जीवन् म्रियमाणः पापक्षयं च पुण्यं च करोमीत्यादि मन्यसे । नन्वेतदितः समधिकं दोषमपश्यताभिधीयत इत्याह

---

[1] Katisūtra = girdle, "pagne"—Form in °ka is new.
[2] I cannot give exact reference

पुण्यक्षयश्च पापं च लाभाय क्रुध्यतो ननु ॥ ६०

लाभार्थं लाभनिमित्तं तदन्तरायकारिणि द्वेषं कुर्वतः सुकृतक्षय एवोपजायते । यदुक्तं सर्वमेतत्सुचरितमित्यादिना[1] । अयं तु विशेषः । अत्यन्तिमसमुद्भवस्य पापस्य राशिरभिवर्धते च ॥

5 अथापि स्याद्यथा कथं चित्तावच्चिरकालं लाभाज्जीवितं स्यात् । तावतैव नः प्रयोजनं । इत्याह ।

यदर्थमेव जीवामि तदेव यदि नश्यति ।
किं तेन जीवितेनापि केवलाशुभकारिणा ॥ ६१

न खलु बोधिसत्त्वस्येतरसत्त्ववज्जीवितं निःप्रयोजनमेवाभि-
10 लषितं । किं तर्हि संभाराभिसंवर्धनार्थं पापक्षयार्थं च । तद्यदि सुकृतक्षयनिमित्तमेव तत्स्यात् । तदा किं तेन तादृशेन जीविते-नापि केवलाशुभकर्मकरणशीलेन । निन्दितमेव तदिति भावः ॥

स्यादेतत् । न लाभान्तरायकारितया ममावर्णवादिनि प्रतिघचित्तमुत्पद्यते । किं तु गुणप्रच्छादनादिकर्मणा दुःख-
15 हेतुत्वात् । इत्याह ।

अवर्णवादिनि द्वेषः सत्त्वान्नाशयतीति चेत् ।
परायशस्करेऽप्येवं कोपस्ते किं न जायते ॥ ६२

अयशोऽभिधायिनि योऽयं भवतो विद्वेषः । सोऽवर्णवादी

---

1 See *supra* VI, 1

दोषाविष्करणाद्गुणप्रच्छादनाच्च त्वां[1] नाशयति । इति मत्वा चेद्यदि स तन्निमित्तकः ॥ अथ वा सत्त्वान्[1] लोकान्नाशयति[2] । अवर्णवादेन मयि निग्राहयति । स्वयमप्रसन्नचित्तस्तेषामपि चित्तमप्रसादयतीत्यर्थः । इत्यवर्णवादिनि द्वेषश्चेत् । उच्यते । तदा [73b] योऽपि परेषामन्यसत्त्वानामयशः प्रकाशयति तत्रापि कोपस्ते किं न जायते । सोऽपि चावर्णवादी सत्त्वान्नाशयति । तदस्मिन्नपि युक्तरूप एव कोपः ॥

अत्रोत्तरमाशङ्कयन्नाह

परायत्ताप्रसादत्वादप्रसादिषु ते क्षमा ।

परेष्वन्येषु सत्त्वेष्वायत्त आश्रितोऽप्रसादोऽस्येति । अन्यसत्त्वान् विषयीकृत्य समुत्पन्न इति । तस्य भावस्तत्त्व तस्मात् । पराश्रिताप्रसादत्वादप्रसादिष्वप्रसन्नचित्तेष्ववर्णवादिषु तव क्षमा क्षान्तिरुत्पद्यते । आत्मचित्तमेव पृच्छति । अत्राह ।

क्लेशोत्पादपरायत्ते क्षमा नावर्णवादिनि ॥ ६३

यदि यः परायत्ताप्रसादः तत्र क्षमा भवतो भवति । तदा स्वस्मिन्नवर्णवादिनि किं न क्षमा । किंरूपे । क्लेशोत्पादनपरायत्ते क्लेशानामुत्पादपरतन्त्रे । परायत्ताप्रसादत्वं क्षमाहेतुस्तुल्यमुभयत्रापि । इत्यर्थः ॥[3]

---

[1] There are, according to the Comm two acceptable readings sa tvām nāçayati, sattvān (=scins can) nāçayati There is no obvious difference in the Ms between *tva* and *ttva*

[2] As the *aprasāda* is a cause of vināça Cp *supra ad* V, 80

[3] "Yo yasminn aprasannacittah na tasminn ev āprasannacittas, tatkleçesu tv aprasannah" Such I take to be the meaning of the sentence

प्रतिमाद्युपघातकारिषु श्रद्धावशादपि प्रतिघचित्तं नोत्पाद-यितव्यमित्याह ।

प्रतिमास्तूपसद्धर्मनाशकाक्रोशकेषु च ।
न युज्यते मम द्वेषो बुद्धादीनां न हि व्यथा ॥ ६४[1]

5 नाशका विक्षोपयितारः । आक्रोशका दोषबुद्ध्या वैरूप्या-भिधायिनः । तेषु न युक्तो मम द्वेषः । कुतः । यस्माद्बुद्धादीनां बोधिसत्त्वार्यश्रावकप्रत्येकबुद्धानां वितथाभिनिवेशप्रसूतात्मग्राह-निवृत्तेरभिष्वङ्गाभावाच्च व्यथा चित्तपीडालक्षणं दौर्मनस्यं नास्ति । इति भाव. ॥ अतः प्रतिमादिविनाशकेषु द्वेषचित्तं 10 नोत्पादयितव्यं । तथा विरुद्धधर्मकारिषु[2] करुणैव तु युज्यते तेषु साधूनां । अन्यथा तत्र विशेषाभावात्पापमेव केवलमुपजायते । यदि पुनर्धर्मतो निवारयितु शक्यते । तदा न दोषः ॥

यदपि च धर्मकामतया गुरुमातापित्राद्युपघातकारिषु द्वेष-चित्तमुत्पद्यते तदपि विनिवा[71a]र्यमेव । इत्याह ।

15 **गुरुसालोहितादीनां प्रियाणां चापकारिषु ।**
पूर्ववत्प्रत्ययोत्पादं दृष्ट्वा कोपं निवारयेत् ॥ ६५

गुरवो धर्ममार्गोपदेष्टारोऽकुशलपक्षनिवर्तयितार· । सालो-

---

[1] Cp *Brahmajālasutta* I, 1 5 'Brethren, if outsiders should speak against me, or against the Doctrine or against the Order, you should not on that account either bear malice or suffer heart breaking or feel ill will If you, on that account, should be angry and hurt, that would stand in the way of your own self conquest' (Rhys Davids)

[2] The compound is new

स्थिताः सोदराः । अन्येऽपि ज्ञातिसगोत्रबान्धवादयः । तेषामप-
कारिषु । तथा प्रियाणां प्रेमस्थानानां चापकारिषु कोपं
निवारयेत् । इति सम्बन्धः । कथ पूर्ववत्प्रत्ययोत्पादं दृष्ट्वा ।
यदुक्तं ये के चिदपराधास्तेत्यादिना[1] । अत सर्वेऽप्यमी पूर्वक-
र्मोपजनितमेव फलमुपभुञ्जते । नात्र कश्चित्प्रतीकारहेतुरस्ति ।। 5
तदनेन यथापरसमये देवगुरुद्विजातिमातापितृप्रभृतीनामर्थे पाप
कुर्वतोऽपि न दोष इति मत[2] । न तथेहाभिमतमित्युक्तं भवति ।

किं चेदमपि वस्तुतत्त्व मनसिकुर्वता न सत्त्वेषु चित्त दूष-
यितव्यमित्याह ।

चेतनाचेतनकृता देहिनां नियता व्यथा । 10
सा व्यथा चेतने दृष्टा क्षमस्वैनां व्यथामतः[3] ॥ ६६

समस्तकार्यस्यान्वयव्यतिरेकाभ्या जनकत्वेनावधारित साम-
ग्रीलक्षणं कारण । सा च सामग्री वस्तुधर्मतया का चित्क चित्स-
मर्थस्वभावा । तत्र चेतनेन कृता हस्तपादादिप्रहारेण । अचे-
तनेन दण्डशस्त्ररोगादिना । तत्रापि चेतनाव्यापारोऽस्त्येव । 15
साक्षात्पारम्पर्यकृतस्तु विशेष । स्वयमेव यदृच्छया वा लोष्टकु-
ड्याद्यभिघातजनिता वा देहिना शरीरिणां नियता व्यथा
नियमेन समुत्पद्यते । नान्यदितो व्यथाकारणमस्ति ॥ सा चैवं
द्विविधकारणसामग्रीप्रसूतापि चेतने सविज्ञानके काये दृष्टा
प्रमाणपरिनिश्चिता । अतस्तदेव तदुत्पत्तिस्थान । नान्यत् । 20

1 See supra VI, 1.

2 I cannot give reference but to V. 81

3 Minaev has vyatham manah – See the Commentary

अचेतने वेदनायोगात् । ततो यद्यस्योत्पत्तिस्थानं तत्तत्रैव भवति । नान्यत्र । यथा पङ्के पङ्कज न स्थले ॥ अतोऽस्माद्द्या-यात्मनस्व महस्वैनामनन्तरकथितो[74b]भयरूपां[1] व्यथां ॥

तदानीमुभयोरपि साधारणदूषणतया क्व चिदपि कोपो 5 न युक्त इति कथयितुमाह ।

मोहादेकेऽपराध्यन्ति कुप्यन्त्यन्येऽपि मोहिताः[2] ।
ब्रूमः कमेषु[3] निर्दोषं कं वा ब्रूमोऽपराधिनं ॥ ६७

आत्मात्मीयग्राहाभिनिवेशविपर्यासादेके के चिदपराध्यन्ति दण्डादिना । समाक्रोशादि वा वदन्त[4] सदोषमात्मानं कुर्वन्ति । 10 अन्ये पुनस्तदपराधेन कुप्यन्ति रुष्यन्ति । विमोहिता मोहादेव स्वकृतकर्मफलसंबन्धमननुसरन्तोऽविद्यावरणात् । प्रतिताडना-क्रोशादिकमारभन्ते ॥ इत्थं ब्रूम कमेषु क्लेशराक्षसावेश-वशीकृतेषु निर्दोष । कं वा ब्रूमोऽपराधिन दोषवन्तं । उभये-षामपि साधारणदोषत्वात् ॥

15 इदमपि चात्मगतमेव चिन्तयता प्रतिघचित्तं निवर्तयित-व्यमित्याह ।

कस्मादेवं कृतं पूर्वं येनैवं बाध्यसे परैः ।
सर्वे कर्मपरायत्ताः कोऽहमत्रान्यथाकृतौ ॥ ६८

---

[1] Ms kathitabhaya°, ubhaya from the Tibetan

[2] So Mm --According to the Commentary anye vimohitah

[3] M, L[2] kāmesu

[4] Ms vadatah—Tib brdeg pa am brgyad-bkag smra ba = tadanam nigraham vā vadantah

कस्मात्कारणात् किमित्येवमेतत्फलं हेतुकर्म कृतं । येनेति श्लोकोक्तिरेषा[1] । यदित्यस्यार्थे यदेवं । यदि वा येन कर्मसामर्थ्येन हेतुना । आक्रोशबन्धनताडनादिभिः बाध्यसे पीड्यसे परैरन्यैः । ननु यदि नामैवं तथापि प्रतीकारो युक्त इत्याह सर्व इत्यादि । सर्वे दुःखहेतवः कर्मप्रत्ययोपजनितप्रवृत्तयः । इति कोऽहमत्रान्यथाकृतौ[2] तत्फलनिवर्तनाय । न कश्चित् । फलदानोन्मुखस्य कर्मणः केन चिन्निवर्तयितुमशक्यत्वात् ॥

इद पुनरत्र युक्तरूपमित्याह ।

एवं बुद्धा[3] तु पुण्येषु तथा यत्नं करोम्यहं ।
येन सर्वे भविष्यन्ति मैत्रचित्ताः परस्परं ॥ ६९

एते सत्त्वाः कर्मक्लेशपरायत्ताः परस्परमसमञ्जसकर्मकारिणो निवर्तयितुमशक्या इति । एव बुद्धा ज्ञात्वा पुनः पुण्येषु कुशलेषु कर्मसु तथा यत्नं करोम्यह । तेन प्रकारेण वीर्यं समारभे । येन तथाविधं सामर्थ्यं [75a] प्रतिलभ्य सन्मार्गे प्रवर्तिता सत्त्वाः सर्वे मैत्रचित्ता हितसुखविधानतत्परा परस्परमन्योन्यं भविष्यन्ति ॥

द्रोहचित्त विनिवर्त्य प्रियवस्तूपघातकारिणि लौकिकोदाहरणेन द्वेषं निवर्तयेदिति श्लोकद्वयमुपदर्शयन्नाह ।

---

1 Tib. hjig-rten-pai smra ba thsul lo

2 Tib. Text translation bdag gis hdi la ci ste bkon ? = aham atra kim vam ?

3 Tib. mthon nas = drstva

दह्यमाने गृहे यद्वदग्निर्गत्वा गृहान्तरं ।
तृणादौ यत्र सज्येत[1] तदाकृष्यापनीयते[2] ॥ ७०

एवं चित्तं यदासङ्गाद्दह्यते द्वेषवह्निना ।
तत्क्षणं तत्परित्याज्यं पुण्यात्मोद्दाहशङ्कया ॥ ७१

5 एकस्मिन् गृहे ऽग्निना दह्यमाने यथा तस्माद्गृहादन्यद्गृह गृहान्तरं गत्वा । अग्निर्यत्र तृणकाष्ठादौ सज्यते लगति । तदन्तर्गतमन्यदपि वस्तु मा धाक्षीदिति शङ्कया । तदाकृष्याप- नीयते पृथक्कृत्वा निर्धार्यते । इति दृष्टक्रम प्रकृतेऽपि योज- यन्नाह । एवमुक्तोदाहरणन्यायेन चित्त मनो यस्य वस्तुन 10 आसङ्गादासक्तो दह्यते परितप्यते द्वेषवह्निना प्रतिघानलेन तदासङ्गस्थानं वस्तु तत्क्षण न कालान्तरपरिलम्बेन परित्याज्यं । तत्राभिनिवेश परिहर्तव्यः । किं कारण । पुण्यस्यात्मा शरीर पुण्यस्कन्ध इति यावत् । तस्योक्तक्रमेणोद्दाह परिक्षयो मा भूत् । अन्यथा गृहान्तर्गतपदार्थवत् प्रद्वेषवह्निस्तमपि दहेत् ॥

15 अपि च । लाभ एवाय लब्धो यन्मनुष्यदुःखैर्नरकफल कर्म विपच्यते । इति प्रतिपादयन्नाह ।

मारणीयः करं छित्त्वा मुक्तश्चेत्किमभद्रकं ।
मनुष्यदुःखैर्नरकान्मुक्तश्चेत्किमभद्रकं ॥ ७२

[1] Minaev sajjeta, Ms sahyeta Tib rtsva sogs gin la mched byed- pa — mched pa-byed pa = ausbreiten, weithin verbreiten (Schmidt) — Mched- pa me = eine Feuersbrunst

[2] Minaev tathākṛṣya, but L[2], M tadāk?, Tib de ni phyun ste don' yin — Phyun ba (hbyin) = avakṛṣṭa nirvāsita

यो हि मारणमर्हति स यदि हस्तमात्र छित्त्वा मुच्यते। तदा न[1] का चित्क्षतिरस्य। प्रत्युत लब्धलाभमात्मानं मन्यते। अत्यल्पमिदं मरणदुःखात्करच्छेदनदुःखमिति। तथा योऽपि मनुष्यदुःखं ताड़नबन्धनतिरस्काराादिकृतमनुभूय नरकदुःखा- द्विमुक्तो भवति। तस्यापि न किं चिदपचीयते। न किं 5 चिदिदं दुःख नरकदुःखात्। सुखमेव तत्। ततो यदि विच- [75b]क्षणः स्यात्। तदा सौमनस्यमेवात्र युक्तमस्य॥

अथापि स्यात्। न मया स्वल्पमात्रेऽपि दुःखे क्षमा कर्तुं शक्यत इति। अत्राह।

यद्येतन्मात्रमेवाद्य दुःखं सोढुं न पार्यते। 10
[2]तन्नारकव्यथाहेतुः क्रोधः कस्मान्न वार्यते॥ ७३

[3]खटचपेटलोष्टादिप्रहारकृतमीषन्मात्रमपि दुःखमिदानीं सोढुं मर्षितु न पार्यते न शक्यते। तदत्र भवन्तं पृच्छामः। यद्येवमेव तदयं नारकदुःखप्रवर्तनीयः क्रोध. कोप कस्मात्कार- णान्न वार्यते। अयमेव ह्यतितरां नरकेषु दुःखदायक इति 15 दुःखभीरूणामेव [क्रोध] निवर्तयितु युक्त स्यात्॥

किं च। यद्यपि सोढुं न शक्यते तथापि तद्धेतुककर्म- संभवादनिच्छतोऽपि दुःखमापतयिष्यति भवतः। न च किं चित्फलमुत्पत्स्यते।

---

1 Ms na kiṃ cit

2 Tib des na tasmāt

3 capeta, Apte The palm of the hand with the fingers extended khaṭṭika = the half closed hand,—khaṭa given in P W from Lexx. only

मर्षणात्पुनस्तस्य महार्थलाभो भविष्यतीति वृत्तद्वयेन शिक्षयितुमाह ।

[1]कोपार्थमेवमेवाहं नरकेषु सहस्रशः ।
कारितोऽस्मि[2] न चात्मार्थः परार्थो वा कृतो मया॥ ७४

5 न चेदं तादृशं दुःखं महार्थं च करिष्यति ।
जगद्दुःखहरे दुःखे प्रीतिरेवात्र युज्यते ॥ ७५

कोपनिमित्तमेव । एवमेव निष्फलमेव । नरकेषु संजीवादिषु । सहस्रशः अनेकसहस्रवार । अहं कारितः छेदनभेदनपाटनादिकारणाभिः पीडितः । एवं दुःखमनुभवतापि मया
10 न च नैवात्मार्थो दृष्टादृष्टफलसाधनः कृतो निष्पादितः । परस्यान्यस्य वार्थः सुखविधानलक्षणः । इति निष्प्रयोजनमेव नारकदुःखसहस्रशःपरिभवो जात ।

तदद्यापि न तथैव ममासहिष्णुता युक्तेत्याह । इदं दुःख नैव तादृशं यादृशं नरकसमुद्भव । अथ च महार्थं सर्वसत्त्व-
15 हितसुखविधानभूत बुद्धत्वं साधयिष्यति । अतो जगतो दुःखहरे त्रिजगत्पर्यापन्नसर्वसत्त्वसर्वदुःखप्रशमनकरे दुःखे प्रीतिरेवात्र युज्यते नारुचिरिति भाव. ॥

पर[76 b]गुणश्रवणेर्ष्यामलप्रक्षालनायाह ।

---

[1] Tib bdud pai don du, as if kāmārtham
[2] karita = pidita — Tib myos gyur kyan, kyan points to a reading kārito' pi — myos wrongly for myons? — myo ba = mada
[3] Quoted a 7 IV, 39

यदि प्रीतिसुखं प्राप्तमन्यैः स्तुत्वा गुणोर्जितं[1] ।
मनस्त्वमपि तं स्तुत्वा कस्मादेवं न हृष्यसि ॥ ७६

गुणाधिकं स्तुत्वा यदि प्रीतिसुखं कैश्चित्प्राप्त । तदा हे मनः त्वमपि तद्गुणसंवर्णने[न][2] किमिति हर्षसुख नानुभवसि । किमकाण्डमेव तदीर्ष्यानलज्वालायामात्मसंतानमिन्धनीकरोषि[3] ॥ 5

ननु सर्वसुखमासङ्गात्मतया निषिद्धमेव सेवितुं । ततोऽहं सर्वसुखवैमुख्यादिदमपि नोपाददे । वक्ष्यति हि ।

यत्र यत्र[4] रतिं याति मनः सुखविमोहित ।
तत्तत्सहस्रगुणित दुःख भूत्वोपतिष्ठते ॥ इति[5] ।

आह । 10

इदं च ते हृष्टिसुखं निरवद्यं सुखोदयं ।
न वारितं च गुणिभिः परावर्जनमुत्तमं ॥ ७७

न हि सर्वं हृष्टिसुखमपाकृत[6] । अपि तु यत्सावद्यमकुशलहेतुः । इद च परगुणाश्रय हृष्टिसुखं निरवद्य तव । न चाकुशलहेतुः । अतः सुखोदय सुखस्योदयो ऽस्मादिति कृत्वा । 15 अत एव न वारितं च गुणिभिर्भगवच्छासनविधिज्ञैः । अयमपरो

---

[1] Minaev gunārjitam M L[2] ganorjitam —Ūrjita = adhika of the Commentary

[2] Ms samvarnnena

[3] Ātmasamtāna = ātmabhāva = ātmā, the self in his everlasting evolution

[4] Mss yatra tatra

[5] VIII, 18

[6] Ms °sukham mayā k°, Tib. dgag pa = nisiddha

ऽस्य गुणः । यत्परावर्जनमुत्तमं परगुणेषु प्रीत्या । गुणेष्वेव-
मयममत्सरीति मन्यमाना अन्येऽपि सत्त्वा आवर्जिता भवन्ति ॥
अतो युक्तमेवात्र प्रीतिसुखमुपादातुं ॥

स्यादेतत् । न परगुणेषु ममाक्षमा काचित् । किं तर्हि
5 तावत्तस्यैव सुखमेतदिति मया सोढुमशक्यमिति । अत्राह ।

तस्यैव सुखमित्येवं तवेदं यदि न प्रियं ।
भृतिदानादिविरतेर्दृष्टादृष्टं[1] हतं भवेत् ॥ ७८

तस्यैव स्तुतिकर्तुः सुखमिति । एवमनेनाभिप्रायेण भवतो
यदीदं परगुणस्तुतिप्रतिसमुद्भवं सुखं न प्रियं । तदातिसंकटे
10 पतितो ऽसि । कथं । भृतिदानादिविरतेः । यदपि च भवतः
स्वात्मसुखनिमित्तं स्वभृत्यादिषु भृतिदानं कर्ममूल्यदानं ।
तथोपकारिणि प्रत्युपकारकरणं । इत्यादेर्विरतेर्वैमुख्यात् ।
तदपि न कर्तव्यमेव स्यात्परसुखविद्वेषिण[ा] [70]। यतस्ते-
नापि तस्य सुखमेव सम्पद्यते । ततो दृष्टमैहिकं फलं । अदृष्टं
15 पारलौकिकं । उभयमपि हतं भवेत्परसुखसम्पद्मर्षिणा[2] ॥

किं च । मिथ्योत्तरमेवेदं भवत इति प्रतिपादयन्नाह ।

स्वगुणे कीर्त्यमाने च परसौख्यमपीच्छसि ।
कीर्त्यमाने परगुणे स्वसौख्यमपि नेच्छसि ॥ ७९

---

1 Minaev . . . virate dista? The first line is translated in Tib. gzhan yan de-ltar bde gyur zhes, gal te khyod bde ldi mi ldod . . . anyo' py evam sukham iti yadi tava sukham idam na priyam.

2 Ms. °sampadyam°

यदि कश्चिद्भवतो गुणमुदीरयति । तदा तस्य परस्यानिष्टमपि सौख्यमिच्छसि । अथ परगुणाननुवर्णयति । तदा पुनरीर्ष्याशल्यवितुद्यमानमानसः स्वसौख्यमपि नेच्छसि । आस्तां तावत्परसौख्यमित्यपिशब्दः[1] ।। तस्मात्परसुखसंपद्द्वेष्यैव भवतो । न स्तावकसुखासहिष्णुता ॥ 5

यदुक्तं ।

तस्यैव सुखमित्येव तवेद यदि न प्रियं । इति ।[2]

तत्र विशेषणदूषणमाह ।

बोधिचित्तं समुत्पाद्य सर्वसत्त्वसुखेच्छया ।
स्वयं लब्धसुखेष्वद्य कस्मात्सत्त्वेषु कुप्यसि ॥ ८० 10

इदमतिगर्हितमेव विशेषेण समुत्पादितबोधिचित्तस्य यत्परसुखसंपदसहिष्णुता नाम । यतः सर्वसत्त्वास्त्रैधातुकान्तश्चराः समस्तसुखसंपत्तिसंतर्पिता बुद्धत्वमधिगमय्य मया कर्तव्या इति मनसिकारेण बोधिचित्तमुत्पाद्यते[3] । तदुत्पाद्य कस्मात्सत्त्वेषु कुप्यते । अद्येदानीं । किंभूतेषु प्रमादस्थानेषु स्वचित्तमभिप्रसाद्य 15 स्वयमात्मनैव प्राप्तसुखेषु । इत्यकरणीयमेव तत्परसुखवैमुख्यचित्तं बोधिसत्त्वस्येति भावः ॥

यः पुनरुत्पादितबोधिचित्तो ऽपि परस्य लाभसत्कार-

---

1 Ms parāḥ saukhyam
2 VI, 78
3 Ms utpādayitum

संपत्तिमभिसमीक्ष्य तदीर्ष्याकषायितहृदयस्तेनैव शोकेन दह्यते ।
तस्य परिभाषणार्थमाह ।

त्रैलोक्यपूज्यं बुद्धत्वं सत्त्वानां किल वाञ्छसि ।
सत्कारमित्वरं दृष्ट्वा तेषां किं परिदह्यसे[1] ॥ ८१

अथ वा स्यादेतत् । न खलु मया तत्सुखमेव न मृष्यते ।
किं तर्हि तद्भावितान्यगुणश्रवणाभि[2]संलभमानैः ते[77b]षा-
मुपनामित[3] लाभसत्कारमित्यत्राह । त्रैलोक्येत्यादि ।[4]

त्रयो लोका एव । कामरूपारूप्यधातुलक्षणाः[5] । लोक-
प्रसिद्धा वा स्वर्गादिस्वभावा । त्रैलोक्यं । तत्समुदायो वा ।
तस्य पूजामर्हतीति पूज्यमभ्यर्चनीयं । अनेन सर्वातिशायित्वं
प्रतिपादितं । तथाभूतं बुद्धत्वं सत्त्वानां किल वाञ्छसि । किले-
त्यनेन विपर्ययं दृष्टारुचिं प्रकाशयति । सत्कारमित्युपलक्षणं
लाभमपि । शेषं सुबोधं ।

लाभमभिसंधायाह ।

पुष्णाति यस्त्वया पोष्यं तुभ्यमेव ददाति सः ।
कुटुम्बजीविनं[6] लब्ध्वा न हृष्यसि प्रकुप्यसि ॥ ८२

---

[1] Minaev parivṛjyase, but Tib (gdun par byed) confirms the reading of L², M

[2] çravaṇād abhi° ?

[3] lābhasatkāram na mṛṣyate

[4] It is rather strange that the stanza is introduced by two prefatory sentences

[5] The same reading (ārūpyadhātu) occurs M Vyut 155 (corrected in PW K F

[6] Tib gñen-gyis htsho ba = kuṭumbena jīvan—Cp Pāli.

त्वया पोषणीयं प्रियपुत्रकादिकं त्वदीयं यः पुष्णाति स तुभ्यमेव ददाति । तवैव तेनोपचयः कृतो भवेत् । अतस्त्वत्कुटुम्बजीविनं[1] । त्वदीयं कुटुम्बं जीवयति यस्तं तथाविधं पुरुषं लब्ध्वा प्राप्य प्रहृष्यसि न काक्वा[2] पृच्छति । प्रकुप्यसि न प्रहृष्यसे चेत्यर्थः । तथा प्रकृतेऽपि येन सर्वसत्त्वा आत्मीयत्वेन गृहीतास्तस्य तत्सुखैः सुखमेवोचितमिति ॥ 5

स्यादेतत् । बुद्धत्वमेव त्वया तेषां प्रतिज्ञातं । न तु पुनरन्यसुखमित्याशङ्क्याह ।

स किं नेच्छति सत्त्वानां यस्तेषां बोधिमिच्छति ।

नन्वेतदपि न सम्यक् । यस्मात् । 10

जगदद्य निमन्त्रितं मया सुगतत्वेन सुखेन चान्तरा[3] ।

इति प्रतिज्ञातं । भवतु नामैवं । तथापि यः समुत्पादितबोधिचित्तस्तेषां सत्त्वानां बोधिं बुद्धत्वमिच्छति स किमन्यल्लौकिकलोकोत्तरमर्थजातं नेच्छति । अथ नैवमिष्यते । तदा बोधिचित्तमपि हीयते इत्याह । 15

बोधिचित्तं कुतस्तस्य यो ऽन्यसंपदि कुप्यति ॥ ८६

बोधिचित्तं कुतस्तस्य मिथ्यैव बोधिचित्तप्रतिज्ञस्य । कस्य । यो ऽन्यसंपदि[4] कुप्यति । इतरविभूतौ लाभसत्कारप्रसूतायां ।

---

[1] Ms tam ku?, but Tib khyod kyi

[2] Ms katka or kakvā Tib has zhes zur gyis hdri bao = indirectly (Jaschke) See Apte s voc kaku and infra ad VII, 19

[3] Supra III, 33

[4] Sampad = hbyor ba

इति मर्मचोदना[1] बोधिसत्त्वस्य कुशलकर्मनिवृत्ति[77b]हेतुः ॥ अपि चापरस्य लाभसत्कारसंपद्भावे ऽपि न भवतस्तद्भाव-संभवः । तत्किमकारणमेव तद्विद्वेषिणात्मघाताय यत्नः क्रियते इति प्रतिपादयन्नाह ।

5 यदि तेन न तल्लब्धं स्थितं दानपतेर्गृहे ।
सर्वथापि न तत्ते ऽस्ति दत्तादत्तेन तेन किं ॥ ८४

यदि नाम तेन तवाक्षमाविषयेण सत्त्वेन तद्दीयमानं वस्तु न लब्धं । तथापि स्थितं दानपतेर्गृहे । भवतस्तु किं तस्माज्जातं । सर्वथापि तेन लब्धेन गृहावस्थितेन वा न तद्वस्तु तवास्ति । 10 इति दत्तादत्तेन तेन किं । न किंचित्प्रयोजनं भवतः । अत-स्तत्रोपेक्षैव युक्ता विदुष ॥ किं च । इदमपि तावत्परि-भाव्यतामित्युपदर्शयन्नाह ।

किं वारयतु पुण्यानि प्रसन्नान्[2] स्वगुणानथ ।
लभमानो न गृह्णातु वद केन न कुप्यसि ॥ ८५

15 यो ऽसावतिप्रसन्नैर्दायकदानपतिभिर्लाभसत्कारैः पूज्यते । स किं वारयतु पुण्यानि पूर्वजन्मकृतानि विपाकोन्मुखानि

[1] Tib does not translate *marman* (See Çikṣās Index s voc) codana = gnod byed-pa Query badhana

[2] Minaev has prasannāt, the reading of the Commentary (an), in L[2], M — The Tibetan translation agrees with the Sanskrit bsod nams dan ni dad-pa am / ran-gi-yon tan ci phyir hdor = puṇyāny eva prasannaç ca svaguṇā vā kiṃ tyajyante

यदन्यस्य लाभसत्काराः । उत प्रसन्नान् दायकदानपतीन् वारयतु । अथ स्वगुणान् वारयतु । यानाश्रित्यैषां प्रसादो जातः । मा प्रसादमप्येषां जनयिष्यथेति । अथ वा लभमानोऽपि तेभ्यो न स्वीकरोतु । ब्रूहि केन प्रकारेणाच न भवतोऽपरितोषः स्यात् । तत्र पुण्यादीनां वारयितुमशक्यत्वात् । लभ्यमानाग्रहणेऽपि सर्वथापि न तत्तेऽस्तीत्यादिना बाधकस्योक्तत्वादिति न कश्चित्परितोषकारणमस्ति ॥

अथापि स्यात् । परस्यैव लाभसत्कारसंपत्तिरस्ति न मम । अथ मम नास्ति तदा परस्यापि मा भूदित्येतन्ममाभितुष्टिनिमित्तमित्याशङ्क्याह ।

न केवलं त्वमात्मानं कृतपापं न शोचसि ।
कृतपुण्यैः सह स्पर्धामपरैः[1] कर्तुमिच्छसि ॥ ८६

सुबोधं । यत्किञ्चिद्दुःखं तत्सर्वं पापसमुद्भूतं । अभिलाषविघातोऽपि दुःखं । यदपि पर्येषमाणो न लभते तदपि दुःखमिति[2] वचनात् । [78a] यद्वक्ष्यति ।

अभिलाषविघाताश्च जायन्ते पापकारिणामिति[3] ।

यत्किंचित्सुखं तत्सर्वं पुण्यप्रसूतमिति सुखाभिलाषिणा शुभे कर्मण्युद्योगः करणीयः । यद्वक्ष्यति । पुण्यकारिसुखेच्छा त्वित्यादि[4] ॥ इति कथं कृतपुण्यैः सह स्पर्धा युज्यते । सुकृत-

---

[1] Minaev has aparam, Tib gźan dag daṅ lhan cig = aparaiḥ saha

[2] Ms duḥkham api, Tib zhes

[3] See VII, 41

[4] Cp VII, 42, 43

क्रियायामेव तत्सुखाभिलाषिणां स्पर्धा युक्तेत्यर्थः ॥ अपि चेद-
मपि प्रष्टव्योऽसि ।

जातं चेदप्रियं शत्रोस्त्वत्तुष्ट्या[1] किं पुनर्भवेत् ।

तव शत्रोर्द्वेषविषयस्य त्वदभिलाषमात्रेण अप्रियमनिष्टं
5 जातमुत्पन्नं चेद्यदि । एतावता भवतः किं पुनर्भवेत् । भवतु
तावत्तस्यानिष्ट । अन्यस्य तु भवतु वा मा वा । मम किं
चिदेव तावन्मात्रेण प्रयोजनमिति[2] । पराभिप्रायमाशङ्क्याह ।

त्वदाशंसनमात्रेण न चाहेतुर्भविष्यति[3] ॥ ८७

तवाशंसनमिच्छाभिलाष इति यावत् । तावन्मात्रेण न
10 चाहेतुः । न विद्यते हेतुरस्य । इत्यहेतुरर्थो भविष्यति ॥
अप्रियस्य भवतु नामैवमभ्युपगम्याप्युच्यते ।

अत त्वदिच्छया सिद्धं तद्दुःखे किं सुखं तव ।

यदि नाम तवेच्छया सिद्धं निष्पन्नमप्रियं शत्रोः ।
तथापि तस्य दुःखे समुत्पन्ने किं सुख तव । न किं चित् ।
15 निष्प्रयोजनमिदमभिप्रेतमिति यावत् । नन्विदमेव प्रयोजनं
यत्तद्दुःखे मम संतुष्टिरित्यत आह ।

---

[1] Minaev tvam tuṣṭyā—Tib de la khyod dgar ci zhig yod = to your pleasure = à vos souhaits

[2] "I do not care if anybody else is unhappy or not, if my enemy be unhappy, there is something good in it for me"

[3] Tib de la gnod-pai rgyur mi hgyur tatra na badhāhetuḥ

अथाप्यर्थो भवेदेवमनर्थः को न्वतः[1] परः ॥ ८८

एवमपि परदुःखपरितोषे यद्यर्थः प्रयोजनं भवेत् । तदात[2] परो ऽनर्थः को नु । नुरित्यतिशये । अयमेवानर्थो महानित्यर्थः ॥ कथं पुनरयमनर्थ इत्याह ।

एतद्धि बडिशं घोरं क्लेशबाडिशिकार्पितं । 5
यतो नरकपालास्त्वां क्रीत्वा[3] पक्ष्यन्ति कुम्भिषु ॥ ८९

यस्मादेतदिदमेवंविध परानर्थचित्तं बडिशं घोरं महाभयङ्कर । किम्भूत । क्लेशबाडिशिकार्पित । क्लेशा एव बडिशेन चरन्तीति बाडिशिकास्तैरर्पितमादत्तं[4] । यतः क्लेशबाडि[78b]शिकात् । बाडिशिकादिव मत्स्य । नरकपाला यमपुरुषास्त्वां क्रीत्वा 10
पक्ष्यन्ति पक्ष्यन्ते । क चिन्नीत्वेति पाठः । कुम्भिषु नरकविशेषेषु[5] । तस्मादत्राभिलाष मा कार्षीरिति भावः ॥

यदपि स्तुत्यादिविघाते दुःखमुत्पद्यते तदप्यविवेचयत एवेत्युपदेशयन्नाह ।

स्तुतिर्यशो ऽथ सत्कारो न पुण्याय न चायुषे । 15
न बलार्थं न चारोग्ये[6] न च कायसुखाय मे ॥ ९०

---

[1] Minaev has ko 'ndhatah parah, M has 'rthatah parah (= there is not anartha worse than this artha) According to the Tib anarthah kas tatah parah = de las phun ba an gzhan ci yod

[2] There is in Ms between tadā and tas some little mark of omission or interpunction tadā 'tah (?)

[3] Supported by Tib — M has ksiptvā Comm, varia lectio nītvā

[4] Ms has arpitam dattam

[5] See *Çiksas* 75, 8 note

[6] See *Çiksas* 266, 9 — On arogya see *Majjh N* Index, stanzas

एतावांश्च भवेत्स्वार्थो धीमतः स्वार्थवेदिनः।

पञ्चप्रकार एवार्थः पुरुषार्थत्वेनाभिमतो विदुषां। तद्यथा पुण्य। आयुर्वृद्धिः। बलवृद्धिः। आरोग्यलाभः। कायसुख चेति। न चैतेषु क चिदुपयुज्यन्ते स्तुत्यादयः। इयानेव हि 5 स्वार्थो भवतो[1] भवेत्प्रज्ञावतः स्वार्थवेदिनः। अन्यस्य पुनरन्यथापि भवेत्। इत्यात्मनि परामृशति। जानन्नु यद्यपि स्वार्थं तथापि स्वार्थवेदिनो ऽनुपायत्वात्पृथगुपदर्शितः[2]। धीमत इत्यनेन तदभङ्गतया तदपि कथितं॥ ननु मानसमपि सुखमस्ति। तेनावधारणमयुक्तमित्यत्राह।

10 **मद्यद्यूतादि सेव्यं स्यान्मानसं सुखमिच्छता॥ ९१**

मानस सुखं सौमनस्य। तदिच्छता मद्यं द्यूतं गणिका परदारिक सेवनीय स्यात्। यत्पुनः सद्धर्मादिश्रवणात्सौमनस्यं तत्पुण्यग्रहणेन संगृहीतमित्यदोष.। तस्मात्सौमनस्यहेतुर्भवतोऽपि स्तुत्यादयो बालजनानन्दकारिणो ऽनुपादेया एव। इष्टमपि 15 बालजनोल्लापकारिणः स्तुत्यादय इत्याह।

यशोऽर्थं हारयन्त्यर्थमात्मानं मारयन्त्यपि।

के चिन्मोहपुरुषास्तादृग्गुणात् स्वयमतिसुदूरे वर्तमाना अपि शक्रादिगुणैः स्तूयमाना वन्दिजनैरन्यैश्च प्रोत्फुल्लनयनवदना

---

[1] Such seems to be the old reading, from a second hand bhavan

[2] Ms prthagupa° —Tib has rang gi don çes pa thabs ma yin pa phyir log tu ma bstan te = svārthajñasya anupāyatvān nāthyā na darçitam —But observe that logs su = prthak

यशोऽर्थिनो हस्त्यश्वादिधनं हणवत्तेभ्यः प्रयच्छन्ति। तथा तैरेव गुणैः संभावितात्मानामपि। शक्रवत् शत्रुविजय[79a]समुद्भूतं यशो मम जगति विपुलतां गमिष्यति। इत्यभिनिवेशाद्दुःसहसग्राममारोहणान्मारयन्ति॥ न चात्र परमार्थतः किंचित्प्रयोजनं। अन्यत्र मिथ्याविकल्पात्। इति प्रतिपादयन्नाह। 5

किमक्षराणि भक्ष्याणि[1] मृते कस्य च तत्सुखं॥ ९२

स्तुत्याद्यभिधायकान्यक्षराणि वर्णाः किं भक्ष्याणि चर्वितव्यानि। यशोऽर्थं मृते सति कस्य च तत्सुखं यशःश्रवणसमुत्थं॥ तस्माद्बालक्रीडासमानमेतदित्युपदर्शयन्नाह।

यथा पांशुगृहे भिन्ने रोदित्यार्तरवं शिशुः। 10

यथा कश्चिद्बालो धूलिमयगृहेण परमपरितोषेण परिक्रीडमानः। केन चित्तस्मिन् भग्ने महद्दुःखेन परिगृहीतः परमार्तिपीडित इव मद्गृहं भग्नमिति करुणस्वरं क्रन्दति। सैवोपमात्रापि। इत्याह।

तथा स्तुतियशोहानौ स्वचित्तं प्रतिभाति मे॥ ९३ 15

तथैव स्तुतियशोहानौ विघाते स्वचित्तं[2] दुःखमाविशत्प्रतिभासते विचारयतो मम[।] अत्रापि न वस्तुसता केन चिद्वि-

1 Tib has ci zhig bya = kim aksarāni kartavyam?

2 Tib has byis pa bzhin = bālavat

3 = dravyasata, paramārthasatā. The opposed notion is expressed by such words as saṃvṛtisat, prajñaptisat.

प्रलम्भ इति परामृष्टव्य ॥ पुनरन्यथा विचारेण बालधर्म एवा-
यमिति चतुर्भिः श्लोकैः पर मुखयन्नाह ।

शब्दस्तावदचित्तत्वात्स मां स्तौतीत्यसंभवः[1] ।

शब्दो वर्णात्मको बाह्यार्थतया ऽचित्तो ऽचेतनः । तस्य
5 भावः । तस्मात् । स शब्दो मां स्तौति मदीय वर्णमुदीरयति ।
असंभवो न संभवत्येतत् ॥ तत्कथं सौमनस्यं जायते इत्याह ।

परः किल मयि प्रीत इत्येतत्प्रीतिकारणं[2] ॥ ९४

अन्यः पुरुषश्चेतनात्मकः । किलेति निरर्थकमेतदपौत्य-
रुचिप्रतिपादक । मयि प्रीतोऽभिप्रसन्न इत्येतदभिसंधानं
10 प्रीतिकारण ।

तत्राप्येवमसंबन्धात्केवल शिशुचेष्टित[3] ।

इति संबन्धः । असंबन्धमेव कल्पयन्नाह ।

अन्यच्च मयि वा प्रीत्या किं हि मे परकीयया[4] ।
तस्यैव तत्प्रीतिसुखं भागो नाल्पोऽपि मे ततः ॥ ९५

---

[1] = *Çikṣās* 266, 1, with the reading mām staut̄iti na sambhavaḥ

[2] See *Çikṣās* 266 2 where occurs the reading, confirmed by Tib ity ayam me matibhramaḥ

[3] Infra p 223, l 14

[4] = *Çikṣās* 266 5

यस्मादन्यस्मिन् सत्त्वे मयि [वा][1] प्रीत्या परसंतानवर्तिन्या[2] किमायतं म[79b]म । न किं चित् । कुतः । तस्यैव ततो य एव प्रीतः स्तुतिकर्ता तत्प्रीतिसुखं । नान्यस्य । अतो भागो नाल्पोऽपि ईषदपि मम ततः परसंतानवर्तिनः प्रीतिसुखात् ॥ स्यादेतत् । परसुखेनैव सुखित्वं बोधिसत्त्वानां । तत्किमिति 5 ततो भागो नास्तीति । अत्राह ।

तत्सुखेन सुखित्वं चेत्सर्वत्रैव ममास्तु तत् ।
कस्मादन्यप्रसादेन सुखितेषु न मे सुखं ॥ ९६

यदि परसुखेन सुखित्वं तदा तस्मिन्नन्यत्र[3] प्रसादेन सुखितेऽपि ममास्तु तत्सुखित्वं । किमात्मन्यभिप्रसादेन प्रीते पर- 10 [स्मिन्] प्रीतिः[4] । न त्वन्यस्मिन्प्रसादेन सुखितेषु[5] मम सुखं ॥ तस्माद्वचनमात्रमेवैतत् । न परमार्थ इति दर्शयितुमाह ।

तस्मादहं स्तुतोऽस्मीति[6] प्रीतिरात्मनि जायते ।
[7]तत्राप्येवमसंबन्धात्केवलं शिशुचेष्टितं ॥ ९७

---

1 vā is translated in the Tib.

2 The Buddhists do not, of course, admit the ordinary Indian notion of self (ātman, puruṣa), everything is only the succession (saṃtāna) of its moments (kṣaṇa), and this succession is no real being apart from the kṣaṇas, or links of the saṃtāna (saṃtānin). The parasaṃtāna is the self of the paras, the svasaṃtāna is our ātman or ālayavijñāna.

3 According to Tib. sarvatra.

4 Tib. = kim ātmany abhiprasanne parasmin punaḥ prītiḥ

5 Tib. adds sems can-la (= sattveṣu)

6 M. has stuta iti.—See Commentary.

7 Tib. de yaṅ de ltar mi ḥthad pas = tad apy evam anupapatteḥ.

तदन्यनिमित्ताभावात् । अहं स्तुत इत्येव विकल्पना[त्] प्रीतिरात्मनि जायते । न पुनः परसुखेन सुखित्वात् । तत्रापि न केवलमन्यप्रसादेन सुखिते सति । आत्मन्यपि[1] एवमुक्तक्रमेणा- सबन्धादप्रत्यासत्तेः कारणात्केवलं बालविलसितमेतत् ॥

5 अपि च स्तुत्यादयो ममापचयमेव दधतीत्युपदर्शयन्नाह ।

स्तुत्यादयश्च[2] मे क्षेमं संवेगं नाशयन्त्यमी ।
गुणवत्सु च मात्सर्यं संपत्कोपं च कुर्वते ॥ ९८

अमी स्तुत्यादयो मम क्षेमं कल्याणं । अथ क्षेम कुशल- पक्षपरिपालनं । तथा संवेगं संसारदुःखनिर्वेदनं । नाशयन्ति 10 घ्नन्ति । [4]एतावन्मात्रमेव । किं तु गुणवत्सु च मात्सर्यं । आत्मनि गुणाधिकमानेन परगुणप्रच्छादनात् । तद्गुणासहनतया वा संपदि लाभसत्कारादिस्वभावायां कोपं चामर्षं कुर्वते तेष्वेव । अहमेव गुणाधिको ममैव सर्वा संपत्तिरुचिता नान्ये- षामिति मत्वा ॥ यत एते दोषाः स्तुत्यादिषु संभविनः ।

15 **तस्मात्स्तुत्यादिघाताय मम ये प्रत्युपस्थिताः ।**
अपायपातरक्षार्थं प्रवृत्ता ननु ते मम ॥ ९९[6]

---

[1] tatrāpi = ātmany api

[2] So M, L² has stutyādayas tu, Minaev °dayo na me —Tib has bstod-sogs bdag ni gyen-b ir byed = disturb the mind

[3] See infra VIII, F Eight samvegavatthus, Visuddhim J P T S, 1893 p 93 —samvega = skyo ba.

[4] So Ms —According to Tib na tavan?

[5] P W (K F) has only moghiḥ, but see Madhyamakavṛtti (Bibl Buddh), p 8, n 3

[6] See V, 81

तस्मात्कारणात् । स्तुत्यादिघाताय विरोधा[80a]य ये सत्त्वा मम प्रत्युपस्थिता उद्यताः । अपायपातो नरकादिपतनं ततो रक्षार्थं त्राणार्थं रक्षणनिमित्त प्रवृत्ता उद्युक्ता ननु ते मम । अतः कल्याणमित्राणि ते नापकारिण इति ॥ लाभादिविरोधिनि सर्वथा प्रतिघचित्तमयुक्त मम । इत्युपदर्शयितुमाह ।

मुक्त्यर्थिनश्चायुक्तं मे लाभसत्कारबन्धनं ।
ये मोचयन्ति मां बन्धाद्द्वेषस्तेषु कथं मम ॥ १००

विमुक्तिकामस्य लाभसत्कारौ बन्धनमिव । सङ्गस्थानत्वात् । अयुक्त नोचित मुमुक्षोर्बन्धनं । कल्याणमित्रकृत्यकारिणः शत्रुत्वेनाभिमता विमोचयन्ति वियोजयन्ति मां बन्धात्संसारदुःखलक्षणात् । लाभादिस्वभावाद्वा । द्वेषस्तेषु परमोपकारिषु प्रीतिस्थानेषु कथ मम । न युक्तमित्यभिप्रायः ॥ कथ न युक्तमित्याह ।

दुःखं प्रवेष्टुकामस्य ये कपाटत्वमागताः[1] ।
बुद्धाधिष्ठानत इव द्वेषस्तेषु कथं मम ॥ १०१

लाभसत्काराभिष्वङ्गप्रसङ्गात् । संसारदुःखैर्निर्मोक्तुकामस्य । ये सत्पुरुषविशेषाः कपाटत्वमपद्वारत्वमागता[2] । कुतः । बुद्धानामधिष्ठानतोऽनुभावादिव । द्वेषस्तेषु कथं मम ॥

---

1 kapāta = sgo lphar = board or plank of a door

2 Apadvāra = Seitenthür, Hinterthür (Böhtlingk) = sgo glegs = board or plank of a door.—According to the Commentary, we have to read duḥkhān unmoktukāmasya.—But the first clause (lābhasatkāra), plainly agrees with the traditional text.

कुशलापघातकारिण्यपि द्वेषं निवारयन्नाह ।

पुण्यविघ्नः कृतोऽनेनेत्यत्र कोपो न युज्यते ।
क्षान्त्या समं तपो नास्ति नन्वेतत्तदुपस्थितं[1] ॥ १०२

कुशलविघातः कृतोऽनेन । इत्येव मनसि निधाय अत्र
5 पुण्यविघातकारिणि द्वेषो न युज्यते । कस्मात् । यतः क्षान्त्या
तितिक्षया सम तुल्यं तपः सुकृतं नास्ति सर्वशुभकर्महेतुत्वात् ।
न च क्षान्तिसमं तप इति वचनात्[2] । ननु तदेवेदमयत्नत
एवोपस्थितमुपनतं[3] । पुण्यविघ्नकारिच्छलेन पुण्यहेतुसंनिधेः ॥

तत्र प्रद्वेषे त्वात्मनैव पुण्यविघातः कृतो भवेदित्याह ।

10 **अथाहमात्मदोषेण न करोमि क्षमामिह ।**
मयैवात्र कृतो विघ्नः पुण्यहेतावुपस्थिते ॥ १०३

अथ यद्यात्मन एव दोषेणासहिष्णुतात्मकेन न करोमि
[80b] क्षमां क्षान्तिमिह विघ्नकारिणि । तदा मयैव न पुन-
रन्येन । अत्र पुण्ये । कृतो विघ्नः । कुतः । पुण्यहेतौ पुण्यवि-
15 घातकारित्वेनाभिमते । उपस्थिते संनिहितीभूते । अत्रेत्यस्मिन्
पुण्यहेताविति वा संबध्यते ॥

यदि पुण्यविघातकारी कथमसौ पुण्यहेतुर्यावता एव विघ्न
इत्याह ।

---

1 Minaev has na tv etad

2 See supra VI, 2 (*Dhammapada*, 184)

3 I would take the meaning of the stanza as follows nanu tad eva kṣantitapas tena vighatakāinopanatam —But according to the Commentary tad etat = kṣāntitapas

यो हि येन विना नास्ति यस्मिंश्च सति विद्यते ।
स एव कारणं[1] तस्य स कथं विघ्न उच्यते ॥ १०४

यो भावः कार्याभिमतः। येन कारणाभिमतेन विना नास्ति। तद्व्यतिरेके न भवति। स एव यद्भावेन भवति। नान्यः कारणं जनकस्तस्य कार्याभिमतस्य। तदन्वयव्यतिरेकानुविधानात्। एवं प्रकृतेऽपि स जनक एव कथ तस्य जन्यस्य विघ्न उच्यते। विघातहेतुरभिधीयते। तथाविधेऽपि तथा व्यवहारं कुर्वतो नास्ति विप्रतिपत्तिः॥

उक्तमेवार्थं दृष्टान्तोपदर्शनेन व्यक्त कुर्वन्नाह।

न हि कालोपपन्नेन दानविघ्नः कृतोऽर्थिना ।
न च प्रव्राजके प्राप्ते[2] प्रव्रज्याविघ्न उच्यते ॥ १०५

न यस्मात्कस्य चिद्दानपतेर्दित्साकाल एव सप्राप्तेनार्थिना। याचनकेन[3]। दानविघ्नः कृत इत्युच्यते। यतः स कारणमेव दानस्य। तथा कस्य चित्प्रव्रजितुकामस्य प्रव्राजकसमवधानं। प्रव्रज्या संवरादिग्रहणस्वभावा। न च तस्या[4] विघ्न उच्यते। अपि तु कारणमेव स तस्यास्तमन्तरेण तस्या असभवात्। एवं प्रकृतेऽपि द्रष्टव्यं॥

---

[1] Definition of the karana by the classical notions of anvaya and vyatireka

[2] M has na hi pra° —According to the Commentary pravrajakaprāptih

[3] Yācanaka, in P W from Kāraṇḍavyūha

[4] The Ms by a second hand tasya naiva vighna

अपि च क्षान्तिहेतुरतिदुर्लभ इति तत्समागमे प्रीतिरेव युज्यत इत्युपदर्शयन्नाह ।

सुलभा याचका लोके दुर्लभास्त्वपकारिणः ।

अतिप्रचुरप्राप्तिका याचनका लोके सर्वत्र सर्वेषां दीयमान-
5 ग्रहणाविमुख्यात् । न तु पुनरपकारिणः । अतस्ते दुर्लभाः शत-सहस्रेषु यदि कथं चित्कश्चित्स्याद्वा न वेति । कुतः पुनरेत-देवमित्याह ।

यतो मेऽनपराधस्य न कश्चिदपराध्यति[1] ॥ १०६

यस्मादन [51^b] पराधस्य निवृत्तपरापकारस्य मम निर्नि-
10 मित्तं न कश्चिदेकोऽपि अपराध्यति । नापकरोति । कर्मणि षष्ठी । एवमतिदुर्लभतया परमोपकारित्वाच्चाभिनन्दनीय एवाप-कारीत्याह ।

अश्रमोपार्जितस्तस्माद्गृहे निधिरिवोत्थितः ।
बोधिचर्यासहायत्वात्स्पृहणीयो मम रिपुः ॥ १०७

15 यस्मात्कथं चित्प्राप्यन्ते अपकारिणः । तस्माद्गृहे प्रादुर्भूतो निधिरिव अश्रमन्तरेणैवाधिगतो रिपुरभिलाषणीय एव मया

---

[1] This idea is sometimes insisted upon. It is asked how some people abused the Tathāgata; it is said that the wounding of the Tathāgata, with effusion of blood, is only a scholastic "casus," nobody being able to hurt a thoroughly benevolent Being. See Prof. Bendall's contribution to *Mélanges Kern* and *M. Vyut.* 271 9, quoted in loc.—The legend of Pūrṇa can be quoted as a contrary instance but the power of the ancient karma must not be lost sight of.—Beggars who ask for the blood and flesh of the giver are very difficult to meet with (*Maṇicūḍāvadana*).

स्यात्। बोधिचर्यायां बुद्धत्वसंभारोपार्जने सहकारित्वाच्च॥ एवं-विधे परमपुरुषार्थे साहाय्यं भजमानस्य प्रत्युपकारकरणमेव कृतज्ञतया मम युक्तमित्युपदर्शयन्नाह।

मया चानेन चोपात्तं तस्मादेतत्क्षमाफलं।
एतस्मै प्रथमं देयमेतत्पूर्वा क्षमा यतः॥ १०८ 5

यस्मादसौ तत्र साहाय्य कुर्वन् कारणमेव न विघ्नः तस्मान्मया क्षमामभ्यस्यता। अनेन चापकार कुर्वता इति द्वाभ्यामेवोपार्जितं। एतदिति यस्य साधनाय साहाय्य भजते। क्षमाफलं धर्माधिगमलक्षणं। एतस्मै धर्मसहायाय प्रथममग्रतो दातव्य मया इति प्रणिधातव्य। यथा मैत्रीबलेन बोधिसत्त्वेन 10 प्रणिहित पञ्चकानुद्दिश्य[1]। तत्र कारणमाह। यस्मादेतत्पूर्वा। एष एव पूर्व कारण यस्याः सा तथोक्ता। न ह्यपकारिणमन्तरेणान्यत्क्षान्तिकारणमस्ति॥

युक्तमेवैतद्यदि तेनैवाभिप्रायेणासौ प्रवर्तते। केवलमपकाराशय एवायमित्याशङ्कयन्नाह। 15

क्षमासिद्ध्याशयो नास्य तेन पूज्यो न चेदरिः।
सिद्धिहेतुरचित्तोऽपि सद्धर्मः पूज्यते कथं॥ १०९

क्षमास्य बोधिसत्त्वस्य निष्पद्यतामित्याशयो नास्यापकारोद्यतस्य। तेन कारणेन कुशलहेतुरपि यदि शत्रुः पूजनीयो न

[1] See Kern, *Buddhism* I, p 81

भवति । एवं तर्हि कुशलनिष्पत्तिहेतुर्निरभिप्रायोऽपि सद्धर्मः प्रवचनलक्षणः कथं पूज्यते । सोऽपि तदाशयशून्यत्वात्पूजनीयो न स्यादिति भावः [81b] ॥

अथ सद्धर्मस्य निरभिप्रायतया अपकाराशयोऽपि नास्ति । अस्य पुनस्तद्विपर्ययो दृश्यते इत्याह ।

अपकाराशयोऽस्येति शत्रुर्यदि न पूज्यते ।
अन्यथा मे कथं क्षान्तिर्भिषजीव हितोद्यते ॥११०

अपकार आशयोऽस्य शत्रोः । इत्येवमभिसंधाय शत्रुर्यदि न पूज्यते दानमानैर्न सत्क्रियते । अन्यथेति । अपकारिणि द्वेषचित्तमनिवारयतः कथ मम क्षान्तिः । तदपकारमसहमानस्य प्रत्यपकारं वा कुर्वतो नैव युक्तेत्यर्थः । अन्यत्रापि कथ क्षान्तिः । भिषजीव हितोद्यते । सुवैद्यवद्धितसुखविधायके यत्र प्रेमगौरवमेव सदा द्वेषनिबन्धनस्य गन्धोऽपि[1] न विद्यते ॥ द्वेषचित्तनिवर्तनाच्च क्षान्तिरुच्यते । तस्मादपकारिण्येव प्रतिघचित्तं निवर्तयतः क्षान्तिरिति । एतदेव दर्शयन्नाह ।

तद्दुष्टाशयमेवातः प्रतीत्योत्पद्यते क्षमा ।
स एवातः क्षमाहेतुः पूज्यः सद्धर्मवन्मया ॥ १११

यतो भिषजीव हितोद्यते[2] क्षान्तिर्न युक्ता । अतो ऽस्माद्धेतोः । तस्य दुष्टाशयमेव प्रतीत्य निमित्तीकृत्य समुपजायते

---

1 Ms has gandho but Tib sgra = śabda

2 Ms has °dyate ' kṣānti

क्षमा । न पुनः कस्य चिच्छुभाशयं । अतोऽस्मात् । स एव
यस्याशयं प्रतीत्योत्पद्यते क्षमा क्षमाहेतुः । न तु पुनर्यो वैद्य-
वद्दुष्टाशयः । इति पूज्यः क्षमासिद्ध्याशयरहितोऽपि सद्धर्म-
वदसौ मया ॥ एतदुक्तं भवति । किं ममानेनाशयविचारेण
प्रयोजनं । अभिमतसाध्यसिद्धौ चेदुपयुज्यते । तावतैव ममो- 5
पादेयः स्यात् । विगुणाशयफलं तु तस्यैव यस्यासौ विगुणा-
शयः । मम तु शुभोदयहेतुरेवाय । इति कथमिव पूजनीयो
न भवेदिति । तस्मात्संभारोपयोगिनि हेतौ किं स्वरूप-
निरूपणेन ॥

एतदेव संभारहेतुत्वमस्यागमतः प्रसाधयन्ना[82a]ह । 10

सत्त्वक्षेत्रं जिनक्षेत्रमित्यतो मुनिनोदितं ।
एतानाराध्य बहवः संपत्पारं यतो गताः ॥ ११२

संभारप्रसूतिप्रवृत्तिहेतुत्वात्सत्त्वाः क्षेत्रं[1] । बुद्धा भगवन्तस्तथैव
क्षेत्रं । इत्येव । अतो बुद्धत्वकारणहेतुत्वात् । अनेकप्रकारं[2]
भगवता वर्णितं । कुतः । यतो यस्मादेतान् सत्त्वान् जिनांश्च । 15
आराध्य । आनुकूल्यानुष्ठानेन । बहवो बुद्धत्वमधिगम्य सर्व-
लौकिकलोकोत्तरसर्वसंपत्तिपर्यन्तं प्राप्ताः ॥

स्यादेतत् । यदि नाम सत्त्वा अपि सर्वसंपत्तिहेतवस्तथापि
तथागतैः सह साधारणता न युक्तेति । अत्राह ।

---

[1] See the texts (*Dharmasaṃgītisūtra*) quoted *Çikṣās.* 153, 7, also 155, 4 (siddhim āgatā bahavaḥ) 7 (siddhikṣetra) — On kṣetra, see supra V, 81, *Friendly Epistle*, st. 42 (J P T S, 1886) *Petavatthu* Comm., p. 7

[2] Tib. rnam pa ldis = tena prakāreṇa

सत्त्वेभ्यश्च जिनेभ्यश्च बुद्धधर्मागमे समे[1] ।
जिनेषु गौरवं यद्वन्न सत्त्वेष्विति कः क्रमः ॥ ११३

उभयेभ्योऽपि बुद्धधर्माणां बलवैशारद्यादीनामागमे प्रतिलम्भे तुल्ये अविशिष्टे । उभयमपि [2]तत्प्रति हेतुत्वमविशिष्ट-
5 मिति भावः । अतः साधारणेऽपि हेतुभावे जिनेषु गौरव यद्वत्तद्वन्न सत्त्वेषु । इत्येव कः क्रमः परिपाटिः प्रेक्षावतां । नैव युक्तेत्यर्थ.[3] ॥

ननु च सत्त्वानां रागादिमलैर्हीनाशयत्वात् कारणत्वेऽपि कथ भगवत्समानता युज्यते इत्याशङ्क्याह ।

10 **आशयस्य च माहात्म्यं न स्वतः किं तु कार्यतः ।**
समं च तेन माहात्म्यं सत्त्वानां तेन ते समाः ॥ ११४

यद्यपि भगवतामप[रि]मितपुण्यज्ञानोपजनितमनुत्तरमिह माहात्म्य । तथाप्युपयुक्तोपयोगित्वेन हेतुभावस्य तुल्यत्वात्सम माहात्म्यमुच्यते । तेन हेतुना ते सत्त्वा' समा जिनैस्तुल्या
15 उच्यन्ते इति ॥ नात्र विशेषः क्रियते । यत्र पुनः प्रतिनियतात्मगतो विशेषस्तमुपदर्शयितुमाह ।

---

1 See *Dharmasamgīti*, loco laud —The phraseology of this Sutra is worthy of notice sattvakṣetram bodhisattvasya buddhakṣetram yathā ca buddhakṣetrād buddhadharmānām lābhāgamo bhavati It is strange that Prajñākaramati gives no reference, as he did before, to the Mahāyānasūtras evidently alluded to by his text

2 Ms tampratı.

3 yuktā paripatih

मैत्र्याशयश्च यत्पूज्यः सत्त्वमाहात्म्यमेव तत् ।
बुद्धप्रसादाद्यत्पुण्यं बुद्धमाहात्म्यमेव तत् ॥ ११५[1]

सत्त्वेषु मैत्रचित्तविहारी पुनर्यत्पूज्यते जनैः । तत्तस्यैव मैत्र्याशयस्य प्रत्यात्मगतं माहात्म्यं नान्यस्य । तथा तथागतमालम्ब्य स्वचित्तं प्रसादयतो[2] यत्पुण्यमु[82]त्पद्यते तद्भगवत एव माहात्म्यमसाधारणं । अन्यस्य तथाविधगुणाभावात् ॥ इत्यसाधारणं गुणमभिधाय प्रकृतमुपदर्शयन्नाह । 5

बुद्धधर्मागमांशेन तस्मात्सत्त्वा जिनैः समाः ।
न तु बुद्धैः समाः केचिदनन्तांशैर्गुणार्णवैः ॥ ११६

इदमत्र बीजं समतोपादानं इत्यर्थः । परमार्थतस्तु न 10 बुद्धैर्भगवद्भिः समाः केचित्सत्त्वाः सन्ति । यदि भवेयुस्तथाविधास्तदा तेऽपि बुद्धा एव स्युः । किम्भूतैः । गुणार्णवैः[4] । गुणानामर्णवा गुणरत्नाकराः । अगाधापारत्वात् । तैः । पुनरपि तेषामपरमेव[5] विशेषणमाह । अनन्तांशैः । अनन्तोऽपर्यन्तः । अंश एकदेशोऽपि येषां गुणार्णवानां । ते तथा । तैः ॥ 15

---

[1] = Çikṣās 157 7-8 (maitrı çay ı) Tib has byams sems-ldan = maitrıyāçayavān

[2] Ms has prasādhavato

[3] Ms has wrongly anantāmçau gunasāgaraih—See below

[4] Ms. has tegha and two illegible syllables in margin Our reading from Tib.

[5] Tib points to a reading amça eva deço'pı—The Ms has anga

उक्तमेवार्थं व्यक्तीकुर्वन्नाह ।

गुणसारैकराशीनां गुणोऽणुरपि चेत्क चित् ।
दृश्यते तस्य पूजार्थं त्रैलोक्यमपि न क्षमं ॥ ११७

गुणेषु प्रधानानामेकराशयो ये भगवन्तस्तेषां गुणोऽणुरपि
5 परमाणुमात्रोऽपि गुणकणिकापीति यावत् । यदि क चित्सत्त्व-
विशेषे दृश्यते प्रतीयते । तस्य तद्गुणाधारस्य पूजानिमित्तं
त्रैलोक्यमपि न क्षमं । त्रैलोक्यजातानि रत्नादीनि न प्रति-
रूपाणीति यावत् ॥

यद्येवं कथं तर्हि सत्त्वाराधनमुक्तमित्याह ।

10 **बुद्धधर्मोदयांशस्तु श्रेष्ठः सत्त्वेषु[1] विद्यते ।**
एतदंशानुरूप्येण[2] सत्त्वपूजा कृता भवेत् ॥ ११८

व्याख्यातमेतत्पूर्वं ॥ इतोऽपि सत्त्वाराधनमुचितमित्याह ।

किं च निश्छद्मबन्धूनामप्रमेयोपकारिणां ।
सत्त्वाराधनमुत्सृज्य निष्कृतिः का परा भवेत् ॥ ११९[3]

15 निश्छद्मबन्धूनामकृत्रिमसुहृदां बुद्धानां बोधिसत्त्वानां च ।
अपर्यन्तोपकारिणां । निष्कृतिः[4] तत्कृतापकारस्य[5] निष्क्रयणं । परि-

---

1 So L.[2] —Minaev has sattvasya —Tib sems-can rnams la

2 Minaev °rūpena

3 = Çiksās 155 10 11

4 *Çiksās* has the gloss in margin pratyupakāro buddhānām

5 The Ms has the unusual reading tatkrtā' pakārasya —nihkrti = reparation of the offences made to the Buddhas.

शोधनमिति यावत् । किमपरं भवेत् सत्त्वाराधनमन्तरेण । एतदेव परं निष्क्रयणमित्यर्थः[1] ॥

प्रभुचित्तानुकूलवर्तिन एव भृत्यस्य वाञ्छितं सिध्यतीत्यवगम्य सत्त्वाराधनमेवोपादेयमिति प्रतिपादयन्नाह ।

भिन्दन्ति देहं प्रविशन्त्यवीचीं[2] 5
येषां कृते तत्र कृते कृतं स्यात् ।
महापकारिष्वपि तेन सर्वं
कल्याणमेवाचरणीयमेषु ॥ १२०[3]

करचरणशिरोनयनखमांसानि छित्त्वा छित्वा प्रदत्तानि येषां [83] हितसुखविधानाय । तथावीचीमपि परदुःखदुःखिनो 10
येषां कृते प्रविशन्ति तत्समुद्धरणाय । प्रकृतत्वात् बुद्धा बोधिसत्त्वाः । तत्र तेषु सत्त्वेषु कृते कृत स्यात् । अन्यथा तु कृतमपि न कृतं भवेत् । कृतशब्दोऽयमिह प्रकृताधिकारात् साधुकरणे वर्तते । येनैव तेन परमापकारिष्वपि न चित्तं दूषयितव्यं । किं तु सर्वमनेकप्रकारं कायवाङ्मनोभिर्वा कल्याणमेव हित- 15
सुखमेव विधायितव्यमेषु ॥

उक्तमेव प्रसाधयन्नाह ।

---

1 Ms niṣkrayaṇam

2 Minaev has avīcim See Commentary and Çikṣās

3 The following verses down to the çloka 131 (end of the chapter) occur at Çikṣās 155 14—157 8

स्वयं मम स्वामिन एव तावद्
यदर्थमात्मन्यपि निर्व्यपेक्षाः ।
अहं कथं स्वामिषु तेषु तेषु
करोमि मानं न तु दासभावं ॥ १२१

5 मम स्वामिन एव बुद्धादयः स्वयमेव[1] आत्मनैव तावदिति परामर्शे। यदर्थं येषां निमित्तं। आत्मन्यपि स्वकायजीवितेऽपि। उक्तक्रमेण निरपेक्षा[2] निरभिष्वङ्गास्तृणवत्परित्यजन्ति। तदह पुन। तेषां भृत्यः। तेषु सत्त्वेषु प्रभुपुत्रेष्वत्यन्तप्रियेषु कथ करोमि मानं। किमिति जानन्नेव तान् प्रतिकूलयामि। न 10 तु दासभाव न पुनर्दासीभूयाराधयामि ॥

इतोऽपि च सत्त्वापकारं परित्यज्य तदाराधनमेव कर्तव्यमित्याह।

येषां सुखे यान्ति मुदं मुनीन्द्रा
येषां व्यथायां प्रविशन्ति मन्युं।
15 तत्तोषणात्सर्वमुनीन्द्रतुष्टि-
स्तत्रापकारे ऽपकृतं मुनीनां ॥ १२२

येषां सत्त्वानां प्रियपुत्राणामिव पतरो मुनीन्द्रा बुद्धा भगवन्तः। सुखे कायमनोजन्मनि। मुद षं यान्ति। येषां च

---

[1] Ms has svayam evam a'
[2] = nirvyapekṣā

दुःखे मन्युं प्रविशन्ति । अपरितोषमासादयन्ति । एतच्चानभिमतत्वाद्भगवतामित्यमभिधीयते । न तु वाणीचन्दनकल्याणान्तत् । श्रावकाणामपि प्रतिघानुनयासंभवः[1] । अन्यत्सुबोधं ॥ कथं पुनस्तत्रापकारे मुनीनामपकृतं स्यादित्यत्राह ।

आदीप्तकायस्य यथा समन्तान्
न सर्वकामैरपि सौमनस्यं । 5
सत्त्वव्यथायामपि तद्वदेव
न प्रीत्युपायो ऽस्ति दयामयानां[2] ॥ १२३

समन्तात्सर्वावयवानभिव्याप्य वह्निना प्रज्वलितशरीरस्य यथा पञ्चकामगुणैर्न सौमनस्य । कायिकमपि सुखं नास्ति तस्य 10 प्र[84]ज्वलितत्वादेव दुःखेनाक्रान्तत्वात् । तद्वत्तथैव सत्त्वानां व्यथायां दुःखवेदनायां न प्रीतेः सौमनस्यस्योपायो हेतुरस्ति कृपात्मकानां भगवतां ॥

तस्मादपरिज्ञानेन क्लेशग्रहावेशवशेन वा सत्त्वापकारकर्मणा यदकुशलमुपचितं[3] तदपीदानीमुपसंहारद्वारेण वान्तीकुर्वन्नाह[4] । 15

---

[1] It is difficult to make out the meaning of this clause The Tib so far as I see, gives no help —abhimata is correctly translated by mñes pa —na tu = de ni ste dad-can-ldan lta bu yin te = tac chraddhāvad vad — Of course *na tu* . . *sambhavah*

[2] *Çikṣās* has mahākṛpānām

[3] Query upacitam

[4] Tib. bçags par-bya-ba. — (See gsor-ba) = to confess, to expiate —The reading *vyaktikurvan* seems, on palæographical grounds, inadmissible.

तस्मान्मया यज्जनदुःखदेन[1]
दुःखं कृतं सर्वमहाकृपाणां ।
तदद्य पापं प्रतिदेशयामि
यत्खेदितास्तन्मुनयः[3] क्षमन्तां ॥ १२४

5 यस्मादेवं सत्त्वापकारे मुनीनामपकृतं स्यात्तस्मात् । पाप । अद्येदानीं प्रतिदेशयामि । संवेगबहुलस्तेषामेव महाकृपाणामग्रतः प्रकाशयामि । पुनरेवं सम्प्रजानन्न करिष्यामि । इत्यायत्यां संवरमापद्ये । यदि प्रतिरूपमाचरितं तत्र मे क्षान्तिं कुर्वन्तु । अनुकम्पामुपादाय ॥

10 क्षमयित्वा सांप्रतमाराधनायेत्यादिना तदेकपरायणतामात्मनो दर्शयति ।

आराधनायाद्य तथागतानां
सर्वात्मना दास्यमुपैमि लोके ।
कुर्वन्तु[4] मे मूर्ध्नि पदं जनौघा
15 विघ्नन्तु वा तुष्यतु लोकनाथः ॥ १२५

तथागतानामभिप्रेतसंपादनाय लोके लोकविषये सर्वात्मना कायेन वाचा मनसा वा दासीभावं स्वीकरोमि । ते ऽपि मे

---

[1] *Çikṣās* has sarvamahādayānām
[2] *Çikṣas* has duḥkhanena
[3] *Çikṣas* has te munayaḥ
[4] Minaev has kurvanti —Our reading is supported by L[2] and *Çikṣās*

[ऽ]प्रसादं कुर्वन्तो मस्तके पादं निदधतु । तेषां पादं प्रमुदितचित्तः शिरसा धारयामि । अनेन मयि पूर्वापराधमपास्य जगतां पतिर्भगवान् संतुष्टमानसो भवतु ॥

भगवत्सु च गौरवकारिभिः सत्त्वेष्वनादरो न कर्तव्य इति प्रसाधयन्नाह । 5

आत्मीकृतं सर्वमिदं जगत्तैः
कृपात्मभिर्नैव हि संशयो ऽस्ति[1] ।
दृश्यन्त एते ननु[2] सत्त्वरूपा-
स्त एव नाथाः किमनादरो ऽत्र ॥ १२६

सर्वत्रगधर्मधातुप्रतिवेधात्[3] सर्वसत्त्वसमतापादनपरात्मपरिवर्तनादिना[4] वा । आत्मीकृत स्वीकृत सर्वमिदं जगत् । न कियदेव । तैर्बुद्धैर्भगवद्भिः करुणामयचित्तसतानैः । सुनिश्चितमेवैतत् । अन्यथा बुद्धत्वायोगात् । तस्मात्सत्त्वरूपेण बुद्धा भगवन्त एवैते सत्त्वा दृश्यन्ते[5] । तेन किमनादरो ऽत्र मूढ[94] चेतसां । नैव युक्त इति भावः ॥ 10 15

अनेकार्थत्वादपि सत्त्वाराधनस्य तत्रैव यतितव्यमित्याह ।

---

1 *Çiksas* samçayo'ti ı

2 According to Dev 85 and to the *Çiksas* —M naev has dṛçyantu etena tu

3 Tib omits °traga°

4 See VII. 16

5 (5) The Commentary is obscure 'Nanu buddhāh sattvarūpena dṛçyante ? sattvā eva nathā iti kim sattvesv anādarah" Such I take to be the meaning of the sentence

तथागताराधनमेतदेव
स्वार्थस्य संसाधनमेतदेव ।
लोकस्य दुःखापहमेतदेव
तस्मान्ममास्तु व्रतमेतदेव ॥ १२७

स्वार्थस्य बुद्धत्वसंभारलक्षणस्यैव[1] । लोकस्य दुःखापहं तद्धेतुत्वात्[2] । एतदेवेति । सर्वत्र सत्त्वाराधनमिति योज्यं ॥
आगामिभयदर्शनादपि च परापकारवैमुख्यमेवाभ्यसनीयमित्युदाहरणोपदर्शनेनाह ।

यथैको राजपुरुषः प्रमथ्नाति महाजनं ।
विकर्तुं नैव शक्नोति दीर्घदर्शी[3] महाजनः ॥ १२८

यस्य[4] राज्ञो देशनिव[ा]सिनं[5] तस्यासौ पुरुषो । महाजन नगरनिगमग्रामकर्वटादिवास्तव्य[6] । प्रमथ्नाति विमर्दयति । स चागामिराजदण्डभयदर्शितया महाजनो वचनमात्रेणापि यावद्विकारमुपगन्तुमसमर्थः । तेन ताडितो ऽपि संकुचितवृत्तिरेवास्ति । कस्मात्

यस्मान्नैव स एकाकी तस्य राजबलं बलं ।

---

1 Ms has °laksanasyāsyaiva
2 According to Tib apahati-hetutvāt
3 dīrghadarçin = mig rgyan rin po — rin po = dīrgha — mig rgyan = distance of sight, distance at which a man can be well distinguished from a woman.
4 Ms has tasya —Tib gan gi.
5 Ms yasya
6 Vāstavya = Einwohner (P W.)

नैव स राजपुरुषोऽसहाय एव द्रष्टव्य:। कथं पुनरयमसहायो न भवतीत्याह। तस्येति। राज्ञो बलमेव तस्य बलं तत्पक्षग्रहणात्।

तथा[1] न दुर्बलं कं चिदपराद्धं[2] विमानयेत्॥ १२९

तस्मादल्पशक्तिमपि कृतापराधं नापकुर्यात्। सो ऽपि न 5 यस्मादेकाकी।

यस्मान्नरकपालाश्च कृपावन्तश्च तद्बलं।
तस्मादाराधयेत्सत्त्वान् भृत्यश्चण्डन्टपं यथा॥ १३०[3]

तस्मादाराधयेत्सत्त्वान्। कुत:। यस्मान्नरकपालाश्च तदपकारमिव प्रत्यपकारिणोऽन्व[ा]चरन्त:[4] कृपावन्तश्च जिनादय- 10 स्तत्पक्षपातिनो बलं। कथमिवाराधयेत्। अधृष्यं राजानं सर्वानुवृत्तिकरणानुजीविनो यथा। तथा॥ किं च लोकप्रसिद्धत इदमेवमिहोक्तं। न तु पुन: सत्त्वाप्रसत्तिफलस्य[5] राजापराधफलेन समानता समस्तीत्याह।

कुपित: किं न्टप: कुर्याद्येन स्यान्नरकव्यथा। 15
यत्सत्त्वदौर्मनस्येन कृतेन ह्यनुभूयते॥ १३१

---

[1] So Minaev —M has tasmān , confirmed by the Commentary
[2] So L[2] —Minaev has aparādhyam
[3] According to the Comm the second line must precede the first
[4] Ex conj —MS is illegible
[5] Aprasatti (compound new) = aprasāda

किमिति काका पृच्छति । किं तद्दुःखजातमुत्पादयितुं नृपतिः समर्थो भवेत् । नैवेति भावः । किंभूत । येन दुःखजातेन नारकी वेदनानुभूयते । अतिप्र [94ᵇ][1]

[तुष्टः किं नृपतिर्दद्याद्यद्बुद्धत्वसमं भवेत् ।
यत्सत्त्वसौमनस्येन कृतेन ह्यनुभूयते ॥ १३२
आस्तां भविष्यद्बुद्धत्वं सत्त्वाराधनसंभवं ।
इहैव सौभाग्ययशःसौस्थित्यं किं न पश्यसि॥ १३३
प्रासादिकत्वमारोग्यं प्रामोद्यं चिरजीवितं ।
चक्रवर्तिसुखं स्फीतं क्षमी प्राप्नोति संसरन् ॥ १३४

॥ इति प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां क्षान्तिपारमिता षष्ठः परिच्छेदः ॥][2]

---

1 The *verso* of the leaf 94 begins with the first sentence of the viith Chapter As the Commentary of the verses 132 134 is also wanting in Tibetan, I believe that the aksaras *atipra* must be read *iti pra* [*jñākaramatikṛtāyām*] The translation of the last çlokas occurs in the Mdo XXVI, fol 19*a*, at the end (Text alone, without commentary) Their authenticity, supported by the quotation in *Çikṣās* (p 157), is confirmed by the Chinese translation

2 The Tibetan adds the following colophon Rgya gar-gyi mkhan po paṇḍi ta chen-po su ma ti kī rti i zhal sna nas dan sgra sgyur gyi lo tsa va ā-tsarya mad pa chos gyi dban phyug-gis bsgyur-an zus pa = translated by the Indian Paṇḍita Sumatikīrti and the Lotsava translator (?) Satyadharmeçvara

प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां वीर्यपारमिता सप्तमः परिच्छेदः ।

तदेवं विपक्षप्रतिषेधेन त्रिधा क्षान्तिं प्रतिपाद्य वीर्यं प्रतिपादयितुमाह ।

एवं क्षमो[1] भजेद्वीर्यं वीर्ये बोधिर्यतः स्थिता ।
न हि वीर्यं विना पुण्यं यथा वायुं विनागतिः[2] ॥ १

एवमुक्तक्रमेण क्षमायुक्तः क्षमः ममस्ति[3] क्षान्तिः । भजेद्वीर्यं वीर्यमारभेत । अन्यथा दुःखासहिष्णुतया वीर्यस्य प्रस्रब्धिर्न स्यात् ॥ कस्मात्पुनर्वीर्यमुपादीयत इत्याह । वीर्यं इत्यादि । यस्माद्वीर्ये बुद्धत्वमवस्थितं । तद्धेतुकतया तदायत्तत्वाद्बुद्धत्वस्य । एतदपि कुतः । यस्मान्न वीर्यमन्तरेण पुण्यं पुण्यसंभारोऽस्ति । उपलक्षणमेतत् । ज्ञानमपि द्रष्टव्यं । वीर्यस्योभयहेतुत्वात् । तदनेन वीर्यात्पुण्यज्ञानसंभारौ ताभ्यां च बुद्धत्वमित्युक्तं भवति ॥ वीर्यस्वरूपापरिज्ञानात्पृच्छति ।

---

[1] Minaev has kṣamī, kṣamo, according to M, Paris Mss and a fragment (F) on Palm leave (Bendall, 1899)

[2] Minaev has . vinā gatiḥ, = vinā agatiḥ —Cp Kern, *Lotus* 139 padavim tu vinā 'gatiḥ —Tib rlun med gyo ba med-pa bzhin

[3] So Ms —Tib ran gis goms pai byas pai bzod = svayam abhyastā kṣāntiḥ

किं वीर्यं कुशलोत्साहस्तद्विपक्षः क उच्यते ।
आलस्यं कुत्सितासक्तिर्विषादात्मावमन्यना[1] ॥ २

किमेतद्वीर्यं नाम । अत्राह । कुशलोत्साहः । यो ऽयं कुशलकर्मणि दानादौ श्रुतादौ च समुद्यमः । तद्वीर्यमभिधीयते ।
5 अकुशले तु कौसीद्यमेव[2] । विपक्षेणोपहत वीर्यमनङ्गमेवाभिमतसिद्धय इति तद्विपक्षमपनयनाय दर्शयितुमाह । तद्विपक्ष इत्यादि । तस्य वीर्यस्य विरुद्धो विनाशाय पक्षो विपक्षः क उच्यते । उत्तरमाह । आलस्यमित्यादि । आलस्यं कौसीद्यं । कायमनसोरकर्मण्यता । कुत्सिते जुगुप्सनीये हास्यलास्यादावा-
10 सङ्गः । विषादो विषण्णता । दुःकरे कर्मणि चित्तस्य विनिवृत्तिः । अनध्यवसानमित्यर्थः । तेनात्मनोऽवमन्यनाऽवज्ञा । अयं तद्विपक्षः ॥

तदालस्यनिषेधाय तत्कारणं तावदुपदर्शयितुमाह ।

अव्यापारसुखास्वादनिद्रापाश्रयतृष्णया ।
15 **संसारदुःखानुद्वेगादालस्यमुपजायते ॥ ३**

संसारदुःखानुद्वेगादसंवेगात्[3] । योऽयमव्यापारो निर्व्यापारता । तत्र तेन वा[4] सुखास्वादः सुखाभिरामः । स च निद्रा

---

1 F has kutsitaçaktii , Minaev kutsitāç°

2 Tib dge-ba la mi-spro-ba ni le lo ñid do = kuçale 'nudyamah kausīdyam.—Infra, le-lo ñid = ālasya , sñoms las = kausīdya

3 See VI 21.

4 Tib de la an des bde-ñoms ......

च मि[85a]द्धाक्रमणं । ताभ्यां मिद्धाक्रमणमपाश्रयतृष्णा[1] ।
अवष्टम्भनाभिलाषः । तया । आलस्यमुपजायत इति योजनीयं ॥
यदि वा । संसारदुःखानुद्वेगाद्व्यापारः । क चिदपि कुशल-
कर्मणि न प्रवृत्तिः । तस्मात्सुखास्वादः । ततो निद्रा । तस्या-
श्चापाश्रयतृष्णा । तया ॥ 5

अतः संसारदुःखानुद्वेगनिवर्तनार्थमियमत्र संवेगभावनामुखी-
कर्तव्या । इत्याह ।

क्लेशवागुरिकाघ्रातः[2] प्रविष्टो जन्मवागुरां ।
किमद्यापि न जानासि मृत्योर्वदनमागतः ॥ ४

वागुरिका मत्स्यादिवधिका जालिका उच्यन्ते कैवर्तादयः । 10
क्लेशा एव वागुरिकाः । तैराघ्रात आयत्तीकृतः[3] । कथमिति
चेत् । प्रविष्टो जन्मवागुरां । निकायसभागतोत्पत्तिरेव वागुरि-
काजालं[4] । तत्प्रविष्टः तदन्तर्गत इत्यर्थः । इदमिह तदात्मसात्करणे
कारणं । अद्यापि एतां दशां प्राप्तोऽपि मृत्योर्मुखं प्रविष्टः सन्
किमिति न वेत्सि । जातश्चेन्मरणमवश्यंभावीति भावः ॥ 15

इदमपरं संवेगकारणमाह ।

---

1 middhākramaṇam not translated in Tib

2 Minaev āghātaḥ, M āghrātaḥ—Tib bçor ba (hchor ba = to hunt, to chase), ña gçoi-ba = to fish —āghrāta = * ākrānta (Böhtlingk)

3 Tib dban du byas-pa

4 So Ms —vāgurikā = vāgurā? or rather vāgurika°?

**स्वयूथ्यान्मार्यमाणांस्त्वं[1] क्रमेणैव[2] न पश्यसि ।
तथापि निद्रां यास्येव चण्डालमहिषो यथा ॥ ५**

यूथ वर्गः । तत्रभवा यूथ्याः । ये सह बाल्याद्यवस्थायां क्रीडितहसितादिना विचरित । तान् स्ववर्ग्यान् । चण्डाला-
5 नामवश्यमारणीयमहिषवत् । न पश्यसि ममापीयमवस्थितिः स्यादिति ॥ अवश्यमिह कियत्कालं परिलभ्य मृत्युरागमिष्यति । तेन तावत्कालं सुखानुभवनमेव मम युक्तमित्यत्राह । यदि नामैवं तथापि नावश्यभाविनि मरणे विश्रामो युक्तः ।

**यमेनोद्वीक्ष्यमाणस्य बद्धमार्गस्य सर्वतः ।
10 कथं ते रोचते भोक्तुं कथं निद्रा कथं रतिः ॥ ६**

इति वध्यपुरुषस्येव सर्वतो वध्यघातकैरधिष्ठितस्य वध्यभूमिं नीयमानस्य निःसरणमपश्यत [53b] सुखासिकावलम्बनमनुचितमेव भवतः । तस्मात्सर्वेगतो भावनयानया हेतुनिवर्तनादालस्य-मपास्य कुशलपक्षोत्साहवर्धनमनुष्ठेय ॥

15 अथापि स्यात् । यदि नामावश्यभाविता मृत्योस्तथापि तत्सन्निधानमवगम्यालस्यमपहास्यामि । इत्याशङ्क्याह ।

---

1 Minaev has svayuthān —Beings of the same nikāya (see p 245, l 12)
2 So F —Minaev evam
3 Ms °vasyam°

यावत्संभृतसंभारं मरणं शीघ्रमेष्यति।
संत्यज्यापि तदालस्यमकाले किं करिष्यसि॥ ७

संभृतः सञ्चीकृतः संभारः सामग्री वधाय व्याधिजरालक्षणो येन। यावदिति लोकोक्ति। शीघ्रं त्वरितमभिसनिधानात्। तदा मृत्युमुखान्तर्गतः। असमये। आलस्यं त्यक्त्वापि किं करिष्यसि। न तदा किं चित्प्रयोजनमिति भावः॥ 5

अकालतामेवास्य समर्थयितुं वृत्तत्रयेणाह।

इदं न प्राप्तमारब्धमिदमर्धकृतं स्थितं।
अकस्मान्मृत्युरायातो हा हतोऽस्मीति चिन्तयन्॥ ८
शोकवेगसमुच्छूनसास्रुरक्तेक्षणाननान्। 10
बन्धून् निराशान् संपश्यन्यमदूतमुखानि च॥ ९
स्वपापस्मृतिसंतप्तः शृण्वन्नादांश्च नारकान्।
त्रासोच्चारविलिप्ताङ्गो विह्वलः किं करिष्यसि॥ १०

इदं यदनागते कर्तव्यतया मनसिकृतं तन्न प्राप्तं। इदमारब्धं यत्कार्यमादित एव कर्तुमिष्टं। इदमर्धकृतं स्थितं यत्कियन्निष्पन्नं 15 कियदनिष्पन्नं। इति कार्यपर्यन्तमगतस्यैव अकस्मान्मृत्युरागतो मम। अहो बतातिकष्टं। हतोऽस्मीति विचिन्तयन् विक्लवः किं करिष्यसीत्यनागतेन संबन्धः।

शोकः प्रियविप्रयोगकृतश्चित्तपरितापः। तस्य वेगोऽनिवार्य-

प्रवृत्तिः । तेन समुच्छूनानि समुन्नतानि साश्रूणि सबाष्पाणि रक्तानि ताम्रवर्णानि लोचनानि येष्वाननेषु तानि तथा । तथाभूतानि आननानि मुखानि येषां बन्धूनां ते तथा । तान् संपश्यन् विलोकयन् । तत्र कर्मकाधिकारात्परस्मैपदं दृश्यः[1] ।
5 किंभूतान् । निराशान् । क । प्रत्युज्जीवनं प्रति त्यक्ताशान्[2] । तत्सानाथ्यविकलान् वा ॥ मरणसमयोपस्थितकृतान्तानुचरमुखानि च स[86a]रोषपरुषभ्रकुटीनि संपश्यन् विक्लवः किं करिष्यसि ।

स्वयं कृतपापकर्मस्मरणेन मरणसमये किमित्येवं मया कृतमिति पश्चात्तापेन तापितः । नैतावन्मात्रमेव । किं तु
10 दृष्टवमादांश्च नारकान् । तीव्रकारणानुभवनदुःखनिर्मुक्तान् विक्रोशितशब्दान्नरकसमुद्भूतान् अर्थान्तरकोपाणामेव[3] । तच्छ्रुत्वा ममाप्ययमेवावस्थेति संत्रासेन यः पुरीषोत्सर्गो विट्प्रवृत्तिः तेनोपलिप्तगात्रः । विक्लवः । अनायत्तकायवाक्चित्तप्रचारः । किं करिष्यसि सर्वक्रियासु निवृत्तव्यापारः ।

15 इति मत्वा स्वस्थावस्थायामेव यतितव्यं । इति शिक्षयितुमाह ।

---

1 Ms tatrāk° —This clause is wanting in Tibetan which does not, as a rule, translate 'grammatical observations —*Mahābhāsya* I 3 29, *Vart* 2 Sampaçyan should by I 3 29 be ātmanepadam, if the word were intransitive, because in that rule there is the adhikāra 'akarmaka', but in the clause it is not intransitive, not ātmanepadam (F W Thomas)

2 Tib. gan du zhe-na, slar-gson pai bsam pa dan bral ba am

3 So Ms —Tib ˇdon hba zhig la khro bai sgra bzhin-du = arthāntare kopaçabdam iva,

जीवमत्स्य इवास्मीति युक्तं भयमिहैव ते[1] ।
किं पुनः कृतपापस्य तीव्रान्नरकदुःखतः ॥ ११

जीवन्त एव मत्स्याः क्रमेण भक्षणार्थं प्रायः प्राग्दिक्षिवासिभिरेव जनै रक्ष्यन्ते। जीवनोपलक्षिता मत्स्या जीवमत्स्या इति तेषामेव समयः। शाकपार्थिवादिवन्मध्यपदलोपी[2] समासः। 5
तद्वदहमपि। अद्य श्वो वा नियतमेव मरिष्यामि। इति मनसि कृत्वा युक्त भयमिहैव ते। इहैव सप्रजानदवस्थायामेव तवासन्नप्राप्तमरणस्य मरणतः। कि पुनः कृतपापस्य भवतो भय युक्त न भवति। इत्यध्याहार्यं। अतिदु महानरकदुःखतः ॥
निर्व्यापारसुखास्वादाभिरतमधिकृत्याह। 10

स्पृष्ट उष्णोदकेनापि सुकुमार प्रतप्यसे ।
कृत्वा च नारकं कर्म किमेवं स्वस्थमास्यते ॥ १२

तप्तवारिणापि सस्पृष्टः। सुकुमारेति संबोधन। अतिमृदुशरीरतया सोढुमशक्तोऽस्मि। यद्येवं तदा। कृत्वा चेत्यादि सुबोधं॥
अपरमपि त प्रत्याह। 15

निरुद्यमफलाकाङ्क्षिन् सुकुमार बहुव्यथ ।
मृत्युग्रस्तोऽमराकार[3] हा दुःखित विहन्यसे ॥ १३

सुखहेतूत्पादनाय व्यापारशून्योऽस्मि। अथ च तस्य फलं

---

[1] Minaev has *me* See Comm

[2] Çākapārthiva = çākapriyah pārthivah *Mahābhasya Vārt.* 8 to PĀN 2, 1, 69 (not *Siddh K* as stated in the St Petersburg-Dict)

[3] Minaev °grasto mara°.

सुखमभिलषसि । दुःखा[50b]सहिष्णुरसि । अथ च बहुव्यथोऽसि । सर्वदुःखाकरत्वात् । मृत्युना च वशीकृतोऽसि । अथ चामरणधर्ममात्मानं मन्यसे । एवं च विपर्यस्त चरितमस्य विपश्यन्[1] करुणायमानः सखेदमेनमाह । हा दुःखित विहन्यसे । समोह-
5 बहुलतया कष्टां दशां प्रविष्टोऽसि । आत्मगतमेव वा विमृशति । एवमन्यत्रापि यथासंभवं द्रष्टव्य । निरुद्यमादीनि चामन्त्रितपदानि ॥

निद्रापरतन्त्र प्रत्याह ।

मानुष्यं नावमासाद्य[2] तर दुःखमहानदीं ।
10 **मूढ[3] कालो न निद्राया इयं नौर्दुर्लभा पुनः ॥ १४**

अष्टाक्षणविनिर्मुक्त मनुष्यभावप्रतिलम्भं नावमिवाभ्युदयादिपारगमनाय प्राप्य । तर समस्त दुःखमयीं महानदीं । सर्वदुःखानि पृष्ठीकुरुष्व वीर्यावलम्बनेनेति यावत् । हे मोहपरवश नायं कालो निद्रायाः । यावदियं नौः सन्निहिता । यदि
15 नेदानीमेव यत्नः क्रियते । तदा पुनरियं दुर्गतिगतस्य नौर्दुर्लभा भविष्यति । यदुक्तं । पुनरप्येष समागमः कुत इति[4] ॥

एवमालस्यं निवार्य कुत्सितासक्तिं निवारयन्नाह ।

---

[1] Ms. viparyastaḥ [illegible] caritam asya v[illegible]ḥ —(ḥ=m.)—In margin na ([illegible]syan), sya, corrected to pya by a second hand.—Tib. has mthon nas = dṛṣṭvā
[2] According to P[illegible] āpādya
[3] Minaev mudhak? (typographical error)
[4] Supra, I 4.

मुक्त्वा धर्मरतिं श्रेष्ठामनन्तरतिसंततिं ।
रतिरौद्धत्यहासादौ दुःखहेतौ कथं तव ॥ १५

शुभकर्मणां रतिं श्रेष्ठामुत्तमां । किंभूतां । अनन्तरतिसंततिं । सुगतिपरम्परासंजननादनन्तापर्यवसाना रतिसंततिः सुखप्रवाहो यस्याः सा तथा । अत एव उत्तमेत्युक्तं । तामपहाय रतिरभिरामः । औद्धत्यमुन्नतता कायचित्तयोः क्रीडनशीलतेति यावत् । हासो वागौद्धत्यं । सरभसस्य वाग्विकार इति यावत् । आदिशब्दाद्गीतादिपरिग्रहः । तत्र कथं रतिस्तव । न युक्तेत्यभिप्रायः । किंभूते दुःखहेतौ । नरकादिदुर्गत्युपनयनाद्दुःखस्य [87a] हेतुर्भवति ॥

एवं कुत्सितासक्तिमपि निराकृत्य विषदात्मावमन्यनां वीर्यविपक्षं निराकर्तुं । अपरमपि च तद्विपक्षनिरसनाय प्रतिपादयन्नाह ।

अविषादबलव्यूहतात्पर्यात्मविधेयता ।
परात्मसमता चैव परात्मपरिवर्तनं ॥ १६

विषादविपरीतोऽविषादः । बलानां व्यूहः समूहो वक्ष्यमाणलक्षणः । तात्पर्यं निपुणता । आत्मविधेयता आत्मवशवर्तिता । एताः सर्वाः कृतद्वन्द्वसमासाः । यदि वा । एभिः सहितात्मविधे-

[1] So M.—Minaev has ˚vādau

[2] Tib has dga ba dan bcas pa nag gi — dga ba = mandi, rabhasa = fierce joy

[3] Tib has zlas dbye bar tshig bsdus pa yin no (See Jaschke, s. voc zla bo)—kṛta, untranslated

यता । परात्मसमतापरात्मपरिवर्तने ध्यानपरिच्छेदे[1] वक्ष्यमाणे ।
इदमपि समस्तं कौसीद्यप्रहाणाय वीर्यसमृद्धये प्रभवतीत्युद्देशः ॥

उद्दिष्टमेवार्थं क्रमेण निर्दिशन्नाह ।

नैवावसादः कर्तव्यः कुतो मे बोधिरित्यतः ।

5 कुतो मे बोधिरिति । कथमहं वराकः सम्यक्संबोधिभाजनं ।
बुद्धत्वं हि तीक्ष्णेन्द्रियस्यारब्धवीर्यस्य [2]अपरिमितपुण्यज्ञान-
संभारैरतिदुष्करकर्मानुष्ठानैरनेकैश्च कल्पासंख्येयैः कस्य चित्पुरुष-
विशेषस्य साध्यं भवति । अहं तु न तादृश इति कथं मद्वि-
धानां तथाविधं बुद्धत्वं संभाव्यते । इत्येवमाकारमनसिकाराद-
10 वसादो विषादो न कर्तव्यः । महार्थभ्रंशस्य हेतुत्वात् । यथोक्तं ।
अवसादोऽप्यनर्थ इति[3] ॥ कस्मात् ।

यस्मात्तथागतः सत्यं सत्यवादीदमुक्तवान् ॥ १७

यस्मात्तथागत इदं वक्ष्यमाणं सत्यमवितथमुक्तवान् कथितवान् ।
कथं ज्ञायत इत्याह । सत्यवादीति । ज्ञानक्रियासंभवादविपरी-
15 तवादी । अतः सत्याभिधानहेतुपदमेतत् ॥ किं तत्सत्यमुक्तवान् ।

तेऽप्यासन्दंशमशका मक्षिकाः कृमयस्तथा ।
यैरुत्साहवशात्प्राप्ता दुरापा बोधिरुत्तमा ॥ १८

इत्याह । तेऽपि बुद्धा भगवन्तः पूर्वं शाक्यमुनिरत्नशिखि-
दीपंकरप्रभृतयः संसारसागरावर्तान्तर्गताः [87b] पृथग्जनावस्थायां

[1] = In the eighth chapter
[2] Ms aparamita°
[3] Cp Çikṣās 54, 2

परिभ्रमन्त एवभूता एवासन् बभूवु· । येस्तस्मादबलात् वीर्यो-त्कर्षसामर्थ्यात् सभारान् सभृत्य प्राप्ताधिगता दुरापा दुर्लभ-प्रतिलम्भा बोधिरुत्तमानुत्तरा । आरब्धवीर्यस्य न किं चिद्दु-ष्करमिति भाव· । इद तत्सत्य ॥

अतो मम पुनरतितरां न दुर्लभा बोधिरित्याह । 5

किमुताहं नरो जात्या शक्तो[1] ज्ञातुं हिताहितं ।
सर्वज्ञनीत्यनुत्सर्गाद्बोधिं[2] किं नाप्नुयामहं[3] ॥ १९

कि पुनरह मनुष्यभूतो जन्मना । शक्तो ज्ञातु हिताहित-मिति । इद हितमिदमहितं । शुभमशुभ च कर्मेत्युपदिष्ट । ज्ञातुमवबोद्धु समर्थोऽस्मि । इति विचिन्त्य । सर्वज्ञस्य सर्ववस्तु- 10 तत्त्ववेदिनो नीतिर्नय उपादेयतत्त्वप्रतिपादनं । तस्यानुत्सर्गाद्-परित्यागात् । तस्यादानोपादानसेवनादित्यर्थः । बुद्धत्व नाप्नुया-महं । काक्वा[4] पठनाद् आप्नुयामेवेति ।

एतद्भगवता रत्नमेघे[5] दर्शितं । यथोक्तं । इह बोधिसत्त्वो नेवं चित्तमुत्पादयति । दुष्प्रापा[6] बोधिर्मनुष्यभूतेन सता । 15 इद च मे वीर्य परीत्तं[7] च हीन च । कुसीदो ऽहं । बोधिश्चा-दीप्तशिरश्चैलोपमेन बहून् कल्पान् बहूनि कल्पशतानि [बहूनि]

---

1 Minaev has patyāç
2 Minaev has sarvajñānīty'
3 Minaev has nāpnuyāmy aham
4 See Apte, s. voc. kāku.—Tib. tshig zur-gyis
5 = Çikṣās. 51, 2-10
6 Çikṣ. dusprapā
7 Ms. parītam; Çikṣ. omits hīnam ca

कल्पसहस्राणि समुदाचरता[1] समुदानेतव्या । तस्मादहमुत्सहे ईदृश भारमुद्वोढुं ॥ किं तर्हि बोधिसत्त्वेनैव चित्तमुत्पादयितव्यं । ये ऽपि ते ऽभिसंबुद्धास्तथागता अर्हन्तः सम्यक्संबुद्धाः[2] । ये ऽपि वाभिसंभोत्स्यन्ते । ते ऽप्यीदृशेनैव नयेन । ईदृश्या प्रतिपदा । ईदृशेनैव वीर्येणाभिसंबुद्धाः । यावन्न च ते तथागतभूता एवाभिसंबुद्धाः । अहमपि तथा तथा घटिष्ये । तथा तथा व्यायंस्ये । सर्वसत्त्वसाधारणेन वीर्येण । सर्वसत्त्वारम्बणेन[3] वीर्येण यथाहमप्यनुत्तरां सम्य[५५]क्संबोधिमभिसंभोत्स्य इति ॥

युक्तमेवैतत् । केवलमतिदुष्करकर्मश्रवणादनध्यवसायो निवर्तयितुमशक्य इति विकल्पयन्नाह ।

अथापि हस्तपादादि दातव्यमिति मे भयं।

करचरणशिरःप्रभृतिदानमन्तरेण बुद्धत्वं न प्राप्यत इत्यतिदुष्करकर्मसु प्रवृत्तिभयादुत्साहो निवर्तत एव । इति चेन्मन्यसे स्वचित्तमेवमाह ।

गुरुलाघवमूढत्वं तन्मे स्यादविचारतः ॥ २०

तदेतद्गुरुलाघवमूढत्वमेव मे । अल्पे बहुतरं बहुतरे चाल्पतरमिति मोहवशेनाविचारतो ऽविवेकान्मम स्यान्न तु परमार्थविचारतः ॥ परमार्थविचारेण गुरुलाघवविपर्यास एवायमित्युपदर्शयन्नाह ।

1 samudacaratā, omitted by Q_1
2 Q_1 makes here reference to the Buddhas of the present time
3 Ms. has ārambhaṇena (Sic)

छेत्तव्यश्चास्मि भेत्तव्यो दाह्यः पाट्यो ऽप्यनेकशः[1]।
कल्पकोटीरसंख्येया न च बोधिर्भविष्यति ॥ २१

संसारचारके नियमंस्तथाविधकर्मवशाच्छेत्तव्यश्चास्मि कर-
चरणाद्यङ्गप्रत्यङ्गच्छेदनान्नरकादिषु। तथा भेत्तव्यो ऽस्मि शक्ति-
कुन्तादिभिः। दाह्यो नरकदहनादिना। पाट्यो ज्वलितक्रक- 5
चादिना। अनेकशो ऽनेकवारान्। नरकादिषु कारणामनु-
भवन्नपर्यन्तपथि संसारे। कल्पानां कोटीरसंख्येयाः सख्यातुम-
शक्याः। इत्यकामस्यापि दुःखमपर्यन्तमनेकप्रकारमापतिष्यति।
न च बुद्धत्वसंभाराय तत्सपत्स्यते ॥

इदं संसारापर्यन्ततया दुःख बहुतरं निष्फलं च। बुद्धत्व- 10
प्रसाधकं पुनरल्पतरं सफलं चेत्युपदर्शयन्नाह।

इदं[2] तु मे[3] परिमितं दुःखं संबोधिसाधनं।
नष्टशल्यव्यथापोहे तदुत्पाटनदुःखवत् ॥ २२

यद् बुद्धत्वप्रसाधकं तदिदं दु खं परिमितं मम प्रतिनियत-
कालभावितया। दुःख(प्रशमन)हेतुश्च[4]। तत्तथाभूतं शल्यं। तेन 15
व्यथा। तस्या [अ]पोहो निवृत्तिः। तन्निमित्त तदुद्दासाय।
यावज्जीवं तत्कृतदुःखप्रहाणायेत्यर्थः। तस्य नष्टशल्यस्यो[88b]-

---

1 So M.—Minaev has dāhyaḥ pātyaḥ anekaçaḥ

2 Minaev has etat.—See Comm.

3 So Minaev; M. has etat parimitam duḥkham sambodhisukhasādhanam

4 This is the reading of the Ms., praçamana being written in the margin by a second hand. It cannot be correct, as the Tib. has sdug-bsnal gyi rgyu de de lta-bui gyur-pai zug-rnu des, = duḥkhahetus tat tathābhūtam çalyam tena

त्पाटन । शरीरादुद्धरण । अपकर्षणमिति यावत् । तेन यद्दुःख
प्रतिनियतकालमल्पतरं । दीर्घकालिकदुःखोपशमनिमित्तं । तद्व-
त्सोढुमुचितमिदमपि दुःख ॥

अतो ऽपि समुचितमिदमित्याह ।

5 **सर्वे ऽपि वैद्याः कुर्वन्ति क्रियादुःखैररोगतां ।**
तस्माद्बहूनि दुःखानि हन्तुं सोढव्यमल्पकं ॥ २३

सर्वे ऽपि न केचिदेव । लङ्घनपाचनादिकृतैर्यथेष्टाहार-[1]
विहारप्रतिषेधजनितैश्च क्रियादुःखैः । रोगपीडितानामारोग्य
विदधति । अन्यथा तत्कर्तुमशक्य । यत एव तस्मादति-
10 शयेनाल्पमल्पकं दुःखं सोढव्य । किमर्थं । बहूनि दुःखानि हन्तुं ।
सर्वसत्त्वानामात्मनश्च दीर्घकालिकसर्वदुःखप्रशमनायेत्यर्थः । एवं
तावल्लौकतु युक्त धीमतः ॥ न चेदं युक्तमपि दुःकरं कर्मादि-
कर्मिकस्य[2] प्रथममनुज्ञात भगवतेति दर्शयन्नाह ।

क्रियामिमामप्युचितां वरवैद्यो न दत्तवान् ।

15 क्रियामिमां समनन्तरप्रतिपादितां दुःखोत्पादनीं ।
उचितामपि सेवनीयामपि । वरवैद्यो[3] भगवान् । सर्वथा सर्व-

---

[1] langhana = das Fasten, Hungercur, pācana = Digestivum *Caraka* 1 22, 6 3 St Petersburg Dict

[2] We have tried to ascertain the meaning of the word *ādikarmika* (Bouddhisme, Etudes et Materiaux) Our hypothesis was wrong to a certain extent M Oldenberg has criticised the translation given by Cowell and Neil (Divyavadāna) beginning a wrong action without finishing it (See Buddhistische Studien, p 650) His own translation refers to a special case—The *ādikarmika* is the "débutant," who has taken the samvara, but who is wanting in *abhyāsa* (See *Çiksas*. Index, p 375).

[3] See Kern, Manual, p 47, and *Vyādhisutra*, J R A S., 1903, III.

व्याधिचिकित्सकः । प्रथम न दत्तवान् न कर्तव्यतया प्रति-
पादितवानादिकर्मिकस्य ॥

कथ तर्हि रागादिव्याधीनपनयति । आह ।

मधुरेणोपचारेण चिकित्सति महातुरान् ॥ २४

सुकुमारतरेणोपचारेणोपक्रमेण । यथाक्रम चिकित्सा- 5
प्रणयनेनेत्यर्थः । चिकित्सति रोगमुक्तान् करोति । महातुरान्
दीर्घरोगिणो रागादिमहाव्याधिग्रस्तान् ॥

कः पुनरय मधुरोपचार इत्याह ।

आदौ शाकादिदानेऽपि नियोजयति नायकः ।
तत्करोति क्रमात्पश्चाद्यत्स्वमांसान्यपि त्यजेत् ॥ २५ 10

मात्सर्यमलापनयनार्थं सुखसुखेन[1] सम्भारसवर्धनार्थं च ।
शक्यपरित्यागे शाकसक्तुपिण्डिकादिदानेन प्रथमतर प्र[89a]-
वर्तयति नायको भगवान् । पुनस्तथोपायविशेषेण नियोजन
करोति । तदिति लोकोक्तौ वा । यद्यथा दाता मृदुदाना-
भ्यासक्रमेण अधिमात्राधिमात्रदानाभ्यासप्रकर्षमासादयन् पश्चा- 15
दुत्तरकालमक्लेशेनैव स्वमांसरुधिरादिकमपि प्रसन्न एव
प्रयच्छेत् ॥

कथं पुनरेतदेवमित्याशङ्क्याह ।

यदा शाकेष्विव प्रज्ञा स्वमांसेऽप्युपजायते ।
मांसास्थि त्यजतस्तस्य तदा किं नाम दुःकरं ॥ २६

---

1 Sukhasukhena given in St. Petersburg Dict. from Lexx. only

यस्मिन् काले दानाभ्यासात्परमप्रकर्षगमनात्[1] सर्वथापगत-मात्सर्यतया शाकेष्विव स्वमांसेऽपि निरासङ्गा बुद्धिरुपजायते। तदा स्वमांसादिदानेऽपि नाशक्यानुष्ठानबुद्धिरिति तस्मिन् काले किं नाम दुःकर। नैव किंचिदित्यर्थः ॥

5 अथापि स्यात्। अतिदीर्घकाल परार्थे ससरता तद्दुःखं कथमिव परिहर्तुं शक्यमित्यत्राह।

न दुःखी त्यक्तपापत्वात्पण्डितत्वान्न दुर्मनाः।[2]
मिथ्याकल्पनया चित्ते[3] पापात्काये यतो व्यथा ॥ २७

द्विविधमेव हि दुःखं बाधकमुपजायते कायिक मानसिकं 10 चेति। तदेतद्द्वयमपि बोधिसत्त्वस्य न संभवति। कायवचन-मनोभिः सर्वावद्यविरतेः कायिक दुःखमस्य न जायते। युक्त्यागमाभ्यामुभयनैरात्म्यस्य[4] च निश्चयनान्मानसमपि कुतः। यतो मिथ्याकल्पनया ऽसद्विकल्पेनात्मात्मीयग्रहप्रवृत्तेन भावा-द्यभिनिवेशकृतेन वा चित्ते दुःख। पापात्प्राणातिपातादेः काये। 15 एवं तावद्दुःखहेतुपरिहाराद्दुःखमस्य न जायत इति प्रति-पादितं ॥

इदानीं सुखमेव केवलमस्यास्तीति प्रतिपादयन्नाह।

---

1 Prakarṣagamana, see Supra II 20, *Bodhicaryā* et Index, *Nyāyabindu* 14, 22.

2 L' has na saṃkṛtamanās (sic)

3 L' has vikalpacittena

4 Bāhya°, adhyātmaçūnyatā, or pudgala°, dharma°, to be established by the Sacred Books (āgamas) and by the common pramāṇas (anumāna, yukti

पुण्येन कायः सुखितः[1] पाण्डित्येन मनः सुखि[2]।
तिष्ठन् परार्थं संसारे कृपालुः[3] केन खिद्यते। २८

सुखं जातमस्य कायस्येति सुखितः। सुखं विद्यतेऽस्य मनस इति सुखि। एवमुभयसुखसमन्वागतत्वात् कृपा[89b]वान् परार्थं संसारे संसरन् केन दुःखेन खिद्यते। खेदं मन्यते। 5
यदि वा केन खिद्यते। खेदहेतोरभावान्न केन चिदिति भावः[4]। तत्किमिदमकारणभीरुतया वैमुख्यमुपादीयते॥

स्यादेतत्। दीर्घकालमासेवितभावितबहुलीकृतेन महता पुण्यसंभारेण सम्यक्संबोधिरधिगम्यते। तदत्र मुमुक्षूणां शीघ्र-
कालतया श्रावकयानमेवाश्रयणीयं स्यादित्याशङ्क्याह। 10

क्षपयन् पूर्वपापानि प्रतीच्छन् पुण्यसागरान्।
बोधिचित्तबलादेव[5] श्रावकेभ्योऽपि शीघ्रगः॥ २९

पूर्वकृतानि यानि पापानि तानि बोधिचित्तबलादेव क्षयीणि कुर्वन्। यथोक्तं प्राक्।

युगान्तकालानलवन्महान्ति 15
पापानि यन्निर्दहति क्षणेनेति।[6]

तथा बोधिचित्तबलादेव प्रतीच्छन्नाददानः पुण्यसागरान्। यदुक्तं।

---

1 L² M sukhitaḥ kāyaḥ
2 Minaev has sukhi
3 L² M dayāluḥ
4 See supra VI 106
5 L² °balād eṣa
6 See supra I 14.

अविच्छिन्नाः पुण्यधाराः प्रवर्तन्ते नभःसमा इति ॥[1]

एवंविधोपायबलजवेन महायानमारूढो बोधिसत्त्वः श्राव-
केभ्योऽपि शीघ्रगस्त्वरितगामी ॥

एवं सुखात्सुखं गच्छन् को विषीदेत्सचेतनः ।
5 **बोधिचित्तरथं[2] प्राप्य सर्वखेदश्रमापहं ॥ ३०**

प्रतिपादितमेवार्थं पिण्डीकृत्य दर्शयति । एवमुक्तक्रमेण
सर्वावद्यविरतेः पुराकृतपापक्षयाच्च स्वप्ने ऽपि दुर्गतिगमना-
भावात् । तीव्राभिप्रायेणानेकसुखेनाहर्निशमाकाशधातुव्यापिनः
पुण्यसागरस्याभिवर्धनाच्च सुगतिपरम्परामन्मार्गावतरणबोधिचित्त
10 रथमिवासाद्य । आरुह्येति यावत् । सर्वखेदैः परिक्लेशैः श्रम
आयासः । तमपहन्तीति प्रतिपादितनयेन । सर्वखेदश्रमं वाप-
हन्तीति त । सुखादेकस्मादपरमुत्तरोत्तरमधिकाधिक सुखं
देवमनुष्यसंपत्तिलक्षणं गच्छन्ननुप्राप्नुवन् । को नाम प्रेक्षावान्
विषाद[90a]मापद्येत ॥

15 तदेवमनेकविधविषादनिमित्तप्रतिषेधेनाविषादं प्रतिपाद्य
बलव्यूहं[4] प्रतिपादयितुमाह ।

छन्दस्थामरतिमुक्तिबलं[3] सत्त्वार्थसिद्धये ।
छन्दं दुःखभयात्कुर्यादनुशंसांश्च भावयन् ॥ ३१

---

[1] See supra I 19

[2] See Çikṣās 361 9

[3] Minaev has chandaḥ sthāma ratir muktibalam M chandasthāma'

[4] See VII 16

इदमप्युद्देशवाक्यमेव। छन्द इह कुशलाभिलाषः। स्थाम आरब्धदृढता। रतिः सत्कर्मासक्तिः। मुक्तिरसामर्थ्ये तावत्कालमुत्सर्गः। एतच्चतुरङ्गबलम्। अनेकावयवसमुदायात्मकत्वात्। हस्त्यादिबलवत्। सत्त्वार्थसिद्धये। वीर्यहेतुत्वादस्य वीर्यस्य च सर्वाभिमतसाधनत्वादिति भावः॥ 5

तत्र छन्दबलस्य बहुकरत्वाच्छन्दमित्यादिनास्योत्पत्तिनिमित्तमाह। दुःखभयादिति। अशुभकर्मणो दुःखं जायत इति त्रासाच्छन्दं कुर्यात्। अनुशंसांश्च भावयन्। अनुशंसाः फलद्वारेण गुणविशेषाः। ते चार्थात्कुशलकर्मण एव। तान् भावयन्। शुभकर्मणोऽनेकप्रकारेण मधुरफलोत्पत्तिं पुनः पुनः सचिन्तयन्नित्यर्थः॥ 10

सांप्रतं बलस्य व्यापारमुपदर्शयितुमाह।

एवं विपक्षमुन्मूल्य यतेतोत्साहवृद्धये।
छन्दमानरतित्यागतात्पर्यवशिताबलैः॥ ३२

एवमुक्तप्रबन्धेनेत्यादि। विपक्षमालस्यादि[1]। उन्मूल्य प्रतिपक्षभावनाविधिनापसार्य। वीर्यप्रवर्धनाय यत्नं कुर्यात्। केनोपायेनेत्यादि[2]। मानश्चित्तस्योन्नतिः। अथ स्थामबलस्योपबृंहणम्। स्थामबलमेव वा। तेषां बलैः सामर्थ्यैः। सामर्थ्यपर्यायो ऽत्र बलशब्दः॥ 15

तत्र तावच्छन्दोत्पादनाय प्रथममाह।

[1] See VII 2
[2] Ms ity ādi Ex conj ity āha chandetyādi

अप्रमेया मया दोषा हन्तव्याः स्वपरात्मनोः ।
एकैकस्यापि दोषस्य यत्र कल्पार्णवैः क्षयः ॥ ३३

तत्र दोषक्षयारम्भे लेशोऽपि मम नेक्ष्यते ।
अप्रमेयव्यथाभाज्ये नोरः स्फुटति मे कथं ॥ ३४

5 गुणा मयार्जनीयाश्च बहवः स्वपरात्मनोः ।
तत्रैकैकगुणाभ्यासो भवेत्कल्पार्णवैर्न वा ॥ ३५

गुणलेशेऽपि नाभ्यासो मम जातः कदा चन ।

सर्वसत्त्वानामुपकरणतया ऽऽत्मनश्च समस्तक्लेशप्रहाणाय निः-शेषगुणोत्पादनाय च मया बोधिचित्तमुत्पादितं । तच्च न 10 शिथिलव्यापारसाध्यमित्यवगम्यापि यद्यनार[90b]ब्धवीर्यतया मन्दसमारम्भ एव तिष्ठामि तदा दुर्गतिविनिपातमन्तरेण नान्या गतिरस्ति ममेति विचिन्त्य संवेगमामुखीकुर्वन् छन्द-मुत्पादयेदिति समुदायार्थ. ॥

अवयवार्थस्तूच्यते । अप्रमेयाः प्रमातुमशक्याः । दोषाः 15 काय[वाक्]चित्तसमाश्रिताः । हन्तव्या' प्रहन्तव्याः । स्वपरात्मनोः स्वात्मनः परात्मनश्च । एकैकस्यापीति । आस्तां तावद्बहूनां । यत्र येषु । मन्दवीर्येण कल्पार्णवैरनेकैः कल्पशतसहस्रैः । क्षयः प्रहाण क्रियते ।

तत्र तेषु । दोषक्षयारम्भे दोषप्रहाणोत्साहे । लेशोऽपि 20 स्वल्पमात्रमपि मम नेक्ष्यते न दृश्यते । अतो ऽप्रमेयव्यथाभाज्ये

ऽपरिमितदुःखभाजनस्य मम नोरः स्फुटति हृदय विदीर्यते कथं केन प्रकारेण ॥

गुणा मयेत्यादि सुबोध ॥ इति विचिन्त्य संवेगमुपदर्शयति ।

वृथा नीतं मया जन्म कथं चिल्लब्धमद्भुतं ॥ ३६

वृथा विफलमेव मया जन्माचणविनिर्मुक्त नीतं प्रेरितं । 5
वृथीकृतमिति यावत् । कथ चिल्लब्ध महार्णवयुगच्छिद्रकूर्म-
ग्रीवार्पणवत्[1] । सुचिरेण प्राप्त । अत एवाश्चर्यस्थानत्वादद्भुतं ॥

इतो ऽपि विफलमित्याह ।[2]

न प्राप्तं भगवत्पूजामहोत्सवसुखं मया ।
न कृता शासने[4] कारा[5] दरिद्राशा न पूरिता ॥ ३७ 10
भीतेभ्यो नाभयं दत्तमार्ता न सुखिनः कृताः ।
दुःखाय केवलं मातुर्गतोऽस्मि गर्भशल्यतां ॥ ३८

तथागतानां सत्क्रियाभिर्महोत्सवमतिशयवदभिनन्दनं[6] । तेन सुख सौमनस्य न प्राप्त नाधिगत मया । नापि शासने प्रति-
मास्तूपसङ्घर्मादिसत्कारे विहारारामशयनादिवस्तुप्रदानैश्च कारा 15
पूजा कृता । नापि दरिद्राणां धनहीनानामाशाभिलाषः सर्वोपकरणसंपत्तिसंपादनेन पूरिता ।

---

[1] See supra IV 20 — The meaning of this simile is it is given in the Commentary of that passage (Tibetan only), is known from the Friendly Epistle (Journal Pāli Text 1886), p 18—See Supra p 9 note, and F W Thomas; Candragomin s Epistle to the king Kaniska, Intr (Ind Ant 1903)

[2] Ms has viphalam ityadi

[3] Minaev kṛtāh—M, L^2 krtā

[4] According to L^2 = tathāgataçāsano

[5] According to L^1 = pujā

[6] Utsava, masc only in St Petersburg Dict

नापि भीतेभ्यः सपत्नादिभयसमाकुलितेभ्यो मा भैषीरित्यभयं दत्तं । नापि कायमनोदुःखैरार्ताः पीड़िताम्तदपनी[91a]य सुखिनः कृता इति सर्वैः सत्पुरुषधर्मैर्विरहितत्वादाह । दुःखायेत्यादि सुबोधं ॥

5 कथं पुनरेतां धर्मदशां प्राप्तो भवानित्याह ।

धर्मच्छन्दवियोगेन पौर्विकेन ममाधुना ।
विपत्तिरीदृशी जाता को धर्मे छन्दमुत्सृजेत् ॥ ३९

धर्माभिलाषस्याभावेन प्राक्तनजन्मोपचितेन । ममाधुनास्मिन् जन्मनि विपत्तिरीदृशी जाता । सर्वसामर्थ्यवैकल्यस्वभावा सम-
10 नन्तरकथिता समुत्पन्ना । एवं ज्ञात्वा को धर्मे छन्दमुत्सृजेत् । परित्यजेत् । को नाम नोपाददीत विचक्षण इति भाव ॥

किं पुन कुशलार्थिना छन्दोत्पादने यत्न इत्याशङ्क्य यच्चोक्तं छन्दं दुःखभयात्कुर्यादित्यादि तद्व्यक्तीकर्तुं चाह ।

कुशलानां च सर्वेषां छन्दं मूलं मुनिर्जगौ ।
15 **तस्यापि मूलं सततं विपाकफलभावना ॥ ४०**

न केवलं विपत्तिपरिहारार्थं । शुक्लधर्मोपचयार्थमपि च्छन्दोत्पादने यतितव्यमिति चकारार्थः । सर्वेषामिति न केषांचिदेव । छन्दं मूलं कारणं भगवानुक्तवान् । न तु स्वयमुत्प्रेक्ष्योच्यत इत्यर्थः । तस्यापि च्छन्दस्यापि मूलं सततं सर्वकालं विपाक-
20 फलभावना । शुभाशुभकर्मणो विपाकफलं परलोके इष्टानिष्टप्राप्तिलक्षण । तस्य भावना पुनः पुनरामुखीकरणं ॥

तत्राशुभकर्मणो विपाकफलमुपदर्शयन्नाह ।

दुःखानि दौर्मनस्यानि भयानि विविधानि च ।
अभिलाषविघाताश्च जायन्ते पापकारिणां ॥ ४१

यावन्ति कायिकमानसिकानि नरकादिगतौ दुःखानि विविधानि नानाप्रकाराणि जायन्ते भवन्ति सर्वाणि पापकारिणामेव । भयानि वधबन्धनताडनादिभ्यः । पर्येषमाणस्य लाभविघातेनाभिलाषविघाताश्च ॥ 5

सुकृतकर्मणो विपाकफलमाह ।

मनोरथः शुभकृतां यत्र यत्रैव गच्छति ।
तत्र तत्रैव तत्पुण्यैः फलार्घेणाभिपूज्यते ॥ ४२ 10

दृष्टाशसनविकल्पो मनोरथः । यस्य लोके मनोराज्यमिति [91b] प्रसिद्धिः । शुभकृतां पुण्यकारिणां । यत्र यत्रैवेति वीप्सायां न क्व चिदेव । गच्छति प्रसरति । फलार्घेणेति । अभिवाञ्छितफलोपनामनमेवार्घ इवार्घः पूजा ॥ तेन पुनरशुभस्य फलमाह । 15

पापकारिसुखेच्छा तु यत्र यत्रैव गच्छति ।
तत्र तत्रैव तत्पापैर्दुःखशस्त्रैर्विहन्यते[1] ॥ ४३

सुखेच्छा सुखाभिलाषः । तत्पापैरिति कर्तरि तृतीया । दुःखशस्त्रैरिति करणे । दुःखान्येव शस्त्राणीव तदिच्छाविच्छेदहेतुत्वात् ॥ 20

---

[1] So M, L^{2}—Minaev hanyase

पृथग्जनासाधारणशुभकर्मविपाकफलमसाधारणमाह ।

विपुलसुगन्धिशीतलसरोरुहगर्भगता
मधुरजिनस्वराशनकृतोपचितद्युतयः[1] ।
मुनिकरबोधिताम्बुजविनिर्गतसद्वपुषः
सुगतसुता भवन्ति सुगतस्य पुरः कुशलैः ॥ ४४

प्रतिलब्धमुदितादिभूमयो[2] हि बोधिसत्त्वा अनिष्क्रान्तो मातृकुक्षौ नोत्पद्यन्ते । किं तर्हि सुखावत्यां[3] विशुद्धदलकमल-कोशेषु जायन्ते । तेषां सुखविभूतिमनेन कथयति । विपुलानि विस्तीर्णानि सुगन्धीनि[4] मनोज्ञगन्धानि शीतलानि शीतसुख-स्पर्शानि तानि च सरोरुहाणि पङ्कजानि चेति । तेषां गर्भाणि[5] । सरोरुहगर्भाणां वा विशेषणान्येतानि । तेषु गताः संस्थिताः प्रज्ञोपायमहाकरुणानिर्यातपुण्यज्ञानकललसवलितसंबोधिचित्ताः[6] सुगतसुता भवन्ति कुशलैरिति संबन्धः ।

कथं पुनः पद्मगर्भेषु पुष्टिं लभन्त इत्यत्राह । मधुरेत्यादि । मधुरैः सर्वस्वराङ्गोपेततया परमसौमनस्यकारिभिः सद्धर्म-घोषाशनैराहारैः कृता उपचिता द्युतयो वपूंषि येषां ते तथा ।

---

[1] Minaev has āsani—, M., Dev. 85 °açana?

[2] See *Dharmasaṃgraha* LXIV, LXV and the *Daçabhūmīçvara* (an older redaction entitled *Daçabhūmaka* was found recently by Professor Bendall).

[3] See *Sukhāvatīvyūha* and infra X. 4.—Birth from lotuses, *Çikṣās.* 175. 5 *sqq.*

[4] Ms. sugandhāni, but see VIII. 67 and Pāṇini quoted in loco.

[5] Garbha masc. only (St. Petersburg Dict.)

[6] Comp. infra the *lokottarakaya*.

कथं च ततो निर्यान्तीत्यत आह । मुनिकरेत्यादि । मुनि-करैः परिपाककालमवगम्य तथागतरश्मिभिर्बोधितानि विका-सितानि च तान्यम्बुजानि चेति । ततो विनिर्गतानि निर्याता-[92¹]नि सन्ति लक्षणव्यञ्जनालंकृततया शोभनानि वपूंषि येषां ते तथा । तथाभूताः सन्तः सुगतसुता बोधिसत्त्वा भवन्ति 5 जायन्ते । सुगतस्य पुरः सुखावत्याममिताभस्य भगवतोऽग्रतः । कुशलैरेकान्तशुक्लैः कर्मभिः ॥

तदनेन मातृकुक्षौ समुत्पद्यमानानामेतद्विशेषणविपर्ययेण दुःख वेदितव्यमित्युपदर्शितं भवति । तथा हि तत्र संकटे दुर्गन्धिनि जठरानलसंतप्ते चोत्पन्नस्य मातापितृशुचिसंभूतस्य 10 मातु पीताशितैर्वान्तकल्पैः संवर्धमानस्य गर्भमलपङ्कनिमग्नस्य परिपाककाले कथं चित्कण्ठगतप्राणस्य यन्त्रनिष्पीडितस्येव ततो निर्गमनमिति प्रायेण मनुष्यभूतस्य व्यतिमिश्रकर्मविपाक-फलमुक्तं ॥

एकान्तकृष्णस्य तु विपाकफलमाह । 15

यमपुरुषापनीतसकलच्छविरार्तरवो
हुतवहतापविद्रुतकताम्रनिषिक्ततनुः[1] ।
ज्वलदसिशक्तिघातशतशातितमांसदलः
पतति सुतप्तलोहधरणीष्वशुभैर्बहुशः ॥ ४५

यमपुरुषैः कालदूतैरपनीता विश्लेषिता ज्वलितमुद्गरादि- 20

---

[1] vidrutaka = *vidruta (St. Pet. Dict.) = liquid.

प्रहारैः सकला समस्ता छविश्चर्मप्रभावो[1] वा यस्य स तथा । अतिशयेनार्तः सन् पतति सुतप्तलोहधरणीषु । पुनरपि किंभूतः । तीव्रानलतापेन द्रवीभूतं यत्ताम्रं तेन निषिक्ता स्नापिता तनुः कायो यस्य । अतोऽप्यपनीतसकलच्छविः । ज्वलन्तोऽसयः शक्त-
5 यश्च शस्त्रविशेषाः । तेषां घातशतैरनेकैः प्रहारैः शातितानि विच्छेदितानि मांसदलानि शकलानि यस्य स तथाभूतः सन् पतति । सुष्ठु तप्तासु लोहमयीभूमिषु । अशुभैरकुशलैः कर्मभिः । बहुश इति बहून् वारान् दीर्घकालेन तत्फलस्य परिचयात् ॥

तदेवं शुभाशुभकर्मणोर्विपाकफलं प्रतिपाद्य छन्दबल-
10 मुपसंहरन्नाह ।

तस्मात्कार्यः शुभच्छन्दो भावयित्वैवमादरात् ।

यत [92b] एव शुभाशुभकर्मणोर्मधुरकटुकफलविपाकः[2] । तस्मादेवं परिभाव्य शुभच्छन्द एवादारेणाशुभकर्म विहाय कार्यः ॥

15 सांप्रतं स्थामबलं प्रतिपादयितुमाह ।

वज्रध्वजस्य[3] विधिना मानं त्वारभ्य भावयेत् ॥ ४६

वज्रध्वजसूत्रप्रतिपादितविधानेन मानं पुनः साध्यं कर्मारभ्य भावयेत् । अथ वा आरभ्य भावयेदिति गाढसमारम्भेण भावयेत् । चेतसि स्थिरं कुर्यात् न शिथिलोपक्रमेणेत्यर्थः ॥

---

1 So Ms

2 Supra I. 9, vipākaphala

3 See *Çikṣā.* 22 5 and 278 14 —On the good *māna*, see *Nettipakarana*, p. 87.

आरम्भमेव निश्चयितुमाह।

पूर्वं निरूप्य सामग्रीमारभेन्नारभेत वा।

पूर्वं प्रथमत एव। अभिमतकार्यनिष्पादनाय सामग्रीं कारणसाकल्यं निरूप्य तस्या बलाबलं विचार्य। आरभेत सति बले नारभेत वासति बले। किमेवविचारेण प्रयोजनमिति चेत्। आह। 5

अनारम्भो वरं नाम न त्वारभ्य निवर्तनं॥ ४७

अनारम्भो वरं नाम प्रथमत एव न त्वारभ्य निवर्तनमशक्तत्वे सति॥ ननु किमत्र दूषणं[1] येनैवं नेष्यत इत्याह।

जन्मान्तरेऽपि सोऽभ्यासः पापाद्दुःखं च वर्धते। 10
अन्यच्च कार्यकालं च हीनं तच्च न साधितं॥ ४८

तथा क्रियमाणे ऽन्यस्मिन्नपि जन्मनि सोऽभ्यास इत्यारभ्य निवर्तनं नाम। प्रतिज्ञातमकुर्वतश्च पापं ततो दुःखं वर्धते। अन्यच्च हीनं नष्टं यत्परित्यज्य तदारब्धं। कार्यकालं च हीनं। आरब्धपरित्यक्तकार्यस्य कालो ऽस्य कार्यस्येति[2]। तस्मिन् काले 15 यदन्यत्कार्यं कर्तव्यं तदित्यर्थः। तच्च यदारभ्य परित्यक्तं तदपि न साधितं न निष्पादितं। इति पञ्चप्रकारमत्र दूषणं। तेन नेष्यत इत्यभिप्रायः॥

---

[1] *Nidarçana* erased, *dūṣaṇa* supplied in margin.
[2] Ms. Kālasyeti, in margin *sya*

अथ किमयं मानः सर्वत्र न कर्तव्यो । नेत्याह ।

त्रिषु मानो विधातव्यः कर्मोपक्लेशशक्तिषु ।[1]

केषु त्रिषु । तदाह । कर्मसु उपक्लेशेषु शक्तौ च । तत्रोप-
क्लेशाः क्षुद्रवस्तुकसंज्ञिताः क्रोधोपनाहम्रक्षप्रदाशादयः[2] सप्त
5 [93 a] । पञ्चाशत्[3] क्लेशा[4] एव वा रागादय उपक्लेशा उच्यन्ते ॥
तत्र कर्ममानं व्याख्यातुमाह ।

मय्येवैकेन कर्तव्यमित्येषा कर्ममानिता ॥ ४९

यत्किंचिदनवद्यं कर्मापतितं भवति सत्त्वानां तत्सर्वं मय्ये-
वैकेन कर्तव्यं । नान्यस्यावकाशो[5] दातव्य इत्यर्थः ॥ एतदेव
10 दर्शयन्नाह ।

क्लेशस्वतन्त्रो[6] लोकोऽयं न क्षमः स्वार्थसाधने ।
तस्मान्मय्येषां[7] कर्तव्यं नाशक्तोऽहं यथा जनः ॥ ५०

क्लेशैः परायत्तीकृतः सर्वो ऽयं जनकायः क्वचिदपि स्वार्थ-
साधने समर्थो न भवति । इत्येषां सर्वसुखोत्पादनाय मया

---

1 See *Mahāvastu* II p 279 the dvātriṃçatākāra aryamāna

2 Ms mrakṣa pramadāva d - See the "twenty four minor evil passions" *Dharmasamgraha* LXIX, *Madhyamakavṛtti*, Chapter VI, Kern, *Manual* p 52, *Çikṣās* Index

3 Ms pañcasat

4 *Dharmasamgraha*, LXVII six evil passions, Childers gives a list of ten, see *Madhyamakavṛtti*, loc laud

5 Cp *Çikṣās* 278 b

6 Minaev Kleçāsvatantro

7 So M —Minaev has mayāsya; see the Commentary

बोधिचित्तमुत्पादितं । यत एवं तस्मान्नाशक्तोऽहमीदृशं भार-
मुद्वोढुं यथायं जनः । अतो मयैवैषां सर्वं कर्तव्यं ॥

दीनेऽपि कर्मणि वैमुख्यं नोत्पादयितव्यमित्याह ।

नीचं कर्म करोत्यन्यः कथं मय्यपि तिष्ठति ।

नीचमतिगर्हितं लोके भारोद्वहनादिकं । मय्यपि सर्व- 5
सत्त्वानां दासभूतेऽपि तिष्ठति विद्यमानेऽपि । मत्करणीय कथ-
मन्यः करोति । मयैव कर्तुमुचितमिति भावः ॥ अथाप्रतिरूपं
ममैव तत्कर्मेति चित्तस्योन्नतिं निवारयितुमाह ।

मानाच्चेन्न करोम्येतन्मानो नश्यतु मे वरं ॥ ५१

को ऽमुष्यपुत्र[1] इह च कर्मातिनिहीन । तदयुक्त मम 10
कर्तुमिति मानाद्यदि न करोमि । तदा मानो नश्यतु मे वरं ।
किमनेन मानेन महार्थभ्रंशकारिणा मम न तु नीचकर्म-
प्रवृत्तिः ॥[2]

इति कर्मसु मानमभिधायोपक्लेशेषु मानमुपदर्शयितुमाह ।

मृतं दुण्डुभमासाद्य काकोऽपि गरुडायते । 15
आपदाबाधतेऽल्पापि मनो मे यदि दुर्बलं ॥ ५२

यद्युपक्लेशेषु निहतमानतया दुर्बलवृत्ति मम चित्त स्यात् ।

---

1 Ms. kad mmusya°, but da is deleted and avagraha supplied by a second hand —amusyaputra, in St Pet Dict, from Lexx only = der Sohn eines beruhmten Mannes, der Sohn des und des

2 Kusalo māno yam mānam nissāya mānam pajahāti (Nettip)

तदा आपदापत्तिः । आबाधते आक्रामति[1] [यथा] सापत्तिकं स्यादित्यर्थः । अल्पापि मृदुप्रचारोपक्लेशजनितापि । कथमिवे- त्याह । मृतमपगतप्राणं दुण्डुभं प्राप्य यथा काको ऽपि गरुड- वदाचरति [93] ॥ कुतः पुनरेवमित्याह ।

5 **विषादकृतनिश्चेष्ट आपदः सुकरा ननु ।**
व्युत्थितश्चेष्टमानस्तु महतामपि दुर्जयः ॥ ५३

चित्तोन्नतिविरहिते विषण्णतया मन्दकायचित्तप्रवृत्ता- वालस्योपहते मुषितस्मृतौ । आपदः सुकराः सुलभाः । उत्प- द्यन्त एव स्वल्पापदापि गम्यत्वात् । व्युत्थितः समुन्नतचित्ततया 10 पुनरुत्साहसपन्न चेष्टमानः स्मृतिसंप्रजन्याभ्यामुपक्लेशानामनवकाशं ददानः । महतामपि दुर्जयोऽजय्य स्यात् ॥

तस्माद्दृढेन चित्तेन करोम्यापदमापदः ।
त्रैलोक्यविजिगीषुत्वं हास्यमापज्जितस्य[2] मे ॥ ५४

स्थामबलावलम्बनं निगमयन् दर्शयति । यत एवं तस्मात् । 15 दृढेन चित्तेन मानसंनाहः । आपद एवापदमनर्थं करोमि सर्वथा तदनुप्रवेशं निवारयन्नुन्मूलितसंतानं करोमि । अन्यथा

---

[1] Minaev ākramati

[2] So M , L², Dev 85—Minaev has āvajjitasya me —L1 has the gloss vipattiyā vipattim

त्रिजगद्विजयारम्भो मम हास्यमुपहसनीयमापदा[1] । आपदायत्ततया वराकिकया[2] । जितस्य गमिष्यति ॥ कीदृश मेत]दित्याह[3] ।

मया हि सर्वं जेतव्यमहं जेयो न केन चित् ।
मयैष मानो वोढव्यो जिनसिंहसुतो ह्यहं ॥ ५५

कुतः । यस्माज्जिना एव भगवन्तः सिंहाः सर्वमारमृगै- 5
रनभिगम्यत्वात् । तेषां सुतो ऽहमपि कथमन्यैः पराजितो नाम
[4]नामधेय लप्स्य इति मनसि निधाय मयैष मानो वोढव्यः ।
यथा हि सिंहकिशोरः प्रतिलब्धवैशारद्यः सर्वान्यमृगैरनभिभूत
एव वने विचरति तथा मया दृढेन भवितव्यमित्यर्थ ॥

स्यादेतद्यद्येवं तदा ये ऽपि सपत्नादिविजयाय मानमु- 10
द्वहन्ति तेऽपि मानिनः प्रशस्या[5] कथं न भवेयुरित्यत्राह ।

ये सत्त्वा मानविजिता वराकास्ते न मानिनः ।
मानी शत्रुवशं नैति मानशत्रुवशाश्च ते ॥ ५६

मानविजिता मानेनाभिभूता वराकास्तपस्विनः । ते मानिनो
भवन्त्येव । कुतः । मानी शत्रुवशं नैति न गच्छति । नासौ 15
वैरिजनानुवृत्तिं करोतीत्यर्थः । ये [91[a]] भवताभिमता[6]

---

1 Ms āpadām ā padayattatay ā from a second hand
2 Varākikā, see St.-Pet. Dict.
3 Ms. kidrçamdityāha, m from a second hand —cf. rt = sthāmabala
4 = Buddhasutanāmadheyam
5 M, L[2] = vaçās tu te.
6 Ms. ye ... bhagavata ... bhimata manmas

मानिनस्ते मानशत्रुवशास्तदायत्तप्रवृत्तयः[1] ॥ एतदेव श्लोकद्वयेन समर्थयितुमाह ।

मानेन दुर्गतिं नीता मानुष्येऽपि हतोत्सवाः ।
परपिण्डाशिनो दासा मूर्खा दुर्दर्शनाः कृशाः ॥ ५७
5 **सर्वतः परिभूताश्च मानस्तब्धास्तपस्विनः ।**
तेऽपि चेन्मानिनां मध्ये दीनास्तु वद कीदृशाः ॥ ५८

सप्तविधमानेष्वन्यतमेन मानेन दुर्गतिं नीता नरकादिषु पातिताः । अथ कथं चिन्मनुष्यभावप्रतिलम्भो भवति तेषां । तदा तत्रापि तन्निन्दाफलेन हतोत्सवा निरानन्दा भवन्ति । 10 क्षीनदीनमनस इत्यर्थः । परपिण्डाशिन आहारवैकल्यात्पर-दत्तभिक्षाहारभुजः । दासाः परतन्त्रवृत्तयो भृत्याः । मूर्खाः सदसद्विवेकशून्याः । दुर्दर्शना विरूपात्मभावा अप्रीतिजनकाश्च । कृशा दुर्बलशरीराः सामर्थ्यरहिताश्च । सर्वतः सर्वेभ्योऽकृतापराधा अपि कायवाक्परिभवलाभिनो भवन्ति ॥

15 के पुनरेवं मानस्तब्धास्तपस्विनो[4] मानेन स्तब्धा अनम्राः । तपस्विनो वराकाः । तेऽपि चेत् । एवंभूता अपि यदि मानिनां मध्ये गण्यन्ते तर्हि दीनाः कृपणाः कृपापात्र-मित्यर्थः । पुनरन्ये दीनाः कीदृशा भवन्तीति वद ब्रूहि चोदकमामन्त्रयते ॥

---

1 Ms prabhrtayah

2 So Dev 85 — Minaev has °pindāsino, St.-Pet Dict has piṇḍāça, pindāçaka (*Bettler*) from Lexx only and açin = *weitreichend, dauernd*, only.

3 See *M Vyut* 104 2—31.

4 Ll has the scholion māno rāgādi jetavān ?

यद्येवंविधा मानिनो नोच्यन्ते कीदृशास्तर्हि ते भवन्तीत्याह।

ते मानिनो[1] विजयिनश्च त एव शूरा
ये मानशत्रुविजयाय वहन्ति मानं।
ये तं[2] स्फुरन्तमपि मानरिपुं निहत्य 5
कामं[3] जने जयफलं प्रतिपादयन्ति ॥ ५९

त एव मानिन उच्यन्ते ये बोधिसत्त्वास्तं स्फुरन्तमपि प्रभवन्तमपि मानवैरिणं निहत्य विधूय। कामं यथेष्टमुद्दामेति यावत्। जने लोके सदेवकादिके जयफल प्रकाशयन्ति बुद्धत्वावस्थायां। एतादृश तन्मानशत्रुविजयफलं यादृशमस्मासु दृश्यत 10 इत्यभिप्रायः। त एव विजयिनश्च लब्धविजयाः। त एव शूरास्तेजस्विन इति पदद्वयं यथासंभवं योज्यं [94b] ॥

उपक्लेशेषु मानं प्रतिपाद्य शक्तौ मानमाह।

संक्लेशपक्षमध्यस्थो भवेद्दृप्तः सहस्रशः।

संक्लेशानां पक्षो वर्गः। तस्य मध्ये तिष्ठन् सहस्रगुणेन दृप्ततरो 15 भवेत्। अतिशयवच्छौर्यबलमवलम्बेत। किंभूतः सन्नित्याह।

दुर्योधनः क्लेशगनैः सिंहो मृगगणैरिव ॥ ६०

---

[1] M. has dhīrāḥ
[2] L[1]: ye tam = sattvā mānam
[3] L[1]: kāmam = yatheṣṭam.

दुःखेन योध्यत इति दुर्योधनः । कथं चिदपिं न पराजीयत इत्यर्थः । कथमिव । यथा हि सिंहो मृगराजो मृगकुलमध्ये महातेजोबलसमन्वागतो विहरन् वने सर्वमृगानभिभवति । न च तैरभिभूयत इति । एव बोधिसत्त्वो दुर्योधनो भवेत् ॥

इदमपरमपि निमित्तमुद्भावनीयमित्याह ।

महत्स्वपि हि कृच्छ्रेषु न रसं चक्षुरीक्षते ।
एवं कृच्छ्रमपि प्राप्य न क्लेशवशगो भवेत् ॥ ६१

अतिप्रकर्षवत्स्वपि कृच्छ्रेषु दुःखेषु सत्सु रस मधुरादिकं जिह्वेन्द्रियग्राह्यं न चक्षुरीक्षते न प्रतिपद्यते न विषयीकरोतीत्यर्थः । तस्य[ा]विषयत्वात् । नाविषये प्रवर्तत इति भावः । एवमुक्तरसचक्षुर्न्यायेन कष्टमपि प्राप्य न क्लेशवशं गच्छेत् ॥

इत्युक्तेन प्रबन्धेन स्थामबल विधाय रतिबलमावेदयितुमाह ।

यदेवापद्यते कर्म तत्कर्मव्यसनी भवेत् ।
तत्कर्मशौण्डो ऽतृप्तात्मा क्रीडाफलसुखेप्सुवत्[1] ॥ ६२

कर्म सभारनिबन्धन ध्यानाध्ययनादिलक्षण यदेवापद्यते । क्रमकरणयोगेनापतित भवेत् । तस्मिन्नेव कर्मणि व्यसनीभवेत् । तत्क्रियारसनिमग्नचित्तः । तत्कर्मशौण्डस्तत्प्रवृत्तिलम्पटः । अतृप्तात्मा पुनः पुनरभिलाषयुक्तः । क इव । क्रीडाफलसुखेप्सुवत् । द्यूतादिक्रीडाया यत्फलं सुख तदाप्तुमिच्छुरिव ॥

---

[1] Minaev has sukhaphalepsuvat —See the Commentary

इतोऽपि विचारयता कर्मणि रतिरुत्पादयितव्येत्युपदर्शयन्नाह ।

सुखार्थं क्रियते कर्म तथापि स्यान्न वा सुखं ।
कर्मैव तु सुखं यस्य निष्कर्मा स सुखी कथं ॥ ६३

सर्वैरेव [95a] कर्मफलसुखलिप्सया कर्म क्रियते । अन्यथा 5
तत्र प्रवृत्तिर्न स्यात् । तथाप्येवं चेतसा प्रवृत्तावपि कस्य
चित्कर्मणोऽभिवाञ्छितफलं स्यात् । कस्य चित्पुनर्न स्यात् ।
निष्फलारम्भस्यापि सम्भवात् । तथापि कर्मारम्भात्पुनः फल-
सम्भावनया नैव निवर्तते जनः । यस्य पुनः कर्मैव सुख न तद्-
त्तरमपरसुखाभिलाषः स निष्कर्मा कर्मविरहितः कथं सुखी 1
स्यात् । न कथ चिदित्यर्थः ॥

इदमपि भावयता कर्मण्यभिनिवेष्टव्यमित्याह ।

कामैर्न तृप्तिः[1] संसारे क्षुरधारामधूपमैः ।
पुण्यामृतैः कथं तृप्तिर्विपाकमधुरैः शिवैः ॥ ६४

रूपादिविषयैः । संसार इति ससरति पुनः पुनः । अभू- 15
तैरतृप्तिरनाप्यायनं । किंभूतैः क्षुरधारामधूपमैः । क्षुरधारायां
यन्मधु मधुरसं यदास्वादय्य[2] तृष्णावशाज्जिह्वोच्छेदनोत्तरकाल[3]

---

1 See Commentary . kāman atṛptih
2 Ms āsvādāya
3 Ms tṛṣṇāvaśā jihvā°

दुःखमुपजायते । तेनोपमा उपमानं यादृशं येषां ते । आपात-
मात्रमाधुर्येऽपि परिणतिदुःखेन कटुकरसत्वात्तेषामित्यभिप्रायः ॥
पुण्यान्येवामृतानीव । तैः कथं तृप्तिरस्तु । किं विशिष्टैः ।
विपाकमधुरैरभ्युदयफलसुखहेतुतया परिणामेन मधुररसत्वात् ।
5 परमसुखजनकैः शिवैः कल्याणकारिभिर्नि.श्रेयसावाहकतया ।
अजरामरफलदानपरत्वात्सर्वदुःखनिर्वर्तकैरित्यर्थः । अत एव
पुण्यामृतैरित्यत्र हेतुपदमेतत् ॥

तस्मादित्युपसंहारेण पुनःकर्माभिरामं दृढयन्नाह ।

तस्मात्कर्मावसानेऽपि निमज्जेत्तत्र कर्मणि ।
10 यथा मध्याह्नसंतप्त आदौ प्राप्तसराः करी ॥ ६५

तस्यारब्धस्य कर्मणो ऽवसानेऽपि निमज्जेत् । तदभिनिवेश-
रसनिमग्न एव विमुञ्चेत्[1] । कथमिव । यथा ग्रीष्मसमये मध्यं-
दिनवर्तिनि सूर्ये [90b] सर्वतो जलमलभमानस्य आत[।]प-
तापितो हस्ती परमाभिनिवेशसंयुक्तः[2] । अतिशयत्वदाह्लाद
15 कारिशीतलजलपरिपूरितं ह्रदमासाद्य प्रथमतो निमज्जति ।
तथा । इति समुदायार्थः । प्राप्तं सरो येन स तथा । पश्चा-
त्कर्मधारयः । आदावित्यस्य निमज्जतीत्यनेन संबन्धः ॥

इदानीं रतिबलं व्याख्याय मुक्तिबलं व्याख्यातुमाह ।

बलनाशानुबन्धे तु पुनः कर्तुं परित्यजेत् ।
20 सुसमाप्तं च तन्मुञ्चेदुत्तरोत्तरतृष्णया ॥ ६६

1 So Ms

2 Ms.: abhiniveçarasamyuktaḥ.

आरब्धकर्मनिष्पादने सामर्थ्यचयमात्मनोऽवगम्य । सामर्थ्यप्रतिलम्भे सति पुनः करिष्यामि । इत्यभिप्रायेण तावत्कालं परित्यजेत् मुञ्चेत् । न तावतास्य विक्षेपः स्यात् । अन्यथा तथापि तदपरित्यागेऽनर्थसमावेश एव स्यात् ॥ यदापि सुनिष्पन्नं तदारब्धं कर्म भवेत् । तदापि मोक्तव्यं । अन्यथा स्वरसवाहितयापि तस्मिन् प्रवृत्ते पुनर्व्यापारादिक्षेप एव स्यात् । 5

तस्मादपरापरविशेषाकाङ्क्षया तन्मुञ्चेत्परित्यजेत् । एतेन यदुक्तं प्राक् । पूर्वं समीक्ष्य सामग्रीमित्यादि[1] तस्योत्सर्गस्यायमपवाद उक्तः ॥

तदेवमवान्तरविशेषोपदर्शनेन बलव्यूह सर्वथाभिधाय प्रथमोद्दिष्टप्रतिपादितमपि पुनः छन्दादिगणे[2] कथित तात्पर्यं व्याचक्षाण आह । 10

क्लेशप्रहारान् संरक्षेत्[3] क्लेशांश्च[4] प्रहरेद्दृढं ।
खड्गयुद्धमिवापन्नः शिक्षितेनारिणा सह ॥ ६७

क्लेशानां प्रहारानुपघातान् सरक्षेत् निवारयेत् । यथा तेषां प्रहारो न प्रभवतीत्यर्थः । क्लेशान् पुनः प्रहरेत् निहन्यात् । दृढं गाढप्रहारेण यथा पुनरवकाशं न लभेरन् ॥ अत्र निदर्शनमाह । यथा शिक्षितेन शस्त्रविद्याकौशलसमन्वा[96a]गतेन शत्रुणा 15

[1] See VII 47
[2] See VII 16
[3] So L[2] Minaev has samraksan
[4] So L[2] Minaev has kleçāms tu

यश्च निपुणतरः खड्गेन संग्रामयन्[1] तमभिभवति । न च तेनाभिभूत इति ॥

तथा तत्रेत्यादिना पुनस्तात्पर्यं निश्चययितुमाह ।

तत्र खड्गं यथा भ्रष्टं गृह्णीयात्सभयस्त्वरं[2] ।

5 **स्मृतिखड्गं तथा भ्रष्टं गृह्णीयान्नरकान् स्मरन् ॥ ६८**

तत्र तस्मिन् खड्गयुद्धे यथा खड्गं हस्तात्कथंचिद्विचलितं पुनः संवृत्य गृह्णीयात् । सभयः । मा मामयं छलमनुप्रविश्य शत्रुर्वधीत् । त्वरमिति । शीघ्रमेव न कालप्रतिलम्बेनेति यावत् । तथा तद्वदेव स्मृतिप्रमोषे । स्मृतिरेव खड्ग इव क्लेशशत्रुविज- 10 याय । तं भ्रष्टमपगतं गृह्णीयात् आमुखीकुर्यात् । नरकान् रौरवादीन् स्मरन् । स्खलिते सति तद्दुःखभागितां मनसिकुर्वन् ॥

ननु सूक्ष्मक्लेशसमुदाचारेऽपि का क्षतिः येन तत्रोपेक्षा न क्रियत इत्यत्राह ।

विषं रुधिरमासाद्य प्रसर्पति यथा तनौ ।

15 **तथैव च्छिद्रमासाद्य दोषश्चित्ते प्रसर्पति ॥ ६९**

अणुमात्रस्यापि दोषस्यावकाशो न दातव्यः । अन्यथा तन्मात्रस्याप्यनुप्रवेशे चित्ते तत्प्रसरावरोधस्य कर्तुमशक्यत्वात् । यथा हि स्वल्पव्रणेऽपि रुधिरसंपर्कवतो विषस्य शरीरे । तस्मा- दणुमात्रक्लेशप्रहारनिवारणेऽपि तात्पर्यं कुर्यात् ॥

20 पुनरन्यथा तात्पर्यं दृढीकुर्वन्नाह ।

---

[1] In St. Pet.-Dict. from Lexx. only.

[2] Minaev gṛhṇīyād bhayasatvaram.

तैलपात्रधरो यद्वदसिहस्तैरधिष्ठितः ।
स्खलिते मरणत्रासात्तत्परः स्यात्तथा व्रती ॥ ७०[1]

यथा कश्चित्पुरुषश्चण्डनृपाज्ञया तैलपरिपूर्णपात्रमादाय पिच्छलसङ्क्रमेणासिहस्तै राजपुरुषै । बिन्दुमात्रतैलभ्रंशेऽप्यत्रैव त्वां प्राणैर्वियोज[यि]ष्याम इति ब्रुवाणैरधिष्ठितो गच्छन् यदि ममात्र कथ चित्स्खलित स्यात्तदा नूनममी मां व्यापादयेयु-
रिति मरणभयात्तत्परो भवति । तथा व्रती गृहीतसंवरः प्रकृतस्खलिते नरकादिदुःखत्रासात्तदनवकाशाय तत्परः स्यात् यत्नवान् भवेत् ॥ उक्तमु[96]पसंहृत्य दर्शयन्नाह ।

तस्मादुत्सङ्गगे सर्पे यथोत्तिष्ठति सत्वरं ।
निद्रालस्यागमे तद्वत्प्रतिकुर्वीत सत्वरं ॥ ७१

यत एवं तस्मादुत्सङ्गगे क्रोडगते सर्पे आशीविषे यथा त्वरितमेवोत्तिष्ठति । मा मामयमहिर्दंक्षीत् । तथैव निद्रा-
लस्यागमे मिद्धस्त्यानप्रादुर्भावे प्रतिकुर्वीत तत्प्रतिपक्षानित्य-
तादिभावनया प्रतीकारं कुर्यात् ॥

अस्य चैव यत्नवतोऽपि कथं[चित्] किं चित्स्खलितं शूर-
स्खलितन्यायेन स्यात् । तदा प्रतीकारं कृत्वा पुनर्यत्नवान् भवेत् । इत्युपदर्शयन्नाह ।

[1] See Çikṣas. 356 19

एकैकस्मिंश्छले सुष्ठु परितप्य विचिन्तयेत्।
कथं करोमि येनेदं पुनर्मे न भवेदिति॥ ७२

स्मृतिप्रमोषे सत्येकैकस्मिन् प्रत्येकं छले स्खलिते कथं चित्क्लेशानामनुप्रवेशे सति। परितप्याध्याशयेन मनस्तापं कृत्वा
5 विचिन्तयेत्। अहो बत जानन्नेव स्खलितोऽस्मि। तत्केन प्रकारेणात्र प्रतिविधानं करोमि येन पुनरिदं छलं न स्यात्। इत्येव दृढसमारम्भं समादाय विहरेत्। न तु पुनः शिथिलः स्यादिति भावः॥

अत एव विवेककामानां प्रतिषिद्धमप्यनुजानन्नाह।

10 संसर्गं कर्म वा[1] प्राप्तमिच्छेदेतेन हेतुना।

आचार्योपाध्यायतदन्यसब्रह्मचारिप्रभृतिभिः। बहुश्रुतैस्त्रिपिटकवेदिभिः कौकृत्यविनोदनकुशलैः सह संसर्गं समवधानमिच्छेदाशंसेत्। तन्निःश्रित एव तिष्ठेदित्यभिप्रायः। कर्म वा प्राप्तं। तदववादानुशासनीलक्षणं। आपत्तिसमुद्धरणं। तैर्दण्ड-
15 कर्मप्रणयनं वा समुत्पन्नमिच्छेत्। एतेन हेतुना तेषामवतारसरक्षणाभिप्रायेण। एतदेवाह।

कथं नामास्ववस्थासु स्मृत्यभ्यासो भवेदिति॥ ७३

केन विधिना नाम आस्ववस्थासु क्लेशावतारदशासु स्मृत्य-

---

[1] So L[2] M.—Minaev has prāptum

भ्यासो भवेत्। अयत्नत एवालम्बना[97a]त्संप्रमोषो[1] न स्यात्। इत्यनेनाभिप्रायेण। अथ समुदायार्थः। कल्याणमित्रसंनिधाना-त्तदववादानुशासनीतस्तदाचारसदर्शनाच्च सदा स्मृतिसंप्रजन्य-विहारिणः क्लेशा नावतारं लभन्ते। ततोऽस्याविरोधत एवोत्साहो वर्धत इति युक्तं। 5

सदा कल्याणमित्रं च जीवितार्थेऽपि न त्यजेत्। इति।[2]

तथा।

उपाध्यायानुशासिन्या भीत्याप्यादारकारिणां।

धन्यानां गुरुसंवासात्सुकरं जायते स्मृतिः॥ इति।[3]

अधुना तात्पर्यमुपदर्श्यात्मविधेयतामुपदर्शयितुमाह[4]। 10

लघुं कुर्यात्तथात्मानमप्रमादकथां स्मरन्।
कर्मागमाद्यथा पूर्वं सज्जः सर्वत्र वर्तते॥ ७४

सर्वकर्मस्वात्मानं[5] कायवाक्चित्तलक्षणं तथा कुर्यादुत्साहा-भ्यासादायत्तिं नयेदित्यर्थः। यथा कर्मागमात्कर्मारम्भात्पूर्वं प्रागेव सज्ज आयत्तीकृतः सुदान्ताश्ववत् तन्मार्गनिरीक्षणासीन 15 इव कर्मणि प्रवर्तते॥

उक्तमेवार्थमुदाहरणेन व्यक्तीकुर्वन्नाह।

---

1 Ms. alambana sampramoṣo
2 Supra V 102
3 Supra V 30
4 See VII 16.
5 Ms kāyacittasyakṣaṇam

यथैव तूलकं वायोर्गमनागमने वशं।
तथोत्साहवशं यायादृद्धिश्चैवं समृध्यति ॥ ७५

तूलकं कर्पासादिसमुद्भूत यथा वायोर्गमने चागमने च वशमायत्तं। तथा तद्वदेव उत्साहवश यायात् वीर्यवशवर्ती 5 भवेत। एवमभ्यासपरायणस्य ऋद्धिश्चाकाशगमनादिलक्षणा समृध्यति संपद्यते ॥

परात्मसमतापरात्मपरिवर्तने पुनरुभयत्राप्युपयुक्ते[1] इति ध्यानपरिच्छेद एव व्याख्येये ॥

इति प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां वीर्यपारमितापरिच्छेदः[2] समाप्त. ॥

---

[1] ubhayatra = dhyāne vīrye ca

[2] Tib (fol 173b) brtson hgrus kyi leu ste bdun pao

प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां ध्यानपारमिता अष्टमः परिच्छेदः ।

तदेव क्षान्तेरनन्तरं वीर्यमभिधाय यदुक्तं ।

संश्रयेत वनं ततः ।

समाधानाय युञ्जीत भावयेच्चाशुभादिकं ॥

इति तद्वर्धयित्वैवमित्यादिना प्रतिपादयितुमुपक्र[97]मते ।

वर्धयित्वैवमुत्साहं समाधौ स्थापयेन्मनः । 5

एवमुक्तप्रतिपक्षस्यासेवनादिना विपक्षमुन्मूल्य वीर्यं वर्धयित्वा ऽनाभोगवाहितया स्थिरीकृत्य समाधौ समाधाने चित्तैकाग्रतायां स्थापयेन्मनः । तत्र निवेशयेत् । आरोपयेदिति यावत् । किमर्थमित्याह ।

विक्षिप्तचित्तस्तु नरः क्लेशदंष्ट्रान्तरे स्थितः ॥ १ 10

तुरिति हेतौ । यस्मात्समाधानमन्तरेण विक्षिप्तचित्तो ऽसमाहितचित्तसमुदाचारो वीर्यवानपि नरः पुरुषः क्लेशानां राक्षसानामिव दंष्ट्रान्तरे मध्ये स्थितः । कवलित एव तैरास्ते । तस्मात् ॥

---

1 Part of the 20 th kārikā of the Çikṣās, See pp XLV and 179 5 9

तत्र तावत्समाधिविपक्षं विक्षेपं निराकर्तुं पीठिकाबन्धं[1] रचयन्नाह ।

कायचित्तविवेकेन विक्षेपस्य न संभवः ।
तस्माल्लोकं परित्यज्य वितर्कान्[2] परिवर्जयेत् ॥ २

कायविवेको जनसंपर्कविवर्जनता । चित्तविवेकः कामादिवितर्कविवर्जनता । इति कायचित्तयोर्विवेके निरासङ्गतया विक्षेपस्य तयोरुन्नततायाः आलम्बनाप्रतिष्ठानस्येति[3] यावत् । न संभवः न प्रादुर्भावः । यत एव तस्माल्लोकं स्वजनबान्धवादिलक्षणं परित्यज्य विहाय पूर्वं वितर्कांश्चित्तविक्षेपहेतून् परिवर्जयेत् परित्यजेत् ॥

तत्र लोकापरित्यागहेतुं तावन्निराकर्तुमुपदर्शयन्नाह ।

स्नेहान्न त्यज्यते लोको लाभादिषु च तृष्णया[4] ।
तस्मादेतत्परित्यागे विद्वानेवं[5] विभावयेत्[6] ॥ ३

आत्मात्मीयग्रहप्रवर्तितोऽभिष्वङ्गः स्नेहः । तस्मान्न त्यज्यते लोकः । लाभादिषु च तृष्णया । आदिशब्दात्सत्कारयशःश्लोकादयः परिगृह्यन्ते । तेषु तृष्णया प्रलोभेन । चकारान्न त्यज्यते लोक इति समुच्चीयते । यत एतत्कारणमपरित्यागस्य तस्मा-

---

[1] pīṭhikā = Unterlage, Piedestal (P. W. from *Kāraṇḍavyūha* 15, 9) = introduction.

[2] vitarkān, L[1] has the scholion : rāgādibhiḥ.

[3] vikṣepa = kāyacittayor unnatatā, cittasya ālambane' pratiṣṭhāna.

[4] On priyasneha, VIII 5. 16 ; lābhatṛṣṇā, 17.

[5] So L[2], M, Dev.—Minaev has *vidhānavam* ?

[6] L[2], M : vicārayet.

देतस्य स्नेहस्य लोभादीनां वा । यदि वा लोकस्य परित्याग-
निमित्तं विद्वान् विचक्षणः । एवमिति वक्ष्यमाणं विभावयेत् ॥
तदेवाह ।

शमथेन विपश्यनासुयुक्तः
कुरुते क्लेशविनाशमित्यवेत्य । 5
शमथः प्रथमं गवेषणीयः
स च लोके निरपेक्षयाभिरत्या ॥[1] ४

श[95a]मथः चित्तैकाग्रतालक्षणः समाधिः । तेन सुयुक्त
इत्यपोद्धृत्येहापि[2] योजनीयं । यदि वा हेत्वर्थे तृतीया । शम-
थेन हेतुना विपश्यनासुयुक्तः । सहार्थे वा । शमथेन सार्धं विप- 10
श्यनासुयुक्त इति ।

विपश्यना यथाभूततत्त्वपरिज्ञानस्वभावा प्रज्ञा । तया
सुयुक्तः । युगनद्धवाहिमार्गयोगेन कुरुते क्लेशानां विनाशं
प्रहाणमित्येवमवेत्य ज्ञात्वा क्लेशविमुमुक्षुणा शमथः प्रथममादौ
गवेषणीयः । उत्पाद्य इत्यर्थः । तदनन्तरं विपश्यना । 15

समाहितो हि यथाभूतं प्रजानातीत्यवदन्मुनिः ।
शमाच्च न चलेच्चित्तं बाह्यचेष्टानिवर्तनादिति ॥

स च शमथः । लोके लोकविषये निरपेक्षयाभिरत्या ।

---

1 Metre

2 Cp *P W* anapoddhārya

3 It is the 9th kārikā of the *Çikṣās*, p XLI, text p 119 9 and Add-Notes p 403 —The first part [an old saying of the Master *Sam N* III 13, *Milinda* 39 5] is quoted *Bodhic* p IX, 1

अभिरतिं परिहरत एवोत्पद्यते नान्यथा ॥ तामेवाभिरतिनिर-पेक्षतामुत्तरप्रबन्धेन दर्शयितुमाह ।

कस्यानित्येष्वनित्यस्य स्नेहो भवितुमर्हति ।
येन जन्मसहस्राणि द्रष्टव्यो न पुनः प्रियः ॥ ५

5 कस्य सचेतनस्य स्वयमेवानित्यस्य । अनित्येषु पुत्रदारा-दिषु । स्नेहो भवितुमर्हति युज्यते । केन हेतुना । येन कार-णेन जन्मनां सहस्राणि अनेकानि जन्मान्यपर्यन्तसंसारे ससरता कदा चिदपि द्रष्टव्यो न पुन प्रिय[1] । प्रीणातीति प्रिय उच्यते ॥

10 तदपि चास्मिन्नास्ति । इत्याह ।

अपश्यन्नरतिं याति समाधौ न च तिष्ठति ।
न च तृप्यति दृष्ट्वापि पूर्ववद्बाध्यते तृषा ॥ ६

यदा तावन्न पश्यति न । तदायमरतिमधृतिं याति । तेनैवासौमनस्येन समाकुलितचित्तत्वात्समाधौ न च तिष्ठति । 15 नैव स्थितो भवति । तमवलम्बितुमशक्त इत्यर्थ. । अथ यदापि प्रियदर्शनमस्य जायते । तदापि न च तृप्यति । दृष्ट्वापि पुन-रधिकतर बाध्यते [98b] तृषा । तद्दर्शनाभिलाषेण पूर्ववत् । अदर्शनकाल इव पीड्यते ॥

अपि च सर्वानर्थनिदान प्रियसगतिकरणमित्युपदर्शयन्नाह ।

---

1 Ms has priyah apica punah

न पश्यति यथाभूतं संवेगादवहीयते।
दह्यते तेन शोकेन प्रियसंगमकाङ्क्षया॥ ७

यथाभूतमविपरीतं दोषगुणान्न पश्यति। न जानाति। प्रियसंगमकाङ्क्षया तेनैव मोहेन संवेगादवहीयते[1]। भ्रष्टो भवति। तथा तेनैवाभिष्वङ्गेण दह्यते। तेन शोकेन मुहूर्तमपि 5 विच्छेदे। तथा तेन शोकेन दह्यते। परितप्यते तेनैव मनस्तापेन प्रियसंगमकाङ्क्षया। प्रियस्य संगमः संप्रयोगः। तस्मिन्नाकाङ्क्षा तृष्णा। तया हेतुभूतया। पुनरुत्तरोत्तरमधिकाधिकप्रार्थनया॥

इतोऽप्यनर्थहेतुरेव तत्संगतिरित्याह। 10

तच्चिन्तया मुधा याति[2] ह्रस्वमायुर्मुहुर्मुहुः।

तस्य प्रियस्य तत्संगमस्य वा चिन्तया तद्गुणानां सदा परिभावनया। कथं नाम ममास्य प्रियसंगमस्य विच्छित्तिर्मा भूदिति तल्लीनचित्ततया वा। निःफलमेवायुःसंस्काराः प्रतिक्षणं क्षीयन्ते। न च क्वचिदपि कुशलकर्मणि समुपयुज्यन्त 15 इति भावः॥

न च यदर्थमायुः क्षयमुपनीयते तन्मित्रं[3] स्थिरमित्यत आह।

---

[1] There are eight samvegavatthus (jati, jara, etc), See Visuddhimagga (J P T S 1893) p 93

[2] Ll has yānti

[3] Ms has tadamitram—Tib has gan gi don du tshe zad par byis pa ma yin no zhes-so de lta na yan hdza-ges brtan pa yin no zhe na

अशाश्वतेन मित्रेण धर्मो भ्रश्यति शाश्वतः॥ ८

अवश्य भङ्गुरतयाऽनवस्थानादस्थावरेण मित्रेण हेतुना धर्मो भ्रश्यति परिहीयते शाश्वतो दीर्घकालावस्थायी संभारान्तर्गमात्[1] फलमहत्त्वाच्च॥

5 स्यादेतत्। अवश्यं हि किं चित्तत्सगमाङ्कितसुखनिबन्धनं प्राप्यते। तत्किमिति सर्वथा तन्निषिध्यत इत्यत्राह।

बालैः सभागचरितो नियतं याति दुर्गतिं।
नेष्यते विषभागश्च[2] किं प्राप्तं बालसंगमात्॥ ९

नापि तत्सगमादनर्थमन्तरेण किं चिदपरमिह लभ्यते 10 [99 a]। तथा हि बालैः पृथग्जनैः सह सभागचरित[3] समानशीलः। नियतमवश्यं याति दुर्गतिं तत्कर्मसदृशसमाचरणात् आर्यधर्मबहिर्भावाच्च। अथार्यधर्मानुवर्तनात्ततोऽसदृशकर्मकारी स्यात्। तदा नेष्यते द्विष्यते विसभागश्चेति असमानचरितः। बालैरिति संबन्धः। अत्र कर्तरि तृतीया॥

15 इत्युभयलोकबाधनात्किं प्राप्तमधिगत हितसुखनिमित्तं बालसंगमात्। नैव किं चिदित्यर्थ॥

न चानुकूलचरितैरप्यात्मसात्कर्तुं शक्या इत्याह।

---

1 Two *sambhāras*, equipments, (*Dharma saṃgraha* (XVII), puṇya° (=dharma, *Çikṣas* 191 5) jñāna, four Lalit av 39 4 sqq, çamatha°, vipaçyanā°

2 The Ms of the Commentary has visabhāga

3 See *Jātakamālā*, 23 58 (sabhāga = übereinstimmend, entsprechend *P W*)

क्षणाद्भवन्ति सुहृदो भवन्ति रिपवः क्षणात्[1] ।
तोषस्थाने प्रकुप्यन्ति दुराराधाः पृथग्जनाः ॥ १०

क्षणमात्रेण सुहृदो मित्राणि भवन्ति । किं चित्स्वप्रयोजन-
मुपलभ्य । क्षणादेव च विषमाभिप्रायत्वात्किंचिन्निमित्तमालम्ब्य
त एव रिपवः शत्रवो भवन्ति । न च निमित्तमप्येषां नियतं । 5
यस्मात्तदा चित्ततोषस्थाने प्रीतिविषये विपर्यासवशात्प्रकुप्यन्ति ।
इति दुराराधा दुःखेनाराधयितुं शक्याः पृथग्जना[2] अनार्याः ॥
अपरमपि बालधर्मं तद्विवर्जनार्थमुपदर्शयन्नाह ।

हितमुक्ताः प्रकुप्यन्ति वारयन्ति च मां हितात्[3] ।
अथ न श्रूयते तेषां कुपिता यान्ति दुर्गतिं ॥ ११ 10

इदं करणीयमिदमकरणीयमित्युक्ता अभिहिताः प्रकुप्यन्ति
विद्विषन्ति न पुनस्तदुक्तं हितमिति गृह्णन्ति । प्रत्युत वारयन्ति
च मां हितात् । किं तवानेन केवलप्रयासफलानुष्ठानेनेति तत्र
प्रवृत्तं मां निषेधयन्ति ततः । अथ न श्रूयते तेषां बालानां
वचनमिति शेषः । यदि तद्वचनमवमन्य हिते प्रवृत्तिः 15
क्रियते । तदा कुपिता अस्मद्वचनान्नायं निवर्तत इति तस्मिन्
हितकर्मकारिणि कोपं कृत्वा[4] [९०b] तत्कर्मप्रेरिता दुर्गतिं
प्रयान्ति ॥

---

1 Cp. Çiks. 191, 4.
2 pṛthagjanā. See Pañj. p. 12.
3 Minayev has hitān. Cp. Çiks. 191, 7.
4 Here the Ms. has again tatkarmakāriṇi kopaṃ kṛtvā.

इम च बालधर्ममपरं तद्विवेकाय भावयेदित्युपदर्शयन्नाह ।

ईर्ष्योत्कृष्टात्समाद्द्वन्द्वो हीनान्मानः स्तुतेर्मदः ।
अवर्णात्प्रतिघश्चेति कदा बालाद्धितं भवेत् ॥ १२

आत्मनो विद्याकुलधनादिभिरुत्कृष्टादुत्तमादीर्ष्या परसम्पत्त्य-
5 सहनता जायते । अर्थात्तेष्वेव । आत्मना समात्तुल्याद्द्वन्द्वो विवादः ।
आत्मनो हीनादधमान्मानोऽभिमानः । अहमितः श्रेष्ठ इत्यभि-
मननात् । स्तुतेर्मदः सदसतां तद्गुणानामाख्यानादहं महीया-
नित्यारोपादवलेपः । अवर्णादात्मनो दोषकीर्तनश्रवणाद्द्वेषश्च ।
अर्थादवर्णवादिनि । इत्येव कदा कस्मिन् काले बालाद्धितं
10 भवेत् । न कदाचिदित्यर्थः ॥

इतोऽपि बालान् परिहृत्य विहरेदिति प्रतिपादयितुमाह ।

आत्मोत्कर्षः परावर्णः संसाररतिसंकथा ।
इत्याद्यवश्यमशुभं किं चिद्बालस्य बालतः ॥ १३

एकस्य बालस्यापरस्माद्बालादित्येवमादि किं चिदशुभम-
15 कुशलमवश्यं नियमेन जायते । किं तत् । आत्मन उत्कर्षः
प्रकर्षः श्रुतज्ञानादिप्रशंसया । परेषामवर्णो दोषप्रकाशनं
श्रुतादिप्रच्छादनं । या संसारे रतिरभिरामः तस्य संकथा
संवर्णनं कामगुणानां संप्रमोदनात् । इत्यादि एवंप्रकार ॥

एवं तस्यापि तत्सङ्गात्तेनानर्थसमागमः ।

20 अपरस्यापि । तत्सङ्गाद्द्वितीयस्य सङ्गात् । किं चिदशुभमवश्यं

स्यात् । येनैव तेन कारणेन अनर्थस्याकल्याणस्य समागमः संप्राप्तिरेवायं बालसमागमः । अत आर्यधर्मानुशिक्षणार्थं ॥

एकाकी विहरिष्यामि सुखमक्लिष्टमानसः ॥ १४[1]

बालजनसंगमवियुक्तोऽद्वितीयो विहरिष्यामि । तद्विवेकात्सुखं क्रियाविशेषणमेतत् । कथमक्लिष्टमानस इति [100a] 5 तत्संपर्कविवर्जनात् तत्कृतसंक्लेशाभावात् । पूर्वस्मिन् हेतुपदमेतत् । यदि वा सुखं कायिकं । अक्लिष्टमानस इति मानसं ॥

तस्माद्बालजनसंपर्कजदुःखपरिजिहीर्षुणा तत्संगतिर्न कार्येति कथयितुमाह ।

बालाद्दूरं पलायेत प्राप्तमाराधयेत्प्रियैः । 10
न संस्तवानुबन्धेन किं तूदासीनसाधुवत्[2] **॥ १५**

बालात्सर्वतो दूरमारात्पलायेत । अपसरेत् । यथा तैः सह कां चिदपि संगतिर्न स्यात् । अथ कथं चिद्दैवायोगाद्भवेत् । तदा प्राप्तं मिलितमाराधयेत् । आरागयेत्[4] । प्रियैः प्रीतिकरैरुपचारैः । आराधयन्नपि न संस्तवानुबन्धेन न परिचया- 15 सन्निकरणाभिप्रायेण । यदि वा न संस्तवानुनयेन । किं तर्हि प्रतिघानुनयवर्जनादुदासीनसाधुवत् सदाचारमध्यस्थजनवत् ॥

---

1 Cp. Çikṣās. 196, 4.
2 Cp. Çikṣās. 191, 8, 197, 8.
3 So Ms.
4 Çikṣās. 30, 1. 3, 211, 11 1.

इदमपरं साधुजनसमाचारं शिक्षयितुमाह ।

धर्मार्थमात्रमादाय भृङ्गवत्कुसुमान्मधु ।
अपूर्व इव सर्वत्र विहरिष्याम्यसंस्तुतः ॥ १६

धर्मायेदं धर्मार्थं तदेव केवलं तन्मात्रं । तदादाय गृहीत्वा ।
5 सारादानं कृत्वेत्यर्थः । भृङ्गवत् चञ्चरीकवत् । मधु मकरन्दं ।
यदि वा धर्म एवार्थः प्रयोजनमस्य चीवरपिण्डपातादेरिति
विग्रहः । बालसम्पर्कविमुख अपूर्व इव नवचन्द्रोपमः सर्वत्र देशे
स्थाने वा[1] विहरिष्यामि । असंस्तुतः अपरिचितः । तन्निवासि-
जनैः प्रत्यासत्तिरहित इत्यर्थः ॥

10 तदेव प्रियसङ्गतिकारणं स्नेहमपाकृत्य साम्प्रतं लाभादितृष्णा
लोकापरित्यागकारणं परिहर्तव्येत्युपदर्शयन्नाह ।

लाभी च सत्कृतश्चाहमिच्छन्ति बहवश्च मां ।
इति मर्त्यस्य संप्राप्तान्मरणाज्जायते भयं ॥ १७

लाभो विद्यतेऽस्येति । चीवरपिण्डपातादिलाभयोगाल्लाभी
15 चाहं । सत्कृतश्च पूजितो जनैः । इच्छन्ति अभिलषन्ति बहव-
श्चानेके मां । [100b] बहुजनसम्मतोऽहमित्यर्थः । इत्येवं चिन्त-
यत एवं मर्त्यस्य मनुष्यस्य मरणाज्जायते भयं । किम्भूतात्संप्रा-
प्तात् अचिन्तितोपस्थितात् । इति सर्वदावश्यंभाविमरणमनसि-

1 Tib. has gnas skabs kun tu dan yul kun tu = sarvadaśāyāṃ sarvadeśe vā

कारात् किं लोकस्य बालजनस्य चिन्तया चरितपरिभावनया ।
न किं चित्प्रयोजनमनुपदेयत्वादिति भावः[1] ।

इत्थमपि बालजनसंगतिर्दुःखहेतुरेवेत्याह ।

निन्दन्त्यलाभिनं सत्त्वमवध्यायन्ति लाभिनं ।
प्रकृत्या दुःखसंवासैः कथं तैर्जायते रतिः ॥ २३ 5

निन्दन्ति कुत्सयन्ति । अलाभिन लाभविरहित सत्त्व । अकृतपुण्योऽय वराको येनाय पिण्डपातादिमात्रकमपि नैवा-परिक्लेशन[2] प्राप्नोतीति । लाभिनं पुनरवध्यायन्ति प्रसन्नैर्दायक-दानपतिभिश्चीवरादिप्रदानैः पूजित । कुहनादिभिरपि[3] दाय-कदानपतीन् प्रसाद्य चीवरादिलाभमासादयति । अन्यथा 10
किमन्यस्य तथाविधा गुणा न सन्ति येनायमेव वर लभते

---

[1] Neither the Sanskrit Ms nor the Tib. translation show any lacuna, but it seems that these last words refer to the stanza 22 tasmāt kim lokacintayā. According to the Tib. Mss. we have

yatra yatra ratiṃ yāti manaḥ sukhābhilāṣi te
tat tat sahasraguṇitaṃ duḥkhaṃ bhūtvopatiṣṭhati [18]
tasmāt prajño na tām icched icchāto jāyate bhayam
svayam eva ca yāty etad dhairyaṃ kṛtvā pratīkṣatām (a) [19]
bahavo lābhino bhūtvā bahavaç ca yaçasvinaḥ
saha lābhayaçobhis te na jñātāḥ kva gatā iti [20]
mām evānye jugupsanti kiṃ prahṛṣyāmy ahaṃ stutaḥ
mām evānye praçaṃsanti kiṃ viṣīdāmi ninditaḥ [21]
nānādhimuktikāḥ sattvā jinair api na toṣitāḥ
kiṃ punar mādṛçair ajñais tasmāt kiṃ lokacintayā [22]

(a) Minaev has pratīkṣya

[2] According to Tib. naiva parikleçena 'as he cannot obtain the utensils, even with difficulty', 'as he does not obtain ... but with difficulty'

[3] On kuhana, see *Çikṣās.*, index

नापर इत्यस्मिंश्चित्तमप्रसादयन्ति वचनं चैवमुद्गिरन्ति । इत्यु-
भयथापि तेभ्यो न चेतसि शान्तिरस्ति ॥

तदेव प्रकृत्या स्वभावेन दुःखहेतुत्वात् । दुःख [स]ंवासो
येषां बालानां ते तथा । तैस्तथाविधैः सह संवसतः कथं जायते
5 रतिः । नैवेत्यर्थः । न च ------[1] सौमनस्येन च विहाराय
विवेककामेन मयाऽरण्यनिषेवणाय यतितव्यमिति तदनुशंसां
दर्शयन्नाह ।

नावध्यायन्ति तरवो न चाराध्याः प्रयत्नतः ।
कदा तैः सुखसंवासैः[2] सह वासो भवेन्मम ॥ २६

10 तरवो वृक्षा नावध्यायन्ति न चाराध्या आराधयितव्याः

---

1 A lacuna in the Ms

Tib (fol 168 a 5) has byis pa sñin rje ldan kyan bstan pa ma yin pa gan gi phyir byis pa zhes-pa la sogs pa gsuns te | grogs pa ni sñin du sdug pa yin la de bzhin gśegs pas gsuns-pa ni lun rnams su gsuns pa yin-no | ci phyir zhe na | gan gi phyir ran la dgos pa med par byis-pa gan-la yan dga-ba skye bar mi hgyur te | de phyir de med pa las bzlog par hgyur ro | de kyan byis pa dan hgrogs pa yin na yan bstan pa ma yin no | de la byams par byas pas kyan so sor skye bo mgu bar mi nus so | de lta bas na de dan hgrogs pa-las byun bai ñes pa span bai ched du bdo ba dan yid bde-bas dben pa hdod pas,

na ca bālo drdhasuhrd bhavati Yasmān [ni] bālaṃ ity ūcy ate

[na bālaḥ kasyacin mitram iti coktaṃ tathāgataiḥ
na svārthena vinā prītir yasmād bālasya jāyate 24]
(svārthadvāreṇa yā prītir ātmārtham prītir eva sā
dravyanāçe yathodvegaḥ sukhahānikrto hi saḥ 25) (a)

mitram iti suhrt uktam tathāgatenety āgameṣuktam kasmād ? yasmāt svaprayojanena vinā bālasya na kasmiṃścid api prītir jāyate tasmāt tadabhāve viparyayaḥ tad api bālasaṃvāse saty api na nirdiṣṭam (?) tatra maitrīkṛtenāpi pṛthagjanasya prītir açakyā evaṃ sati tatsaṃvāsodbhūta doṣaparihārārtham sukhena saumanasyena ca

(a) The Çloka 25, given by Mss is wanting in the Tibetan translation

2 Cp M Vyut 126 10

प्रयतन्त इति। तदनुकूलसमाचरणेन अरण्यादिषु वसता विष-
माभिप्रायरहितत्वात् [101a]। इति कदा तैस्तरुभिः सह वासो
भवेन्मम। किंभूतैः सुखसंवासैरित्याशंसति। सुखहेतुत्वात्सुख-
मिति पूर्ववत्॥

पुनरेकाकिताविहारेऽभिरतिमाह। 5

शून्यदेवकुले स्थित्वा वृक्षमूले गुहासु वा।
कदानपेक्षो यास्यामि पृष्ठतोऽनवलोकयन्॥२७

शून्यदेवकुले जनसंकीर्णतारहिते स्थित्वा निवस्य। रात्रि-
मेकामुषित्वा द्वे वा यथाभिलाषं वृक्षमूले वृक्षस्याधस्तात्।
पर्वतादिषु गुह्यप्रदेशा गुहाः। तत्र वा। अनपेक्षः कदा 10
यास्यामि। आसङ्गस्थानस्य कस्य चिदभावात्। अत एव पृष्ठतो-
ऽनवलोकयन् पश्चादनिर्वृत्तेरभावात्॥

पुनरन्यथा आह।

अममेषु[1] प्रदेशेषु विस्तीर्णेषु स्वभावतः।
स्वच्छन्दचार्यनिलयो विहरिष्याम्यहं कदा॥ २८ 15

केन चिद्विरोधकारिणा पूर्वमस्वीकृतेषु। विस्तीर्णेषु विपु-
लेषु सौमनस्यकारिषु। स्वभावतः स्वयमेव तथाविधेषु। न
कृत्रिमतया। विहरिष्याम्यहं कदा। इत्याशास्ते॥ एवं विहरतो

1 Cp. Prajñākaramati 187. 15

यत्सुखं तदुपदर्शयन्नाह । स्वच्छन्दचारी न परतन्त्रवृत्तिः । अनिलयः । न विद्यते निलयो[1] आलयो निरासङ्गतया यस्ये- त्यनिलयः क्वचिदपि स्वीकाराभावात् । तथाभूतः प्रतिबद्धो न कस्य चित् ॥ शेषः सुबोधः ॥

5 पुनरेवमल्पेच्छतया आशंसनीयमित्यादर्शयन्नाह ।

मृत्पात्रमात्रविभवश्चौरासंभोगचीवरः ।
निर्भयो विहरिष्यामि कदा कायमगोपयन् ॥ २९

मृत्पात्रं मृन्मयं भिक्षाभाजनं । तदेव केवलं तन्मात्रं विभवो धनं यस्येति । तथा चौराणामसंभोग्यं पांसुकूलाम्बरकृतत्वाद- 10 परिभोग्यमनुपयुक्तमिति तावत् । तादृशं चीवरं वासो यस्य स तथा । एतद्द्वयमपि परैरहार्यं । अत एव निर्भयः कायजीवित- निरपेक्षतया च । तदेव दर्शयति । कायमगोपयन्निति । बाह्या- ध्यात्मिकस्य परिग्रहाग्रहस्याभावात् । अरक्षयन् [ ] ॥

इयमनित्यता चासङ्गपरित्यागस्य कारणं सर्वदा सेवितव्येति 15 तच्चिन्तयैवोपदर्शयन्नाह ।

कायभूमिं निजां गत्वा कङ्कालैरपरैः सह ।
स्वकायं तुलयिष्यामि कदा शतनधर्मिणं ॥ ३०
अयमेव हि कायो मे एवं पूतिर्भविष्यति ।

---

[1] So Ms
Minaev sadana°, L² sattana, M. ṣatana

शृगाला अपि यद्गन्धान्नोपसर्पेयुरन्तिकं ॥ ३१

अस्यैकस्यापि कायस्य सहजा अस्थिखण्डकाः ।

पृथक् पृथग्गमिष्यन्ति[1] किमुतान्यः प्रियो जनः ॥ ३२

कायभूमि निजामिति श्मशानभूमि । चिरमपि स्थित्वा तत्पर्यवसानत्वाच्छरीरस्य । कङ्कालैरपरैरिति पूर्वमृतानाम- 5
स्थिभि पञ्जरैः । शतन[2] प्रतिभावः । तद्धर्मिणं तत्स्वभावं ॥

तामेव तुलनां कथयत्ययमेव हीत्यादिना । एवमित्यपर-कङ्कालगलितशरीरमादृश्यमुच्यते । पूतिः कुत्सितो भविष्यति । कीदृश इत्याह । शृगाला इत्यादि । अतिदुर्गन्धतया तदा-हारपरायणानां गोमायूनामपि दुःसह इति ॥ 10

इत्थमपि प्रियस्य सगतिरनित्येत्याह । अस्यैकस्यापीत्यादि । अस्योपात्तस्यैकस्य एकत्वेन कल्पितस्यापि कायस्य । सहजाः कायेन सह जाताः । अस्थिखण्डकाः पृथक् पृथग्भविष्यन्ति[3] । विसंयुक्ता भविष्यन्तीत्यर्थः । किमुतान्यः प्रियो जनः पृथग्भ भविष्यति यः सर्वदा विसयुक्त एवास्ते ॥ 15

स्यादेतत् । सुखदुःखसहायाः सदा ममैते पुत्रदारादयः । तदेषु युक्त एवानुनयः कर्तुमित्याह ।

एक उत्पद्यते जन्तुर्म्रियते चैक एव हि ।

नान्यस्य तद्व्यथाभागः किं प्रियैर्विघ्नकारकैः ॥ ३३

[1] The commentary has bhavisyanti,—Tib (so sor hgyes hgyur) gives no help

[2] Ms has śatanam

[3] gamisyanti ?

जन्ममरणयोर्न कश्चित्कस्य चिद्दुःखसभागी स्यात् । अन्तराले च स्वकर्मोपहितमेव सुखदुःखमुपभुञ्जते सर्वे । अतोऽभिमानमात्रमेवैतत् । यतो नान्यस्य तदात्मनो[1] व्यतिरिक्तस्य तद्व्यथाभागः । तस्यानुनयकारिणो व्यथा । तस्या भागः प्रत्यग्रो जायते । तस्य 5 मा । तेनैव तस्याः संवेद्यमानत्वात् । अतो न किं चित्प्रयोजनं प्रियैः कुशलपक्षविघातकारिभिः ॥

परमार्थतो न कस्य चित्केन चित्संगति[102a]रस्तीत्युपदर्शयन्नाह ।

अध्वानं प्रतिपन्नस्य यथावासपरिग्रहः[2] ।
10 **तथा भवाध्वगस्यापि जन्मावासपरिग्रहः ॥ ३४**

मार्गप्रस्थितस्य कां चिद्दिशं गन्तुमुद्यतस्य यथाऽपरैरध्वगैः सहैकस्मिन्नावासे क चिन्मण्डपादौ वावासपरिग्रहो भवति । तथा संसारेऽपि कर्मायत्तगतेः संसरतो ज्ञातिसगोत्रसालोहितादिभिरेकस्मिन् जन्म[न्य]ावासपरिग्रहो जायते । पुनरपि तत्प- 15 रित्यज्य क चिदेकाकितया याति । न च तत्र केचित्सहायास्तमनुगच्छन्ति । अतो न केन चित्कस्य चिद्वास्तवी संगतिः संभवति । तस्मात्तानर्थसहस्रोपनेत्रीं स्वयमुपकल्प्य केन चित्संगतिं कुर्यात् ॥

---

[1] Ms. first hand tavātmano
[2] Ms. may has yathā vāsa
[3] saṃsṛ...ti (first hand) saṃsarato jñāti (second hand)

तदेवमभिधाय संगतिदोषं । एकाकितायाः पुनरिमे गुणा इति वृत्तत्रितयेनोपदर्शयन्नाह ।

चतुर्भिः पुरुषैर्यावत्स न निर्धार्यते ततः ।
आशोच्यमानो[1] लोकेन[2] तावदेव वनं व्रजेत् ॥ ३५
असंस्तवाविरोधाभ्यामेक एव शरीरकः ।
पूर्वमेव मृतो लोके म्रियमाणो न शोचति ॥ ३६
न चान्तिकचराः केचिच्छोचन्तः कुर्वते व्यथां ।
बुद्धाद्यनुस्मृतिं चास्य विक्षिपन्ति न केचन ॥ ३७

अवश्यमनिच्छन्नपीदानीं जीवदवस्थायां मरणमुपगतो बला-त्त्याजयितव्यो . . . [आशोच्य]मान[3] । हा वत्सेत्यादि- 10 विलापवचनैः परिदेव्यमानः लोकेन बन्धुप्रभृतिना तावदेव ततः पूर्वमेव वनं व्रजेत् ॥

कः पुनरत्र गुणविशेष इत्याह । असंस्तवेत्यादि । अनुनय-प्रतिघाभावात् । म्रियमाणो न शोचति । शोकोपजनितदुःख-

[1] Minaev, according to L², M, has açocyamāno, such the reading of the Tib (See n 3) L¹ açocyamāno and the Commentary paridevyamāna (yons su gduns-pa) supports this reading

[2] Minaev has loke na

[3] A lacuna in the Ms —Tib (Fol 170a1) has di ni gson-pa-i mtha mi hdod kyan nes par hchi bar hgyur pas khyim na gnas pa stobs kyis dor-bar bya ba yin pa, de bas na de ltar ran ñid kyis gson pa ñid ra dor bar rigs so de nas zhes pa-ni kyim-nas so mya nan med par zhes pa ni = balāt tyājayitavyo gṛhavāsaḥ, tasmād evam svayam jīvann eva tyaktum arhati tata iti gṛhāt açocyamāno ..

भागी न भवति । कुतः । पूर्वमेव मृतो लोके । यदैव गृहा-
न्निष्क्रान्तः । तदैव स्वजनबान्धवादौ लोकविषये ॥

अयमपरो गुणस्तस्येत्याह । न चान्तिकचरा इत्यादि ।
अन्तिकचराः समीपवर्तिनो ज्ञातिबान्धवादयस्तद्वियोगातुराः
5 शोचन्तः शोकमुपजनयन्तः । न च नैव कुर्वते व्यथां । आत्मनः
कायमनसोः पीड़ां । यदि वा तेषां शोकं पश्यतो म्रियमाणस्य
मनस्तापं ॥ न केवलमयमेव गुणः । अपि तु बुद्धाद्य [102b]
नुस्मृतिं च । आदिशब्दाद्धर्माद्यनुस्मृति । तत्रावस्थानमनस्कारं
वा । अस्येति जनसंपर्कविवर्जनचारिणो नरस्यान्तसमये ॥

10 तस्मादित्यादिनोपसंहरति ।

तस्मादेकाकिता रम्या निरायासा शिवोदया ।
सर्वविक्षेपशमनी[1] सेवितव्या[2] मया सदा ॥ ३८

एकाकिता अनासङ्गविहारिता । रम्या सुखहेतुत्वात् ।
निरायासा दुःखविपक्षत्वात् । शिवोदया निःश्रेयसावाहकत्वात् ।
15 सर्वविक्षेपशमनी सर्वविक्षेपस्य कायवाङ्मनसिकदुराचारस्य शमनी
निवर्तिनी समाधानहेतुत्वात् । सेवितव्या मया सदेत्यनेनैवाभि-
निवेशेनासङ्गः कार्य इत्यर्थः ॥

तदेवं जनसंपर्कविवर्जनात्कायविवेकं प्रतिपाद्य चित्तविवेकं
प्रतिपादयितुमाह[3] ।

---

[1] Minaev has °samanī.
[2] Minaev °sadā mayā. See the Commentary.
[3] Cittaviveka VIII 39-89.

सर्वान्यचिन्तानिर्मुक्तः[1] स्वचित्तैकाग्रमानसः ।
समाधानाय चित्तस्य प्रयतिष्ये दमाय च ॥ ३९

सर्वा या अन्यचिन्ता असद्वितर्कस्वभावास्ताभिर्निर्मुक्तः । तद्विरहितः । स्वचित्तैकाग्रमानसः । स्वचित्तमेवैकमग्रं प्रधानं यस्मिन् मानसे मनसिकारे तत्तथोक्तं[2] । तादृशं मानसं यस्य स तथा । स्वचित्तं वा एकाग्रमेकायत्तं तत्प्रचारव्यवलोकनतत्परं । नियतालम्बनप्रतिबद्धं वा मानसं यस्येति समासः । तथाभूतः समाधानाय चित्तस्य शमथाय प्रयतिष्ये । तत्परायणो भविष्यामि । तदेकाग्रतायां नियोजयिष्यामीत्यर्थः । दमाय चेति । पुनः पुनस्तत्रैवालम्बने योजनाय । बहिर्विक्षेपनिवारणाय वा ॥

तत्र चित्तसमाधानस्य विपक्षत्वात्कामवितर्कं निवारयितुमाह ।

कामा ह्यनर्थजनका इह लोके परत्र च ।
इह[3] बन्धवधच्छेदैर्नरकादौ परत्र च ॥ ४०

अप्रहीणभवसंयोजनैः कमनीयतयाऽध्यवसितत्वात् कामा रूपादयो विषया उच्यन्ते । विभक्तो यस्मादर्थः । तस्मादुद्विज्य कामेभ्य[4] इति वक्ष्यमाणेन सम्बन्धः । ते च सेव्यमाना अनर्थजनका

1 L[1] has the scholion bodhicitta = bodhicitta[illegible]
2 Samādhi = samādhāna = citt[illegible] (VIII, [illegible])
3 Minaev has bandhabaddha, M. L[2] bandhabadha = b[illegible] dan bcin dan gcod
4 Ms. m[illegible]ebhya. See VIII, 8[illegible]

बीभत्सरूपात्[1]। ईर्षितादृशात्। यदि वा[2] एवं त्रासः। यद्दूरादपि दूरतरं[3] पलायस इति योजनीयं। यदैव चलत' कथं न त्रास इत्याह।

वेतालेनेव केनापि चाल्यमानाद्भयं न किं॥ ४८

भूतग्रहेण चाल्यमानाज्जीवतश्चलतः। किं न भयं भवति। 5 तस्मादतिशयेन भयं युक्तमित्यर्थः॥ एवं तावज्जुगुप्सनीयतां प्रतिपाद्य पुनरन्यथा प्रतिपादयितुमाह।

एकस्मादशनादेषां लालामेध्यं च जायते।
तत्रामेध्यमनिष्टं ते लालापानं कथं प्रियं॥ ४९[4]

यो हि नाम मोहावृतविवेको रागविषमूर्छितचैतन्यः। 10 तस्यातिकमनीयतया कामिनीवदनमधुपानलुब्धा तन्मुख-विज्वललालापानाभिलाषिणः। पर्यनुयोगमाह। एकमेव कारणं द्वयोरप्याहारपानस्वभावात्। तत्र तयोर्मध्ये अमेध्यं पुरीषमप्रियं भवतः। लालायाः श्लेष्मणः पानं कथं प्रियं। केन प्रकारेण तत्राभिरतिर्नान्यत्र। द्वयोरपि युक्तिः भावः॥ 15 अथापि स्यात्। यद्यपि द्वयोरपि कारणमभिन्नं। तथापि

1 Ms bhibhatsa

2 Yan na de-ltar zhes-pa ni skrag pa ste

3 Ms dur ara [ ]m p , illegible syllable in margin — Tib. çin tu rin ba

4 Stanza 50th in Minaev's edition and in Tib translation of the text (Mdo XXVI 21 a 1). Stanza 49th of Minaev is the 51th in our commentary and the 52th according to the Ms L[2]

5 S) Ms

तस्मिन्नतिदुर्गन्धतया वैमुख्य । इतरस्मिंस्तु तदभावात्प्रीतिरिति ।
तदेतदपि न सम्यगभिधानमित्युपपादयन्नाह ।

तूलगर्भैर्मृदुस्पर्शै रमन्ते नोपधानकैः ।
दुर्गन्धं न स्रवन्तीति[1] कामिनो ऽमेध्यमोहिताः ॥ ५०

5 कर्पासादितूलपरिपूरितैर्मसू[101b]रकादिभिरुपधानैः सुकुमारस्पर्शैः कामिनो न रमन्ते । न धृतिमधिवासयन्ति । कुतः । दौर्गन्ध्यमशुचिनिस्यन्द न मुञ्चतीति[2] कृत्वा ऽशुचिपरिपूरिते स्त्रीकडेवर एव रमन्ते । एतदपि कुतः । कामिनः कामसुखाभिलाषिणः । अमेध्यमोहिता यतः । हेतुपदमेतत् ।
10 अमेध्यविषये ऽमेध्येन वा मोहिताः । अशुचौ शुचिविपर्यासात्तत्रैवातिशयवतीमभिरतिमनुभवन्ति ॥ स्यादेतत् । यदि नामाशुचित्वममेध्ये स्त्रीकडेवरे च साधारणं । तथापि तदेकत्र विवृतमन्यत्र प्रच्छादितं । अतस्तदन्यपरिहारेणास्मिन्नभिष्वङ्ग इत्यत्राह ।

15 **यत्र छन्ने ऽप्ययं रागस्तदच्छन्नं किमप्रियं ।**
न चेत्प्रयोजनं तेन कस्माच्छन्नं विमृद्यते ॥ ५१

यस्मिन्नमेध्यस्वभावे प्रच्छादितरूपे ऽदृष्टेऽपीति यावत् । एतादृशो ऽभिष्वङ्गः । तदच्छन्न दृश्यतां गतमतिशयेन प्रीतिकरमुपजायत इत्युचित । तत्किमिति तथाभूतमप्रियं

---

[1] Commentary has *daurgandhyam muñcati*

[2] So Ms , read *muñcanti*

भवतः। अथ तथाभूते सर्वथा वैमुख्यमेव ते नाच्छन्नेन किं चित्प्रयोजनं तत्रास्ति। यद्येवं तर्हि कस्माद्धेतोः छन्नं विशेषेण मृग्यते। तदन्यपरिहारेण तस्यैव घटनाय यत्न क्रियते॥ अपि चेदमपि प्रष्टव्यस्त्वं किं भवानशुचिविरागो न वेति। अत्र प्रथमं विकल्पमधिकृत्याह। 5

यदि ते नाशुचौ रागः कस्मादालिङ्गसेऽपरं।

यदि भवतो ऽशुचौ न रागो न सर्वथा आसङ्गोऽस्ति। तर्हि कस्मादालिङ्गसेऽपरमन्यं। किं तदित्याह।

मांसकर्दमसंलिप्तं स्नायुबद्धास्थिपञ्जरं॥ ५२

मांसमेव कर्दम इव लेपनसाधर्म्यात्। तेन लिप्तमुपदिग्धं। 10 किमेव भूतमिति चेत्। स्नायुबद्धास्थिपञ्जरं। स्नाय्वाबद्धं सङ्गीकृतं। आयत्तीकृतं। अस्थिपञ्जरं। अस्थिसकलं[1]। अन्यथा खण्डशो विसकलितं[2] स्यात्। इति विरागविषयतामस्य द[105a]र्शयति। अथ शुचौ राग इति द्वितीयो विकल्पः स्वीक्रियते। तत्राह। स्वमेवेत्यादि। 15

अथ वान्यथावतार्यते। यदुक्तं परेण। छन्ने चर्मादिना रागो भवति नाच्छन्ने। तत्राह। यदीत्यादि। यदि तेन हेतुना चर्मादिना पिहितत्वादिति कृत्वाऽशुचौ रागो भवति

---

1 Ms. camkalam—new word

2 New word

भवतः । तदा कस्मादालिङ्गसे परमन्यदीयं पञ्जरं । अन्य-त्पूर्ववत् ॥

किं तर्हि समुचितमत्रेत्याह ।

त्वमेव बह्वमेध्यं ते तेनैव धृतिमाचर ।
अमेध्यभस्त्रामपरां गूथघस्मर विस्मर ॥ ५३

त्वमेवात्मनैव बहुतरमशुचिलालाशिङ्घाणमस्तकलुङ्गमूत्रपुरी-षादि[1] तवास्ति । तेनैवाशुचिना सतोषं कुरुष्व । ततोऽप्यमे-ध्यभस्त्रां[2] पुरीषप्रसेविकां[3] । अपरामन्यां स्त्रीशरीरस्वभावां । गूथघस्मर पुरीषभक्षणशील विस्मर तत्र मनसिकारं मा कार्षीः ॥

मांसप्रियोऽहमित्यादिना पुनरन्यथा परिहारमाह ।

मांसप्रियोऽहमस्येति[4] द्रष्टुं[5] स्प्रष्टुं च वाञ्छसि ।
अचेतनं स्वभावेन मांसं त्वं[6] कथमिच्छसि ॥ ५४

मांसं प्रियं यस्य । एषोऽहं मांसप्रियः । अस्यास्थिपञ्जरस्य । यदि वा । मांसस्य प्रियो मांसप्रियोऽहमस्येति पूर्ववत् । मांस-

---

1 M. Vyut. 189, 114 çiṅghāṇikā.
2 Ms. pramudhvā?
3 See P. W. sub voc. prasevaka (Sack); prasevikā only in the compound carma°.
4 Ed. M. °haṃ asmīti.
5 Minaev has spraṣṭum draṣṭum. So Tib. (24 b1) but see the Commentary.
6 Minaev has māṃsatvam—Tib. ça ni khyod gos mi ḥdod.

प्रियोऽहमस्य प्रिय इति यावत् । सापेक्षत्वेऽपि समासो गमक-
त्वात् । इत्येवं तत्प्रलोभात्प्रत्युपकारधिया वा द्रष्टुं स्प्रष्टुं च
वाञ्छसि । दर्शनं स्पर्शनं चाभिलषसि ॥ अचाह । अचेतनं
चेतन्यशून्यं मृत्पिण्डप्राय[1] । स्वभावेन प्रकृत्या । न तु पुनर्यथा-
परे वर्णयन्ति । चेतन्ययोगादचेतनमपि चेतनमभिधीयते । 5
तादृशं मांस त्वमचेतनस्वभावं कामुकः सन् कथमिच्छसि ।
तद्दृष्टौ[2] च मृत्पिण्डेऽपि स्यात् । तथा च सति भवानपि न
चेतनः स्यात् ॥

अस्ति तत्र चित्स्वभावं चित्तं । तेन तदिच्छामीति चेदाह ।
[105b] 10

यदिच्छसि न तच्चित्तं द्रष्टुं[3] स्प्रष्टुं च शक्यते ।
यच्च शक्यं न तद्वेत्ति किं तदालिङ्गसे मुधा ॥ ५५

यच्चित्तं चित्स्वभावमिच्छसि । तदरूपित्वाद्द्रष्टुं न शक्यते ।
यच्च मांसास्थिस्वभावं कडेवरं[4] द्रष्टुं च स्प्रष्टुं च शक्यते । न
तद्वेत्ति न जानाति । अचेतनत्वात् । अतः किमिति तदचेतन- 15
मालिङ्गसे आश्लिष्यसि । मुधेति निष्फलं । नैवालिङ्गितुमुचित-
मिति भावः । अन्यथा[1] लोष्टाद्यालिङ्गनप्रसङ्गः ॥

---

1 Mrtpinda = hjim-gon , infra, = hjim pai dum bu
2 Ms taddrstau Tib de bdod pa na = tadicchāyām
3 See p 308 n 5
4 The Ms has once only (in this chapter) the reading kalevara

किं चेदमप्यतिगर्हितमित्यादर्शयन्नाह ।

नामेध्यमयमन्यस्य कायं वेत्सीत्यनद्भुतं ।
स्वामेध्यमयमेव[2] त्वं तं नावैषीति विस्मयः ॥ ५६

अन्यस्य कायं यदमेध्यमय न वेत्सि तन्न किं चिदाश्चर्यं । युक्तमेव तदवेदनं परसंतानस्यात्मना व्यवहितत्वात् ॥ इदं पुनरतिशयेनाश्चर्यस्थान । यत्त्वस्यात्मनोऽमेध्यमयं त्व त कायं नावैषि । नावगच्छसि ॥

इदानीं शास्त्रकारस्तं संवेजयन्नाह[3] ।

विघनार्कांशुविकचं मुक्त्वा तरुणपङ्कजं ।
अमेध्यशौण्डचित्तस्य का रतिर्गूथपञ्जरे ॥ ५७

विघनार्कांशुभिर्विकचं विकसित । तादृशं तरुणपङ्कजं अभिनवसरोरुह हित्वा । अमेध्याभिनिविष्टचित्तस्य का रतिर्गूथपञ्जरे । न युक्तेति भावः ॥

पुनरन्यथा प्राह ।

मृदाद्यमेध्यलिप्तत्वाद्यदि न स्प्रष्टुमिच्छसि ।
यतस्तन्निर्गतं कायात्तं स्प्रष्टुं कथमिच्छसि ॥ ५८

---

1 The reading of the Ms. is possibly loṣṭra, a wrong reading according to P W

2 So L², M —Minaev has maya eva

3 tam saṃvejayann āha Tib (174 b5) de la skyo-bar mdzad pa

आदिशब्दादस्रादि । अशुचि अचितत्वात् । यदि स्प्रष्टुं न वाञ्छसि । यतः कायात्तदमेध्य निर्गतं निर्यातं त कायं कथमिच्छसि स्प्रष्टुं ॥

अथापि स्यात् । नायमुपालम्भो मम युक्तरूपो यतो न मे कश्चिदभिनिवेशोऽमेध्य इत्यचाह । 5

यदि ते नाशुचौ रागः कस्मादालिङ्गसे परं ।
अमेध्यक्षेत्रसंभूतं तद्बीजं तेन वर्धितं ॥ ५९

अमेध्यक्षेत्र मातुर्जठर । अनेकाशुचिस्थानत्वात् । तत्र संभूत समुत्पन्न । तद्बीज । तदेवामेध्य मातापितृशुक्रशोणितस्वभाव बीज यस्य तत्तथोक्त । तेन वर्धितमिति । तेनामेध्येन मातृ- 10 पीताशितस्य वान्तकल्पस्य रसेन वर्धितं गर्भस्थितमुपबृंहितं । बहिर्निर्गत[106a]मपि स्वयमशितपीतपरिपाकाशुचिरसेन । कस्मादालिङ्गसे परमिति संबन्धः । परं स्त्रीकडेवरं । इत्युपालम्भोऽस्त्येव भवतः ॥

अथाशुचिरागोऽहमिति पक्षस्वीकारः । तदाप्युपालम्भस्त- 15 दवस्थ एवेत्याह ।

अमेध्यभवमल्पत्वान्न[1] वाञ्छस्यशुचिं कृमिं ।
बह्वमेध्यमयं कायममेध्यजमपीच्छसि ॥ ६०

---

1 So Minayev —M amedhyabhavam eva tvam

पुरीषाद्यशुचिसम्भूत कृमिं प्राणकजातं न वाञ्छसि । कार्यं पुनर्मांहग्रामस्य बहुतराशुचिस्वभावमशुचिसम्भूतमपि पूर्वकर्मेणेच्छसि ॥

अथापि स्यात् । किमत्रोत्तर वक्तव्य । यतोऽहमपि यादृश-
5 स्तादृश तस्या. शरीरं । तेनाशुचेर्नाशुचिसंपर्को दोष.।[1] यादृशो यत्तस्तादृशो बलिरपीत्यत्राह ।

न केवलममेध्यत्वमात्मीयं न जुगुप्ससि ।
अमेध्यभाण्डानपरान् गूथघस्मर वाञ्छसि ॥ ६१

अयमिह महामोहस्य प्रभाव । यदात्मगतमेव तावदशुचि-
10 स्वभाव न विगर्हसि । प्रत्युतापरानशुचिकुम्भानभिलषसि । इति धिक् परामर्शविकलता । गूथघस्मरेति तिरस्कारवचनेन तस्यैव संबोधन ॥

इदानीं साक्षात्कायाशुचिस्वभावतां प्रतिपादयन्नाह ।

कर्पूरादिषु हृद्येषु शाल्यन्नव्यञ्जनेषु वा[2] ।
15 मुखक्षिप्तविसृष्टेषु भूमिरप्यशुचिमता ॥ ६२

एवं शुचिपवित्रवस्तून्यपि यदेकदेशनिष्यन्दसंपर्कादपवित्र-

---

1 See Col Jacob, Second handful of popular maxims, p 36
2 Minaev has çālyam na vyañjaneșu vā

स्वभावतां व्रजन्ति । आसतां तावत्तानि वस्तूनि तत्संसर्गाद्भूमि-
रपि शुचिस्वभावाऽशुचित्वं प्रयाति ॥

यदि प्रत्यक्षमप्येतदमेध्यं नाधिमुच्यसे ।
श्मशाने[1] पतितान्घोरान् कायान् पश्यापरानपि ॥ ६३

एवं तावदध्यक्षसिद्धोऽयं व्यवहारः । तथापि यदि नाधि- 5
मुच्यसे न सम्प्रत्येषि दृष्ट्वापि न श्रद्दधासीत्यर्थः । तदा श्मशाने
पूतिनिवासे कायान् पश्य । किम्भूतान् । घोरानिति । विखा-
दितकविनीलकविपूयकादिस्वभावतया[2] बीभत्सान् भयंकरान्
वा । अपरानिति । अतोऽधिकान्[3] ॥

किं च । प्रकृत्या विकृत एवायं सर्वदा कायो नाभिरति- 10
स्थानं युज्यत इत्यु[10 b]पदर्शयन्नाह ।

चर्मण्युत्पाटिते[4] यस्माद्भयमुत्पद्यते महत् ।
कथं ज्ञात्वापि तत्रैव पुनरुत्पद्यते रतिः ॥ ६४

उत्पाटिते वियोजिते । यस्मादिति कायात् । त्रासो
जायते महान् । किमेतदिति । एवं तत्स्वभावं विदित्वापि कथं 15
तस्मिन्नेव स्थाने भयस्थानत्वेनैकदा प्रतिपन्ने पुनरन्यदा जायते
रतिरभिष्वङ्गः ॥

---

[1] Patita = bor-ba

[2] See *M Vyut* 52, 1 2 6 (vinilakasaṃjñā etc, parts of the Aśubhabhāvanā) vipūyaka also in P W

[3] gzi'an yan zhes pa ni hdi bas lhag pao (Sol 175 b5)

[4] So Minaev, M, L[2] udghatite

स्यादेतत् । यदि नामाशुचिस्वभावता कायस्याध्यक्षसिद्धा । तथापि चन्दनादिसुरभिवस्तूपलिप्तोऽसौ कमनीयो भवति । इत्यत्राह ।

काये न्यस्तोऽप्यसौ गन्धश्चन्दनादेव नान्यतः ।
अन्यदीयेन गन्धेन कस्मादन्यत्र रज्यते[1] ॥ ६५

शरीरे निवेशितोऽप्यसौ गन्धः । चन्दनादिप्रसूतः । यद्वशात्काये कमनीयबुद्धिरुपजायते । चन्दनादेव केवलात् । नान्यत इति कायात् । अतः कस्मात्परकीयेन गन्धेन चन्दनसमुद्भूतेनान्यत्र यस्यासौ गन्धो न भवति । अत्राभिरतिः क्रियते ॥

अपि च । चन्दनादिसंस्कारोऽपि केवलात्मोपघाताय वर्तते न हितायेति प्रतिपादयन्नाह ।

यदि स्वभावदौर्गन्ध्याद्रागो नात्र शिवं ननु ।
किमनर्थरुचिर्लोकस्तं[2] गन्धेनानुलिम्पति ॥ ६६

स्वभावदौर्गन्ध्यात्सहजात्पूतिगन्धवत्त्वात् । अत्रेति काये । यदि रागो नोत्पद्यते तदा शिवं ननु कल्याणमेव स्यात् । एवं गुणसंभवेऽपि किं कारणमनर्थप्रियो लोकस्तं कायं गन्धेनानुलिम्पति । सर्वथा न युक्तमेतदित्यर्थः ॥

न चास्य संस्कारसहस्रेऽपि स्वभावान्यथात्वमस्तीत्याह ।

---

1 Minaev, rakṣyate — M L² rakṣyase Tib chags par byed

2 Minaev has lokas tad gandhena

कायस्यात्र किमायातं सुगन्धि यदि चन्दनं।

कायस्य स्वभावदुर्गन्धस्य किमायातं। किं भूतं। न किं चित्। सुगन्धि यदि चन्दनं। शोभनो गन्धोऽस्येति बहुव्रीहिसमासान्तादिन्[1]। तथापि न तस्य स्वभावप्रच्युतिरस्तीति भावः॥
अथ तद्गन्धात्तस्मिन् कमनीयतामुपादायाभिरतिरुत्पद्यते। 5
इत्यत्राह।

अन्यदीयेन गन्धेन कस्मादन्यत्र रज्यते॥ ६७

एवं च न विचक्षणता स्यादि[107a]त्यर्थः॥ केशादिसंस्कारद्वारेणाप्यनर्थहेतुरेवाय काय इति श्लोकद्वयेनोपदर्शयन्नाह।

यदि केशनखैर्दीर्घैर्दन्तैः समलपाण्डुरैः[2]। 10
मलपङ्कधरो नग्नः कायः प्रकृतिभीषणः॥ ६८
स किं संस्क्रियते यत्नादात्मघाताय शस्त्रवत्।
आत्मव्यामोहनोद्युक्तैरुन्मत्तैराकुला मही॥ ६९

दीर्घैः सहजावस्थितैरच्छिन्नैरित्यर्थः। दन्तैर्दशनैः। समलपाण्डुरैः दन्तधावनक्रमुकादिभिरसंस्कृतैः। मलपङ्कधरः। मल 15
एव पङ्कः कर्दमः। त धारयतीति तथा स्नानाभ्यञ्जनादिविरहात्। नग्न इति वस्त्रविविक्तत्वात्। यथा जात इवाव-

---

[1] See Pāṇini, 5 4 135
[2] Minaev has pāṇḍaraiḥ, M has pāṇḍaraiḥ

स्थितः । [1]तथाभूतः सन् । यदि कायः प्रकृत्या भीषणः प्रेतानामिव स्वभावेन भयंकरः ॥

स एवंभूतः किमिति सत्क्रियते । यत्नादिति । केशनखादिरचनाविशेषैः । दन्तधावनताम्बूलादिभिः । स्नानाभ्यञ्जनानुलेपनादिभिः । वस्त्रादिभिर्वा । किमिव । आत्मघाताय शस्त्रवत् । आत्मनो वधार्थं खड्गादिर्यथा संस्क्रियते । तद्वत् ॥

इत्येषां मोहवशीकृतं विचेष्टितं परिदेवयन्नाह । आत्मेत्यादि । आत्मनैव संचिन्त्यात्मनो व्यामोहमुत्पादयितुं यत्नवद्भिरुन्मत्तैरस्वस्थचित्तैः । एवं च विपरीतकर्मानुष्ठानान्नैते वराकाः[2] सचेतस इति खेदं करोति शास्त्रकारः । न चात्र कश्चिदात्मज्ञो दृश्यत इत्युन्मत्तैराकुला समाकीर्णा मही पृथिवीति ॥

प्रासङ्गिकं परिसमाप्य प्रकृतमनुबध्नन्नाह ।

कङ्कालान् कतिचिद्दृष्ट्वा श्मशाने किल ते घृणा ।
ग्रामश्मशाने रमसे[3] चलत्कङ्कालसंकुले ॥ ७०

शवानामस्थिपञ्जरान् । कतिचित् प्रतिनियतान् । एतदुक्तं भवति । चर्मणुत्याटित[4] इत्यादिकमुक्त्वा यदुक्तं कथं ज्ञात्वापीत्यादि । तत्र परस्योत्तरं । न श्मशानगतकलेवरसादृश्यमस्य

---

1 Ms yathā.
2 Ms has naite vakarāh In margin to varākāh
3 L², M ramate.
4 VIII 64

येन तस्मिन्नेवात्रापि रतिर्न स्यात्। किं तर्हि श्मशाने तस्य घृणास्थानत्वात्। नात्रेति। [107b][1] अत्राभिधेयकङ्काला-
नित्यादि ग्रामश्मशान इति। नैवात्र कश्चिद्विशेषोऽस्ति। तदेव शरीरं श्मशाने घृणास्थानं ग्रामे वाऽभिरतिस्थानमिति काका
ब्रूते[2]। नैतद्विचक्षणधियां[3] समायुक्तमिति भावः। चलत्क- 5
ङ्कालसंकुल इत्यनेनैतद्दर्शयति। एतावांस्तु विशेषो न चानेन विशेषेणाशुचिस्वभावता घृणाहेतुर्निवर्तते येन प्रवृत्तिरियं
स्यादिति। संकुल इति समाकीर्णे॥

भवतु नामेदृशमशुचिस्वभावमपि सूकराणामिवाभिरति-
स्थानं। तथा चैवंविधमपि द्रविणविकलस्य नैतत्सुलभमित्यु- 10
पदर्शयन्नाह।

एवं चामेध्यमप्येतद्विना मूल्यं न लभ्यते[4]।
तदर्थमर्जनायासो नरकादिषु च व्यथा॥ ७१

विना मूल्यं द्रव्यमन्तरेण न लभ्यते न प्राप्यते। अतस्तद-
र्थिनां प्रथमतो धनमेवार्जनीयं। तदर्जनेनायासात्। कृषीवणि- 15
ज्यसेवादिसमाश्रयेण परिश्रमादिहैव दुःखमुपजायते। अध-
र्मेण चोपार्जनान्नरकादिषु। इत्युभयलोकेऽनर्थहेतुरेव तदर्जनं।

---

[1] Tib hdir brjod pai-bya ba ni rus-gon zhes..
[2] Tib hdri-ba = precchati
[3] Ms dhiyām samatāmapi yuktam. Tib mkhas-pai blo-can gyis mñam-par rigs so
[4] So L[2], M., Minaev labhyase

नापि तत्सुखप्राप्तिरस्ति। दुःखमेव तु केवलं तदर्जनेनेति प्रतिपादयन्नाह।

शिशोर्नार्जनसामर्थ्यं केनासौ यौवने सुखी।
यात्यर्जनेन तारुण्यं वृद्धः कामैः करोति किं॥ ७२

5 बालावस्थावस्थितस्य न धनोपार्जनशक्तिरस्ति। बालत्वादेव। केन धनेन प्रकारेण वासौ बालो यौवने युवावस्थायां सुखी स्यात्। धनविकलत्वान्न कचिदित्यर्थः। यदपि कस्य चित्पितृपितामहोपार्जितधनेन यौवने सुखित्वं दृश्यते। तदपि प्रतिनियतस्यैव न सर्वस्य। न चापि पूर्वोक्तदुःखद्वयादिमुच्यतेऽसौ। 10 अतो धनार्जनमुपादेयमादौ सुखसाधनोपायत्वात्। तदर्जयत एव गलितवयसो न कश्चिदुपयोगो वि[105a]षयैरिति॥

अथापि स्यात्। तदर्जयतापि कामसुखमनुभूयत एवेत्यचाह।

के चिद्दिनान्तव्यापारैः परिश्रान्ताः कुकामिनः।
15 **गृहमागत्य सायाह्ने शेरते स्म मृता इव॥ ७३**

के चित्कुत्सितकामाक्षिप्तचेतसः काष्ठतृणपत्त्राद्याहरणभृतिकर्मक्रियालक्षणैर्दिनपर्यन्तव्यापारैः परिखिन्नकायमनसो निरुत्सुकाः। अस्तंगते सवितरि स्वगृहमागत्य गाढनिद्राक्रान्तत्वात् मृतकल्पाः शेरते स्म स्वपन्ति। प्रभाते पुनरुत्थाय तत्रैव 20 नीचकर्मणि युज्यन्ते। स्मशब्दोऽत्र वाक्यालंकारेऽतीतार्थाविष-

यत्नात्[1] । एवमायुःसंस्कारान् केचित्कुकामिनः क्षपयन्ति न च कामसुखास्वादमुपलभन्ते ॥

परसेवकानधिकृत्याह ।

दण्डयात्राभिरपरे प्रवासक्लेशदुःखिताः ।
वत्सरैरपि नेक्षन्ते पुत्रदारांस्तदर्थिनः[2] ॥ ७४ 5

अपरे पूर्वकेभ्योऽन्ये कुकामिनः सेवका इत्यर्थः । ते दण्डयात्रादिभिः । दण्डोऽपरचक्रविजयाय यात्रा प्रयाणं । परराष्ट्रद्रव्यग्रहणाय वा यात्रा । तदादिर्येषां देशान्तरप्रेषणादीनां । तैः प्रवासो देशान्तरगमनं । तेन क्लेशः परिश्रमः । तेन दुःखिताः पीडिताः । सर्वदा तथाभूता वत्सरैरपि । अनेकवर्षात्ययेऽपि । पुत्रान्दारांश्च नेक्षन्ते न पश्यन्ति । तदर्थिन इति तैः पुत्रदारादिभिरर्थिनस्तदभिलाषकाः । तदर्थमेव परसेवादिस्वीकारादित्यर्थः ॥ 10

अहो वतामीषां निष्फलमनुष्ठानमिति शोचयन्नाह ।

यदर्थमिव विक्रीत आत्मा कामविमोहितैः[3] ।
तन्न प्राप्तं मुधैवायुर्नीतं[4] तु परकर्मणा ॥ ७५ 15

यदर्थं सुखप्रतिलम्भनिमित्तं । विक्रीतः परदासीकृत आत्मा

---

1 According to the Tib (Fol 178 a1) atitārtha , smaṣabda = gyur ces-pai sgra

2 Mss putrandarāms

3 See Comm and stanza FF

4 Minaev mudhaiv vāyur , M yunaivāyun°

कामविडम्बितैः । तच्च प्राप्तं । तदिति सुखं न प्राप्तं । न प्रतिलब्धं । आयुःसंस्कारा एव हि केवलमनर्थकं परकर्मानुष्ठानेन चयमुपनीताः । न साधुकर्मणि क्व चिदपि योजिता इति भा[108b]वः ।

5 सुखलिप्सया प्रवृत्तानां प्रत्युत दुःखमेवापतितमेषामित्युपदर्शयन्नाह ।

विक्रीतस्वात्मभावानां सदा प्रेषणकारिणां ।
प्रसूयन्ते स्त्रियोऽन्येषामटवीविटपादिषु ॥ ७६

सुखबुभुक्षयाऽन्येषु विक्रीतः परायत्तीकृतः स्वात्मभावः 10 स्वकायो यैस्ते तथा । तेषामन्येषां सेवकानामित्यर्थः । अत एव सदा प्रेषणकरणशीलानां । अन्येषामपरेषां प्रभुप्रयोजनेन गच्छतां । मार्ग एव प्रसूयन्ते स्त्रियः । अटवीविटपादिषु । आदिशब्दात्पर्वतनितम्बनदीकूलादिषु कष्टस्थानेषु ॥

अयमपरो विपर्यासस्तेषामिति प्रतिपादयन्नाह ।

15 **रणं जीवितसंदेहं विशन्ति किल जीवितुं ।**
मानार्थं दासतां यान्ति मूढाः कामविडम्बिताः ॥७७

विक्रीतस्वात्मभावाः संग्रामं चतुरङ्गसंघट्टं[1] प्रविशन्ति । किंभूतं जीवितसंदेहं । तत्र प्रविष्टस्य जीवितं स्याद्वा न वेति जीवितस्य संदेहोऽस्मिन्निति कृत्वा । जीवितुमिति जीवनार्थं । 20 अत्र प्रतिलम्भैर्जीविकां कल्पयिष्याम इति मत्वेत्यर्थः ।

---

[1] New expression

मानार्थं दासतां यान्ति । बलवता केन चिदभिभूताः स्वमा-
नोद्धरणार्थं[1] । अङ्गुलीच्छेदवेलाग्रहणसेवादिस्वीकारात् । मूढा
मोहान्धीकृतविवेकचक्षुषः । के ते । कामविडम्बिताः कामाय
कामेन वा विडम्बितास्तिरस्कृताः ॥

इहैव जन्मनि कामासक्तचेतसां यद्दुःखं दृश्यते तत्कथयन्नाह । 5

छिद्यन्ते कामिनः[2] के चिदन्ये शूलसमर्पिताः ।
दृश्यन्ते दह्यमानाश्च हन्यमानाश्च शक्तिभिः ॥ ७८

परदारधनापहरणादेः । शेषः सुबोधः ॥ किं चायं सुख-
साधनत्वेनोपादीयमानोऽपि चानर्थपरंपराप्रसूतिहेतुरेवार्थः ।
इति कथयन्नाह । 10

अर्जनरक्षणनाशविषादैर्
अर्थमनर्थमनन्तमवेहि ।
व्यग्रतया धनसक्तमतीनां
नावसरो भवदुःखविमुक्तेः ॥ ७९

अर्जनमनुत्पन्नस्योत्पादनं दुःखं । उपार्जितस्यापि रक्षणं जला- 15
नलादिभ्यः[3] पञ्चप्रत्यवायेभ्यः परिपालनं कष्टतरं । तथा रक्षित-

---

1 Ms manoıddharana—Tıb ran gı na-rgyal dbyun baı phyn (178b 6)

2 So L² M —Mınaev has kımena

3 The oııgınal ıeading of the Ms appeaıs to be pañcapıatyayavāyo-bhyah, by a second hand pıatyayāyebhyah Tıb (179 a 3) chus (?) za-baı byed pa lna las

[109a]स्यापि कथं चित्तस्करादिभिर्नाशादिविषादो दौर्मनस्यं परितापहेतुरनर्थः । तदेवमनर्थपरंपरानिदानत्वात् कारणे[1] कार्योपचारादर्थ एवानर्थ उक्तः । इत्येवमर्जनादिभिः सर्वदा व्याकुलत्वात् । धनासक्तचेतसां क्षणमपि समाधानानवकाशत्वात् ।
5 नावसरः [2]संसाराश्रितजात्यादिदुःखनिर्मोक्षाय सदा तद्गतमनसिकारैरेवायुःसंस्काराणां क्षपणात् ॥

सर्वमेतदुपसंहृत्य कामासङ्गपरित्यागाय संवेगकथया प्रोत्साहयत्येवमित्यादिना ।

एवमादीनवो भूयानल्पास्वादस्तु कामिनां ।
10 शकटं वहतो[3] यद्वत्पशोर्घासलवग्रहः ॥ ८०

एवमित्युक्तप्रकारपरामर्शः । आदीनवोऽनर्थः । भूयाननेकप्रकारः । न चात्र सुखोत्पादवार्त्ताप्यस्ति । यदपि विपर्यासात्कथं चित्सुखमिति प्रतिभासते । तदपि न किं चित् । गुरुतरभाराक्रमणपरिक्लान्तवपुषः पशोरिव घासलवग्रासग्रहणं ॥

15 तस्यास्वादलवस्यार्थे यः पशोरप्यदुर्लभः ।
हता दैवहतेनेयं क्षणसंपत्सुदुर्लभा ॥ ८१

तस्यैवंभूतस्यातितुच्छस्य सुखास्वादलेशस्य पशोरपि साधा-

---

[1] M Vyut
[2] So Ms —āçrita = āçrita = bi tan pa
[3] Minaev çakaṭavāhano yadvat...

रणस्यार्थे । तस्य निमित्तं । इयं क्षणसंपत् । अष्टाक्षणविनिर्मुक्ता । हता विनाशिता । वृथाकृतेत्यर्थः । किंविशिष्टा सुदुर्लभा व्याख्याता[1] । केन दैवहतेन । दैवं पुरातनं कर्म । तेन हता । हिताहितपरिज्ञाने विपर्यस्तमतिः कृतो विमोहित इत्यर्थः । वस्तुतस्तु तिरस्कारवचनमेतत् । भागविहीन एवमुच्यते ॥ 5

अवश्यं गन्तुरित्यादिना श्लोकद्वयेन विपर्यासरूपतामेव प्रतिपादयति ।

> अवश्यं गन्तुरल्पस्य नरकादिप्रपातिनः
> कायस्यार्थे कृतो योऽयं सर्वकालं परिश्रमः ॥ ८२ 10

अवश्यं गन्तुरित्यनित्यतयाऽस्थिरस्वभावस्य । अल्पस्य । [2]लोकोत्तरकायमपेक्ष्यातिदूरतरं नि:कृष्टस्य । नरकादिप्र[109b]पातिन इत्यपरमितदुःखभागिनः[3] । स्वसुखोत्पादनेऽप्यसमर्थस्येत्यर्थः । कायस्यात्मशरीरस्यार्थे[4] सुखोत्पादनाय । योऽयं नरकादिदुःखमविगणय्य कृतः सर्वकालं संसारस्य पूर्वस्यां[5] कोटौ 15 परिश्रमः प्रयासः ॥

---

[1] See I. 4.

[2] Tib = lokottaram apekṣya = ḥjig rten ḥdas-pa la bltos nas.

[3] Parimita (dpag tu med pa), of course, is correct but the wrong writing is of frequent enough occurrence to be kept into consideration.

[4] Ātmaçarīra = raṅ gi lus = svakāya.

[5] Snar byas pa bye bar (bye ba = 10,000,000.)

ततः कोटिशतेनापि श्रमभागेन बुद्धता ।

ततस्तस्मात्परिश्रमात् । [कोटिशते]नापि परिश्रमभागेनांशेन बुद्धत्वं स्यात् । तदपेक्षयात्यल्पीयसा आयासबलेन बुद्धत्वं स्यात् । तथापि तदर्थं मन्दबुद्धयो नोत्सहन्त इत्यर्थः ॥ अथ बोधि-
5 चर्या[या]मपि चरतोऽनेकदुष्करशतसमारम्भादतिशयवद्दुःखसह-समुत्पद्यत एवेत्यचाह ।

चर्यादुःखान्महद्दुःखं सा च बोधिर्न कामिनां ॥ ८३

चर्यादुःखमपेक्ष्येदमेव महद्दुःखं यत्कामार्थं चरतां संसारे तेषामवीच्यादिनरकपतनात् । पारतन्त्र्येण दीर्घकालमनुभव-
10 नाच्च । न तु बोधिसत्त्वानां प्रतिनियतकालं स्वेच्छया तदनु-भवतां । तदेवं दुःखमनुभवतामपि कामार्थं कामिनां सा च बोधिर्न भवति या बोधिसत्त्वानां परार्थं दुःखमनुभवता-मित्यर्थः ॥

पुनर्विशेषेण कामनिदानदुःख प्रतिपादयन्नाह ।

15 न शस्त्रं न विषं नाग्निर्न प्रपातो न वैरिणः ।
कामानामुपमां[1] यान्ति नरकादिव्यथास्मृतेः ॥ ८४

अमी शस्त्रादयो दुःखजनकत्वेन प्रसिद्धा न सादृश्यं भजन्ते प्रति कामानां । कस्मात् । नरकादिदुर्गतिदुःखस्यागमात्प्रति-

---

1 Minaev has kāminām

पन्नस्य स्मरणात् । स्मरणेनामुखीकरणात् । शस्त्रादयो हि नियतकालं मरणमात्रदुःखदायकाः । कामास्तु दीर्घकालिकतीव्रनरकादिदुःखहेतव इति कीदृशा तैरेषामुपमा भवेत् ॥

तदेवं कायविवेकानन्तरं चित्तविवेकं प्रतिपाद्य प्रकृते योज[110a]यितुमाह । 5

एवमुद्विज्य कामेभ्यो विवेके जनयेद्रतिं ।

कामेभ्यो भयहेतुभ्यः । एवमुक्तक्रमेण उद्विज्य संत्रासं कृत्वा पूर्वोक्तविवेके रतिमभिरतिमुत्पादयेत् । कुत्र स्थित्वा । तत्राह ।

कलहायासशून्यासु शान्तासु[1] वनभूमिषु ॥ ८५

प्रतिद्वन्द्विनामभावात्कलहायासशून्यास्ताः । व्याड़मृगसरी- 10 सृपतस्करादिविरहाच्च रम्याः । तत्रानुशंसामाह ।

धन्यैः शशाङ्ककरचन्दनशीतलेषु
रम्येषु हर्म्यविपुलेषु शिलातलेषु ।
निःशब्दसौम्यवनमारुतवीज्यमानैः
चङ्क्रम्यते परहिताय विचिन्त्यते च ॥ ८६

धन्यैः सुकृतिभिः । शशाङ्कस्य चन्द्रमसः करा रश्मय एव शुक्लताशैत्यसाधर्म्याच्चन्दनानीव तैः । शीतलानि यानि शिला-

---

[1] So Mss and Tib translation of the text (25 b3)—According to Commentary ramyāsu.

तलानि तेषु चङ्क्रम्यत इति संबन्धः। किंविशिष्टेषु । प्रकृत्यैव शुचिपविचेषु कर्कशादिदोषरहितेषु च। हर्म्यविपुलेषु । धवलगृहवद्विस्तीर्णेषु। कीदृशैः सद्भिश्चङ्क्रम्यते । निःशब्दैः प्रतिकूलशब्दविरहितैः । सौम्यैरनुत्कटैः सुखसंस्पर्शैरित्यर्थः । वनमारुतैः
5 वनपवनैः । वीज्यमानास्तैश्चङ्क्रम्यत इति परावृत्त्या[1] पुनः पुनर्मन्दं भ्रम्यते। न केवलं चङ्क्रम्यते । किं तु परहिताय सत्त्वानां सुखोत्पादनाय विचिन्त्यते॥ सर्वमेतदयत्नमिद्धं योगिनां। कामिनां तु प्रयत्नसाध्यं । तदनेनैश्वर्यसुखादि शिष्यते॥

विवेकसुखमित्युपदर्शितं भवति॥ इदमपरमसाधारणं सुखं
10 विवेकविहारिण इत्युपदर्शयन्नाह ।

> विहृत्य यच क्व चिदिष्टकालं
> शून्यालये वृक्षतले[2] गुहासु।
> परिग्रहरक्षणखेदमुक्तः
> चरत्यपेक्षाविरतो यथेष्टं॥ ८७

15 सुबोधं॥ स्वच्छन्दचारीत्यादिना कथितमेवार्थं व्यक्तीकरोति ।

> स्वच्छन्दचार्यनिलयः प्रतिबद्धो न कस्य चित् ।
> यत्संतोषसुखं भुङ्क्ते तदिन्द्रस्यापि दुर्लभं॥ ८८

---

[1] P W has only the meaning *Wiederkehr* in the compound aparāvṛtti

[2] Minaev has *talam*, but L[2], M *tale*.

स्वस्यात्मनः छन्दोऽभिलाषः । तेन चरितुं शीलमस्येति स्वेच्छाचारीत्यर्थः ॥

इति विवेकगुणानभिधाय प्रकृतमभिधित्सुराह[1] ।

एवमादिभिराकारैर्विवेकगुणभावनात् ।
उपशान्तवितर्कः सन् बोधिचित्तं तु भावयेत् ॥ ८९[2] 5

एवमिति पूर्वोक्तैः । आदिशब्दादन्यैरप्येवंविधैराकारैः । वि[110b]वेकस्य कायिकचैतसिकस्य गुणानां भावनात् । इति हि सर्वसुखसंपत्तिहेतुर्विवेक इति चेतसि पुनःपुनरामुखीकरणाद्धेतोः उपशान्तो वितर्कोऽसन्मनसिकारो यस्य स तथाभूतः सन् बोधिचित्तं तु भावयेत् । एव परिशुद्धे चेतसि 10 भाव्यमानं बोधिचित्तं प्रकर्षपदमधिरोहतीति विशेषं तुशब्देन दर्शयति ॥

तच यावदेकत्वं परेषु नात्मना क्रियते न तावत्परहितसुखाय सम्यक् चित्त चलति[3] । आत्मग्राहस्यात्मन्येव विशेषेण प्रवृत्तेः । अतोऽस्य निवृत्तये । 15

परात्मसमतामादौ भावयेदेवमादरात् ।

आदौ प्रथमतः । पश्चात्परात्मपरिवर्तनमिति भावः[4] ।

---

[1] Abhidhitsu, not in P W

[2] Compare this line and the following one (90 a) with *Çikṣās*, 357 16.

[3] So Ms

[4] Parātmasamata, VIII 90 113, parātmaparivartana, VIII 113

एवमिति वक्ष्यमाणनीत्या । आदरादिति महताभिनिवेशेन ॥

तथा[1] एवाकारं दर्शयति ।

समदुःखसुखाः सर्वे पालनीया मयात्मवत् ॥ ९०

सत्त्वो नामैषां कश्चिद्विशेषो ऽस्ति । अतो यथा मम दुःखं
5 बाधकं तथैषामपि । यथा मम सुखमनुग्राहकं तथैषामपि ।
इति तुल्यदुःखसुखाः सर्वे प्राणिनो भवन्ति । तस्मात्पालनीया
मयात्मवत् । यथात्मा दुःखाद्दुःखहेतोर्वा समुद्ध्रियते । तथान्येऽपि
सत्त्वाः समुद्धरणीयाः । यथात्मा सर्वथा सुखीकर्तुमिष्यते
तथान्येऽपीति परिपालनीया आत्मवत् ॥

10 ननु कथमात्मनानेकप्रकारगतिभेदभिन्नानां सत्त्वानामेकत्वं
सेत्स्यति । अभिन्नदुःखसुखस्वभावत्वं च कथं । इत्यत्राह ।

हस्तादिभेदेन बहुप्रकारः
काया यथैकः परिपालनीयः ।
तथा जगद्भिन्नमभिन्नदुःख[2]-
15 सुखात्मकं सर्वमिदं तथैव ॥ ९१

करचरणशिरःप्रभृतिभेदादनेकप्रकारः कायो यथैकत्वेना-
ध्यवसितः परिपालनीयो भवति दुःखनिवर्तनात्सुखोपधानाच्च ।

---

[1] Parātmasamatāyaḥ

[2] Minaev has duḥkham

तथा जगत्सत्त्वलोकः[1]।[2] अभि[111a]न्नमेकत्वेनाध्यवसितमात्मनः परिपालनीयं भवति। अभिन्नदुःखसुखात्मक च लुप्तचकारो निर्देशः। तथैव हस्तादिभेदवदेव सर्वमिदमिति बहुप्रकार-गतिभेदभिन्नमपि।

अयमभिप्रायो। यथाभ्यासादेकत्वाध्यवसायोऽस्मिन् काये एकत्वमन्तरेणापि। तथानेकप्रकारे जगत्यपीति न कश्चिद्विशेषः॥ 5

स्यादेतत्। यदि भवता सह जगदेकस्वभाव तदा कथमिव भवतो दुःखमन्यसन्तानेषु न बाधकं स्यात्। एव विपर्ययेऽपि योज्यमित्याशङ्क्याह।

यद्यप्यन्येषु देहेषु मद्दुःखं न प्रबाधते। 10
तथापि तद्दुःखमेव[3] ममात्मस्नेहदुःसहं॥ ९२

अन्येष्वपरेषु शरीरेषु मम दुःख यदि नाम प्रबाधकं न भवति। तथापि तद्दुःखमेव मम[4]। कुतः। आत्मनि स्नेहेन दुःसह [सोढु]मशक्य। हेतुपदमेतत्। अंशेन प्रवृत्तावपि दुःखस्वभावतां न मुञ्चतीत्यर्थः। एव विपर्ययोऽपि व्याख्येयः॥ 15

तथा यद्यप्यसंवेद्यमन्यद्दुःखं मयात्मना।[5]
तथापि तस्य तद्दुःखमात्मस्नेहेन दुःसहं॥ ९३

---

1 Sattvaloka opposed to the bhājanaloka

2 So Ms and Tib

3 L³ has the scholion tasya duḥkham (tad duḥkham = tan mama duḥkham) — Tib inaccurately de-lta na de-dag sdug bsṅal de bdag gi hen-pas mi bzod-ñid

4 Sdug-bsṅal de ñid bdag gi yin no (182a 3)

5 This line, in the Tib (25 b7) = the second line of 92, but for the last words bzod-par dka

12

अतः स्वपरविशेषमपास्य दुःखस्वभावतैव निवर्तनहेतुः । अत आह ।

मयान्यदुःखं हन्तव्यं दुःखत्वादात्मदुःखवत् ।

यद्यद्दुःखं तत्तन्मया हन्तव्यं । यथात्मदुःख । दुःखं चेदमन्य-
5 सत्त्वदुःखमिति स्वभावहेतुप्रयोगः । दुःखस्वभावतामात्रभाविनी हन्तव्यता[1] । न चासिद्धता हेतोः । अविशेषेण दुःखस्वभावतायाः प्रसाधितत्वात् । न चाप्यनैकान्तिकता । आत्मदुःखस्यापि हन्त-व्यता न स्यादविशेषादिति विपर्ययबाधकं । विरुद्धताप्यत एव न स्यात् ॥

10 तथायमपरः प्रयोगः ।

अनुग्राह्या मयान्येऽपि सत्त्वत्वादात्मसत्त्ववत् ॥ ९४

ये सत्त्वास्ते सर्वे मयानुग्राह्या यथात्मसत्त्वः । सत्त्वाश्चान्येऽपि प्राणिन इति स्वभावहेतुरेव । सत्त्वात्मकतामात्रभाविन्यनुग्राह्य-स्वभावताच । अयमपि नासिद्धः सत्त्वात्मकता[111b]याः पक्षे
15 प्रसिद्धत्वात् । आत्मनो ऽनुग्राह्यताऽभावप्रसङ्गेनानैकान्तिकोऽपि न स्यात् । पूर्ववच्च विरुद्धः ॥

नन्वस्ति विशेषोऽन्यस्मादात्मनि सुखाभिनिवेशो नाम । तथा ततोऽयमनैकान्तिको हेतुरिति । अत्राह ।

यदा मम परेषां च तुल्यमेव सुखं प्रियं ।
20 **तदात्मनः को विशेषो येनात्रैव सुखोद्यमः ॥ ९५**

---

[1] See *Nyāyabindu* p 104 14.

तुल्यमेव सममेव सुखं प्रियमिष्टं। तदात्मनः परस्मात्को विशेषो। नैव कश्चित्। येन तत्रैवात्मन्येव सुखोत्पादनाय तात्पर्यं न परस्मिन्नित्यर्थः॥

प्रथमे हेतावनैकान्तिकतां परिहरन्नाह।

यदा मम परेषां च भयं दुःखं च न प्रियं। 5
तदात्मनः को विशेषो यत्तं रक्षामि नेतरं॥ ९६[1]

भयमिति दुःखहेतुः। नेतरमिति नान्य॥

स्यादेतत्। यदि नाम दुःखात्मकता न विशिष्यते तथापि यस्य दुःखेन बाधा स्यात् स एव रक्षितुमुचितो नान्य[2] इत्याह।

तद्दुःखेन न मे बाधेत्यतो यदि न रक्ष्यते। 10
नागामिकायदुःखान्मे बाधा तत्केन रक्ष्यते॥ ९७[3]

तस्य परस्य दुःखेन मम बाधा पीडा नास्तीत्यतोऽस्मात्कारणाद्यदि न रक्ष्यतेऽन्यः। तदाऽपरमिदं व्याहतं स्यात्। यतो नागामिनः कायस्य परलोकभाविनो नरकादिजातस्य दुःखात्मकस्य [दुःखान्मे] तस्योपात्तस्य[4] कायस्य काचिद्बाधा 15

---

[1] First kārikā of the Çikṣāsamuccaya see Çi p 2, l 10 and Additional Notes (quoted supra ad III 21, p 87)

[2] Ms syāt sādhava rakṣitum ucitā nānya iti

[3] = Çikṣās, 358, 14 varia lectio rakṣasi— So 12

[4] Ms first hand duhkhātmā ityasyopāttasya, second hand duhkhātmakasyopāttasya—Tib (fol 182 b7) does not support my conjecture sdug-bsṅal gyi bdag ñid (?) hdir skyes pa lus po hdi la cun zad kyan gnod par mi srid do (duhkhātmakasya tasya ihajātasya kāyasya)

संभवति[1] तस्यान्यत्वात्। इति[2] लोकोक्तौ तस्मादर्थे वा। यत एवं तस्मात्केनाभिप्रायेणासौ रक्ष्यते। काय इति प्रकृतत्वात्। पापान्निवर्तनात् कुशले प्रवर्तनाच्च॥

अथापि स्यात्। अहमेक एव सर्वदा। तेनात्र भिन्नत्वं
5 नास्ति शरीरयोः। नायं दोष इत्यत्राह।

अहमेव तदापीति मिथ्येयं परिकल्पना।

आत्मनो निराकरिष्यमाणत्वात्। निरस्तत्वाच्च लेशतः[3]। तत्कोऽयमहंप्रत्ययस्य विषयो[4] भविष्यति। तस्मादहंप्रत्ययविषयस्य कस्य चिदेकस्याभावात्। मिथ्येय परिकल्पनाऽध्यवसायः। अहमेव तदापी[112a]ति भवान्तरेऽपि। मायोपमपञ्चोपा-
10 दानस्कन्धमात्रालम्बनत्वादस्य। इतीदमप्यध्यवसायवशादुच्यते। न तु पुनरस्य वस्तुतः किं चिदालम्बनमस्ति। विकल्पात्मकत्वात्॥ कुतः पुनरियं मिथ्याकल्पनेत्याह।

अन्य एव मृतो यस्मादन्य एव प्रजायते॥ ९८[5]

यदा नात्मादिः कश्चिदेकः परलोकगामी संभवति।
15 स्कन्धमात्रमेव केवलं। तदा न खलु यदेव स्कन्धपञ्चकमिह विनश्यति तदेव पुनरप्युत्पद्यते परलोके। अपि तु।

---

1 Ms kā cid badhā na sambhavati
2 Tib de zhes pa ni = tad iti
3 So Ms = çun zad bkag-pai yan phyir
4 Ms viçeṣa, Tib yul
5 *Çikṣās*, 358, 5 (anyas tatra prajāyate.)

अपूर्वमेव[1] पूर्वनिवृत्तौ तवेदंप्रत्ययताविशिष्ट क्लेशकर्माभिसंस्कृत-मन्तराभवसंतत्या[2] समुत्पद्यते। तस्मादनादिसंसारप्रवृत्तवितथ-विकल्पाभ्यासवासनावशादहंप्रत्ययो वितथ एवोपजायते ॥

किं च। इदमपर तत्र बाधकमिति। आह।

यदि यस्यैव यद्दुःखं[3] रक्ष्यं तस्यैव तन्मतं। 5
पाददुःखं न हस्तस्य कस्मात्तत्तेन रक्ष्यते ॥ ९९

आस्तां तावद्यदागमिकायदुःखरचार्थं न यतितव्यं। इहै-कस्मिन्नपि काये प्रत्यङ्गभेदाद्भिन्न दुःख। ततो यद्यान्यदुःख-मन्यस्य रचितुं न युज्यते। तदा कथ पादादौ प्रहारं पतन्त दृष्ट्वा हस्त प्रसार्य रच्यते। अन्यत्वाविशेषान्न युक्तमेतदित्यर्थः ॥ 10
अथ।

अयुक्तमपि चेदेतदहंकारात्प्रवर्तते।
यदयुक्तं निवर्त्यं तत्स्वमन्यच्च[4] यथाबलं ॥ १००[5]

अहकारोऽस्मिन् कायेऽहमित्यात्मग्रहादात्मनोऽभावेऽपि। प्रवर्त्तते। जायते पादादौ रचणमनसिकारः[6]। नैतत्साधु। यतो 15 यदयुक्तं। युक्त्या सगत न भवति। तन्निवर्त्यमपसार्य स्वकीयं

---

[1] Tibetan translates the word apurva in the middle of the compound antarabhava° (bar ma doi srid pa snu med par gyur)

[2] Antarābhavasamtati, see Journal Asiatique, 1902, II, p 295

[3] So L² —Minaev has tad duhkham

[4] So Minaev —L² and Çiksās anyadvā

[5] See Çiksās, 360-3, the second pāda being svātmany astitmatra na

[6] Ms has raksasi manasikārah

परकीयं च यथाबलं यथासामर्थ्यं । शक्तिवैकल्यादेव तदुपे-[f]क्षितुमुचितमिति भावः ॥

स्यादेतत् । यदि नामात्मादिर्नास्ति तथापि संतानो[1] नामैकः संभवति । तथा बहूनां करच[112b]रणादीनां समु-
5 दायः शरीरमेकं । तदेतद्द्वयं यथासंभवमिहलोके परलोके चात्मदुःखापहरणादेर्नियामकं भविष्यति ॥ ततोऽयमविशेषादि-त्यसिद्धो हेतुः । पूर्वकश्चानैकान्तिक इत्याशङ्क्याह ।

संतानः समुदायश्च पङ्क्तिसेनादिवन्मृषा ।[2]
यस्य दुःखं स नास्त्यस्मात्कस्य तत्स्वं भविष्यति ॥ १०१

10 संतानो नाम न कश्चिदेकः परमार्थसन् संभवति । किं तर्हि कार्यकारणभावप्रवृत्तक्षणपरंपराप्रवाहरूप एवायं । ततो व्यतिरिक्तस्यानुपलम्भात् । तस्मादेतेषामेव क्षणानामेकपदेन प्रतिपादनाय संकेतः कृतो बुद्धैर्व्यवहारार्थं संतान इति । इति प्रज्ञप्तिसन्नेवायं[3] । तेनात्राभिनिवेशो न कार्यः । अन्यथात्मना
15 किमपराद्धं येनासौ न स्वीक्रियते । एवं समुदायोऽपि[4] न समुदायिभ्यो वस्तुसन्नेको विद्यते । तस्य तेभ्यः पृथगनुपलब्धेः । तत्त्वान्यत्वविकल्पस्तस्यावयविविचारेणैव गत इति नेह प्रतार्यते । ततश्चायमपि संवृतिसन्नेव पूर्ववत् ॥

---

1 See Journal Asiatique, loc. cit.
2 = Çikṣās. 359, 14
3 Prajñaptisat, see Madhyamakavṛtti (Bibl. Buddhica) p. 28, n. 1
4 Ms. samudāyo 'pi

अनयोर्यथासंख्यमुदाहरणमाह । पङ्क्तिसेनादिवदिति[1] । पङ्क्तिवत्सन्तानः । सेनादिवत्समुदायः । आदिशब्दान्मालावनादयो गृह्यन्ते । यथानेकेषां पिपीलिकादीनां पूर्वापरभावेन व्यवस्थितानां स्वरूपमन्तरेण पङ्क्तिर्नास्ति स्रक्सूत्रवदेका । यदा[2] च हस्त्यश्वपदातिप्रभृतिभ्यो मिलितेभ्यो व्यतिरिक्ता नान्या सेना का चिदेका तत्रास्ति । तथा समुदायोऽपि । एतच्चान्यत्र विस्तरेण विचारितमिति नेह विचार्यते[3] । तस्मादवस्तुसदालम्बना[4]-भावान्मृषायं प्रत्ययः[5] । अर्थो वा । विचारासहत्वात् ॥

एवमात्मादेः स्वामिनः कस्य चिदभावाद्यस्य सदन्धि दुः[113a]ख स नास्ति । अतः कस्य तद्दुःख स्वात्मीयं भविष्यति । नैव कस्य चिदित्यर्थः ॥

ननु यद्यात्मादिर्नास्ति तदा कथमय दृष्टान्तो भविष्यति । आत्मवदिति[6] । आत्मसत्त्ववदिति च ॥ सत्यमेतत् । किं तु नेदं व्यसनितया[7] साधनमभिधीयते । किं तर्हि परस्यात्मग्रहाभिनिवेशनिवारणाय । तद्यदि परस्य निवृत्त एवात्मग्रहाभिनिवेशः । तदा न किं चित्प्रयोजनमनुमानप्रयोगस्य । अथ न निवृत्तः तदा तदभिप्रायेणैव स्वपरविभागं कृत्वा तत्प्रत्यायनार्थं[8]

---

[1] See Journal Asiatique, loc cit p 287, n 1
[2] gan gi tsho (fol 184 a 7)
[3] See IX 73
[4] dei phyir ltag tu dnos-par = nityavastu ālambana
[5] So Tib ges pa hdi ni.
[6] See VIII, 90 94
[7] So Ms and Tib (phons-pai sgo-nas).
[8] See *M. Vyut* 245 (712).

साधनं दृष्टान्तश्चोच्यते । इति न दृष्टान्तस्यासिद्धिर्व्यवहारप्रवर्तनाय[1] । किं चेदमुपात्तपञ्चस्कन्धमात्रमभिसंधाय[2] दृष्टान्ते दीयमाने[3] न का चित्क्षतिः । अत्रैवात्मशब्दस्य प्रवृत्तेरिति ॥

इदानीं प्रकृतमुपसंहरन्नाह ।

5 अस्वामिकानि दुःखानि सर्वाण्येवाविशेषतः ।
दुःखत्वादेव वार्याणि नियमस्तत्र किंकृतः ॥ १०२

न विद्यन्ते स्वामिनो येषामुक्तक्रमेणेति विग्रहः । अममानि न कस्य चित्प्रतिबद्धानीत्यर्थः । कुतः[4] । कि कानि चिदेव । न । सर्वाण्येवाविशेषतः । न क चित्कस्य चित्स्वामित्वमस्ति । विशेषा-
10 भावात् । दुःखत्वादेव स्वपर[ा]विभाग कृत्वा वार्याणि निषेध्यानि भवन्ति । नान्यन्निमित्तमस्ति तत्रात्मीयत्वादि । तेनाय नियमः किंकृतः । केन विशेषेण कृत. । येन स्वकीयानि च वार्याणि न परकीयाणीति । एवं दुःखत्वादिति हेतुरनैकान्तिको न भवतीति समर्थित ॥

15 ननु यदि दुःखी नाम न कश्चित्संसारे सभवति । तर्हि दुःखमनिवार्यमेव स्यात् । कृपापात्रस्य दुःखिनः कस्य चिद्भावादित्याशङ्कमान आह ।

---

1 thı sñıd la hjug par-bya baı don yın pas so= pıavartımāıthatvāt
2 upātta=zın pa
3 =mdzad pa
4 So Ms—Wanting ın Tıb (181 b7)

दुःखं कस्मान्निवार्यं चेत्सर्वेषामविवादतः ।
वार्यं चेत्सर्वमप्येवं न चेदात्मनि सर्ववत्[1] ॥ १०३

न[2] वा[113b]यमेव निरात्मकत्वादेव यदि मन्यसे तदा न युक्तमेतत् । कुतः । सर्वेषामविवादादविप्रतिपत्तेः । चार्वाकस्यापि स्वदुःखपरिहारेणैवेह प्रवृत्तेः । न च तेषामात्मनोऽभ्युपगमाद्दोषः । तत्स्वभावस्यानुपलब्धेः । न चाभ्युपगममात्रेण तस्य सत्ता प्रसिध्यति । तत्साधकप्रमाणाभावात् । बाधकस्य चानेकप्रकारस्याभिधानात् ॥ एवं सति यदि वार्यं दुःखं तदा सर्वं वार्यं । न चेत्सर्वं वार्यं तदात्मापि[3] । उपात्त[पञ्च]स्कन्धस्वभावमपि दुःखं न वार्यं । [4]सर्ववदविशेषादित्युपसंहारः ॥ 10

स्यादेतत् । करुणापरतन्त्रतया परदुःखदुःखिनः सर्वदुःखापहरणाय यत्नः । तदरं बहुदुःखनिदानं सैव[5] प्रथमतो नोत्पादयितुं युज्यत इति परवचनावकाशं शङ्कमान आह ।

कृपया बहु दुःखं चेत्कस्मादुत्पद्यते बलात् ।

बलादिति प्रयत्नात् । अत्रोत्तरमाह । 15

जगद्दुःखं निरूप्येदं कृपादुःखं कथं बहु[6] ॥ १०४

---

1 So Mss —de min bdag kyan sems can bzhin = na ced ātmapi sattvavat — See the commentary

2 Ms na kāryam

3 bdag-ñid kyan (185a 7)

4 sarvavad = thams cad bzhin du

5 saiva = karuṇāparatantratā

6 = Çikṣās 360, 6

जगतो दुःखं नरकादिकृतमनेकप्रकारं समीक्ष्य। इदं कृपा-कृतं दुःख कथं बहु। नेदं बहु कृपादुःखमिति भावः॥

किं चापरमिदमचोद्यमित्याह।

बहूनामेकदुःखेन यदि दुःखं विगच्छति।
5 उत्पाद्यमेव तद्दुःखं सदयेन परात्मनोः॥ १०५[1]

एकस्य पुरुषस्य दुःखेन बहूनां सत्त्वानां यदि दुःख विगच्छति निवर्तते। तदा उत्पाद्यमेव जनयितव्यमेतत्तादृशं दुःख। सदयेन कृपात्मकेन परस्यात्मनश्च॥

[2]उत्सूत्रतामस्य परिहरन्नाह।

10 अतः सुपुष्पचन्द्रेण जानतापि नृपापदं।
आत्मदुःखं न निहतं बहूनां दुःखिनां व्ययात्॥ १०६

यत एवोत्पाद्यमेव तद्दुःख कृपालुना स्वपरात्मनोः। अत एव सुपुष्पचन्द्रेण बोधिसत्त्वेन नृपादापदं। नृपस्य वा राज्ञ आपदं। जानतापि बुध्यमानेनापि। आत्मदुःख न निहतं न
15 निवर्तितं [114a] उपेक्षितमिति यावत्। तथा राज्ञोऽपि परलोकदुःखं। किमिति बहूनां दुःखिनां व्ययात्। दुःखस्येति

---

[1] See *Çikṣās* 281, 4 varam khalu punar aham eko duḥkhitaḥ syām na ceme sarvasatvā apāyabhūmiprapatitāḥ

[2] utsutra, *Nyayavārttikatātparyaṭīkā*, 431 7 —Abstract is new Tib brtage pa ni ma yin no zhes ..

प्रकृत षष्ठ्यन्ततया सबध्यते[1] । यदुक्तं सुपुष्पचन्द्रस्येतिवृत्तके[2] । तथा हि । अतीतेऽध्वनि रत्नपद्मचन्द्रविशुद्धाभ्युद्गतराजो नाम तथागतोऽभूत् । स भगवान् बुद्धकृत्यं कृत्वा चिरतरकालमवस्थाय परिनिर्वृतः । तस्मिंश्च परिनिर्वृते शासनान्तर्धानसमये राजा शूरदत्तो[3] नाम बभूव । तस्य रत्नावती नाम राजधानी । तस्मिन् काले दृष्टिविपन्नाः सत्त्वाः[4] । तेषामनुकम्पार्थं बहवो बोधिसत्त्वा उत्पन्नाः प्रव्रजिताः । ते च ततो राष्ट्रजनपदेभ्यो निर्वासिताः । समन्तभद्रं नामारण्यवनखण्डमुपसृत्य विहरन्ति स्म सार्धं सुपुष्पचन्द्रेण धर्मभाणकेन । अथ खलु सुपुष्पचन्द्रस्य बोधिसत्त्वस्य सत्त्वान् करुणायमानस्य रहोगतस्य चेतसि वितर्क उदपादि । यन्न्वहं जनपदराष्ट्रराजधानीर्गत्वा सत्त्वान् कुमार्गप्रपन्नान् कल्याणे वर्त्मनि प्रतिष्ठापयामि । स तमर्थं सब्रह्मचारिभ्यो निवेदयामास । तैर्निवार्यमाणोऽपि स्वयं च स्वापद प्रतिपद्यमानस्तस्य राज्ञोऽपि ततो वनखण्डान्निर्जगाम । स क्रमेण धर्मं देशयन् तस्य राज्ञो राजधानीमनुप्राप्तो बहून् सत्त्वान् राजपुत्रामात्यपुरोहितप्रभृतीन्प्रकार विनीय सत्पथे व्यवस्थाप-

---

[1] = bahūnāṃ duḥkhasya vyayārtham. The fourth pāda of the stanza is translated in Tib. (26 a 7) maṅ poi sdug bsṅal zad bgyur phyir = bahuduḥkhasya vyayārtham, or bahūnāṃ duḥkhavyayārtham.

[2] See Rājendralāl Mitra (*Buddhist Literature of Nepal*, p. 217) on *Samādhirāja* (Ch. xxxii) and Cowell's Cat. of Hodgson Coll., J. R. A. S. n. ser. viii, p. 6 (Ch. xxxv. Supuṣpa?).

[3] Rājendralāl Mitra has Śūradatta, but Tib. = dpa byin.

[4] blta ba log par gyur.

[5] So Ms.—Tib. ji ltar hdul bai thabs rnams pa du mas = yathāvinayam bahūpāyaiḥ.

यन् । तेन राज्ञा राजमार्गे दृष्टः । मद्दर्शनेन प्रकुपः सर्वं च जनकायं तद्दावर्जितं प्रतिपद्य ईर्ष्यादूषितहृदय । तद्वधार्थं स्वपुत्रानाज्ञापयामास । तांश्च तद्वधविमुखान् प्र[114b]तिपद्य नन्दिकं वध्यघातकमाज्ञापयामास । तेन तदाज्ञामनुवर्तमानेन करचरणादिच्छेदक्रमेणाचीणि च सदंशिकेनोद्धृत्य[1] जीविताद्व्यपरोपितः । अथ तस्य भिक्षो राजमार्गगतस्य जीविताद्व्यपरोपितस्य शरीरेऽनेकान्यद्भुतानि बभूवुः । तानि प्रतिपद्य स राजा निश्चित बोधिसत्त्व एवायं भिक्षुरिति परितापगतो बहुतरं परिदेवते स्म । इति सुपुष्पचन्द्रस्येतिवृत्तकं संक्षिप्य कथितं । विस्तरेण पुनः समाधिराजसूत्रे निर्दिष्टमिति तत्रैवावधार्यं ॥

न चापि कृपावतां परदुःखदुःखिनां महदपि दुःखं बाधकमिति प्रतिपादयन्नाह ।

एवं भावितसंतानाः परदुःखसमप्रियाः ।
अवीचिमवगाहन्ते हंसाः पद्मवनं यथा ॥ १०७[2]

एवं परात्मसमतया भावितसंतानाः । अनाभोगप्रवृत्तचित्तसंततयः । परदुःखेन सम तुल्यं प्रियं सुखहेतुर्येषां ते तथा[3] । आत्मसुखमपि परदुःखेन दुःखमेव येषामित्यर्थः ।

---

[1] See St Pet W (samdamçıkā).

[2] = Çıkṣās 360, 9 — Prof Bendall refers to Kārandavyūha, Ch II on which see Cowell, J of Philology, 1875, p 12 — Tib (second pāda) gzhan gyı sdug bsnal zhı dga bas [= Çamapriyah]

[3] = gzhan gyı sdug bsnal zhı-zhın ñams dga ba ste bde bai rgyu , = paraduhkham çamayıtva prītih sukhahetur

तेऽवीचिमवगाहन्ते परव्यसनसमुद्धरणाय तद्दुःखं सुखमेव मन्यमानाः। इदमेवाह। हंसाः पद्मवनं यथा। आवीचिकमपि दुःखं सुखमेव परार्थे येषां ते केन दुःखहेतुनान्येन दुःखिनो भविष्यन्ति॥

अपि च सुखमपि तेषामसाधारणमेवोपजायते परसुखेन। 5 इत्युपदर्शयन्नाह।

मुच्यमानेषु सत्त्वेषु ये ते प्रामोद्यसागराः।
तैरेव ननु पर्याप्तं[1] मोक्षेणारसिकेन किं॥ १०८[2]

दुःखबन्धनादिभ्यो मुच्यमानेषु सत्त्वेषु सत्सु। ये ते इति। तेषामेवानुभवसिद्धत्वादिदंतया कथयितुमशक्याः। अत एव 10 प्रामोद्यसागराः संतुष्टिसमुद्राः कृपावतां सतानेषु प्रादुर्भवन्ति। तैरेव प्रामोद्यसागरैः। पर्याप्त तदन्यसुखवैमुख्यात् परिसमाप्तं [115a][3] + + + + + + + + + + + +

1 So L^2 and Commentary (=Tib thob-pa) —Minaev has paryantam

2 =Çikṣās 360, 9 sattveṣu mucyamāneṣu...mokṣeṇāpy arasena kim

3 The leaves containing the last part of the Commentary of the eighth chapter are lost—See the Appendix

प्रज्ञाकरमतिकृतायां बोधिचर्यावतारपञ्जिकायां
प्रज्ञापारमिता नवमः परिच्छेदः[1]।

ओं लोकपालाय नमः। ओं लोकेशाय नमः॥[2]

या[3] निर्लेपतया निरुत्तरपदं[4] सर्वप्रपञ्चोज्झिता[5]
[6]प्रज्ञापारमितादिसंवृतिपदैराख्यायतेऽनाख्यया।
यां सम्यक् प्रतिपद्य निर्मलधियो यान्त्युत्तमां निर्वृतिं
5 तां नत्वा विधिवत्करोमि विवृतिं तस्याः प्रसन्नैः पदैः॥[7]
यत्राचार्यो गुणनिधिरसौ शान्तिदेवः[8] प्रकाशं
वक्तुं शक्तः प्रवचनमहाम्भोधिपारं प्रयातः।

---

1 This part of the Commentary has been published by myself in Roman characters in my *Bouddhisme, Études et Matériaux*, (Bruxelles, Academie and London, Luzac 1898)

2 The first lines of this chapter down to the folio 129A (infra p 343, l 13) from a modern copy of the Nepalese MS. The invocation *om lokapalaya namah, om lokeçaya namah*, is wanting in the Tibetan translation (fol 205 b3) where we read [illegible] gzhon nur gyur pa-la phyag htsal-lo = *Mañjuçrīye kumārabhūtāya namah*

3 Tib *gan dag* = ye to be read *gan lag*, as in the third pada

4 Tib *go hphan bdan* = anuttarapadavati

5 Ms prapañcocchrita = spros pa kun spans.

6 According to the Tib *prajñāpāramitā*

7 Metre Çārdūlavikrīḍita—The padas are respectively rendered, in Tib translation, by lines of 15, 17, 17, 19 syllables

8 Ms Çāntidevapādaiḥ

किं तस्यार्थं हतमतिरहं वक्तुमीशस्तथापि
प्रज्ञाभ्यासात्सुकृतममलं[1] यत्नतोऽस्मि प्रवृत्तः ॥[2]

न नाम का चिद्गुणलेशवासना
मतेर्न मेऽस्ति प्रतिभागुणोऽर्जितः ।[3]
तथापि मच्चित्तनिषेवणाफलं[4]
यदेव मे तादृशि वाक्प्रसर्पति ॥

अथ यो नाम कश्चिद्गोत्रविशेषात्[5] पर्युपासितकल्याणमित्रतया त्रिजगत्पर्यापन्नसमस्तजनदुःखदुःखी सर्वप्राणभृतां निःशेषदुःखसमुद्धरणाशयः स्वसुखनिरपेक्षः[6] तत्प्रशमोपायभूतं बुद्धत्वमेव मन्यमानस्तत्प्राप्तिवाञ्छया समुत्पादितबोधिचित्तो[7] महात्मा [8]सौगतपदसाधनोपायभूतसम्भारद्वयपरिपूरणार्थं क्रमेण दानादिषु प्रवर्तते । तस्य तथा प्रवर्तमानस्य सम्यक्[9] प्रति[- -]शमथस्या[129b]पि[10] दानादयः प्रज्ञाविकलतया जगदर्थसंपादननिदानं बुद्धत्वं नावहन्तीत्यभिसंधाय । अवश्यं संसारदुःखनिर्मोक्षार्थिना प्रज्ञोत्पादनाय यतितव्यं । यथोक्तं ।

---

1 Ms svakṛtam

2 Metre Mandākrāntā

3 Ms matir mamāsti pratibhāguṇorjitaḥ—Tib bdag la śes rab yon tan bsags pa yod pa ma yin te

4 Forms like niṣevaṇa are common

5 Tib rigs kyi khyad par gyi phyir = kaścit kasmiṃścid gotre

6 According to the Tib duḥkha

7 Ms samutpādita

8 Ms saugatapada° Tib bde bar gśegs pa'i go 'phaṅ thob pa'i thabs su gyur pa

9 Ms samyak pratividrśamathasyāpi—Tib zhi gnas dmigs pa yaṅ dag par ldan-pa gyur pas

10 The folios are numbered by letter and figure numerals Both here concord, but see p 316 n 6

शमथेन विपश्यनासुयुक्त[1] । इत्यादि ।

तत्र[2] शमथप्रतिपादनं कृतमिदानीं तदनन्तरप्राप्तां विपश्यनां प्रज्ञापरनामधेयां प्रतिपादयन्नाह ।

इमं परिकरं सर्वं प्रज्ञार्थं हि मुनिर्जगौ ।
तस्मादुत्पादयेत्प्रज्ञां दुःखनिवृत्तिकाङ्क्षया ॥ १

इममिति समनन्तरमिह शास्त्रे लक्षणतः प्रतिपादित दानादिकमिदन्तया प्रत्यक्षतया परामृशति । परिकरमिति परिवारं परिच्छेदं संभारमिति यावत् । सर्वमुक्तप्रकारमन्यच्च । प्रज्ञार्थं हि मुनिर्जगाविति संबन्धः । प्रज्ञा यथावस्थितप्रतीत्यसमुत्पन्नवस्तुतत्त्वप्रविचयलक्षणा सैवार्थः प्रयोजन संबोधिहेतुभावोपनायकतया यस्य दानादिलक्षणस्य परिकरस्य स तथा तमिति । दानपारमितादिषु धर्मप्रविचयस्वभावायाः प्रज्ञायाः प्रधानत्वात् ।

तथा हि दानं संबुद्धबोधिप्राप्तये प्रथमं कारण पुण्यसंभारान्तर्भूतत्वात् । तच्च शीलालङ्कृतमेव सुगतिपरंपरां[ ] सुख भोगोपकरणसंपन्नामावहदनुत्तरज्ञानप्रतिलम्भहेतुः । क्षान्तिरपि तद्विपक्षभूतप्रतिघप्रतिपक्षतया दानशीलसुकृतमयं संभारमनुपालयन्ती सुगतत्वाधिगतये संप्रवर्तते । एतच्च शुभं दानादि-

---

[1] Ms çamathena vipaçyanayā suyukta. This is the first pāda of viii 4, where we have vipaçyanāsuyukta, *metri causa*; but the Ms M. ad viii 4, gives the reading [illegible]nayā.—Tib. *zhi gnas rab tu ldan pai lhag mthon gis*, see infra.

[2] VIII 4 foll.

चित्तयसंभूतं पुण्यसंभाराख्यं ध्यानादिमुपजनितं च ज्ञानसंभाराख्यं वीर्यमन्तरेण न भवतीति तदुभयसंभारकारणतया सर्वावरणप्रहाणाय समुपजायते । समाहितचित्तस्य च यथाभूतपरिज्ञानमुत्पद्यत इति ध्यान[120b]पारमिताप्यनुत्तरज्ञानहेतुरुपपद्यते ।

एवमेते दानादयः सत्त्वा[?] संभृता अपि प्रज्ञामन्तरेण सौगतपदाधिगमहेतवो न भवन्तीति । नापि पारमिताव्यपदेशं लभन्ते । प्रज्ञाकृतपरिशुद्धिभाजः पुनरव्याहतोदारप्रवृत्तितया तदनुकूलमनुवर्तमानास्तद्धेतुभावमधिगच्छन्ति । पारमितानामधेयं च लभन्ते ।

तथा[1] दातृदेयप्रतिग्राहकादित्रितयानुपलम्भयोगेन प्रज्ञापरिशोधिताः सादरनिरन्तरदीर्घकालमभ्यस्यमानाः प्रकर्षपर्यन्तमुपगच्छन्तो ऽविद्याप्रवर्तितसकलविकल्पजालमलरहितं [2]क्लेशज्ञेयावरणविनिर्मुक्तमुभयनैरात्म्याधिगमस्वभावं सर्वस्वपरहितसंपदाधारभूतं परमार्थतत्त्वात्मकं तथागतधर्मकायमभिनिर्वर्तयन्तीति प्रज्ञाप्रधाना दानादयो गुणा उच्यन्ते ।[3]

न चैतद्वक्तव्यं । यदि प्रज्ञा प्रधानं दानादीनां सैव केवला संबोधिसाधनमस्तु किमपरैर्दानादिभिरिति । तदन्येषामुप-

[1] Maith Ms has *tatha hi*

[2] Dh S cxv *avarane* [illegible]

[3] Tib *çes-rab* [illegible] *phal pai brjod do* = prajñaiva pradhanam, dan[illegible]dayo gun[illegible] — *phal pa* = usual, common, bad = prākrta, gun[illegible], guna — qualit[illegible] = *yon tan*

योगस्य वर्णितत्वात् । केवलं नेत्रविकला इव दानादयः प्रज्ञाने-
तृका[1] एव यथाभिमतां सौगतीं भूमिमभिसरन्तीति प्रज्ञोप-
नायका[2] उच्यन्ते । न तु प्रज्ञैव केवला सम्यक्संबोधिसाधनं ।
तस्माद्दानादिपरिकरः प्रज्ञार्थ इति सिद्धं ॥

5 सर्वकल्पनाविरहात्समारोपापवादान्तद्वयमौनात् । [4]अशैक्ष-
कायवाङ्मनःकर्मलक्षणमौनत्रययोगाद्वा मुनिर्बुद्धो भगवान् ।
[5]त्रिदुःखतादुःखितसर्वजगत्परित्राणाध्याशयो जगौ जगाद उक्त-
वानित्यर्थः । आर्यप्रज्ञापारमितादिसूत्रान्तेषु प्रज्ञार्थमुक्तवान्
क्रमेण दानादिपरिकरं ।

10 यथोक्तमार्यशतसाहस्र्यां प्रज्ञापारमितायां । [130a][6] तद्य-
थापि नाम सुभूते सूर्यमण्डलं [7]चन्द्रमण्डलं च[7] चतुर्षु द्वीपेषु
कर्म करोति । चतुरश्च द्वीपाननुगच्छति । अनुपरिवर्तते ।
एवमेव सुभूते प्रज्ञापारमिता पञ्चसु पारमितासु कर्म
करोति । पञ्च पारमिता अनुगच्छति । अनुपरिवर्तते ।
15 प्रज्ञापारमिताविरहितत्वात्पञ्च पारमिताः पारमितानामधेयं
न लभन्ते ॥ तद्यथापि नाम सुभूते राजा चक्रवर्ती विरहितः

---

1 So Nep Ms Maith Ms has °nitraka

2 So Maith Ms, Nep Ms has prajñopayanayaka, Tib śes pa la dren-pa

3 According to Tib agrahaṇād vā

4 = mi slob pai lus dan

5 triduḥkhatā see M Vyut § 112,5 6, 7

6 The folio is numbered 130 (letter numeral) and 131 (figure) —The fol 130 (figure) is really a part of the VIIIth Chapter

7-7 Wanting in Nep Ms, but occurs in the Maith Ms and in the Tib

सप्तभी रत्नैश्चक्रवर्तिनामधेयं न लभते। एवमेव सुभूते पञ्च पारमिताः प्रज्ञापारमिताविरहितत्वान्न पारमितानामधेयं लभन्ते ॥ तद्यथापि नाम सुभूते याः काश्चन कुनद्यः सर्वास्ता येन गङ्गा महानदी तेनानुगच्छन्ति। ता गङ्गया महानद्या सार्धं महासमुद्रमनुगच्छन्ति। एवमेव सुभूते पञ्च पारमिताः 5 प्रज्ञापारमितापरिगृहीता येन सर्वाकारज्ञता तेनानुगच्छन्तीति विस्तरः ॥

पुनश्चोक्तं। इयं कौशिक प्रज्ञापारमिता बोधिसत्त्वानां महासत्त्वानां दानपारमितामभिभवति शीलपारमितामभिभवति चान्तिपारमितामभिभवति ध्यानपारमितामभिभवति। 10 [1]तद्यथापि नाम कौशिक जात्यन्धानां शतं वा सहस्रं वा अपरिणायकानामभव्यं मार्गावतरणाय। कुतः पुनर्नगरानुप्रवेशाय। एवमेव कौशिक अचचुष्काः पञ्च पारमिता जात्यन्धभूता भवन्ति विना प्रज्ञापारमितया अपरिणायिका विना प्रज्ञापारमितया अभव्या बोधिमार्गावतरणाय। कुत एव सर्वा- 15 कारज्ञतानगरानुप्रवेशाय। यदा पुनः कौशिक पञ्च पारमिता॰ पज्ञापा[130b]रमितापरिगृहीता भवन्ति। तदैताः पञ्च पारमिता॰ सचचुष्का भवन्ति। प्रज्ञापारमितापरिगृहीताश्चैता. पञ्च पारमिताः पारमितानामधेयं लभन्त इति विस्तरः ॥ एवमन्यत्रापि यथासूत्रमवगन्तव्यं। 20

---

[1] Cp *Aṣṭasāhasrikā* p. 172 for a quasi literal exposition of this very doctrine.

उक्तं च ।

सर्वपारमिताभिस्त्वं निर्मलाभिरनिन्दिते ।

चन्द्रलेखेव ताराभिरनुयातासि सर्वदा ॥[1] इति ॥

अथ वा । इममिति समनन्तरप्रक्रान्तरूपं शमथात्मकं
5 प्रबन्धं[2] । परिकरमिति प्रज्ञासमुत्थापकतया तत्कारणसंदोहं
पीठिकाबन्धं च[3] । प्रज्ञार्थमिति प्रज्ञैव पूर्वोक्तार्थः प्रयोजनं
साध्यतया यस्य तं । शमथपरिशोधितचित्तसंताने[4] प्रज्ञायाः
प्रादुर्भावात् । सुपरिशोधितक्षेत्रे[5] सस्यनिष्पत्तिवत् ।

यथोक्तं शिक्षासमुच्चये । किं पुनरस्य शमथस्य माहात्म्यं
10 यथाभूतज्ञानजननशक्तिः । यस्मात्

समाहितो यथाभूतं जानातीत्युक्तवान्मुनिः । इति ॥[6]

एतदपि धर्मसंगीतावुक्तं[7] । समाहितचेतसो[8] यथाभूतदर्शनं

---

1 = *Aṣṭasāhasrikā prajñāpāramitā*, prefatory stanzas 8.

2 Maithil Ms. *°śamathātmakaṃ śamathaprab°*, Nep. *śamathakapr°*, and in margin *°tmakaṃ śamathaḥ*—Tib. źi gnas kyi bdag ñid-kyi rgyun no.

3 According to the Tib. *bandhana eva*—*saṃdoha* = bsdus pa = *samāsa*—*pīṭhikābandha* = gźi.

4 Maithil Ms. *°cittacitta°*, *°citta* only, in Nep. and Tib.

5 *supariśodhita* = legs par sbyaṅs pa. *pariśodhita* = yoṅs su dag-par byas-pa.

6 See *Çikṣās* p. 119 9 (... *śamasya* ... *prajānātīty avadan muniḥ* and metrical observations, p. 403 (*Saṃy. N.* III p. 13, *Mil.* p. 39 3 have the same saying with *pajānāti*, see also *Çikṣās* 120 11–13 "Here a prose saying is forced into verse")—*samāhito* ... = Kārikā 9a (see *Çikṣās* p. XLI). Prof. Bendall's opinion—so far as the original reading is concerned—is confirmed by the quotation of this very passage, supra ad VIII 4 *samāhito hi* ... *prajānātīty avadan muniḥ*. Compare Bhojarāja ad *Yogas.* I 20 *samāhitacittaç ca bhāvyam samyag vijānāti* and *M. Vyut.* 81 6 *samāhitacitto yathābhūtam prajānāti, yathābhūtam paçyati*.

7 This quotation follows in the *Çikṣās* (119 11).

8 *Çikṣās* *°manaso*—Tib. mñam par bźag pai sems.

भवति। यथाभूतदर्शिनो बोधिसत्त्वस्य सत्त्वेषु महाकरुणा प्रवर्तते।[1] इदं मया[2] समाधिसुखं[3] सर्वसत्त्वानां निष्पादयितव्यं। स तया महाकरुणया सञ्चोद्यमानो ऽधिशीलमधिचित्तमधिप्रज्ञं च शिक्षा[ं][4] परिपूर्यानुत्तरां[5] सम्यक्संबोधिमभिसंबुध्यते[6]। इति विस्तरः॥ 5

हिरिति यस्मात् प्रज्ञार्थं दानादिपरिकरं शमथात्मकपरिकरं वा मुनिर्जगौ तस्मादुत्पादयेत्प्रज्ञामिति योजनीयं। उत्पादयेदिति निष्पादयेत्साक्षात्कुर्याद्भावयेत्सेवयेद्बहुलीकुर्याद्वा॥

सा च प्रज्ञा द्विविधा हेतुभूता फलभूता च। हेतुभूतापि द्विविधा। अधिमुक्तिच[131 a]रितस्य च भूमिप्रविष्टस्य च 10 बोधिसत्त्वस्य। फलभूता तु सर्वाकारवरोपेतसर्वधर्मशून्यताधिगमस्वभावा[7] ऽनिमित्तयोगेन[8]। तत्र प्रथमतो हेतुभूता[9] श्रुतचिन्ताभावनामयी[10] क्रमेणाभ्यासाद्भूमिप्रविष्टप्रज्ञां निर्वर्तयति। सा चापरापरभूमिप्रतिलम्भयोगेन प्रकर्षमभिवर्धयन्ती याव-

---

1 *Çikṣas* has *evam casya bhavati*. — Wanting in our Mss. and Tib.

2 *mukha* = sgo, but see Kern, *Lotus*, 295, n. 1.

3 *Çikṣas* has *sarvadharmayathābhūtadarçanam ca*.

4 See *Dh. saṃgraha* 140 (tisraḥ çikṣāḥ); the reference to *M. Vyut.* is wrong, read 36; and *Aug. N.* I. 235. — *çikṣam*, according to *Çikṣās*.

5 Supported by the Tib. (not by *Çikṣas*).

6 Nep. Ms. has *bodhyate*. — The *vistara* is to be found supra ad V. 54.

7 Nep. Ms. °*bhāva*' *ni*°.

8 Maithil Ms. has °*varopeta s*° *āyogena*. — The readings of the Nep. Ms. are supported by Tib.

9 According to the Tib. *rgyur gyur pa ni*. — Nep. Ms. has *hetubhūtām* ... *bhavanāmayīm*, Maithil Ms. °*bhūtā*, ... *mayī*.

10 Cp. *M. Vyut.* 75, supra p. 5, n. 1 and V. 25. — *mayī* is wanting in Tib.

द्भयावरणविगमात्मकसकलकल्पनाजालविगतबुद्धत्वस्वभावप्रज्ञां नि-
ष्पादयति । अत एवाह दुःखनिवृत्तिकाङ्क्षयेति ।

दुःखस्य पञ्चगतिसंगृहीतसत्त्वराशिगतस्य स्वात्मगतस्य च ।
सांसारिकस्य । जातिव्याधिजरामरणस्वभावस्य[1] प्रियविप्रयोगा-
5 प्रियसंप्रयोगपर्येष्यमाणलाभविघातलक्षणस्य । संक्षेपतः पञ्चोपा-
दानस्कन्धात्मकस्य च । निवृत्तिः । निर्वाणं । उपशमः । पुन-
रनुत्पत्तिधर्मकतया आत्यन्तिकसमुच्छेद इत्यर्थः । तस्याः
काङ्क्षया अभिलाषेण च्छन्देनेति यावत् ॥

तथा हि विपर्याससंज्ञिनो ऽसत्सत्त्वसमारोपाभिनिवेशवशा-
10 दात्मात्मीयग्रहप्रवृत्तेरयोनिशोमनसिकारप्रसूतो रागादिक्लेशगणः
समुपजायते । तस्मात्कर्म । ततो जन्म । ततश्च व्याधिजरामरण-
शोकपरिदेवदुःखदौर्मनस्योपायासाश्च संजायन्ते । एवमस्य केव-
लस्य महतो दुःखस्कन्धस्य समुदयो भवति । तदेवमनुलोमा-
कारं प्रतीत्यसमुत्पादं सम्यक्प्रज्ञाया व्यवलोकयतः । पुनस्तमेव
15 निरात्मकमस्वामिकं मायामरीचिगन्धर्वनगरस्वप्नप्रतिबिम्बादि-
समानाकारतया परमार्थतो निःस्वभावं पश्यतो यथाभूतपरि-
ज्ञानात्तद्विपक्षात्मतया मोहस्वभावमविद्याभवाङ्गं निवर्तते ।
अविद्या[131b]निरोधात्तत्प्रत्ययाः संस्कारा निरुध्यन्ते । एवं पूर्व-
पूर्वस्य कारणभूतस्य निरोधादुत्तरोत्तरकार्यभूतस्य निरोधो
20 वेदितव्यः । यावज्जातिनिरोधाज्जरामरणशोकपरिदेवदुःखदौ-

[1] Nep. Ms. °prayogaapri°. — On this topic, see M. Vyut. 112

र्मनस्योपायासाश्च निरुध्यन्ते । एवमस्य केवलस्य महतो दुःख-
स्कन्धस्य निरोधो भवति ॥ [1]तत्राविद्या तृष्णोपादानं च क्लेश-
वर्त्मनो व्यवच्छेदः[2] । संस्कारा भवश्च कर्मवर्त्मनो व्यवच्छेदः ।
परिशिष्टान्यङ्गानि दुःखवर्त्मनो व्यवच्छेदः[1] । पूर्वापरान्त-
निरोधो निरोधवर्त्मनो व्यवच्छेदः । एवमेव त्रिवर्त्म निरा-
त्मकम् आत्मात्मीयरहितं[4] सम्भवति च सम्भवयोगेन[5] विभवति
च विभवयोगेन स्वभावान्नड़कलापसदृशं[6] इति । एतच्चोत्तरत्र
विस्तरेण युक्त्यागमाभ्यां प्रतिपादयिष्यते ॥

तदेवं प्रज्ञया स्वप्नमायादिस्वभावं संस्कृतं प्रत्यवेक्षमाणस्य
सर्वधर्माणां निःस्वभावतया प्रतिपत्तेः परमार्थाधिगमात्सवासन-
निःशेषदोषराशिविनिवृत्तिर्भवतीति[7] सर्वदुःखोपशमहेतुः प्रज्ञो-
पपद्यत इति ॥

यथा च युक्त्यागमाभ्यां विचारयतो ऽविपरीतवस्तुतत्त्वप्रवि-

---

1 1 = *Daçabhūmaka* quoted in Çikṣ 227 11 (with a varia lectio *pari çeṣam duḥkhavartmano vyavacchedaḥ*)

2 = lam-du ni im par-chad do Vibhuticandra has lam gyi o = °vartma syat —There are three *Kaṇḍa* in the Pratītyasamutpāda *Kleçakaṇḍa*, *karma*°, *duḥkha*°, see *Pratītyasamutpādahṛdaya* by *Nāgārjuna* (Tanjur Mdo XVII) which agrees with our text

3 bdag man bi mi yin te

4 So Tib —*ātma* wanting in Maithil Ms -*tma* deleted in Nep

5 Nep *sambhavati vasam*°, Maithil *sambhavati* | *a*°

6 Maith *svabhāvo nala*° On *kalāpa*, see infra ad IX 73 *Abhidh saṅg* (J P T S 1884) VI 8, and *Çālistamba*

7 Maith has *savāsana*? — Tib bag chags dan bcas pai ñes

चयः[1] समुपजायते । तदुपदर्शयितुं सत्यद्वयव्यवस्थामाह संवृति-
रित्यादि ।

संवृतिः परमार्थश्च सत्यद्वयमिदं मतं ।
बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते ॥ २[2]

5 संव्रियत आव्रियते यथाभूतपरिज्ञानं स्वभावावरणादावृत-
प्रकाशनाच्चानयेति[3] संवृतिः । अविद्या मोहो विपर्यास इति
पर्यायाः । अविद्या ह्यसत्पदार्थस्वरूपारोपिका स्वभावदर्शनाव-
रणात्मिका च सती संवृतिरुपपद्यते ।

यदुक्तमार्यशालिस्तम्बसूत्रे[4] । पुनरपरं तत्त्वे[5]ऽप्रतिपत्तिर्मिथ्या-
10 प्रतिपत्तिरज्ञानमविद्येति । उक्तं च[6] ।

अभूतं ख्यापयत्यर्थं भूतमावृत्य वर्तते ।
अविद्या जायमानैव कामलातङ्कवृत्तिवत्[7] ॥ इति ॥

तदुपदर्शितं च प्रतीत्यसमुत्पन्नं वस्तुरूपं संवृतिरुच्यते । तदेव

---

1 The Nep Ms has viparitavisu tattvam akliṣṭe ... samvṛtir avidyā (see infra l 6). The lacuna is manifest; the Tib translator exactly follows the Nepalese Ms.

2 The first line is quoted infra ad 107 (idam smṛtam).

3 *avṛtaprakāçana*—If *avṛta* be right (query *abhūta*?), it is to be translated *adhyāropita*, *abhūta*.—This sentence is passed over in Tib.

4 See *Çikṣāsamuccaya* and our forthcoming edition of the *Çālistamba*.

5 *tattve*, the second *t* by a second hand.

6 Quoted by Vibhūticandra (285 b 5). Snaṅ bai phren ba las = from the *Ālokamālā* (?)

7 Tib *mig ser gyis ni gnod pa bzhin*. Vibhūticandra *mig ser nad la sogs pa bzhin*.—mig ser = *kāmala* (M Vyut).—See *Daçabhūm.*, *lank.* *kṛcchrajīvana* *duhsthye* = gnod pa, nad pa

लोकसंवृतिसत्यमित्यभिधीयते लोकस्यैव सं[132a]वृत्या तत्सत्यमिति कृत्वा ॥ यदुक्तं ।

मोहः स्वभावावरणाद्धि संवृतिः
सत्य तया ख्याति यदेव कृत्रिम ।
जगाद तत्संवृतिसत्यमित्यसौ
मुनिः पदार्थं कृतक च संवृतिं ॥ इति ॥[1]

सा च संवृतिर्द्विविधा लोकत एव । तथ्यसंवृतिर्मिथ्यासंवृतिश्चेति । तथा हि किंचित्प्रतीत्यजातं नीलादिकं वस्तुरूपमदोषवदिन्द्रियैरुपलब्धं लोकत एव सत्यं । मायामरीचिप्रतिबिम्बादिषु प्रतीत्यसमुपजातमपि दोषवदिन्द्रियोपलब्धं यथास्वं[2] तीर्थिकसिद्धान्तपरिकल्पितं च लोकत एव मिथ्या । तदुक्तं ।

विनोपघातेन यदिन्द्रियाणां
षण्णामपि ग्राह्यमवैति लोकः ।
सत्यं हि तल्लोकत एव शेषं
विकल्पितं लोकत एव मिथ्या ॥ इति ॥[3]

एतत्तदुभयमपि[4] सम्यग्दृशामार्याणां मृषा परमार्थदशायां

---

[1] Metre Vaṃçastha.—This is the 28th stanza of the VI chapter of the *Madhyamakāvatāra*, see *Muséon* 1900 Aout (1. 2)—Quoted without reference by Vibhūticandra (285 b 5)

[2] Tib. ji ltar mu stegs can gyi ran-gi-grub mthas

[3] = *Madhyamakāvatāra*, VI 25 (*Muséon*, loc. cit.) by Candrakīrti.—Quoted by Vibhuticandra 286 a 1, from Nāgārjuna

[4] So Nep Ms.—Maith. Ms has *etad ubhayam*.—Tib. de-ltar de gñi ga yan = *evam tad ubhayam*

संवृतिसत्यालीकत्वात्। एतत्समनन्तरमेवोपपत्त्या प्रतिपादयिष्यामः। तस्मादविद्यावतां वस्तुस्वभावो न प्रतिभासत इति॥

परम उत्तमोऽर्थः परमार्थः। अकृत्रिमं वस्तुरूपं यदधिगमात्सर्वावृतिवासनानुसन्धिक्लेशप्रहाणं भवति। सर्वधर्माणां
5 निःस्वभावता। शून्यता तथता भूतकोटिः। धर्मधातुरित्यादिपर्यायाः। सर्वस्य हि प्रतीत्यसमुत्पन्नस्य पदार्थस्य निःस्वभावता पारमार्थिकं रूपं। यथाप्रतिभासं सांवृतस्यानुपपन्नत्वात्॥

तथा हि। न तावद्यथापरिदृश्यमानरूपेण सत्स्वभावो
10 भावः। तस्योत्तरकालमनवस्थानात्। स्वभावस्य च सर्वदा ऽनागन्तुकतया ऽविचलितरूपत्वात्। यो हि यस्य स्वभावः स कथं कदा चिदपि निवर्तेत। अन्यथा तस्य स्वभावताहानिप्रसङ्गान्निःस्वभाव[132b]तैव स्यात्। नापि स उत्पद्यमानः सत्स्वरूपेण कुतश्चिदागच्छति निरुध्यमानो वा क्व चित्सन्निचय
15 गच्छति॥ अपि तु हेतुप्रत्ययसामग्रीं[2] प्रतीत्य मायावदुत्पद्यते। तदैकल्यतो निरुध्यते च। हेतुप्रत्ययसामग्रीं प्रतीत्य जातस्य[3] परायत्तात्मलाभस्य प्रतिबिम्बस्येव कुतः सत्स्वभावता।

न च कस्य चित्पदार्थस्य परमार्थतो हेतुप्रत्ययसामग्रीतः समुत्पत्तिः संभवति। तस्या अप्यपरसामग्रीजनितात्मतया

---

1 Yod pai ran bzhin – Mss °svabhāvā bhavāh (?vat) no plural sign in Tib compare *tasyottara°*

2 *samagrīm*, wanting in Nep. given by Maith. and Tib.

3 Maith adds *ca*

परायत्तात्मलाभाया निःस्वभावत्वात्। एवमन्यस्याः पूर्वपूर्वायाः स्वस्वकारणसामग्रीजन्यतया निःस्वभावता द्रष्टव्या। इत्थं कारणानुरूपं कार्यमिच्छता कथं निःस्वभावात्सस्वभावस्योत्पत्तिरभ्युपेतव्या। यद्वक्ष्यति।

मायया निर्मितं यच्च हेतुभिर्यच्च निर्मितं। 5
याति तत्कुतः कुत्र याति चेति निरूप्यतां॥
यदन्यसंनिधानेन दृष्टं न तदभावतः।
प्रतिबिम्बसमे तस्मिन् कृत्रिमे सत्यता कथं॥[1] इति।

उक्तं च।

यः प्रत्ययैर्जायति स ह्यजातो 10
न तस्य उत्पादु सभावतो ऽस्ति।
यः प्रत्ययाधीनु स शून्य उक्तो
यः शून्यतां जानति सो ऽप्रमत्तः॥[2] इति।

[3]इति शून्येभ्य एव शून्या धर्माः प्रभवन्ति धर्मेभ्य इति॥[4]

न च स्वपरोभयरूपहेतुनिबन्धनमहेतुनिबन्धनं वा भावस्य 15 जन्मातिपेशलमुपपद्यते[5]। तथा ह्यात्मस्वरूपं भावानां स्वजन्मनिमित्तं भवेत्। निष्पन्नमनिष्पन्नं वा भवेत्। न तावन्निष्पन्नस्य सतः स्वात्मनि कारणता। तस्य सर्वात्मना स्वयं निष्पन्नत्वात्

---

1 = IX 144, 145

2 *Anavataptahradapasamkramanasūtra* quoted in *Madh. Vrtti* ad XIII 2 et alias

3 *iti* given by both Mss

4 See infra ad IX 108, and *Pañcakrama* 40.35

5 *atipeśala* = çin-tu legs pa

क्व पुनरस्य व्यापारोऽस्तु । उत्पाद्यस्य पुनरस्यानिष्पन्नस्यान्यस्य स्वभावस्याभावात् । एकस्य चास्य निरंशत्वात् । [133a] न च पश्चादुत्पद्यमानस्यापरस्य तत्स्वभावता युक्ता । तन्निष्पत्तावनिष्पन्नस्य तत्स्वभावत्वाभावात् । इति न स्वात्मनो निष्पन्नात्कस्यचिदुत्पत्तिरस्ति । न चापि स्वत उत्पत्तिपक्षे प्राङ्निष्पन्नं स्वरूपमितरेतराश्रयदोषप्रसङ्गात्कस्य चित्संभवति । नापि तदनिष्पन्नस्वभावमाकाशकुशेशयमकाशमशेषसामर्थ्यशून्यं स्वनिष्पत्तौ हेतुभावमुपगन्तुमर्हति[1] । अन्यथा खरविषाणस्यापि स्वस्वभावजनकत्वप्रसङ्गात् ॥

नापि परत इति पक्षः । आदित्यादप्यन्धकारस्य सर्वस्माद्वा सर्वस्योत्पत्तिप्रसङ्गात् । जनकाजनकाभिमतयोर्विवक्षितकार्यापेक्षया परत्वाविशेषात् । [2]जन्यजनकैकत्वैकसंततिप्रतिनियमोऽप्यनुत्पन्ने कार्ये काल्पनिकतया वस्तुतो न संगच्छते । न चानागतावस्थितधर्मापेक्षया कार्यादिव्यवहारो वास्तवः । अर्थस्वभावसद्भावस्य[3] निरूपयिष्यमाणत्वात् । नापि बीजावस्थासु विद्यमानाङ्कुरापेक्षया बीजस्य परत्वमकाल्पनिकमस्ति । कारणे कार्यास्तित्वस्य निषेत्स्यमानत्वात् । यत्र परिदृश्यमानमेव रूपं विचारतो नावतिष्ठते तत्रानागतादिषु संभावितस्य का चिन्ता ॥

[1] According to the Tib. *arhati* (?) *ca*

[2] rgyu[d] ... gcig pa so-sor nes pa = ?*janakaikasamtati* — *ekatva* is wrong

[3] Nep. *sthiti*, Maith. *sukha*, Tib. dnos po ... an bzhin du yin-par dpyod-par hgyur bai phyir ro.

नाप्युभयत इति पक्षः । प्रत्येकपक्षोक्तसमुदितदोषप्रसङ्गात् । कार्यानुत्पत्तौ चोभयरूपस्य हेतोः परमार्थतो ऽभावात् । उत्पत्तौ वा न किं चिज्जनयितव्यमस्तीति कुतोभयरूपस्य हेतोर्व्यापारः स्यात् ॥

नाप्यहेतुत इति विकल्पः । यतो नायं प्रसज्यप्रतिषेधात्मतया ऽहेतुत इति युज्यते । अहेतुकत्वे हि भावानां देशकालनियमाभावप्रसङ्गः स्यात् । नित्यं सत्त्वासत्त्वप्रसङ्गो वा । उपेयार्थिनां प्रतिनि[133b]यतोपायानुष्ठानं च न स्यात् । प्रधानेश्वरादीनां कारणत्वे ऽस्य प्रतिषेधस्येष्यमाणत्वात्[1] । तन्नाहेतुतो भावाः स्वभाव प्रतिलभन्ते ॥

तस्माच्च स्वपरोभयरूपहेत्वहेतुभ्य उत्पद्यन्ते सत्स्वभावा भावाः । तदुक्तं ।

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्व चन के चन ॥ इति ॥[2]

एकानेकस्वभावविचारणयापि सर्वभावानां स्वभावविकलत्वाच्च सत्स्वभावत्वं । तस्मात्स्वप्रमायाप्रतिबिम्बादिवदिदंप्रत्ययतामात्रमेव अविचारमनोहरमस्तु किमिह सर्वदुःखहेतुना भावाभिनिवेशेन प्रयोजन ॥ अत इदमर्थस्य तत्त्व ।

---

[1] sogs pa rnams rgyu-yin-pa ñid hdi hgeg par hgyur bai phyir ro

[2] = *Madhyamakamula* I 1 (See *Madhy Vrtti* p 12, l 13, Bibl Buddh)

[3] rkyen las byun ba tsam ñid hdi = *idam pratyaya*?, but on the compound *idampratyayatāmātra* see *Madh Vrtti*, p 9 n 7 8, and infra Index

निःस्वभावा अमी भावास्तत्त्वतः स्वपरोदिताः ।
एकानेकस्वभावेन वियोगात्प्रतिबिम्बवत् ॥[1]

एव निःस्वभावतैव सर्वभावानां निज पारमार्थिक रूपमवतिष्ठते ॥ तदेव प्रधानपुरुषार्थतया परमार्थ उत्कृष्टं प्रयोजनमभिधीयते ॥

अत्रापि नाभिनिवेष्टव्य। अन्यथा भावाभिनिवेशो वा शून्यताभिनिवेशो वेति न कश्चिद्विशेषः। उभयोरपि कल्पनात्मकतया सांवृतत्वात्। न चाभावस्य कल्पितस्वभावतया किंचित्स्वरूपमस्ति। न च भावनिवृत्तिरूपो ऽभावो निवृत्तेर्निःस्वभावत्वात्। यदि च भावस्यैव कश्चित्स्वभावः स्यात् तदा तत्प्रतिषेधात्माऽभावोऽपि स्यात्। भावस्य तु स्वभावो नास्तीति प्रतिपादितमेव। अतो न भावनिवृत्तिरूपो ऽभावो नाम कश्चित्। न च भावाभावयोरुक्तक्रमेणासत्त्वे प्रतिपादिते तदुभयसंकीर्णात्मता[2] सम्भवति। उभय[3]प्रतिषेधस्वभावता वा। भावविकल्पस्यैव सकलविकल्पनिबन्धनत्वात्तस्मिन्निराकृते सर्वएवामी एकप्रहारेण निरस्ता भवन्तीति। तस्मात्।

न सन्नासन्न सदसन्न चाप्यनुभयात्मक

किं चिदभिनिवेशविषयतया मन्तव्य। तदुक्तमार्यप्रज्ञापारमितायां[4]। सुभूतिराह। इहायुष्मन् शारद्वतीपुत्र बोधिसत्त्व-

---

[1] udita - smras pa = said to be sva or para

[2] Mss samkīrṇatātmatā.

[3] pya omitted by Nep.—See infra p 359 l 10

[4] Comp Astasahasrikā, 190 10

यानिकः कुलपुत्रो वा कुलदुहिता वा ऽनुपायकुशलो रूपं
शून्यमिति प्रजानाति सङ्गः। वेदनां शून्यामिति सजानाति
सङ्गः। संज्ञां शून्यामिति सजानाति सङ्गः[1]। संस्कारान् शून्या-
निति सजानाति सङ्गः। विज्ञानं शून्यमिति सजानाति सङ्गः।
एवं चक्षुः श्रोत्रं घ्राणं जिह्वा कायो[2] मनः। यावत्सर्वधर्मशून्यतां 5
शून्यामिति संजानाति सङ्ग इति विस्तरः॥

उक्तं च।

सर्वसंकल्पहानाय शून्यतामृतदेशना।
यस्य तस्यामपि ग्राहस्त्वयासाववसादितः॥ इति[4]।
न सन्नासन्न सदसन्न चाप्यनुभयात्मकं। 10
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥ इति[5]।

एवं चतुष्कोटिविनिर्मुक्तमादिशान्तमनुत्पन्नानिरुद्धानुच्छेदा-
शाश्वतादिस्वभावतया निःप्रपञ्चत्वादाकाशवदासङ्गानामनास्पद-
मशेषं[6] विश्वमुत्पश्याम इति॥

सत्यद्वयमिदं मतमिति। किं तत्। संवृतिः परमार्थश्चेति 15

[1] This clause is wanting in Mss — given by Tib.

[2] So Mss [illegible]

[3] Nep. has *ya ca* (second hand).

[4] Quoted infra ad IX. 33; *iti* wanting in Nep.

[5] Quoted in *Subhāṣitasaṃgraha* (fol. 17) from Sūtra, *Muséon*, 1903, IV, p. 389—See *Sarvadar.* p. 11, l. 1, and our translation note 58 (*Muséon*, 1901, II, p. 171.)

[6] So Math. – Nep. has *asaṃganasaṅgam* — Tib. chags-pa med-pa gnas med-pa = *asaṅgam anāspadam* — *viśva* = hgro ba = *jagad*.

पश्चाद्योज्ञनीयं । भूतमियं ब्राह्मणी श्रावपनमिय मुष्टिकेति यथा ।[1]

संवृतिरेकं सत्यमविपरीतं । परमार्थश्चापरं सत्यमिति । चकारः सत्यतामात्रेण ऽतुल्यबलतां समुच्चिनोति । तत्र संवृतिसत्यमवितथं रूपं लोकस्य । परमार्थसत्यं च सत्यमविसंवादकं तत्त्वमार्याणामिति विशेषः । इत्थ विशेषोपदर्शनार्थो ऽपि युक्तश्चकारः ॥

एतदुक्तं भवति । सर्व एवामी आध्यात्मिका बाह्या[श्च][2] भावा[134b]: स्वभावद्वयमाबिभ्रतः समुपजायन्ते । यदुत सांवृतं पारमार्थिकं च । तत्रैकमविद्यातिमिरावृतबुद्धिलोचनानाम-[3]भूतार्थदर्शिनां[4] पृथग्जनानां मृषादर्शनविषयतया समादर्शितात्मसत्ताकं । अन्यत्प्रविचयाञ्जनशलाकोद्घातिताविद्यापटलसम्यग्ज्ञाननयनानां[5] तत्त्वविदामार्याणां[6] सम्यग्दर्शनविषयतयोपस्थितस्वरूपं[7] ।

तदेतत्स्वभावद्वयं सर्वे पदार्था धारयन्ति । अनयोश्च स्वभा-

---

1 Grammatical instances wanting in Tib — *muṣṭikā*, masc. only in PW — Maith has *srtam vastiketi*

2 According to Tib.—Nep *ādhyātmika bāhyā bh°* Maith *°ka va ba*

3 *buddhi* wanting in Nep and Tib but on the relations of Tib and Nep see

4 Nep and Tib *abhūtātma°*

5 Maith *°paṭalakulas°*

6 According to Tib *samyagjñāna*

7 So Nep and Tib —Maith *°viṣayatayā samādarśitātmasattākam anyat praticayaya sthitarūpam*

वयोर्मृषादृशां बालिशानां यो विषयस्तत्संवृतिसत्यं । यस्तु सम्यग्दृशामधिगततत्त्वानां विषयस्तत्परमार्थसत्यमिति व्यवस्था शास्त्रविदां । यदाह ।

सम्यग्मृषादर्शनलब्धभावं
रूपद्वयं बिभ्रति सर्वभावाः । 5
सम्यग्दृशां यो विषयः स तत्त्वं
मृषादृशां संवृतिसत्यमुक्तं ॥ इति ॥[1]

इति द्वयोः समुदायो द्वयमिति युज्यते । मतमिति सम्मतमभिमतं । केषां । प्रक्षीणावरणधियां बुद्धानां भगवतां तन्मार्गानुयायिनामार्यश्रावकप्रत्येकबुद्धबोधिसत्त्वानां च । इदमेव 10 सत्यद्वयं नान्यत्सत्यमस्तीति । अवधारणार्थो ऽपि युज्यते चकारः । तदुक्तं ।

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ इति ।[2]

[3]पितापुत्रसमागमे चोक्तं । 15

सत्य इमे दुवि लोकविदूना
[4]दिष्ट स्वयं अश्रुणित्व परेषां ।

1 = *Madhyamakāvatāra*, VI 23. (See *Muséon*, loc cit.)

2 = *Madhyamakamūla*, XXIV 8 (See *Madhy. vṛtti*)

3 = Yab sras mjal ba — See supra VI 14 — All passages known hitherto are in prose

4 *diṣṭa* = *dṛṣṭa* = gzigs. Tib has *tvayā parasmād açrutya svayam dṛṣṭam* — For scansion *diṣṭa sayam açuṇitva*

संवृति या च तथा परमार्थो

सत्यु न सिध्यति किं च तृतीयु ॥ इति ॥

ननु चत्वार्यार्यसत्यानि दुःखसमुदयनिरोधमार्गलक्षणा-
न्यभिधर्मे कथितानि भगवता । तत्कथं द्वे एव सत्ये इति ।
5 सत्यं । किं तर्हि वैनेयजनाशयानुशयवशादेते[1] द्वे ए[135a]व[2]
चत्वारि कृत्वा कथितानि । अमीषां द्वयोरेवान्तर्भावात् । तथा
हि दुःखसमुदयमार्गसत्यानि संवृतिस्वभावतया संवृतिसत्ये ऽन्त-
र्भवन्ति । निरोधसत्यं तु परमार्थसत्यं इति न कश्चिद्विरोधः ॥

स्यादेतत्संवृतिरविद्योपदर्शितात्मतया ऽभूतसमारोपस्वरूप-
10 त्वाद्विचाराच्चतशो[3] विशीर्यमाणापि कथं सत्यमिति । एतदपि
सत्यं । किं तु लोकाध्यवसायतः संवृतिसत्यमित्युच्यते । लोक
एव हि संवृतिसत्यमिह[4] प्रतिपन्नः । तदनुवृत्त्या भगवद्भिरपि
तथैवानपेक्षिततत्त्वार्थिभिः संवृतिसत्यमुच्यते । अत एव लोक-
संवृतिसत्यं चेति शास्त्रे ऽपि विशेष उक्त आचार्यपादैः । वस्तु-
15 तस्तु परमार्थ एवैकं सत्यमतो न काचित्क्षतिरिति ॥

---

1 *bsam pa dan bag la ñal gyi dban gis* in conformity to the anuçaya and to the āçaya

2 The folio numbered 135 (letter num tal) is wanting — We give this portion from the Maith Ms

3 *ātma* wanting in Tib

4 Ms *vicarād bhūtaço*—Tib *lan bu pa phrag du ñams par gyur na*

5 Ms *lokā eva ... pratipannāh*

6 *samvrti* supported by Tib

7 So Ms — Tib *bcom ldan hdas kyis kyan de kho na don de ñid btan sñoms su bzhag nas*

8 Ms *uktam aryācāryapadaih* — *Çāstra* = *Madhyamakamūla* XXIV 8—Ācārya = Nāgārjuna

यथोक्तं भगवता । एकमेव भिक्षव परमं सत्यं यदुता-प्रमोषधर्म निर्वाणं सर्वसंस्काराश्च मृषा मोषधर्माण इति[1] ॥

सत्यद्वयमिदमुक्तं । तत्राविद्योपप्लुतचेतसां तत्स्वभावतया संवृतिसत्यमिति प्रतीतं । परमार्थसत्यं तु न ज्ञायते कीदृक्कि-स्वभावं किंलक्षणमिति । अतो वक्तव्यं तत्स्वरूपमिति । अत आह बुद्धेरगोचरस्तत्त्वमिति ।

बुद्धेः सर्वज्ञानानां । समतिक्रान्तसर्वज्ञानविषयत्वादगोचरः । अविषयः । केनचित्प्रकारेण तत्सर्व[बुद्धि]विषयीकर्तुं[2] न शक्यत इति यावत् । इति कथं तत्स्वरूपं प्रतिपादयितुं शक्यं । तथा हि सर्वप्रपञ्चविनिर्मुक्तस्वभावं परमार्थ[सत्यं][3]तत्त्वं । अतः सर्वो-पाधिशून्यत्वात्कथ[4] कया चित्कल्पनया पश्येत । कल्पनासमति-क्रान्तस्वरूपं च शब्दानामविषयः । विकल्पजन्मानो हि शब्दा[5] विकल्पधियामविषये [न] प्रवर्तितुमुत्सहन्ते । तस्मात्सकलविक-ल्पाभिलापविकलत्वादनारोपितमसांवृतमनभिलाप्यं परमार्थतत्त्वं कथमिव प्रतिपादयितुं शक्यते । तथापि भाजनश्रोतृजनानु-ग्रहार्थं [परिकल्पमुपादाय][6] संवृत्या निदर्शनोपदर्शनेन किंचिदभिधीयते ॥

---

[1] Quoted *Madhy. vṛtti* (Bibl. Buddh.), p. 41, n. 2 — The Ms has *uduta promosadharmam bijam*

[2] Ms *tatsarva ... viṣayīkartum*. Tib. *blo de thams cad-kyis*

[3] *satya*, from Tib.

[4] *upādhi* = khyad par

[5] Ms *śabdān ..., utsahate*

[6] Ms *tadbhāvanasamvṛtyā*. Tib. yons su brtag pa bzun-nas kun rdzob-kyi bden pa dpe ñe bar- - *samvṛtisatyanidarśana*

यथा तिमिरप्रभावात्तैमिरिकः[1] सर्वमाकाशदेशं केशोण्डुक-
मण्डितमितस्ततो मुखं विक्षिपन्नपि पश्यति । तथा कुर्वन्तमवे-
त्यातैमिरिकः किमयं करोतीति तत्समीपमुपसृत्य तदुपलब्ध-
केशप्रणिहितलोचनो ऽपि न केशाकृतिमुपलभते । नापि तत्के-
5 शाधिकरणान् भावाभावादिविशेषान् परिकल्पयति । यदा
पुनरसौ तैमिरिको ऽतैमिरिकाय स्वाभिप्रायं प्रकाशयति
केशानिह पश्यामीति[2] । तदा तद्विकल्पापसारणाय तस्मै यथा-
भूतमसौ ब्रवीति । नात्र केशाः सन्तीति तैमिरिकोपलब्ध्यनु-
रोधेन प्रतिषेधपरमेव वचनमाह । न च तेन[3] तथा प्रतिपाद-
10 यतापि कस्य चित्प्रतिषेधः कृतो भवति विधानं वा । तच्च
केशानां तत्त्वं यत्तैमिरिकः पश्यति तन्नातैमिरिकः[4] ॥

एवमविद्यातिमिरोपघातादतत्त्वदृशो बाला यदेतत्स्कन्ध-
धात्वायतनादिस्वरूपमुपलभन्ते[5] तदेषां सांवृतं रूपं । तानेव
स्कन्धादीन्येन स्वभावेन[6] निरस्तसमस्ताविद्यावासना बुद्धा भग-
15 वन्तः पश्यन्ति । अतैमिरिकोपलब्धकेशदर्शनन्यायेन[7] । तदेषां
परमार्थसत्यमिति ।

---

1 Ms *timirasvabhāvāt* — Tib rab rib gyi mthus

2 Tib = *keça iha santīti*

3 Tib de rnams kyis = *taiḥ*

4 According to the Tib — Ms. *yad ataimirikaḥ* *tan na taimirikaḥ*

5 So Ms., Tib = *upaghātāt tattvadṛço* *svarūpam nopalabhante* — *na upalabhante* is wrong, *tattvadṛço* very questionable

6 Tib *de bzhin gan gis* — Query *ran bzhin*

7 Tib = *ataimirikadarçananyāyena* — °*upalabdhakeça*°, given by Maith. Ms., is doubtful.

यदाह शास्त्रवित्।

विकल्पितं यत्तिमिरप्रभावात्[1]
केशादिरूपं वितथं तदेव।
येनात्म[136a]ना[2] पश्यति शुद्धदृष्टि-
स्तत्तत्त्वमित्येवमिहाप्यवैहि॥ इति[3]। 5

इति परमार्थतोऽवाच्यमपि परमार्थतत्त्वं दृष्टान्तद्वारेण प्रतीतिमुपादाय कथंचित्कथितं। न तु तदशेषसांवृतव्यवहार-विरहितस्वभावं वस्तुतो वक्तुं शक्यत इति॥ यदुक्तं।

अनक्षरस्य धर्मस्य श्रुतिः का देशना च का।
श्रूयते देश्यते चार्थः समारोपादनक्षरः॥ इति[4]। 10

तस्माद्व्यवहारसत्य एव स्थित्वा परमार्थो देश्यते। परमार्थ-देशनावगमाच्च परमार्थाधिगमो भवति। तस्यास्तदुपायत्वात्। यदुक्तं शास्त्रे[5]

व्यवहारमनाश्रित्य परमार्थो न देश्यते।
परमार्थमनागम्य निर्वाणं नाधिगम्यते॥ इति 15

[6]एवं परमार्थदेशनोपायभूता परमार्थाधिगमस्योपेयभूत इति[6]। अन्यथा तस्य देशयितुमशक्यत्वात्॥ ननु च तथाविध-

---

[1] Ms svabhavat

[2] The letter and figure-numerals concord again as the lacuna has not been noticed by the second hand (figure numerals)

[3] = *Madhyamakavatara*, VI 29 — Çāstravid = Candrakirti

[4] Quoted with the reading *deçyate capi* in *Madhy vrtti*, ad XV 2 (fol 78 b), *uktam bhagavata* — Our Tibetan version has *don*, supporting *deçyate carthah*

[5] = *Madhyamakamula* — This stanza = XXIV 10

[6 6] Wanting in Maith — Given by Nep and Tib.

मपि तथाविधबुद्धिविषयः परमार्थतः किं न भवतीत्यत्राह ।
बुद्धिः संवृतिरुच्यत इति । सर्वा हि बुद्धिरालम्बननिरालम्बन-
तया[1] विकल्पस्वभावा । विकल्पश्च सर्व एवाविद्यास्वभावः । अव-
स्तुग्राहित्वात् । यदाह ।

5 विकल्पः स्वयमेवायमविद्यारूपतां गतः । इति ।[2]

अविद्या च संवृतिः । इति नैव काचिद्बुद्धिः पारमार्थिक-
रूपग्राहिणी परमार्थतो युज्यते । अन्यथा सांवृतबुद्धिग्राह्यतया
परमार्थरूपतैव तस्य हीयेत । परमार्थस्य वस्तुतः सांवृतज्ञाना-
विषयत्वात् ॥

10 तत्र चेदमुक्तं भगवतार्यसत्यद्वयावतारे । यदि हि देवपुत्र
परमार्थतः परमार्थसत्यं कायवाङ्मनसां विषयतामुपगच्छेत् ।
न तत्परमार्थसत्यमिति संख्यां गच्छेत् । संवृतिसत्यमेव तद्भ-
[136b] वेत् । अपि तु देवपुत्र परमार्थसत्यं सर्वव्यवहारसमति-
क्रान्तं निर्विशेषं । असमुत्पन्नमनिरुद्धं । अभिधेयाभिधानज्ञेय-
15 ज्ञानविगतं । यावत्सर्वाकारवरोपेतसर्वज्ञज्ञानविषयभावसमति-
क्रान्तं[3] परमार्थसत्यमिति विस्तरः ।

अत एव तद्विषयः सर्वकल्पनानां यद्भावाभाव[स्व]परभाव-
सत्यासत्यशाश्वतोच्छेदनित्यानित्यसुखदुःखशुच्यशुच्यात्मानात्मा-

---

1 °niralambana° wanting in Maith — Tib. has snaṅ ba daṅ mi snaṅ ba ñid kyis = ābhāsānābhāsatayā

2 Prose in our Tib. version, but metrical in Vibhūticandra's Commentary

3 °viṣayabhāva°, bhāva wanting in Tib. yul las ḥdas pa

त्मशून्याशून्यलक्षणैकत्वान्यत्वोत्पादनिरोधादयो[1] विशेषास्तत्त्वस्य न संभवन्ति। अमीषां सांवृतधर्मत्वात् ॥

एतदुक्तं भगवता पितापुत्रसमागमे[2]। एतावच्चैव[3] ज्ञेयं यदुत संवृतिः परमार्थश्च। तच्च भगवता शून्यतः सुदृष्टं सुविदितं सुसाक्षात्कृतं। तेन सर्वज्ञ इत्युच्यते। तत्र संवृतिर्लोकप्रचारतस्तथागतेन दृष्टा। यः पुनः परमार्थः सोऽनभिलाप्यः। अनाज्ञेयः। अपरिज्ञेयः। अविज्ञेयः। अदेशितः। अप्रकाशितः। यावदक्रियः। अकरणः। यावन्न लाभो नालाभो न सुखं न दुःखं न यशो नायशो न रूपं नारूपमित्यादि।

इति प्रत्यस्तमितसमस्तसांवृतवस्तुविशेषमशेषोपाधिविविक्तमुक्तमनन्तवस्तुविस्तरव्यापिज्ञानालोकावभासितान्तरात्मना भगवता परमार्थसत्यमिति। तदेतदार्याणामेव स्वसंविदितस्वभावतया प्रत्यात्मवेद्यं। अतस्तदेवात्र प्रमाणं। संवृतिसत्यं तु लोकव्यवहारमाश्रित्य प्रकाशितं। तदेवं यथावद्विभागतः सत्यद्वयपरिज्ञानादविपरीतो धर्मप्रविचय उपजायते ॥

एवं संवृतिपरमार्थभेदेन द्विविधं सत्यं व्यवस्थाप्य तदधिकृतस्य लोकोऽपि द्विविध एवेत्युपदर्शयन्नाह [137a]। तत्र लोक इत्यादि।

---

[1] ° abhāvasvarūpata, sic from Tib. ṅan dan gzhan gyi dṅos po — lakṣaṇa wanting in Tib. — gcig dan du ma dan — ekatvānānātva

[2] The same quotation occurs infra ad IX. 155.

[3] So Nep. — Maith. ta eva — Tib. de ñid

तत्र लोको द्विधा दृष्टो योगी प्राकृतकस्तथा ।
[1]तत्र प्राकृतको लोको योगिलोकेन बाध्यते ॥ ३

तत्र तयोः संवृतिपरमार्थसत्ययोरधिकृतो[2] व्यवस्थितस्तत्सत्य-
प्रतिपत्तेति यावत् । लोको जनः । द्विधा द्विप्रकारः । संवृति-
5 परमार्थसत्यवेदी । लोक इति समुदायवचनं । तेन राशिद्वय-
मित्यर्थः । दृष्ट इति प्रतिपन्नः । युक्तेरागमाच्च । कथं कृत्वा
द्विधेत्याह योगी प्राकृतकस्तथेति । योगः समाधिः सर्वधर्मा-
नुपलम्भलक्षणः[3] । सोऽस्यास्तीति योगी । लोक इत्येकः प्रकारो
राशिः । तथा प्रकृतिः संसारप्रवृत्तेः कारणमविद्या तृष्णा ।
10 तस्या जात इति प्राकृतः । प्राकृत एव प्राकृतको[4] लोक इति
द्वितीयः । तत्र योगी प्रधानतत्त्वमविपरीतं पश्यति । प्राकृत-
कस्तु विपर्यस्तं वस्तुतत्त्वं पश्यति[5] भ्रान्तत्वात् ।

स्यादेतत् । उभयोरपि यथास्वं तत्त्वदर्शित्वात्कतरः पुन-
रनयोर्भ्रान्तिमानस्तु य एवान्यतरेण बाध्यते । कः पुनरनयोः
15 केन बाध्यत इत्याह तत्रेत्यादि । तत्रेति सप्तम्या समुदाय-
निर्देशः । निर्धारणे च सप्तमी[6] । तत्र तयोर्योगिप्राकृतकयो-

---

[1] With this line and the following one (4 A) compare Aryadeva's *Cittaviçuddhiprakaraṇa*, 83 (J A S.B LXVII, p 182) yatha prakṛtiko .

[2] dban bar gnas-pa

[3] Maith °*anupalambhaçūnyatāl*°—° *çunyata* ° wanting in Tib

[4] *phal pa ñid phal pa yin la hjig -rten*

[5] Maith has *adhyavasyatiti*, but Tib *mthon*

[6] *bdun pai mtha can sbyin btan bai tshig dan dmigs kyis dgar ba la bdun pao*

लौकिकयोर्मध्ये प्राकृतको लोकः प्राकृतकत्वज्ञात्या समुदाया-न्निर्धार्यते। निर्धार्य च बाध्यत इति बाधनं विधीयते[1] ॥ केनेत्यपेक्षायामाह योगिलोकेनेति। योग्येव लोको योगि-लोकः। तेन बाध्यत इति विपर्यस्तमतिर्व्यवस्थाप्यते। कथं धीविशेषेणेति योजनीयं[2]। न तु योगी प्राकृतकेन बाध्यते। 5

इदमित्राभिमत। यथा विभ्रमाहितसद्भावं तिमिरोपहत-चक्षुषो ऽसद्भूतकेशोण्डुकादिदर्शिनो ज्ञानं यथावस्थितवस्तुतत्त्व-ग्राहिणो ऽतैमिरिकज्ञानेन[3] बाध्यते। न तथा तैमिरिकज्ञाने-नातैमिरिकज्ञानं बाध्यते। एवमविद्यामलतिमिरदूषितबुद्धि-चक्षुषो[4] विपरीतवस्तुस्वरूपग्राहिणः प्राकृतकस्य ज्ञानं प्रज्ञा- 10 सलिलक्षालितविगतमलानास्रवज्ञानचक्षुषो[5] भावनिजतत्त्ववेदिनो योगिलोकस्य ज्ञानेन बाध्यते। न पुनरितरज्ञानेन योगि-ज्ञानमिति।

तथा चोक्तं[6]।

न बाधते ज्ञानमतै[137b]मिराणां 15

यथोपलब्धं[7] तिमिरेक्षणानां।

---

[1] Maith *nirdhāryate badhyate bādhena vidhīyate* — Tib. dmigs kyis bsal-ba yin-te dmigs kyis bsal nas kyan gnod ces pa ni gnod par brjod-de.

[2] See infra p 370 l 11

[3] Maith adds *taimirikajñānam*.

[4] °*buddhi*° wanting in Nep, given by Maith. and Tib.

[5] Ҫes rab chus bkrus pai mtshau ñid-can dri-ma dan bral ba.

[6] *Madhyamakāvatāre*, VI 27

[7] So Nep — Maith °*labdhih* —See infra p 378, l 14

तथामलज्ञानतिरस्कृतानां
धियास्ति बाधा न धियोऽमलायाः ॥ इति ॥

तस्मात्प्राकृतज्ञानमेव भ्रान्तमिति बाध्यते ॥ अथ किं प्राकृता एव बाध्यन्ते। योगिभिस्तु योगिनोऽपीत्याह बाध्यन्त इत्यादि।

5 **बाध्यन्ते धीविशेषेण योगिनोऽप्युत्तरोत्तरैः ।**

योगिनोऽपि योगिभिरपरापरैर्बाध्यन्ते। न केवलं प्राकृतका इत्यपिशब्दस्यार्थः। किंभूतैरुत्तरोत्तरैः। उत्तरे चोत्तरे चोत्तरोत्तरास्तैः। तारतम्यभेदावस्थितगुणविशेषप्रतिलम्भोत्कर्षप्राप्तैरधिकाधिकैरित्यर्थः। तदपेक्षयापचितगुणा[2] अधराधरे 10 बाध्यन्ते। ज्ञानमाहात्म्यादिभिरभिभूयन्ते।

कथ धीविशेषेणेति। धियो ज्ञानस्य प्रज्ञाया विशेषस्तत्तदावरणविगमात्प्रकर्षः। तेन। उपलक्षणं चैतत्। ध्यानसमाधिसमापत्त्यादिविशेषेणापि। तथा हि प्रमुदिताख्यप्रथमभूमिलाभिनो बोधिसत्त्वस्य ज्ञानादिगुणापेक्षया तदुत्तरविमलाभिधानद्वितीय-15 भूमिलाभिनो बोधिसत्त्वस्य ज्ञानप्रभावादयो गुणा विशिष्यन्ते। एवमन्येषामप्युत्तरोत्तरभूमिलाभिनां वेदितव्यं। तथा प्रथमध्यानादिलाभिनामप्युत्तरोत्तरैर्बाधनं योजनीय। यावत्सास्रवाणामनास्रवैरिति ॥

---

[1] The Tib. translation of the *Madhyamakāvatāra* (de bzhin du mod ye-çes spans pai blos) is literally accurate, our Tib. translation is very good: de-bzhin çes pa dri mai dban gyur pas = tathā malinajñānādhīnatayā.

[2] Nep. from a second hand °upacaya guṇā

स्यादेतत् । सत्यपि योगिनां धियो विशेषे प्राकृतज्ञानं भ्रान्त-
मिति कथमवगमयितुं शक्यत इत्याह । दृष्टान्तेनोभयेष्टेनेति ।

दृष्टान्तेनोभयेष्टेन कार्यार्थमविचारतः ॥ ४

उभयेषां योगिप्राकृतकानामिष्टोऽभिमतस्तेन दृष्टान्तेन
निदर्शनेन । य एष सूत्रेषु भगवता मायामरीचिगन्धर्वनगर-
प्रतिबिम्बादिरुक्तो दृष्टान्तः स चोभयेषामपि निःस्वभावतया
प्रसिद्धः । तस्मा[138a]द्धर्म्येण सर्वधर्माणां निःस्वभावत्वप्रतिपाद-
नात् । तथा हि ये तावत्सर्वजनप्रतिपन्नस्वरूपा रूपादयः । ते
योगिनामेव परमार्थसत्याधिगमान्निःस्वभावतया सिद्धाः । ये
पुनरिमे स्वप्नमायादिषूपलब्धास्ते प्राकृतकानामपि । अतस्तचो-
भयोरपि विप्रतिपत्तेरभावाद्दृष्टान्तधर्मता न विहन्यते ॥ येषां तु
मीमांसकादीनां देशकालान्यथात्मकं वस्त्वेव तत्तथा प्रतिभासत[1]
इति मतं तेऽन्यत्र[2] निराकृता इति न तन्मतमिह निरस्यते ॥
ये तु स्वयूथ्याश्चित्तमेव वस्तुसत्स्वप्नादिषु तथा प्रतिभासत इति
मन्यन्ते । तेऽपि यथावसरमग्रतः स्वसंवेदननिराकरणान्निरा-
करिष्यन्ते[3] ॥ युक्तिसिद्धमपि । उभयसिद्धमेव । अतस्तेन दृष्टान्तेन
विपरीतवस्तुस्वरूपग्राहितया प्राकृतकज्ञानं भ्रान्तमिति व्यवस्था-
प्यते । एवं योगिनामपि[4] यथासम्भवं वक्तव्य ॥

---

1 *Yul daṅ dus gzhan gyi bdag ñid dṅos po ñid de de bzhin du snaṅ ba yin no* For *Uttaramīmāṃsā*, see *Brahmasūtrabhāṣya*, 3, 2 1 3 (Col G A Jacob)

2 In some other treatise

3 svayūthyaḥ = Vijñānamātravādinaḥ —See infra ad IX 17, 18

4 Tib = *yogijñānam*

ननु यदि निःस्वभावाः सर्वभावा इति वस्तुतत्त्वं कथं तर्हि सर्वसत्त्वसमुद्धरणाशयेन दानादिषु संभारपरिपूरणार्थं तत्त्ववेदिनामपि बोधिसत्त्वानां प्रवृत्तिः। तेषामपि निःस्वभावत्वात् । इत्यत आह। कार्यार्थमविचारत इति ।

5 कार्यं साध्यं। उपादेयं। फलमुच्यते । तदर्थं तन्निमित्तमविचारतः। अविचारेण तद्धेतौ प्रवर्तनात् । तथाभूतेष्वपि तत्प्रत्ययतानियमस्य विद्यमानत्वात् । न हेतुफलभावस्य निरोधः ।

एतदुक्तं भवति। यद्यपि मायादिस्वभावतया निःस्वभावा 10 दानादयस्तथापि त्रिकोटिपरिशुद्ध्या सादरादियोगेनाभ्यस्यमानास्तथाभूता अपि परमार्थाधिगमाय हेतु[138b]भावमापद्यन्ते। तेषां तदुपायत्वात् । प्रतीत्यसमुत्पादस्य चाचिन्त्यत्वात् । एतादृशादेव हेतोरेतादृशं फलमधिगम्यते। तस्य तदुपेयत्वात्[1] । तदुक्तं ।

15 उपायभूतं व्यवहारसत्य-

मुपेयभूतं परमार्थसत्यं । इति[2] ॥

अवश्यं चैतदेव[3]। अन्यथा मार्गाभ्यासतः[4] समलावस्थाया निर्मलावस्था सविकल्पावस्थाया निर्विकल्पावस्था कथमुत्पद्येत। तस्याः परमार्थतस्तत्स्वभावत्वात् । अन्यथापि समानमेतत् ।

---

[1] So Nep and Tib —Maith *tatpratyayatvāt*

[2] *Madhyamakāvatara*, VI 80

[3] So Nep and Tib —Maith *evaitavyam*

[4] Nep adds *samala avthā*

सर्वधर्माणां परमार्थतो निःस्वभावत्वात्। हेत्वनुरूपं च सर्वत्र फलमिष्यते। अतः संवृतादपि निःस्वभावाद्धेतोर्निःस्वभावताधिगम एव फलं। कथमन्यथा संस्कृतादपि मार्गादसंस्कृतं निर्वाणमवाप्येत। इति दानादयो वस्तुतो निःस्वभावा अपि परमार्थतत्त्वाधिगमाय सर्वसत्त्वेषु करुणायमानैर्बोधिसत्त्वैरुपादीयन्ते। 5
अन्यथा परमार्थाधिगमायोगात्। ततो दानादिषु प्रवृत्तिरनिवारिता। एवमिष्टानिष्टफलप्राप्तिपरिहारार्थिनां कुशलाकुशलयोः प्रवृत्तिनिवृत्ती वक्तव्ये। एतत्पुनः पश्चाद्व्यक्तीकरिष्यते॥

स्यादेतत्। यदेतन्मायादिसमानस्वभावं वस्तुरूपं योगिनः प्रतिपद्यन्ते तदेव यदि प्राकृतकोऽपि जनः प्रतिपद्यते क्व तर्हि 10
विप्रतिपत्तिरस्तीत्याह। लोकेनेत्यादि।

लोकेन भावा दृश्यन्ते कल्प्यन्ते चापि तत्त्वतः।
न तु मायावदित्यत्र विवादो योगिलोकयोः॥ ५

लोकेन प्राकृतकजनेन। हेतुप्रत्ययं प्रतीत्य भवन्ति स्वरूपलभन्त इति भावाः। न पुनः पारमार्थिकं रूपं निजमेषा- 15
मस्ति। इति भावशब्देन निःस्वभावताभिधानं प्रतीयते। [1]सत्स्वरूपेण[1] न केवलं दृश्यन्ते कल्प्यन्ते चापि तत्त्वतः। यथाप्रतीतस्वभावेनैव परमार्थतोऽध्यवसीयन्ते। अ[139a]भिनिविश्यन्त इति यावत्। यदेतदस्मत्प्रतीतिगोचरो वस्तुरूपं तद्वास्तवमेवे-

---

[1] Wanting in Tib

त्यभिमननात्। न तु मायावत्। न तु पुनर्यथा योगिना मायेव मायावत्स्वभावशून्या दृश्यन्ते परमार्थतस्तथा प्रतीयन्ते[1]। इत्यत्रास्मिन् विवादो विप्रतिपत्तिर्योगिलोकयोः। योगिना सह लोकस्येत्यर्थः। तत्प्रतिपन्ने वस्तुतत्त्वे लोकस्याप्रतिपत्तेः।
5 लोकेन सह वा योगिनः। तत्प्रतिपन्ने योगिना यथार्थताप्रतिषेधात्॥ अयमभिप्रायः। सर्वभावानां सांवृतं पारमार्थिकं चेति रूपद्वयमस्ति। तत्र यत्सांवृतं तदेव लोकेन प्रतीयते। यत्तु पारमार्थिकं तद्योगिनेत्युक्तं। यथा मायाकारनिर्मितहस्त्यादिरूपमेव मन्त्रादिसामर्थ्यविभ्रमितलोचनो जनः पश्यति।
10 मायाकारस्तु तत्स्वभावादि[2] निजं तत्स्वरूपं। एवं योगिलोकयोरपि यथायोगं प्रतिपत्तव्यं॥

अथापि स्यात्। यदेतत्समस्तजनसाधारणमर्थक्रियाक्षम[3] प्रत्यक्षप्रमाणप्रतीतं वस्तुरूपं तत्कथमपह्नोतुं शक्यत इति परस्य हृदयमाशङ्क्याह प्रत्यक्षमपीत्यादि।

15 **प्रत्यक्षमपि रूपादि प्रसिद्ध्या न प्रमाणतः।**

यदपि च प्रत्यक्षमभिधीयते रूपादि। आदिशब्देन शब्दादि वेदनादि गृह्यते। तदपि प्रसिद्ध्या रूढ्या[4] लोकप्रवादेन न प्रमाणतः। न प्रमाणेनाधिगतं तत्प्रत्यक्षं रूपादीति सम्बन्धः।

---

[1] So Nep and Tib —Math *māyeva tathā lokena pratīyante*

[2] So Mss and Tib

[3] See *Sarvadarç.*, French translation, n 20 (*Muséon* 1901)

[4] For this reading I am indebted to Prof H Kern —Math *racya* —Nep has *rūyā* from a second hand —Not translated in Tib

सांव्यवहारिकप्रमाणत्वात्प्रत्यक्षादीनां तदधिगतं सांवृतमेव रूपादि । न च लौकिकप्रमाणसमधिगम्यं तात्त्विकं रूपं सर्वजनानां तत्त्ववेदित्वप्रसङ्गात् । यदाह ।

इन्द्रियैरुपलब्धं यत्तत्तत्त्वेन भवेद्यदि ।

जातास्तत्त्वविदो बालास्तत्त्वज्ञानेन किं तदा ॥ इति ।

तस्मात्प्रत्यक्षमपि न प्रमाणेनाधिगतं ॥

रूपादि तत्त्वं प्रत्यक्षमपि यदि न प्रमाणाधिगतं कथं तत्प्रसिद्धिः । प्रसिद्धिश्चेत्कथं मृषेत्यत्राह । अशुच्यादिष्वित्यादि ।

अशुच्यादिषु शुच्यादिप्रसिद्धिरिव सा मृषा ॥ ६

यथा च परमार्थतोऽशुचिनि स्त्रीकलेवरादौ तदासक्तिविपर्यस्तचेतसां शुचिबुद्धिरुपजायते । आदिशब्दादनित्यादौ नित्यादिबुद्धिर्गृह्यते[1] । सा चातस्मिंस्तद्ग्रहान्मृषा वितथग्राहिणीत्यर्थः । तद्वदियं रूपादावपीत्यविशेष ।

यदि न प्रत्यक्षप्रमाणात्तत्सिद्धिः । आगमात्तर्हि भविष्यति । तथा हि स्कन्धधात्वायतनादिस्वभावतया भगवता भावाः सूत्रे देशिता क्षणिकादिस्वभावतया च । तत्रेदमुक्तं भगवता । सर्वं सर्वमिति[2] ब्राह्मण यावदेव पञ्च स्कन्धाः । द्वादशायतनानि । अष्टादश धातव इति ॥ तथा ।

---

[1] Reference to the four viparyāsas
[2] So Nep. and Tib. — Math. has *sarvam sattvam iti*

क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया ।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ॥ इति[1] ।

न च मायादिस्वभावानां क्षणिकाक्षणिकादिधर्मताप्रतिपादनमुचित । निःस्वभावानां कस्य चित्स्वभावस्याभावात् ।
5 तत्कथममी न परमार्थसन्त इत्यत्राह लोकावतारणेत्यादि ।

लोकावतारणार्थं च भावा नाथेन देशिताः ।
तत्त्वतः क्षणिका नैते संवृत्या चेद्विरुध्यते ॥ ७

लोकानां भावाभिनिवेशिनां स्कन्धादिदेशनाविनेयानां सत्त्वानामापाततः[2] शून्यतादेशनानधिकृतानां शून्यतायामवतारणार्थं
10 सुकुमारोपक्रमेण प्रवर्तनाय । चो हेतौ । यस्माद्भावाः स्कन्धायतनादिलक्षणाः । वस्तुतो निःस्वभावत्वेऽपि सर्वधर्माणां । नाथेन नरकादिदुःखात्सत्त्वान् परित्रायमाणेनाभ्युदयनिःश्रेयससुखं प्रापयता सत्त्वाशयादिवेदिना बुद्धेन भगवता देशिताः प्रकाशिताः । न तु परमार्थतः । तस्मान्न सूत्रविरोधः ॥ तदुक्तं ।

15 ममेत्यहमिति प्रोक्तं यथा कार्यवशाज्जिनैः ।
तथा कार्यवशात्प्रोक्ताः स्कन्धायतनधातवः ॥ इति[3] ॥

यदि न परमार्थतो दे[140a]शिताः कथं तर्हि ते क्षणिका इत्याह । तत्त्वतः क्षणिका नैत इति । तत्त्वतः परमार्थतो

---

[1] The first line is quoted in Kumārila's *Tantravārt* p 170 10, the second in *Bhāmatī* (Calcutta, 1891) p 361 3 (bhūtir yeṣām), both in *Nyāyabindupūrvapakṣa*—See *Album Kern*, p 112, n 1

[2] = ro zhig

[3] *Yuktiṣaṣṭika*, by Nāgarjuna, fol 27 a 2 (Mdo XVII)

निःस्वभावत्वात्क्षणिका अपि न भवन्ति। एते। इमे भावाः। क्षणिकादिदेशना वैनेयानां तत्स्वभावताप्रकाशनात्[1]। यदि न तत्त्वतः क्षणिकाः कथं तर्हि देशनायामपि कथिता इति मनसि निधाय परः संवृत्या चेत्[2]। यदि संवृत्या क्षणिका अभिधीयन्त इत्युच्यते[3]। इत्युत्तरमाशङ्क्य दूषयति। तदा विरुध्यते। संवृत्या क्षणिका न परमार्थत इति विरुध्यते। न संगच्छते। अक्षणिकतया प्रतीतेः प्रतीतिविरोधः[4]। सांव्यवहारिभिरक्षणिकत्वप्रतीतेः। न क्षणिकत्वं सांवृतं रूपमिति यावत्[5]। एतत्सिद्धान्तवादी परिहरति न दोषो योगिसंवृत्येति। 5

न दोषो योगिसंवृत्या लोकात्ते[6] तत्त्वदर्शिनः। 10
अन्यथा लोकबाधा स्यादशुचिस्त्रीनिरूपणे॥ ८

नायं प्रतीतिविरोधलक्षणो दोषः। कुतः। योगिनां पुद्गलनैरात्म्यसमाधिलाभिनां[7] या संवृतिर्व्यवहारस्तया क्षणिकतया

---

1 So Mss —Tib skad-cig ma la sogs pas (?) bstan pai (r) gdul bya rnams la denan bzhin bstan pai phyir

2 So Mss —According to Tib *āha saṃvṛtyā ced iti*

3 Mss ucyanto

4 Things being perceived as permanent, there is opposition by the perception —Tib *skad cig ma ma yin par rtogs pa dan hgal lo* = akṣaṇikatayā pratīter virodhaḥ.

5 Tib *tha sñad-pa-rnams kyis skad cig ma ma yin par de-kho na ñid du rtogs pa dan kun rdzob kyi ran bzhin zhes-pa ni hgal lo zhes pai don to* .. akṣaṇikatvasya tattvena pratītiḥ sāṃvṛtam rupam ceti virodha ity arthaḥ

6 So M —Minaev has *lokānte*

7 Bdag med pai tin ne

प्रतीतेः ॥ अयमभिप्रायः । यदि नामार्वाग्दर्शनैः क्षणिकत्वं न प्रतीयते । तथापि योगिव्यवहारगोचरः । योगिव्यवहारो ऽपि संवृतिरूपतां न जहाति बुद्धिः संवृतिरुच्यते इति वचनात्[1] । न च प्रतीतिबाधित बाधितमेव । तथाविधायाः प्रतीते-
5 रप्रमाणत्वात् ।

कुतः पुनरेतत्सांवृतमपि क्षणिकत्वादि योगिन एव पश्यन्ति । नार्वाग्दर्शिन इत्याह । लोकात्ते तत्त्वदर्शिन इति । लोकादर्वाचीनदर्शनात्मकाशात्ते योगिनस्तत्त्वदर्शिनः । अतीन्द्रिय-दर्शिनः । हेतुपदमेतत् । यस्मात्तत्त्वदर्शिनस्ते तस्मात्क्षणिक-
10 नैरात्म्यादि लोकाप्रतीतमपि प्रतिपद्यन्ते । अत एव न तेषां लोकप्रतीतिबाधा ।

अवश्यं चैतदङ्गीकर्तव्यमित्याह । अन्यथेत्यादि । अन्यथा यदि चैवं [140b] न स्वीक्रियते । तदा भवदभ्युपगतेऽपि लोकबाधा स्यात् । कुत्र । अशुचिस्त्रीनिरूपण इति । अशुचिभावनासमये[2] ।
15 अशुचीति स्त्रियाः कामिन्या निरूपणे विभावनायां लोकबाधा स्यात् । लोकप्रतीतेन विरोधो भवेत् । लोकेन शुचिस्वभावतया स्त्रीशरीरस्याध्यवसानात् । तस्मान्न लोकप्रतीतेन योगिदर्शन-बाधेति । अत्र

यथोपलब्धं[3] तिमिरेक्षणानां

---

[1] See supra p 352, l 4

[2] Nep Ms has *aśubhābhā*

[3] First hand *upalabdhi*, i erased, see above, p 360, l 15

इत्यादिनोपचयहेतुत्वेन[1] योजनीयं ॥ इति नागमादपि
भावानां परमार्थतः सिद्धिरस्ति । तस्मान्मायास्वप्नादिस्वभावाः
सर्वधर्मा इति निश्चितमेतत् ॥

स्यादेतत् । यदि सर्वव्यापिनी मायोपमस्वभावता । बुद्धोऽपि
तर्हि मायोपमः स्वप्नोपमः स्यात् । उक्तं चैतद्भगवत्यां[2] । एवमुक्ते 5
सुभूतिस्तान् देवपुत्रानेतदवोचत् । मायोपमास्ते देवपुत्राः
सत्त्वाः । स्वप्नोपमास्ते देवपुत्राः सत्त्वा इति हि माया च
सत्त्वाश्चाद्वयमेतदद्वैधीकारं[3] । सर्वधर्मा अपि देवपुत्रा मायोपमाः
स्वप्नोपमाः । स्रोतआपन्नोऽपि मायोपमः स्वप्नोपमः । स्रोत-
आपत्तिफलमपि मायोपम स्वप्नोपमं । एवं सकृदागाम्यपि 10
सकृदागामिफलमपि । अनागाम्यपि अनागामिफलमपि । अर्ह-
न्नपि अर्हत्त्वमपि मायोपम स्वप्नोपमं । प्रत्येकबुद्धोऽपि मायोपमः
स्वप्नोपमः । प्रत्येकबुद्धत्वमपि मायोपमं स्वप्नोपमं । सम्यक्संबुद्धोऽपि
मायोपमः स्वप्नोपमः । सम्यक्संबुद्धत्वमपि मायोपम स्वप्नोपमं ।
यावन्निर्वाणमपि मायोपमं स्वप्नोपमं । सचेन्निर्वाणादपि कश्चिद्धर्मो[4] 15
विशिष्टतरः स्यात्तमप्यहं मायोपमं स्वप्नोपम [141a] वदामि[5] ॥

---

1 *upacayahetu°* = lhag-pa rgyan tshogs

2 Quoted in *Madh-vṛtti*, Chapter XVII in fine.—Some various readings; our text is abridged.

3 advayadhīkāra, wanting in P. W.—The Ms. has °कार not कारं.

4 *dharmo viśiṣṭataraḥ* = khyad par du ḥphags-paḥi chos.

5 *Madh-vṛtti*, has *vadeyam*.—No final clause (*iti* = zhes te) in Mss.—Comp. the *Mahāprajñāpāramitāsūtra* quoted by *Teitaro Suzuki*, Awakening of faith in the Mahāyāna, p. 100, n. 1. "Even Nirvāṇa is like a mirage, like a dream. Nay, if there be something superior to Nirvāṇa, I declare it is also like a mirage, like a dream."

एवं कथं तत्र सत्कारापकारयोः पुण्यपापसमुद्भव इति परस्याभिप्रायमाशङ्क्याह । मायोपमादित्यादि ।

मायोपमाज्जिनात्पुण्यं सद्भावेऽपि कथं यथा ।

यदि भगवानपि मायोपमस्वभावः । तदा मायोपमान्निः-
5 स्वभावाज्जिनाद्भगवतः पुण्यं सुकृतं पूजासत्कारपादवन्दनादिभिः[1]
कथं यथा कथमिवेति मन्यसे । उपलक्षणं चैतत् । पापमपि
तदपकारे कथमिवेति द्रष्टव्यं । न हि मायाकारनिर्मितपुरुष-
सत्कारापकारयोः पुण्यपापप्रसूतिर्युक्तेति परस्याभिप्रायः ।

अत्र प्रागुक्तमेवोत्तरं । तथात्र परमेव परिपृच्छति । सद्भावे-
10 ऽपि कथं यथेति । सद्भावेऽपि परमार्थसत्यत्वेऽपि भगवतः
कथमिव पुण्यं । कथं यथेत्युभयत्रापि योजनीयं ।

अयमभिप्रायः । यथा कस्य चित्परमार्थसतो जिनात्पर-
मार्थसत्पुण्यमुपजायते । तथान्यस्य मायोपमान्मायोपममेवेत्या-
वयोर्न कश्चिद्विशेषः । इदंप्रत्ययतामात्रस्योभयसाधारणत्वात् ।
15 इति यदेवोत्तरं भवतां तदेवास्माकमपि नातिरिच्यते[2] किं
चित् । न च युक्तिसिद्धं परमार्थसद्वस्तुरूपं किं चिदस्तीति
प्रतिपादितं ॥

भवतु नाम मायोपमादपि जिनात्पुण्यं । इदं तु कथं
समाधीयत[3] इत्याह । यदि मायोपम इत्यादि ।

---

[1] Ms has *vandanādanādibhih*, not supported by Tib

[2] *khyad par cun zad kyan yod pa ma yin no* = na kaç cid viçesah

[3] *de lta na yan hdi la lan ji ltar hdebs zhes.*

यदि मायोपमः सत्त्वः किं पुनर्जायते मृतः ॥ ६

अथवा अन्यथाऽवतार्यते । यदि जिनोऽपि मायोपमः । का वार्त्ता तर्हि सांसारिकेषु सत्त्वेषु । तेऽपि तथेति ब्रूमः । मायोपमास्ते देवपुत्राः सत्त्वा इति वचनात्[1] । एवं सति महान्दोषः प्रसज्यत इत्याह । यदीत्यादि ।

यदि मायोपमो मायास्वभावसमानधर्मः सत्त्वः प्राणी । तदा किंपुनर्जायते मृतः । किमिति प्रश्ने अक्षमायां वा । किं पुनर्जायते । उत्पद्यते । मृतो निकायसभागतायाश्च्युतः । का[141b]रणमत्र वक्तव्यं नैतद्युक्तमिति वा । न हि मायापुरुषो विनष्टः पुनरुत्पद्यते । तस्मात्परमार्थसन्तो भावा इत्युपगन्तव्यं ॥ नैतदुपगन्तव्यमित्याह । यावदित्यादि ।

यावत्प्रत्ययसामग्री तावन्मायापि वर्तते ।

यावत्कालं प्रत्ययानां कारणानां मन्त्रौषधादीनां सामग्री समुदायः । समग्राणि कारणानि । तावत्कालं मायापि वर्तते । नार्वाग्निवर्तते । नापि ततः परं प्रवर्तते । एवं यावदविद्याकर्म-तृष्णास्वभावा[2] सामग्री तावत्सत्त्वसतानमायापि वर्तते । इदं-प्रत्ययतायत्तवृत्तित्वात्[3] । यदि न परमार्थतः सत्त्वोऽस्ति । कथमा-संसारं सत्त्वसतानः प्रवर्तते । न तु मायावदचिरमेव निवर्तते ।

---

1 See supra p 379, l 7

2 So Tib —Better *avidyātṛṣṇakarma*

3 gan ikyen inams gaṅ yin-pa ni hjug pai phyir io

उक्तमत्र। यावत्प्रत्ययसामग्री तावत्प्रवर्तते[1]। [2]यस्य तु तथा नास्ति स नानुवर्तत इति[3] ॥

अपि च न चिरकालावस्थितिः सम्यक्त्वव्यवस्थानिबन्धन-मित्याह। दीर्घसतान इत्यादि ।

5 **दीर्घसंतानमात्रेण कथं सत्त्वोऽस्ति सत्यतः ॥ १०**

दीर्घश्चिरकालावस्थितः। संतानः प्रवाहः। स एव केवल-स्तन्मात्र। तेन। कथमिति पृच्छति। केन प्रकारेण। सत्त्वोऽस्ति विद्यते। सत्यतः परमार्थतः॥ एतावांस्तु विशेषः। यस्य हि दीर्घकालावस्थितिहेतुप्रत्ययविशेषोऽस्ति। स दीर्घकालमनु-

10 वर्तते। यस्य तु तथा नास्ति स नानुवर्तत इति। न तु तावता सम्यक्मिथ्यात्वं। तस्मान्मायास्वभावत्वेऽपि न पुनर्जन्मासंभव ॥

एवं तर्हि यथा मायापुरुषवधादौ न प्राणातिपात.। तथा तदपरपुरुषवधादावपि न स्यादभिन्नस्वभावत्वादित्यत्राह। मायापुरुष इत्यादि ।

15 **मायापुरुषघातादौ चित्ताभावान्न पापकं।**

मायापुरुषस्य घातादौ मारणादौ। आदिशब्देन तस्या-दत्तादि गृह्यते[4]। समानेऽपि निःस्वभावत्वे चित्तस्य विज्ञानस्य मायापुरुषसताने ऽभावात्। असत्त्वात्। न पापक नाकुशल-

---

[1] Tib = *tāvan maya pravartate*

[2] Wanting in Tibetan, see infra l 9

[3] Dev has *sattvatah*

[4] Tib ma byin par blans pa la sogs pa yin la = *adattādānādi*

मुत्पद्यते प्राणातिपातादि । [141a] पापमेव पापकं स्वार्थे कन्विधानात्[1] । तत्रापि मारणाभिप्रायेण प्रहारं ददतो भवत्येवाशुभं न तु प्राणातिपातः ॥ मायापुरुषादन्यत्र कथं प्राणातिपात इति चेत् । आह । चित्तमायेत्यादि ।

चित्तमायासमेते तु पापपुण्यसमुद्भवः ॥ ११ 5

चित्तमेव माया चित्तमाया । तया समेते युक्ते । मायास्वभावेन चित्तेन संबद्ध इत्यर्थः । तुशब्दः पूर्वस्माद्विशेषार्थः । पुण्यं च पापं च पुण्यपापे । तयोः[2] । सुकृतदुष्कृतयोः समुद्भवः समुत्पत्तिः । उपकारापकारयोः ॥ इति सामग्रीविशेषात्कार्यविशेषः । यथा सत्यपि गोमयेतरजन्मनोर्वृश्चिकयोराकारसाम्ये[3] 10 कारणभेदात्स्वभावभेदः । तथेहापि नोक्तदोषप्रसङ्गः ॥

यदुक्तं चित्तमायेति तत्परो विघटयन्नाह मन्त्रादीनामित्यादि ।

मन्त्रादीनामसामर्थ्यान्न मायाचित्तसंभवः ।

मन्त्रादीनां । आदिशब्दादौषधादीनां । चित्तोत्पादं[4] 15 प्रत्यसामर्थ्याद्व्यापारात् । न मायाचित्तसंभवः । न मायास्वभावं चित्तं संभवति । यथा परव्यामोहनिबन्धनानां मायाकारप्रयुक्तानां

---

1 This clause is wanting in Tibetan

2 *tayoḥ*, in modern copy, wanting in Nep and Tib

3 = *lci ba dan gzhan las skyes pai myu gu dag* —Nep. has *jan ranoh*, and *vaı* ° from a second hand

4 Modern copy and Nep have here *kāı ya*, but in the Nep there is a mark that these aksaras are out of place

मन्त्रादीनां प्रभावेन हस्त्याद्याकारनिर्वृत्तिः । न तथा चित्तस्येति परस्य भावः ॥ एतत्परिहरन्नाह । सापि नानाविधेत्यादि ।

सापि नानाविधा माया नानाप्रत्ययसंभवा ॥ १२

अपिशब्दोऽवधारणार्थो भिन्नक्रमश्च[1] । सा माया नाना-
5 विधैव नानाप्रकारैव अतीव[2] नानाप्रत्ययसंभवा । नानाप्रत्यया-
दनेकप्रकारकारणात्संभव उत्पादो यस्याः सा तथोक्ता ॥
अयमभिप्रायः । यदि माया मायेति शब्दसाम्यमस्ति । तथापि न
तत्कारणस्याप्यभेदो मायास्वभावत्वेऽपि कार्यस्य नानास्वभावत्वात् ।
न ह्येकस्मिन् कार्ये किं चित्कारणं[3] दृष्टमिति कार्यशब्द-
10 साम्यात्सर्वत्र तदेव प्रकल्पयितुं युज्यते । अपि तु क्व चिदेव[4]
कस्य चित्सामर्थ्यं शब्द[112b]साम्येऽपि स्वभावभेदात् । एत-
देवोपदर्शयन्नाह । नैकस्येति ।

नैकस्य सर्वसामर्थ्यं प्रत्ययस्यास्ति कुत्र चित् ।

नैकस्य क्व चिदुपलब्धसामर्थ्यस्य प्रत्ययस्य कारणस्य हेतोः ।
15 सर्वसामर्थ्यं सर्वस्मिन् कार्ये सामर्थ्यं शक्तिरस्ति संभवति । क्व
चिद्दृष्टमिति कृत्वा कुत्र चिदिति कस्मिंश्चित्समये देशे काले वा ।

---

1 According to Tib. *bhinnakramo vā*.

2 So Tib. (*yin tu*) and Nep. old reading; new reading and modern copy *uta eva*.

3 Tib. ḥbras bu gcig pa rgyu gcig mthoṅ bas = *ekasmin kārya ekam kāraṇam*.

4 So Math. supported by Tib. — Nep. *kvacideva kasya* = *kvacid eva-kasya*.

दृष्टमिष्टं वा । ततश्च का चिन्ताया मन्त्रादिसामर्थ्यप्रतिलब्ध-स्वभावा । का चित्पुनरनादिसंसारप्रवृत्तमात्मात्म्याऽविद्यादिप्रभाव-प्रवर्तिता । तस्मान्न सर्वासु मन्त्रादिसामर्थ्यमिति ।

एतत्सर्वं लोकव्यवहारानुगतं कल्पनानिर्मितं सांवृतं वस्तु-तत्त्वमुपादाय समुत्थितं । न तु परमार्थतः । परमार्थदशायां जननमरणोत्पादनिरोधहेतुफलभावाभावादिकल्पनाया अभा-वात् । प्रकृतिनिर्वृतत्वात्सर्वधर्माणामिति ॥

एतदसहमानः परः पुनरन्यथा प्रसञ्जयन्नाह । निर्वृत इत्यादि ।

निर्वृतः परमार्थेन संवृत्या यदि संसरेत् ॥ १३

निर्वृतः स्वभावशून्यत्वादुत्पादनिरोधरहितः । परमार्थेन परमार्थसत्यतः प्रकृतिनिर्वाणतया ऽऽदिशान्तत्वात् । यदि संवृत्या संवृतिसत्येन काल्पनिकत्वेन संसरेत् । जातिजरामरणादियोगी भवेत् । तदायं महान्विरोधः स्यादित्याह । बुद्धोऽपि संसरे-देवमित्यादि ।

बुद्धोऽपि संसरेदेवं ततः किं बोधिचर्यया ।

एवमभ्युपगम्यमाने बुद्धोऽपि सर्वावरणप्रहाणतो निर्वृतोऽपि संसरेत्[1] । जन्मादिभाग्भवेत् । यत एव । ततस्तस्मात्कारणात् । किं बोधिचर्यया । बोधये बुद्धत्वाय चर्या करचरणशिरःप्रदा-नाद्यनेकदुःकरशतलक्षणा । तया किं । न किं चित्प्रयोजनं ।

[1] So Tib —Nep has *saṃsāre*.

उक्तक्रमेणैव वैफल्यात् । सा हि सर्वसांसारिकधर्मनिवृत्तये सर्वगुणसमुच्चयास्पदबुद्धत्वप्राप्तये[1] च समाश्रीयते[2] । तथापि न सांसारिकधर्म[143a]निवृत्तिश्चेत् । किं तत्समाश्रयेण समाधित-मिति भावः । तत्प्रत्युक्तमेव यावत्प्रत्ययसामग्रीत्यादिना । पुन-
5 रपि विस्पष्टयन्नाह । प्रत्ययानामित्यादि ।

प्रत्ययानामनुच्छेदे मायाप्युच्छिद्यते न हि ।
प्रत्ययानां तु विच्छेदात्संवृत्यापि न संभवः ॥ १४

प्रत्ययानां कारणानां । अनुच्छेदेऽविनाशे । हिर्यस्मात् । मायापि न केवलं संसार इति । समुच्चयेऽपिशब्दः । नैवोच्छिद्यते
10 न निवर्तते । प्रत्ययानां कारणानां तु विच्छेदात् । निवृत्तेः । संवृत्यापि काल्पनिकव्यवहारेणापि [न] संभवो न संसरणं[3] । प्रत्ययानां समुच्छेदः पुनस्तत्त्वाभ्यासादविद्यानिरोधादिक्रमेण वेदितव्यः ।

तद्यथोक्तमार्यशालिस्तम्बसूत्रे[4] । एवमुक्ते मैत्रेयो बोधिसत्त्वो
15 महासत्त्व आयुष्मन्तं शारिपुत्रमेतदवोचत् । यदुक्तं भगवता धर्मस्वामिना सर्वज्ञेन । यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति । यो धर्मं पश्यति स बुद्धं पश्यति । तत्र कतमः

---

1 So Nep °*āsrta* = brten te (See *Mahāvastu* I 456, *Lalita* 210 ₂)

2 Nep *samāśrīyate*, *samāśrayeṇa*

3 *na* wanting in both Mss —Tib *hkhor-ba srid pa ma yin no* = na saṃsara-*ṇa*saṃbhavaḥ

4 See *Çikṣās* and for this passage *Madh vṛtti* (Bibl Buddh) p 6 n 2

प्रतीत्यसमुत्पादो नाम। यदिदमविद्याप्रत्ययाः संस्काराः। संस्कारप्रत्ययं विज्ञानं। विज्ञानप्रत्ययं नामरूपं। नामरूपप्रत्ययं षड़ायतनं। षड़ायतनप्रत्ययः स्पर्शः। स्पर्शप्रत्यया वेदना। वेदना-प्रत्यया तृष्णा। तृष्णाप्रत्ययमुपादानं। उपादानप्रत्ययो भवः। भवप्रत्यया जातिः। जातिप्रत्यया जरामरणशोकपरिदेवदुःख-दौर्मनस्योपायासाः। [एवमस्य केवलस्य महतो दुःखस्कन्धस्य 5 समुदयो भवति। तत्र अविद्यानिरोधात्संस्काराः][1] निरुध्यन्ते। [पेयालं।] एवमस्य केवलस्य[2] महतो दुःखस्कन्धस्य निरोधो भवति। अयमुच्यते प्रतीत्यसमुत्पादः॥ पेयालं॥ य इमं प्रतीत्यसमुत्पादं सततसमितं निर्जीवं[3] यथावदविपरीतमजातमभूतमसंस्कृतम-प्रतिघमनालम्बनं[4] शिवमभयमहार्यमव्युपशमस्वभावं[5] पश्यति। 10 स धर्मं पश्यति। यस्तु[6] एवं सततसमितं यावदव्युपशमस्वभावं धर्मं पश्यति। सोऽनुत्तरं[7] धर्मशरीरं बुद्धं पश्यति॥ पेयालं॥ [143b] तत्राविद्या कतमा। एतेषामेव षण्णां धातूनां यैकसंज्ञा[8] पिण्डसंज्ञा नित्यसंज्ञा ध्रुवसंज्ञा शाश्वतसंज्ञा सुखसंज्ञा आत्मसंज्ञा सत्त्वसंज्ञा[9] जीवसंज्ञा जन्तुसंज्ञा मनुजसंज्ञा मानवसंज्ञा 15

---

1 From Tib.—Modern copy °upāyasāt e canirudhyante. Nep upa yasāç ca, but the wanting passage is not supplied in margin

2 Wanting in Tib

3 Tib has ajīvam, nirjīvam

4 From other sources aupamitam abījam (wanting in Tib.)

5 From other sources abhayam avyayam (Wanting in Tib.)

6 So Nep

7 So Nep.—Read anuttara°

8 So Nep °Cp M Vyut § 207

अहंकारममकारश्च। एवमादि विविधमज्ञानमियमुच्यते ऽविद्या। एवमविद्यायां सत्यां विषयेषु रागद्वेषमोहाः प्रवर्तन्ते तत्र ये रागद्वेषमोहा विषयेष्वमी अविद्याप्रत्ययाः संस्कारा इत्युच्यन्ते। वस्तुप्रतिविज्ञप्तिर्विज्ञानं। चत्वारि महाभूतानि
5 चोपादानानि[1] रूपमैकध्यरूप[2]। विज्ञानसहजास्त्वारोऽरूपिण उपादानस्कन्धा[3] नाम। तन्नामरूप। नामरूपसंनिसृतानीन्द्रियाणि[4] षडायतनं। त्रयाणां धर्माणां संनिपातः स्पर्शः। स्पर्शानुभवो वेदना। वेदनाध्यवसान तृष्णा। तृष्णावैपुल्यमुपादानं। उपादाननिर्जात पुनर्भवजनक कर्म भवः।
10 भवहेतुकः स्कन्धप्रादुर्भावो जातिः। जात्यभिनिर्वृत्तानां स्कन्धानां परिपाको जरा। स्कन्धविनाशो मरणं। म्रियमाणस्य संमूढस्य [5]स्वाभिष्वङ्गस्यान्तर्दाहः शोकः। शोकोत्थलपन[6] परिदेवः। पञ्चविज्ञानसंप्रयुक्तमसातानुभवनं दुःख। दुःखमनसि-
15 कारसंप्रयुक्त मानसं दुःखं दौर्मनस्यं। ये चान्य एवमादाय उपक्लेशा इम उपायासा इत्युच्यन्ते।

तत्र महान्धकारार्थेनाविद्या। अभिसंस्कारार्थेन संस्काराः। विज्ञानार्थेन विज्ञानं। मननार्थेन[7] नामरूपं। आपद्वारार्थेन[8]

---

[1] Tib hbyun ba chen po bzhi po ño-bar-gzun nas gzugs gcig po ni gzugs so = *catvāri mahābhūtāny upādāya rūpam*

[2] Nep *ekadhyarūpam* modern copy *ekādhya*

[3] = *ne bar-len pai phun po*

[4] °*nisrtāni*, corrected in margin °*sri*?

[5] chags dan bcas pa = *sābhisvangasya*, correct

[6] *uttha* = byun ba   [7] See *Çikṣās*, 251, n 2 (manyanā)

[8] So Nep —Modern copy *āpaddvāra*°—Tib skye-bai sgoi-phyir = *janmadvarārthena*, but see VI 101

षडायतनं। स्पर्शनार्थेन स्पर्शः। अनुभवनार्थेन वेदना। परितर्षणार्थेन तृष्णा। उपादानार्थेनोपादानं। पुनर्भवजननार्थेन भवः। स्कन्धप्रादुर्भावार्थेन जातिः। स्कन्धपरिपाकार्थेन जरा। विनाश[144ᵃ]र्थेन मरणं। शोचनार्थेन शोकः। वचनपरिदेवनार्थेन परिदेवः। कायसंपीडनार्थेन दुःखं। चित्तसंपीडनार्थेन दौर्मनस्यं। उपक्लेशनार्थेनोपायासाः। इति विस्तरः॥ 5

एवमुपदर्शितप्रत्ययानामनुच्छेदे[1] संसारो[2] ऽविकलः प्रवर्तते। द्वादशाङ्गप्रतीत्यसमुत्पादस्यैव संस्कारत्वात्। यदाङ्गराचार्यपादाः।

यथाक्षेप क्रमाद्वृद्धः[3] संतानः क्लेशकर्मभिः।
परलोकं पुनर्यातीत्यनादि भवचक्रक। 10
स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः[4]। इति॥

प्रत्ययानां पुनरुच्छेदे सर्वथैव संसरणं न स्यात्। कारणवैकल्यात्। ततश्च बुद्धोऽपि संसरेदेवमित्येतन्न प्रसज्यत इति॥

एवं तावत्सौत्रान्तिकादिचोद्यमुदस्य योगाचारविप्रतिपत्तिनिराकरणाय तन्मतेन दूषणमुद्भावयन्नाह। यदा न भ्रान्तिरपीत्यादि। 15

यदा न भ्रान्तिरप्यस्ति माया केनोपलभ्यते॥ १५

---

[1] Tib rkyen rnams rgyun ma-chad na

[2] Nep old reading saṃskāro, Nep new hand saṃsāro—Tib has ḥdu-byed

[3] vrddhaḥ = skyes-nas = jāta

[4] Kleçakāṇḍa, karma°, duḥkha°; compare the three vartman, supra p 351, n 2, and Congrès d'Alger, Notes sur le Pratītyasamutpāda

यदा सर्वं जगन्मायात्मकतया स्वभावशून्यमुपगतं मध्यमक-वादिभिः । मायास्वभावसंवृतिग्राहिणी बुद्धिरपि भवतां नास्ति बाह्यवत् । तदा माया केनोपलभ्यते । केन प्रतीयते तद्ग्राहक-वस्तुसज्ज्ञानमन्तरेण । नैव केन चिदित्यर्थः । यस्य पुनः स्वचित्त-5 मेव परमार्थसद्ग्राह्यरूपतया भ्रान्तं तथा प्रतिभासते । न तस्यायं दोष इति भावः ॥

एव[1] निराकर्तुमाह । यदा मायैवेत्यादि ।

यदा मायैव ते नास्ति तदा किमुपलभ्यते ।

यदा मायैव ग्राह्यतया हस्त्याद्याकारप्रवृत्त्या तव विज्ञान-10 वादिनो नास्ति । चित्तमात्रं जगदभ्युपगच्छतो बहिरर्थाभावात् । तदा किमुपलभ्यते । तदा किमिह प्रतिभासते । बहिरर्था-भावाद्देशादिविच्छेदेन प्रतिभासो न युक्त इत्यर्थः ॥ अत्र पर-स्याभिप्रायमाशङ्कयन्नाह चित्तस्यैव स इत्यादि ।

चित्तस्यैव स आकारो यद्यप्यन्योऽस्ति तत्त्वतः ॥ १६

15 उक्तमत्र स्वचित्तमेव बहीरूपत[144b]या भ्रान्तं हस्त्याद्याकार प्रतिभासत इति ॥ उक्तमेव । किं तु यद्यपि चित्तस्यैव ज्ञान-स्यैव स इति देशादिविच्छेदेन ग्राह्यतया प्रतिभासमान आकारो निर्भासः । अन्य इत्यपर आन्तराद्ग्राहकाच्चित्ताका-रात् । अस्ति विद्यते । तत्त्वतो वस्तुतः ॥ यद्यपीत्यभ्युपगम्योक्त । 20 तथापि नैतत्संगच्छत इत्याह । [चित्तमेव यदा मायेत्यादि][2] ।

[1] So Ms -ctan ni ? [2] From Tib only

चित्तमेव यदा माया तदा किं केन दृश्यते।

चित्तमेव विज्ञानमेव वेदकतया स्वीकृतं। यदा माया नान्या। न हि वेदकचित्तव्यतिरिक्ता काचिदन्या माया नाम। तदात्मतया। तस्यास्तथाप्रतिभासोपगमात्। तदा किं केन दृश्यते। किं केन प्रतीयते। दर्शनमेव हि केवलमस्ति न दृश्यं। दृश्यमन्तरेण दर्शनमपि न स्यात्। दृश्यापेक्षत्वात्तस्य। अतो न केन चित्किं चिद्दृश्येत। इत्यान्ध्यमशेषस्य जगतः प्राप्तमिति भावः॥ ननु स्यादेवैतत्। यदि ज्ञानस्यात्मसंवेदनं न स्यात्। यावता स्वसंवेदनतया स्वरूपं संवेदयत्तदभिन्नं मायादिप्रतिभासमपि वेदयेत्। तथा च सति न काचित्क्षतिः॥ इति विज्ञानवादिनोऽभिप्रायमाशङ्क्याह। उक्तं चेत्यादि।

उक्तं च लोकनाथेन चित्तं चित्तं न पश्यति[1]॥ १७

स्वभावशून्यमेव सर्वं जगद्यदा युक्तितः प्रतिपादित। तदा कः कस्य स्वभावो वस्तुत इति कस्य केन वेदनं स्यात्। उक्तं च भगवता। सर्वधर्माः शून्याः। शून्यतालक्षणं चित्तं। सर्वधर्मा विविक्ताः। विविक्ततालक्षणं चित्तमिति॥ किं च। उक्तं च कथितं च। लोकनाथेन। लोकानां सर्वसत्त्वानां नाथेन शरण्येन बुद्धेन भगवता। किमुक्तं। चित्तं चित्तं न पश्यतीति। चित्तं

[1] On the svasamvedana see Muséon, N S, II, p 177

स्वात्मानं न जानाति। सत्यपि वस्तुत्वे स्वात्मनि कारित्र-विरोधात्[1]। कथमिव। न च्छिनत्ति यथात्मानमसिधारा।

न च्छिनत्ति यथात्मानमसिधारा तथा मनः।

यथा सुतीक्ष्णाप्यसिधारा खड्गधारा तदन्यवदात्मानं
5 स्वकायं न च्छिनत्ति न विघाटयति। स्वा[145a]त्मनि क्रिया-विरोधात्। तथा मनः। असिधारावच्चित्तमपि स्वात्मानं न पश्यतीति योज्यं। तथा हि न तदेवैकं ज्ञानं वेद्यवेदक-वेदनात्मस्वभावत्रय युक्तं[2]। एकस्य निरंशस्य त्रिस्वभावता-ऽयोगात्[3]॥

10 तत्रेदमुक्तं। आर्यरत्नचूडसूत्रे[4]। स[5] चित्तं परिगवेषमाणो नाध्यात्मं चित्तं समनुपश्यति। न बहिर्धा चित्तं समनुपश्यति। न स्कन्धेषु चित्तं समनुपश्यति। न धातुषु चित्त समनुपश्यति। नायतनेषु चित्तं समनुपश्यति। स चित्तमसमनुपश्यंश्चित्तधारां पर्येषते। कुतश्चित्तस्योत्पत्तिरिति। आलम्बने सति चित्त-
15 मुत्पद्यते। तत्किमन्यच्चित्तमन्यदालम्बनं। अथ यदेवालम्बनं तदेव चित्त। यदि तावदन्यदालम्बनमन्यच्चित्तं तद्द्विचित्तता भवि-

---

[1] Kāritra, *M Vyut* 245 (295)

[2] So Ms —Tib = *naikasmin jñāne* .. ° *trayam yuktam*

[3] ° *bhāvatā'yogāt*, so Ms

[4] See *Çikṣās* Index —This very passage (° paripṛcchā) occurs in the *Madhyamakavṛtti* (Bibl Buddh) p 62, 4, and has been translated by Burnouf *Intr* p 561 ,—also in *Çikṣās* 235 1 (See note in loco)

[5] Mss *svacittam*.—Tib *de sems rab tu tshol-ba*

श्यति[1] । अथ यदेवालम्बनं तदेव चित्तं । तत्कथं चित्तं चित्तं पश्यति[2] । न हि चित्तं चित्तं समनुपश्यति । तद्यथा न तयैवासिधारया सैवासिधारा शक्यते छेत्तुं । न तेनैवाङ्गुल्यग्रेण तदेवाङ्गुल्यग्रं स्प्रष्टुं शक्यते । [3]एवमेव तेनैव चित्तेन तदेव चित्तं द्रष्टुमिति विस्तरः ॥

अत्र चित्तमात्रवादिनः स्वात्मनि [क्रिया]विरोधं[4] विघटयितुं स्वपक्षप्रसाधनाय दृष्टान्तमुद्भावयन्नाह । आत्मभावमित्यादि ।

आत्मभावं यथा दीपः[5] संप्रकाशयतीति चेत् ॥ १८

आत्मभावं स्वस्वरूपं[6] । यथा दीपः । प्रदीपः । संप्रकाशयति द्योतयति । यथा हि किलान्धकारावृतघटादिवस्तुप्रतिपत्तये प्रदीप उपादीयते । न तथा प्रदीपप्रकाशनाय प्रदीपान्तरं । अपि तु घटादि प्रकाशयन्नेवात्मानमपि प्रकाशयति ॥ तथा प्रकृतेऽपि स्वसंवेदने वेदितव्यं । न चापि क्वचिद्विरोधो दृष्ट इति सर्वत्र योजनीयं । तस्मात्प्रदीपवदविरोध एवेति चेत् । यद्येवं मन्यसे । तदा नैवं वक्तव्यं । कुत इत्याह । नैवेत्यादि ।

---

1 *Sems de gñis su hgyur ro*

2 *Sems de ltar mthon bar hgyur te Sems kyis sems mthon bar mi ruṅ-no*

3 *Madh vṛtti* has *evam eva na tenaiva . . . śakyam draṣṭum*, and our Tib too

4 *kriyā* is wanting in Mss But Tib has *run la byed-pa hgal-ba*

5 This is a capital instance in favour of the *svasamvedana*, see *Sarvadarçanas* (Muséon, II, p. 177 and foll)

6 *raṅ-gi dṅos ni raṅ-gi raṅ bzhin yin-te*

नैव प्रकाश्यते दीपो यस्मान्न तमसावृतः।

नैव प्रकाश्यते। घटादिवन्नैवोद्योत्यते। दीपो यस्मान्न तमसावृतो [145b] नान्धकारपिहितः। विद्यमानस्यावरणस्याप-
नयनं प्रकाशनं। ततो युक्तं घटादीनां प्रकाशनं। तेषां प्राग्वि-
5 द्यमानत्वात्। नैवं प्रदीपस्य तस्य प्रागविद्यमानत्वात्। न
चाविद्यमानस्य प्रकाशन युक्तमसत्त्वात्। तस्मान्नैव प्रकाश्यते
दीपः। इति विसदृशत्वान्न प्रदीपदृष्टान्तात्साध्यसिद्धिः॥

स्यादेतत्। आत्मभावमित्यादिना नैतदभिधीयते यदा-
त्मानं घटवत्तमसावृत प्रकाशयति दीपः। अपि तु तत्स्वभावं
10 प्रति परनिरपेक्षतामात्रमस्याभिधीयते। एतदेवोपदर्शयन्नाह।
न हीत्यादि।

न हि स्फटिकवन्नीलं नीलत्वे ऽन्यमपेक्षते॥ १९
तथा किं चित्परापेक्षमनपेक्षं च दृश्यते।

हिरिति यस्मात्। यथा स्फटिकोपलः स्वयमनीलः सन्।
15 नीलत्वे नीलगुणोत्पत्तिनिमित्तमन्यमुपाधि नीलपत्रादिसंनि
धिमपेक्षते। तथा स्वयमेव यद्वस्तु नीलं तदपि न नीलत्वेऽन्य-
मुपाधिमपेक्षते। तथा तेन प्रकारेण कि चिद्घटादिकं परापेक्षं
प्रदीपाद्यपेक्षं प्रकाश्यं दृश्यते। किं चित्पुनः प्रदीपादिकमनपेक्षं
च। स्वयं प्रकाशात्मकं दृश्यते। उपलभ्यते। एतावन्मात्रमेव
20 विवक्षितं।

एवं विज्ञानवादिनोपदर्शिते विशेषे सिद्धान्तवादी नील-मेव तावन्नीलत्वे परनिरपेक्षं दृष्टान्तत्वेनोपदर्शितं प्रतिषेधय-न्नाह । अनीलत्व इत्यादि ।

अनीलत्वे न तन्नीलं कुर्यादात्मानमात्मना ॥ २०[1]

अयमपि न सदृशो दृष्टान्तः । यतो नीलमपि न नीलत्वे स्फटिकवन्निरपेक्षं । तद्भाव प्रति स्वहेतुप्रत्ययापेक्षत्वात् । कदा पुनरिदमनपेक्षं स्यात् । यदि तदनीलमेव स्वहेतोरुत्पद्येत । पुनस्तद्भावे परनिरपेक्षं स्वयमेव नीलमात्मान कुर्यात् । न चैत-दस्ति । यतो ऽनीलत्वे नीलगुणरहितत्वे सति । नेति निषेध-यति । तदिति नीलाभिमत वस्तु । नील नीलगुणयुक्तमात्मानं स्वरूपमा[146a]त्मना स्वयमेव न कुर्यात् । न कर्तुं शक्नोति पूर्ववत्स्वस्मिन् क्रियाविरोधात् । तस्माच्च नीलस्यापि परानपे-क्षता नीलत्वं प्रति स्फटिकवत् ॥

तथा हि स्फटिकोपलोऽपि वस्तुतोऽवस्थितरूप एवोपाधि-संनिधौ न नीलोपरागमनुभवति । अपि तु सर्वस्योपादानलक्ष-णात्[2] । नीलोपाधिविशेषसहकारिणश्च पूर्वस्वरसनिरोधात् ।

---

[1] Minaev has

tathā kim cit parāpekṣam anapekṣam ca dṛśyate |
anīlatve na tan nīlam nīlahetur yathekṣyate || २० ||

nīlam eva hi ko nīlam kuryād ātmānam ātmanā |
anīlatve na tan nīlam kuryād ātmānam ātmanā || २१ ||

In the Ms Burn 90, 20B and 21A are wanting, *also in the Tibetan translation* (Mdo, XXVI, fol 30 a6)

[2] So Ms.—*sarvasya* is certainly wrong, °*sv* is correct (see following note)

अन्य एव नीलगुणोपरक्तः स्फटिकोपल उत्पद्यत[1] इति सिद्धान्तः। तस्मात्साधारणमनयोस्तद्गुणं प्रति हेतुप्रत्ययाधीनत्वं। इति प्रकृतेऽपि साध्ये न कश्चिद्विशेषः॥

ननु प्रियमिदमनुष्ठितं प्रियेण। यस्माज्जडस्वभावव्यावृत्त्या-
5 त्मतया स्वहेतुप्रत्ययात्। उत्पत्तिरेव ज्ञानस्य। प्रकाशान्तरनिरपेक्षस्यात्मप्रकाशता स्वसंवेदनमुच्यते। एतदेव त्वयापि नीलस्वरूपपरामर्षेण[2] समर्थितं। एतावन्मात्रेण प्रदीपोऽपि दृष्टान्तीकृतः। न पुनरस्माभिः कर्मकर्तृक्रियाभेदेन ज्ञानस्यात्मप्रकाशनमिष्यते। एकस्य सतः कर्मादिस्वभावत्रयस्यायोगात्। तत्र
10 क्रियादिभेदेन दूषणेऽपि किं चिद्दूषितमस्माकं स्यात्। स्वहेतुजनितस्यात्मप्रकाशस्यानुपघातात्। इति नात्मसंवेदने प्रतिपादितदोषप्रसङ्गः॥

तदुक्तं।

विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते।
15 इयमेवात्मसंवित्तिरस्य याऽजडरूपता॥
क्रियाकारकभेदेन न स्वसंवित्तिरस्य तु।[3]
एकस्यानंशरूपस्य त्रैरूप्यानुपपत्तितः॥ इति॥[4]

---

[1] on-kyan thams cad ran gi ñe bar len pa skad cig ma dan snon poi khyad-par lhan cig byed pai rkyen pas kyan shi ma yin ñid kyi(s) bcags nas cel gyi rdo snon poi yon tan gyis bsgyur bi gzhan ñid skye bar hgyur ro = *api tu sarvasvopādānakṣaṇa nīlopadhisahakāripratyayād api pūrvasvarūpam rodhat*

[2] So Ms

[3] bdi-yi ran bzhin rig-pa ni bya dan byed poi dnos poi min = *kriyākāraka-rūpeṇa*

[4] From some Yogācāra treatise.

अत्रोच्यते । क्रियाकारकभेदेन व्यवहारप्रसिद्धं शब्दार्थमधिगम्य दूषणमुक्तं । स्वसंवेदनशब्दस्य तदर्थाभिधायकत्वात् । यदि पुनर्दोषभयाल्लोकप्रसिद्धोऽपि शब्दार्थः परित्यज्यते । तदा लोकत एव बाधा भव[164b]तो भविष्यति ॥

इत्थमपि न परमार्थतः स्वसंवेदनसिद्धिः । तथा हि हेतु- 5
प्रत्ययोपजनितस्य प्रतिबिम्बस्येव निःस्वभावत्वमुक्तं । तथा च सुतरां न स्वसंवेदनं ज्ञानस्य । तत्त्वतो निजस्वभावाभावात् । न च स्वभावाभावे गगनोत्पलस्यात्मसंवेदनमुचितं । न चापि जड़स्वभावता मध्यमकवादिनं प्रति परमार्थतः कस्य चित्सिद्धा । येन जड़व्यावृत्तमजड़ स्वसंवेदनं स्यात् । तस्मादन्यानेव वस्तु- 10
वादिनः प्रति युक्तमेतदुक्तं[1] । ततो निःस्वभावतया न कथं चिदपि स्वसंवेदनसिद्धिः ॥ एतत्पुनः पश्चात्स्मृत्युपस्थानोपदर्शनप्रस्तावे[2] विस्तरेणोपदर्शयिष्यामः ॥

सांप्रत प्रदीपस्य स्वयंप्रकाशतामभ्युपगम्य बुद्धेः स्वसंवेदनमयुक्तमिति प्रतिपादयन्नाह । दीप इत्यादि । 15

दीपः प्रकाशत इति ज्ञात्वा ज्ञानेन कथ्यते ।
बुद्धिः प्रकाशत इति ज्ञात्वेदं केन कथ्यते ॥ २२[3]

भवतु वा प्रदीपस्य प्रकाशात्मता । तथापि न बुद्धिसंवेदन-

---

1 Modern copy has *yuktam eva tad*

2 ix 24

3 According to the Minaev's edition, really 21.

साधनं[1] प्रति सदृशो दृष्टान्त इति समुदायार्थः । दीपः प्रकाशत इति । आभासते प्रकाशान्तरनिरपेक्षः स्वयमेव । इति ज्ञात्वा प्रतीत्य ज्ञानेन बुद्ध्या कथ्यते । प्रतिपाद्यते । प्रदीपस्य ज्ञानविषयत्वात् । बुद्धिर्ज्ञान प्रकाशत इति यदुच्यते । तत्पुनः 5 केन ज्ञानेन ज्ञात्वा कथ्यत इति परः पृच्छति ॥

न चात्र किं चिद्बुद्धिप्रतिपत्तिनिबन्धनमस्तीति[2] असंभावनां प्रकाशयति । न तावत्पूर्वज्ञानेन तत्प्रतिपत्ति । तत्कालमनुत्पत्तेस्तस्यासत्त्वात् । नापि पश्चात्कालभाविना तदानीं क्षणिकतया ग्राह्यस्यातीतत्वात् । न च तत्समानकालभाविना तेन तस्यानुप-10 कारात् । न चानुपकारकस्य विषयभावः । नाकारणं विषय इति वचनात् । नापि स्वयं । तत्रैव विप्रतिपत्तेः । तत्कथं तत्प्रतीतिरिति न विद्मः ॥

इत्थं सर्वथा बुद्धेरप्रतिपत्तौ तत्संवेदनमतीवायुक्तमित्याह[3] [147a] । प्रकाशा वेत्यादि ।

15 **प्रकाशा वाप्रकाशा वा यदा दृष्टा न केन चित् ।**
वन्ध्यादुहितृलीलेव कथ्यमानापि सा मुधा ॥ २३

प्रकाशा वा । प्रकाशात्मिका दीपवत् । अप्रकाशा वाप्रकाशात्मिका घटादिवत् । परस्परसमुच्चये वाशब्दद्वयं । बुद्धिर्यदा

---

1 *Samvedana* = ran-rig-pa = *sva* ?

2 Tib *yod pa ma yin-na zhes pai-sgra ni mi srid pa stan pai byed pa yin-no* = . astīti itiçabdo 'sambhāvanām

3 The folio 147 is wanting in the Nep. Ms

दृष्टा न केन चित् । न प्रतिपन्ना केन चित्प्रतिपत्त्या स्वरूपेण वा[1] । यदेतिपद तदेत्याकर्षति । तदा वन्ध्याया अप्रसवधर्मिण्याः स्त्रिया दुहिता पुत्री तस्या लीला विलासो ललित । तद्वत् । कथ्यमानापि । आख्यायमानापि सा मुधा । सेति बुद्धिर्मुधेति निष्फला ॥ वन्ध्यादुहितुरविद्यमानतयाप्रतिपन्नत्वात् तल्लीला सुतरामप्रतिपन्नेत्यभिप्रायः ।

अथ वानुत्पन्नानिरुद्धस्वभावतया वन्ध्यादुहितृस्थानीया बुद्धिः । अप्रतीततत्स्वभावतया तल्लीलावत्स्वसंवित्ति । तदप्रतीतेस्तस्या अप्यप्रतीतिरिति कथ्यमानापि युक्तिरहितेन वचनमात्रेण सा स्वसंवित्तिर्मुधा । अनुपादेयत्वान्निष्प्रयोजना ॥ 10

स्यादेव । युक्तिशून्यं वचनमात्रमेतत् । यत इयमत्र युक्तिरस्तीत्याह[2] । यदि नास्तीत्यादि ।

यदि नास्ति स्वसंवित्तिर्विज्ञानं स्मर्यते कथं ।

यदि स्वसंवेदनं विज्ञानस्य । नास्ति न विद्यते । तदा विज्ञानं स्मर्यते कथं । विज्ञानस्य स्वसंवेदनाभावादुत्तरकालं 15 स्मरणं न स्यात् । न ह्यननुभूतस्मरणं युक्तमतिप्रसङ्गात् । तस्मा-

---

[1] So Maith —Tib rtogs pa po hga yan med la rtogs pa cun zad kyin med-do ran d in gzhan gñis kyan ma yin-no = *pratipattuh kasya cid abhāvān na kā cit pratipattir api, svaparoohayam api nāsti*

[2] Ms syad etan nu yuktiçunyam v canamātram etat yata ubhayatra yuk tir , Tib de lta mod kyi hdi ni rigs pas ston zhin thsig tsam yin te gan gi phyir hdi la rigs pa hdi yod do zhes. ..

दनुभवफलस्य स्मरणस्योत्तरकालं दर्शनाज्ज्ञानसंवेदनमस्तीत्यनुमीयत इति ।

नैतत्साधनं साधीयः[1] । यतो यदि स्वसंवेदनकार्यतया स्मरण निश्चित भवेत् । भवेदग्नेर्यथा धूमः स्वसंवेदनस्य कारण[2] स्मृतिः । न चासिद्धे स्वसंवेदने प्रमाणतः । स्मरणस्य तत्कार्यताग्रहणमस्ति । सर्वथोभयप्रतिपत्तिनान्तरीयकत्वात्कार्यकारणभावप्रतिपत्तेः[3] । न च चक्षुरादेरिव विज्ञानमदर्शनेऽपि स्मरणं तत्कार्यं सेत्स्यति । चक्षुषो हि व्यतिरेके नीलादिज्ञानाभावतो [व्यतिरेकद्वारेण] तत्कार्यमनुमीयते[4] । स्मृतिस्तु ज्ञानसंवेदनमन्तरेणापि भवतीति प्रतिपादयिष्यामः । इति स्वसंवेदनकार्यतानिश्चयमन्तरेण स्मरणस्य तद्विनाभावाच्च संवेदनसिद्धिः ।

अतः स्मरणमपि ज्ञानत्वात्कथं सिद्धमिति वक्तव्यं । न च स्वयमसिद्धं लिङ्गं ज्ञापकमन्यस्य । न च स्मरणं स्वसंवेदनस्य प्रत्यक्षतया ग्राहकं तस्य तस्मादन्यत्वात् । न च ज्ञानस्य ज्ञानान्तरविषय[त्व][5] । बहिरर्थवत्सम्बन्धासिद्ध्यादिदोषप्रसङ्गात् ॥

---

1 Tib. *hdi yan sgrub pai byed pa yin pas hdis bsgrub par-bya-ba ma yin te* —The *lotsavas* did not understand the word *sādhīyas* or read *sādhya* (bsgrub par-bya-ba).

2 Tib. has *bsgrubs par byed pa* (sic).—Possibly *sādhakam*.

3 Ms. has sarvatobhaya° = thams cad-du rgyu dan hbras-bu rtogs-pa ni gñi ga rtogs pa med par ma yin no = [*sarvathā hetuphala*[*bhāva*]-*pratipattir ubhayapratipattim antareṇa nāsti*.—Cp. *Nyāyabinduṭ.* 22, 52 ll.

4 Ms. *nīlādijñānamabhavatu tath°*—Tib. mig med par snon po la sogs pai çes-pa med pas *ldog pai sgo nas* de hbras bu rjes su dpog go .. *vyatirekadvāreṇa*.

5 *çes pa ni çes pa gzhan gyi yul ma yin te*.

अन्यत्वाविशेषात्संतानान्तरभाविनापि स्मरणेन तस्य ग्रहणं स्यात् ।
अथ तेन पूर्वम[न]नुभूतत्वान्न स्मर्यत इति चेत् । एकसंतति-
पतितेनापि न पूर्वमनुभूतमिति समानः प्रसङ्गः ।

कार्यकारणभावोऽपि न तस्य नियामको युज्यते । कार्य-
कारणभावस्यैव परमार्थतो ऽभावात् । सत्यपि तस्मिन् सर्व- 5
ज्ञानानां स्वप्रतिपत्तिनिष्ठतया तद्ग्रहणस्याशक्यत्वात्[1] । यथा-
व्यवहारमभ्युपगमे काल्पनिकत्व[2] । काल्पनिकत्वे च सर्वव्यव-
हाराणां कल्पनानिर्मितत्वात्सांवृतत्वमिति साधितं नः साध्यं[3] ॥
इति न स्मृतेः स्वसंवेदनसिद्धिः ॥

भवतोऽपि कथं तर्हि स्वसंवेदनाभावे स्मृतिरित्याह । अन्या- 10
नुभूत इत्यादि ।

अन्यानुभूते संबन्धात्स्मृतिराखुविषं यथा ॥ २४

[4]ज्ञानादन्यस्मिन् ग्राह्ये वस्तुनि विषये ऽनुभूते सति ज्ञाने
स्मृतिः स्मरणमुपजायते । [5]नन्वन्यस्मिन्ननुभूतेऽन्यत्र स्मरणेऽति-
प्रसङ्गः स्यादित्याह । संबन्धादिति । विषयेऽनुभूते[6] तद्विज्ञान- 15
स्मरणं संबन्धाद्भवति । विज्ञानं हि तद्ग्राहकतया तत्संबद्ध[7] ।

---

1 *ran ñid rtogs pa la mthar thug pa yin pai phyir dan de hdzin par mi nus pai phyir-ro*

2 *brtags pa-ñid*

3 *kun-rdzob bsgrub-bya yin-pas don-dam pa ma bsgrubs pai phyir ro*

4 *hdi çes pa-las gzhan* = tatra jñānad

5 Ms *na canyasm n*

6 *yul dran-pa na brel ba-las çes pa.* = visayasmarane sambandhaj jñāna smaranam

7 Ms *tatsambandham*

अतो विज्ञानं स्मर्यते। नान्यत्॥ [1]सत्यपि संबन्धे ऽन्यस्मिन्ननु-
भूते ऽन्यस्य स्मरणे विस्मृतं स्मरणं स्यादिति चेत्। न[2]। पूर्व-
मनुभूतो विषय उत्तरकालमनुस्मर्यमाणः स एवानुभवविशिष्टो
ऽनुस्मर्यते। तद्विशिष्टस्य तस्य ग्रहणात्। ज्ञानमेव च विषयानु-
5 [148 a]भवो। नान्य। इति विषयानुभवस्मरणात्तत्संबद्धतया
ज्ञाने स्मरणमभिधीयते। न तु विषयरहितं ज्ञानमपि केवल-
मनुस्मर्यत इत्यदोषः॥

ननु कथमिव ज्ञानसंवेदनाहितस्मृतिवासनाबीजमन्तरेण
स्मृतिरुत्तरकालं स्यादित्याह। आखुविषं यथेति। आखुविष।
10 मूषिकविषं। यथा संबन्धात्कालान्तरेण जायते तथा स्मृतिर-
पीत्यर्थः। तथा हि मूषिकविषमेकस्मिन् शरीरक्षणे[3] संक्रान्तं
पुनः कालान्तरेण मेघस्तनितमधिगम्य[4] विनापि स्वसंवेदना-
हितस्मृतिवासनाबीजमिदंप्रत्ययतामात्रायत्तवृत्तित्वात्[5]। अन्य-
स्मिन् क्षणे विकृतिमुपयाति। तथा प्रकृतेऽपि न दूष्यतीति[6]
15 भावः॥

पुनरपि विज्ञानवादी ज्ञानसंवेदनसिद्धये प्रकारान्तरमुप-
दर्शयितुमाह। प्रत्ययान्तरेत्यादि।

---

1 *hbrel ba bden kyan hdi ma myon na gzhan dran pa ni* = tasminn ananubhūte.

2 Ms *na pūrvam* —Tib. *ma yin te*

3 The Tib has *skad cig-la lus la hphos nas* = ekasmin kṣaṇe çarīra-saṃkrāntam

4 According to Tib °*stanitapratyayam*

5 On the *smṛtivāsanabīja* (dran-pai chags kyi sa bon), see our partial translation of the *Sarvadarçana*, Muséon (1901), note 1ff

6 *skyon med do* = na dosa iti.

प्रत्ययान्तरयुक्तस्य दर्शनात्स्वं प्रकाशते।

प्रत्ययान्तरं कारणान्तर[1]। ईक्षणिकादिविद्या परचित्तादि-
ज्ञानाभिज्ञा च[2] ताभ्यां युक्तस्य तत्सामग्रीसम्बद्धस्य चित्तस्य दर्श-
नात्। प्रतिभासनात्। विज्ञानस्य स्वं प्रकाशते। स्वरूपं प्रति-
भासते। संवेदनमस्तीति यावत्। यदि हि तत्सर्वदा[3] परोक्षरूप 5
कथ कदा[4] चित्सामग्रीविशेषादुपलभ्येत। ततो यथा सामग्री-
विशेषात्परचित्तमुपलभ्यते तथा समनन्तरालम्बनादिप्रत्ययात्स्व-
चित्तमप्युपलभ्यत[5] इति भावः॥

एतदपि न ज्ञानसंवेदनसाधनमित्याह[6]। सिद्धाञ्जनेत्यादि।

सिद्धाञ्जनविधेर्दृष्टो घटो नैवाञ्जनं भवेत्॥ २५ 10

सिद्धं च तदञ्जन च सिद्धस्य वाञ्जन। तस्य विधिर्विधानं
प्रयोगः। तस्माद्दृष्टः। प्रतीतो घटो निधानादि वा। नैवाञ्जनं
भवति। न च घटादिरञ्जनमेव स्यात्। न यद्यस्मात्प्रतीयते
तदेव तद्भवति॥ एवमीक्षणिका[दि]विद्यासहकारिणा[7] ज्ञानेन

---

[1] rkyen gzhan ni dus gzhan yin te = *kālantaram* This reading is possibly better, being more difficult, *kāraṇa* is given by a second hand in the Nep Ms

[2] *lta bai rig pa la sogs pa dan gzhan gyis* (?) *sems çes pa la-sogs pai mnon-pai çes-pa daq* = īkṣaṇikāvidyādi-paracittajñānādi abhijñābhyām

[3] thams-cad du = *sarvathā*

[4] *kadā cit* = brgya la yan

[5] See *Nyāyabindu* 13, 10 foll

[6] *na* in *sādhana* is given in margin, second hand

[7] *adi* from Tib *rig-pa la sogs*

परचित्तं च[1] घटादिवद्दृष्टमिति । नैतावता तत्स्वसंवेदनं सिद्धं स्यात् । तस्मान्नैतदपि [148b] साध्योपयोगि साधनं । ननु यदि ज्ञानमविदितस्वरूपं स्यात् । अर्थस्यापि प्रतीतिर्न स्यादव्यक्त-व्यक्तिकत्वाज् ज्ञानस्य न ह्यर्थस्य व्यक्तिस्तदप्रतीतौ कथमर्थस्य
5 प्रतीतिः[2] । तथा हि स्वसंवेदनस्य प्रतिषेधादन्येनान्यस्य ग्रहणा-योगाच्च । तद्ग्रहणाभ्युपगमे चोत्तरोत्तरस्याप्रतीतस्य प्रतीतये ज्ञानान्तरानुसरणेनानवस्थाप्रसङ्गाच्च । न कथं चिदप्यर्थप्रतीति-रिति[3] । तेन यदुक्तं । अन्यानुभूत इत्यादि । तदसंगतं । अर्थ-स्यानुभवाभावात् सर्वस्यायं दृष्टादिव्यवहारो लोके न स्यादि-
10 त्याह । यथा दृष्टमित्यादि ।

यदुच्यते दृष्टादिव्यवहारो न स्यादिति । स किं परमा-र्थतो न स्यात् । संवृत्या वा । तत्र यदि परमार्थतो न स्यादि-त्युच्यते । तदा प्रियमिदमस्माकं । न हि सांवृतस्य परमार्थ-चिन्तायामवतारोऽस्ति । अथ लोकप्रसिद्धितस्तदा ।

15 **यथा दृष्टं श्रुतं ज्ञातं नैवेह प्रतिषिध्यते ।**

---

[1] *ca*, wanting in Tib

[2] So Nep Ms —The old *interpunction* has been erased before *na hy* and *katham* —Tib has don van rtogs par mi hgyur ba ma yin nam çes pa mi mig gsal ba gsal bar byed pai phyir te don mi gsal ba ma yin pa de ma rtogs pa la don ci ltar rtogs par hgyur te (*mig gsal ba* = *cakṣur vyakta*, to be read *mi gsal ba* = *avyakta*) I have little doubt that the old reading, previous even to the Tibetan translation, was as following *arthasyāpi pratītir na syat, avyaktavyaktikatvaj jñānasya tarhy arthasya pratītis, tad apratītau katham* (See supra p 352, n 1, a conjecture on the relations between the Tibetan translation and our Ms or its prototype)

[3] This very argument is forcibly summarized in the line *Sarvadarçana* p. 15, l 17, *Apratyakṣopalambhasya nārthadṛṣṭiḥ prasidhyati* (Dharmakīrti)

इति । यथा दृष्टमिति । चक्षुरादिविज्ञानेन प्रत्यक्षेण
प्रतिपन्नं । श्रुतमिति । परपुद्गलादागमाच्च । ज्ञातमिति ।
चिह्नलिङ्गजादनुमानान्निश्चितं[1] । तदेतदिह सर्वं व्यवहार-
माश्रित्य नैव प्रतिषिध्यते । न वार्यते । यद्यथा लोकतः प्रती-
यते तत्तथैवाविचारितस्वरूपमभ्युपगम्यते लोकप्रसिद्धितः । न तु 5
पुनः परमार्थतः ॥ तेन ज्ञानसंवेदनाभावादर्थानधिगमादयोऽपि
दोषाः परमार्थपक्षवादिन इह नावतरन्ति ।

यदि तत्तथैवाऽभ्युपगम्यते[2] । किं नाम तर्हि प्रतिषिध्यते ।
इत्याह । सत्यत इत्यादि ।

सत्यतः कल्पना त्वत्र दुःखहेतुर्निवार्यते ॥ २६ 10

सत्यतः परमार्थतः । कल्पनाऽरोपः[3] । तुशब्दः पुनरर्थे । सा
पुनरत्र । विचारे सिद्धान्ते वा । निवार्यते प्रतिषिध्यते । कुतो
दुःखहेतुरिति हेतुपदमेतत् [110a] । दुःखस्य हेतुः कारणं
यस्मात्तस्मादित्यर्थः । उपादानस्कन्धानां सदसदादिकल्पनाहित-
प्रवृत्तिहेतुत एव च संसारस्य दुःखस्वभावः[4] । 15

---

1 See *Nyāyabindu*, p 104

2 *tathaivā 'bhyupa,'* so Ms

3 So Ms

4 *Saṃsāra* from a second hand written in margin after *hetuta eva ca* —Tib has ñe-bar len-pai phuṅ-po rnams yod-pa daṅ med-pa la sogs-par brtags-pas bzhag pa hjug pai rgyu ñid ni hkhor-ba yin te sdug bsṅal kun hbyuṅ hjig rten daṅ lta gnas srid pa an de dag ñid ces pai tshig las = *upādāna-skandhāḥ sadasadādikalpanāhitapravṛttihetava eva saṃsāraḥ duḥkham sam-udayo* .. —I should admit that *āhita* (bzhag pa) is out of place, and read *°hetuta eva saṃsāraḥ, saṃsārac ca* .

दुःखं समुदयो लोको दृष्टिः स्थानं[1] भवस्य तु । इति वचनात् ।
इति सत्यतः कल्पना दुःखहेतुर्भवति । तस्मादसत्समारोप-
कल्पनाभिनिवेशप्रतिषेधमात्रमत्राभिप्रेतं । न तु वास्तवं किं
चित्प्रतिषिध्यत इति ॥ तदेवं स्वसंवेदनं ज्ञानस्य न कथ चिदपि
5 युज्यते । तदुक्तं ।

न बोध्यबोधकाकारं चित्तं दृष्टं तथागतैः ।
यत्र बोद्धा च बोध्यं च तत्र बोधिर्न विद्यते[2] ॥ इति ॥

यत्तु क चिद्भगवता चित्तमात्रतास्तिलमुक्तं । तत्स्कन्धाय-
तनादिवन्नेयार्थतयेति कथयिष्यते[3] ॥

10 इदानीं प्रासङ्गिक परिसमाप्य प्रकृते योजयन्नाह । चित्ता-
दन्येत्यादि ।

चित्तादन्या न माया चेन्नाप्यनन्येति कल्प्यते ।
वस्तु चेत्सा कथं नान्यानन्या चेन्नास्ति वस्तुतः ॥ २७

तर्हि चित्तादन्या माया स्यात् । अनन्या वा स्यात् । उभय-
15 स्वभावा वा । अनुभयस्वभावा वा । इति चत्वारो विकल्पाः ।
तत्र न तावत्प्रथमपक्षः । चित्तादन्याभ्युपगमेऽपि चित्तमात्रं
जगदिच्छतः सिद्धान्तविरोधः स्यात् । द्वितीयपक्षे तु यदा
मायेव ते नास्तीत्यादिना[4] प्रतिपादित एव दोषः । तृतीयस्तु

---

1 Read *dṛṣṭisthānam* —Quoted from the Abhidharmakoça
2 de la byan-chub sems yod min = *tatra bodhicittam nasti*
3 See infra IX, 73 at the end, supra ad IX, 6
4 IX, 16

प्रकारो न संगच्छते। परस्परविरुद्धयोरेकत्राभावात्। अथ चतुर्थी कल्पना। सापि न संगच्छते॥ तामुपादायोच्यते। चित्तादन्या न माया। इत्यन्यत्वप्रतिषेधः। अनन्या तर्हि। नाप्यनन्येति तत्त्वस्यापि प्रतिषेधः। इति[1] उभयपातपक्षश्चेद्यदि[2] कल्प्यते व्यवस्थाप्यते सोऽपि न युक्तः। अन्योन्यपरिहारवतोरेक- 5 प्रतिषेधस्यापरविधिनान्तरीयकत्वात्तयोरेकत्राभावात्। चतुर्थी कल्पना सापि न संघटते॥

अपि च वस्तु चे[दि]ति। य[149b]दि सा माया वस्तुसती कथं नान्या। चित्ताद्व्यतिरिक्ता न भवति। अथानन्या चेद्यदि। चित्तमेव माया। तदा नास्ति वस्तुतः। न विद्यते परमा- 10 र्थतः। तस्यास्तत्स्वभावत्वात्[3]। चित्तमेव केवलं[4]। एतत्तदेवा- यातं यदुक्तं।

यदा मायैव ते नास्ति तदा किमुपलभ्यते।

इति[5]॥ अधुना प्रकृतं प्रसाध्योपसंहरन्नाह। असत्यपीत्यादि। 15

असत्यपि यथा माया दृश्या द्रष्टृ तथा मनः।

असती। उपलभ्यमाना माया हस्त्यादिवद्वस्तुतोऽसत्स्वभावा। तादृश्यपि दृश्या दर्शनविषया यथा माया। द्रष्टृ तथा मनः।

---

[1] = de-ltar = *evam*

[2] *gñi ga ba ga pai phyogs*

[3] *don-dam par yod pa ma yin-pa de la ste dei raṅ-bźin yin pai phyir ro*

[4] According to Tib *kevalam ity etat*

[5] = IX, 16

सैवासती माया दृश्या दृष्टान्तः । तथा मनः परमार्थतोऽस-
त्स्वभावमपि दर्शनसमर्थं भविष्यति । तेन यदा न भ्रान्ति-
रप्यस्तीत्यादि[1] यदुक्तं परेण तत्प्रमाध्योपसंहारेण दर्शितं ॥

पुनरपि प्रकारान्तरेण परमार्थसद्विज्ञानसाधनाय परोप-
5 क्रममभिसंधायाह । वस्त्वाश्रयश्चेदित्यादि ।

वस्त्वाश्रयश्चेत्संसारः सोऽन्यथाकाशवद्भवेत् ॥ २८

तथा हि संक्लेशो व्यवदानं च हेयोपादेयतया द्वयमिदं
यथावत्प्रतिपत्तव्यं । तत्र रागादिमलावृतं चित्तं संक्लिष्टमित्यु-
च्यते । ते चाभूतसमारोपबलोत्पन्नत्वादागन्तुकाश्चित्ताश्रिताः
10 प्रवर्तन्ते । तत्प्रभूतकर्मजन्मपरंपरोपनिबन्धः संसारः प्रजायते ।
तदेव चित्तं परमार्थतः प्रकृतिप्रभास्वरमनागन्तुकमभूतपरि-
कल्पसमुत्थग्राह्यग्राहकादिद्वयसमारोपाभिनिवेशवासनाशून्यमद्व-
यस्वभावमागन्तु[क]दोषविनिर्मुक्तमाश्रयपरावृत्त्या व्यवदानमित्युच्य-
ते[2] ॥ तदेव संक्लेशव्यवदानयोर्वस्तुसद्भूतचित्तमन्तरेण व्यवस्थापनं
15 न घटत इति मन्यन्ते । संसारनिर्वाणयोश्चित्तधर्मत्वात् । चित्त-
मेव संक्लिश्यते चित्तमेव व्यवदायते इति वचनात् ॥

तदेतत्परमतं निरूपयति । वस्त्वेव वस्तुसद्भूतचित्तमेवा-
श्रयोऽस्येति वस्त्वाश्रयः । चेद्यदि संसारो व्यवस्थाप्यते । तदा
संसारोऽन्यथा भवेत् । चित्तादन्यः स्यात् । वस्तुनोऽन्यत्वेऽवस्तु

---

[1] = IX, 15

[2] See p 409, l 6 — *āgantuka* = glo bur ba.

स्यात् । चित्तस्यैव च[1] वस्तुत्वात् । कथमिव । आकाशवत् । गगनमिव ।

य एष चित्ताश्रयः संसारोऽभिधीयते स किं वस्त्ववस्तु वा । वस्त्वपि चित्तं तदन्यद्वा ॥ तत्र यदि वस्तु चित्तमेव तदा न चित्तादन्यः संसारस्तदाश्रयः । चित्तमेव सः । चित्तं च प्रकृति- 5
प्रभास्वरतया व्यवदानस्वभावत्वान्न प्रहेयं । अथ चित्तादन्यः । तदा चित्तव्यतिरिक्तस्यान्यस्याभ्युपगमात्सिद्धान्तक्षतिः । अथा-
वस्तु । तदा संसारो नाम न किं चिदस्ति । खरविषाणवत् । अत एवाह । आकाशवदिति । यथाकाशं प्रज्ञप्तिमन्मात्रमसन्न[2]
किं चिदर्थक्रियायां समर्थं । तथा संसारो भवतः स्यात् । अथ 10
वा । आकाशवदिति निःस्वभावत्वादस्त्सिद्धान्तानुप्रवेशः ॥

स्यादेतत् । यदि नामावस्तु । तथापि वस्तुसद्भूतचित्तसमा-
श्रितत्वात् । तस्यार्थक्रियासामर्थ्यं भविष्यतीत्याह । वस्त्वाश्रये-
णेत्यादि ।

वस्त्वाश्रयेणाभावस्य क्रियावत्त्वं कथं भवेत् । 15

नासद्रूपस्य कश्चिदाश्रयो भवितुमर्हति । आश्रयाश्रयि-
भावस्य कार्यकारणरूपत्वात् । न चाभावः कस्य चित्कार्यमनि-
वर्त्यविशेषत्वात् । भवतु नाम । तथापि वस्त्वाश्रयेण वस्तुसद्भूत-
चित्तसमाश्रयेणाभावस्यासदात्मकस्य क्रियावत्त्व । अर्थक्रिया-

[1] Ca ?

[2] prajñaptisat, see supra VIII 10, Çikṣā, 257 7 Madh Vṛtti (Bibl Buddh) p 28, n 1

कारित्वं । कथं भवेत् । न कदा चिदपि युज्यत इत्यर्थः । अन्यथा तस्य भावस्वभावता स्यात् । शक्तिर्हि भावलक्षणं । सर्वशक्तिविरहोऽभावलक्षणमिति वचनात्[1] ॥

किमिदानीमिति विचार्यमाणमुपस्थितं भवत इत्याह ।
5 असत्सहायमित्यादि ।

असत्सहायमेकं हि चित्तमापद्यते तव ॥ २९

असन्नेवाभावः सहायो [150b] ऽस्येति । असत्सहाय । हिरवधारणे । एकमद्वितीयमेव । चित्तमापद्यते तव । चित्तैकपरमार्थवादिनः ॥ ननूक्तमेव । ग्राह्यग्राहकाद्याकारविनिर्मुक्तमद्वय-
10 लक्षणं चित्तं । इति चित्तैकताप्रतिपादने न किं चिदनिष्टमस्माकं । तदयुक्तं । सङ्क्षास्यापि प्रहेयतया वस्तुत्वमुक्तं । तत्कथं चित्तमेवैकं वस्तु । अस्तु[2] नाम तथापि न बाधकान्मुक्तिरित्याह । ग्राह्यमुक्तमित्यादि ।

ग्राह्यमुक्तं यदा चित्तं तदा सर्वे तथागताः ।

15 ग्राह्यमित्युपलक्षणं । ग्राहकादिमुक्तमपि वेदितव्यं । अथ वा ग्राह्याधीनं ग्राहकत्वमिति तदभावाद्ग्राहकाभावः । ग्राहकाभावे च तदुपकल्पितस्याभिलाप्यस्याभावात् । अभिलापस्याभाव इत्युपदर्शयितुं ग्राह्यमुक्तमित्युक्तं । ग्राह्याद्याकारविविक्तं । अद्वय-

[1] See M. Vṛtti, 116, n. 1.

[2] From a second hand. First hand *vastu vastu nama*—Tib. has de sems gcig-pu ñid yod par gyur-pa de lta-na = *tac cittaikatā syāt tathāpi*.

स्वभावं यदा सर्वस्य जगतश्चित्तं । तदा तस्य चित्तस्य सर्वसत्त्व-
संतानान्तर्गतत्वात्सर्वसंसारिणः सत्त्वास्तथागता बुद्धा भगवन्तः
प्राप्नुवन्ति । न कश्चित्पृथग्जनः स्यात् । ततश्च सक्लेशप्रहाणा-
यार्थमार्गभावनावैयर्थ्यप्रसङ्गः । न चैव ॥ तस्मात्सत्यपि ग्राह्य-
ग्राहकवैधुर्ये भावाभिनिवेशस्य तदवस्थत्वान्न सर्वथा सक्लेश- 5
प्रहाणमित्यभिसंधायाह । एवं चेत्यादि ।

एवं च को गुणो लब्धश्चित्तमात्रेऽपि कल्पिते ॥ ३०

एवं चेति निपातसमुदायः । एवं सतीत्यस्मिन्नर्थे । अप्यर्थे
चकारः । एवमपि स्वीकृते को गुणो लब्धो । नैव कश्चित् ।
चित्तमात्रेऽपि विज्ञप्तिमात्रतायामपि कल्पितायां कल्पनया 10
समारोपिते । अद्वयतत्त्वपरिज्ञानान्वयेऽपि सर्वसत्त्वसंताने रागा-
दीनां पर्यवस्थानात् ॥

नन्वेतत्समानं निःस्वभाववादिनो भवतोऽपीति समानदूष-
णतामापादयन्नाह । मायोपमत्वेऽपीत्यादि ।

मायोपमत्वेऽपि ज्ञाते कथं क्लेशो निवर्तते । 15

मायोपमत्वे मायास्वभावत्वेऽपि [151a] जगतो ज्ञाते । कथं
क्लेशो निवर्तते । कथं रागादिगणः प्रहीयते । इति पृच्छति ।
किमत्र प्रहाणानुपपत्तिकारणं यत्पृच्छसीत्याह । यदा माये-
त्यादि ।

यदा मायास्त्रियां रागस्तत्कर्तुरपि जायते ॥ ३१

इदमत्र प्रहाणानुपपत्तिबीजं दृश्यते । यदा मायास्त्रियां मायाकारविनिर्मितायामबलायां रागः सरक्तचित्तता जायते । उत्पद्यते । कस्य जायते । तत्कर्तुरपि । न केवलं यद्व्यामोहनाय सा विनिर्मिता तेषामेव जायते । किं तु तस्या मायास्त्रियाः कर्तुर्निर्मातुरपि जायते । इत्यपिशब्दार्थः ॥ यदा हि परचित्तविभ्रमसंपादनार्थं मन्त्रौषधिसामर्थ्यविनिर्मितां सर्वाङ्गप्रत्यङ्गावयवलक्षणपरिपूर्णामभिनवयौवनशोभासंपत्समापन्नां प्रसन्नमनोहरवर्णां लावण्यातिशयशालिनीमतीव तदाकारनिर्माणप्रवीणः कश्चिन्मायाकारो जनपदकल्याणीं स्त्रियमुपदर्शयति । तदा न तावत्तदन्ये तामभिसमीक्ष्य मन्मथशरप्रहारान्तरव्यथितचेतसो जायन्ते । अपि तु योऽपि स तस्याः कमनीयकान्तिसंपदः कामकलाकौशलोत्कण्ठितमूर्तेरभिनिर्माता । मया स्वयमेव चैषा विरचितेति । तत्स्वभावविचक्षणः । सोऽपि कामकलया परमदशामासादयन्न कथं चिदपि चेतः संधारयितुमलं ॥ तत्कथं मायोपमत्वेऽपि निश्चिते संसारसंततिच्छेदः स्यात् ॥

एतत्परिजिहीर्षन्नाह । अप्रहीणा हि तदित्यादि ।

अप्रहीणा हि तत्कर्तुर्ज्ञेयसंक्लेशवासना ।
तद्दृष्टिकाले तस्यातो दुर्बला शून्यवासना ॥ ३२

हिर्यस्मादर्थे । नैतद्दूषणमस्माकमासज्जते । यस्मादप्रहीणाऽनिवृत्ता । तत्कर्तुर्मायास्त्रीनिर्मातुः । किमप्रहीणा ज्ञेयसंक्लेश-

वासना । ज्ञेयसंक्लेशः सस्वभावतासमारोपादासङ्गादिः[1] । वस्तुता-
समारोपो वा । ज्ञेयावरणं यावत् । तस्य वासना । अनादि-
संसारजन्मपरम्पराभ्यस्तमिथ्याविकल्पजनिततद्बीजभूतचित्तसंतति-
संस्काराधानं[2] । तस्या अप्रहीणत्वात् ॥

नन्वेतत्समानं विज्ञानवादिनोऽपि प्रतिविधानं । तस्याप्यद्वय-
तत्त्वस्य सत्त्वेऽपि । आगन्तुकसंक्लेशवासनाया अप्रहीणत्वात् । न
सर्वे तथागता भवन्ति ॥ नैतत्समानं । यस्मादभावात्मानो
मलाः कार्यत्वाविकला नावरणं भवितुमर्हन्ति । इत्युक्तमेव ।
अस्माकं तु निःस्वभावमेव जन्यं जनकं चेति न समानं ।

सा यस्मादप्रहीणा । अतोऽस्मात्कारणात् । तद्दृष्टिकाले ।
तस्या ज्ञेयसस्वभावतया[3] दृष्टिरुपलब्धिः । तस्याः काले । तस्यां
वा मायास्त्रियां दृष्टिकाले उपलम्भकाले । तस्येति अप्रहीण-
संक्लेशवासनस्य द्रष्टुः । दुर्बला शून्यवासनेति । शून्यस्य शून्य-
तत्त्वस्य शून्यताया वेति विग्रहः । छन्दानुरोधाद्भावप्रत्ययस्य
लोपं कृत्वा शून्येति निर्देशः । वासना संस्काराधानं । सा
दुर्बला सामर्थ्यविकला । आरोपितस्य दर्शनात् ॥ अतस्तदा
भाववासना बलवती । कथं तर्हि सा निवर्तत इत्याह । शून्य-
तेत्यादि ।

---

1 sa°, not sat°. Tib. raṅ-bzhin daṅ bcas par.

2 ḥbyuṅ ba daṅ de sa-bon-du gyur pa'i sems kyi rgyun gyis ḥdus byas pa yin-te.

3 sa (jñeyasa°), not translated in Tib.—First hand °bhāvatayā (Tib. raṅ-bzhin du). Second hand °tāva.

शून्यतावासनाधानाद्धीयते भाववासना ।

शून्यताया मायास्वभावनिःस्वभावताया वासना । तस्या आधानं । आवेधः । अभ्यासेन दृढीकरणमिति यावत् । तस्माद्विरुद्धप्रत्ययात् । हीयते निवर्तते । वह्निसन्निधाना-
5 च्छीतस्पर्शवत् । किं भाववासना । अनवराग्रसंसाराभ्यस्तवस्तु-सद्ग्राहाध्यवसानवासना । तस्या भूतार्थत्वात् । वस्तुनिजस्वभाव-त्वाच्च । इतरस्या अलीकत्वादागन्तुकत्वाच्च ॥

ननु भावाभिनिवेशो वा शून्यताभिनिवेशो वा । इति नाभिनिवेशं प्रति कश्चिद्विशेषः[1] । तस्यापि कल्पनास्वभावा-
10 नतिक्रमात् । यदाह ।

शू[152a]न्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः ।
येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे ॥ इति ॥

एतत्परिहर्तुमाह । किं चिन्नास्तीत्यादि ।

किं चिन्नास्तीति चाभ्यासात्सापि पश्चात्प्रहीयते ॥ ३३

15 किं चिदिति भावो वा शून्यता वा । नास्ति न विद्यते । चशब्दः पूर्वापेक्षया । समुच्चये । इत्येव चाभ्यासात् । भाववासना-प्रहाणस्य पश्चात्सापि शून्यतावासनापि प्रहीयते । निवर्तते ॥ अयमभिप्रायः । शून्यताआवेधो[2] हि भावाभिनिवेशस्य प्रति-

---

[1] See above 358 6
[2] So Ms

पत्वात् । प्रहाणोपायभूतो । ऽधिगते चोपेये पश्चात्कोलोप-
मत्वात्[1] । उपायस्यापि प्रहाणमनुष्ठीयते । एतदेवाह ।

सर्वसंकल्पहानाय शून्यतामृतदेशना ।
यस्तु तस्यामपि ग्राहस्त्वयासाववसादितः ॥ इति[2] ॥

स्यादेतत् । यदि नाम किं चिन्नास्तीति मनसिकारा- 5
भ्यासाद्भवति शून्यतावासनायाः प्रहाणं । तथापि तदभ्यासात्पुन-
रभावकल्पना[3] प्रवर्तमाना निवर्तयितुमशक्या । ततश्च गण्ड-
प्रवेशेऽक्षितारानिर्गमो जात इति[4] तदवस्थ तव दौःस्थ्यमित्य-
त्राह । यदा न लभ्यत इत्यादि ।

यदा न लभ्यते भावो यो नास्तीति प्रकल्प्यते । 10
तदा निराश्रयोऽभावः कथं तिष्ठेन्मतेः पुरः ॥ ३४

इयमपि[5] विचारेण नावतिष्ठत इति ॥ यो भावो नास्तीति
प्रकल्प्यते । यस्य भावस्य प्रतिषेधः क्रियते । स यदि विचार्य-
माणो निःस्वभावतया न लभ्यते । न प्राप्यते तैमिरिकोपलब्ध-
केशस्तबकवत् । तदा निराश्रय इति । यस्यासौ परिकल्पितो 15
भावः । तस्य सबन्धिनो ऽभावात् । निरालम्बः । अभावः । कल्पना-

---

1 Ms *kālopamatvāt*—But Tib *gzins* = *kola* (Foucaux) = *Floss (Pet. W.) = raft.—Pāli, *kullo*

2 See supra 359.8. I prefer the reading *yasya*.—Tib *hdi ni khyed kyis spans lags ces*

3 Ms *abhāsakalpanā*.—Tib dnos po med pai rnam par rtog pa = abhāva-vikalpa

4 *lba ba bcug pa-las mig-hbras hbyun ba bzhin du*

5 *iyam abhāvakalpanā*

विदर्शितमूर्तिः। कथं तिष्ठेन्मतेः पुरः। कथमसौ विचारेण बुद्धेरग्रतः प्रतिभासेत। स्वयमेव भावनिःस्वभावतायां निवर्तते॥

अथ वा अन्यथावतार्यते। भवतु नाम शून्यताबलाधाना-द्भाववासनाविनिवृत्तिः[1] [152b]। तत्प्रतिषेधाभावादभावाभि-
5 निवेशस्तु[2] केन वार्यते। इत्यत आह। यदा न लभ्यत इत्यादि। अन्यत्सर्वं पूर्ववत्॥

अयमत्र समुदायार्थः। सर्वधर्मशून्यता हि भावाभिनिवेश-प्रहाणायोपादीयते। सापि शून्यता शून्यताभिमुखीकरणात्प-श्चात्प्रहीयते। यापि च क्वचि चिद्भावकल्पना जायते। सापि
10 समनन्तरविचारेण निवर्तते॥ अत एवैतत्समस्तकल्पनाजाल-निवर्तनाय भगवत्यां प्रज्ञापारमितायां विस्तरेणाध्यात्मशून्यता-दयोऽष्टादश शून्यताः प्रोक्ताः[3]॥ न च शून्यता भावाद्व्यति-रिक्ता भावस्यैव तत्स्वभावत्वात्। अन्यथा शून्यताया भावाद्व्यति-रेके धर्माणां निःस्वभावता न स्यात्। निःस्वभावता तत्स्वभाव
15 इति प्रसाधितं प्राक्॥

एतदपि प्रज्ञापारमितायामुक्तं। पुनरपरं सुभूते बोधि-सत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् सर्वाकारज्ञताप्रति-संयुक्तैर्मनसिकारैः। एव प्रत्यवेक्षते। न रूपशून्यतया रूपं शून्यं। रूपमेव शून्यं। शून्यतैव रूपं। न वेदनाशून्यतया वेदना

---

1 *bala* = stobs

2 According to the Tib.—Ms. *tatpratiṣedhād abhāvād abhini°*

3 See *M. Vyut.* 37; *Dh. S.* XLI

शून्या । वेदनैव शून्या । शून्यतैव वेदना । न संज्ञाशून्यतया संज्ञा शून्या । संज्ञैव शून्या । शून्यतैव संज्ञा । न संस्कारशून्यतया संस्काराः शून्याः । संस्कारा एव शून्याः । शून्यतैव संस्काराः । न विज्ञानशून्यतया विज्ञानं शून्यं । विज्ञानमेव शून्यं । शून्यतैव विज्ञानमिति विस्तरः ॥ 5

उक्तं च ।

यः प्रतीत्यसमुत्पादः शून्यता सैव ते मता ।
भावः स्वतन्त्रो नास्तीति सिंहनादस्तवातुलः ॥ इति ।

इति न शून्यता धर्मव्यतिरिक्ता । तस्माच्छून्यतायामपि नाभिनिवेशः कर्तव्य इति [153a] ॥ 10

एवं सर्वविकल्पप्रत्यस्तम(या)त्[1] । समस्तावरणनिर्मुक्तिरुपजायते । इत्युपदर्शयन्नाह । यदा न भाव इत्यादि ।

यदा न भावो नाभावो मतेः संतिष्ठते पुरः ।
तदान्यगत्यभावेन निरालम्बा प्रशाम्यति ॥ ३५[2]

यदा न भावः परमार्थसत्स्वभावो मतेर्बुद्धेः संतिष्ठते पुरो- 15
ऽग्रतः । नाभावः । नापि भावविरहितलक्षणोऽभावः । यदा मते संतिष्ठते पुरः । तदाऽन्यगत्यभावेन विधिप्रतिषेधाभ्यां गत्यन्त-

[1] Ms. *pratyastasamasta ... mat* in margine. — Query ... *pratyastam*? — Tib. nub *pa phyin* (nub = paçcima, astam, antardhanam.)

[2] According to Taranatha and to the Commentary of Vibhuticandra, Çantideva, when coming to this stanza, disappeared from the eyes of his auditors.

राभावात् । उभयानुभयपक्षयोरेतद्द्वयविधिप्रतिषेधात्मकत्वात् । आभ्यामव्यतिरिक्तत्वाऽनयोः संग्रहे तावपि संगृहीताविति । निराश्रया । सदसतोरालम्बनयोरयोगात् । बुद्धिः प्रशाम्यति । उपशाम्यति । सर्वविकल्पोपशमान्निरिन्धनवह्निवत् । निर्वृति-
5 मुपयातीत्यर्थः ॥

कथ तर्हि सकलकल्पनाविरहादनेककल्पासङ्ख्येयाभिलषितं परार्थसपदुपायभूत बुद्धत्वमधिगम्य परार्थमभिसपादयति भग-वानित्यत्राह । चिन्तामणिरिति ।

चिन्तामणिः कल्पतरुर्यथेच्छापरिपूरणः ।
10 विनेयप्रणिधानाभ्यां जिनबिम्बं तथेक्ष्यते ॥ ३६

चिन्तामणिरिति । चिन्तितफलदाता रत्नविशेष. । कल्प-तरुरिति । कल्पितफलदाता वृक्षविशेष· । स यथा विकल्प-मन्तरेणापि लोकाना यथाभव्यमिच्छायाः परिपूरणः । अभि-लाषस्य सपादकः । जिनबिम्बं तथेक्ष्यत इति सबन्धः ।
15 चतुर्मारजयाज्जिनो भगवान्[1] । पापकधर्मजयाद्वा । जिनस्य बुद्धस्य भगवतः । बिम्बं द्वात्रिंशता महापुरुषलक्षणैर्विराजित शरीरं । तथा तेन प्रकारेण । ईक्ष्यते । सर्वकल्पनाभावेऽपि परहितसुखसपादनसमर्थः प्रतीयते ।

---

1 See *Childers*, *Gōksas*, 198 10 *Mhv* III 273 281

कथं पुनरेतदिष्टमात्रेण भविष्यतीत्याह । विनेयप्रणिधानाभ्यामिति । विनेयवशात् । ये बुद्धस्य भगवतो विनेयाः[1] । तदुपाधिफलविशेषप्रतिलम्भहेतुकुशलकर्मपरिपाकात्[2] । तद्वशात् । प्रणिधानवशाच्च[3] । [15:b] यत्पूर्वं बोधिसत्त्वावस्थायामनेकप्रकारं भगवता सत्त्वार्थसंपादनं प्रणिहितं तस्याक्षेपवशात् । 5
कुलालचक्रभ्रमणाक्षेपन्यायेनानाभोगेन प्रवर्तनात् । सर्वसत्त्वहितसुखसंपादनमुपपद्यते ॥

यदुक्तं[4] । यस्यां रात्रौ तथागतोऽभिसंबुद्धो यस्यां च परिनिर्वृतो । ऽत्रान्तरे तथागतेनैकमप्यक्षरं नोदाहृतं । तत्कस्य हेतोः । नित्यं समाहितो भगवान् । ये चाक्षरस्वररुतवैनेयाः 10
सत्त्वाः । ते तथागतमुखादूर्णाकोशादुष्णीषात् । ध्वनिं निश्चरन्तं शृण्वन्तीत्यादि ॥

उक्तं च ।

तस्मिन् ध्यानसमापन्ने चिन्तारत्नवदास्थिते ।
निश्चरन्ति यथाकामं कुड्यादिभ्योऽपि देशनाः ॥ 15
ताभिर्जिज्ञासितानर्थान् सर्वान् जानन्ति मानवाः ।
हितानि च यथाभव्यं क्षिप्रमासादयन्ति ते ॥ इति ।

---

[1] gaṅ saṅs rgyas bcom ldan ḥdas ... gdul bya ... gdul bya = ye buddhabhagavatām vineyās te ...

[2] upadhi, not translated in Tibetan.—tad = de ...

[3] praṇidhāna = smon lam.

[4] See Tathāgataguhyasūtra quoted Madh. Vṛtti fol. 109 b.

[5] = sgron ma ...—See J.R.A.S. 1902, p. ?71.

चतुस्तवे[1] ऽप्युक्तं।

नोद्‌धृतं त्वया किं चिदेकमप्यचरं विभो।
कृत्स्नश्च वैनेयजनो धर्मवर्षेण तर्पितः॥ इति॥

एवमसाधारणं कारणमाख्याय पुनरन्यथा ऽप्यवस्थाया एव
5 स तादृशः प्रभावातिशयविशेषो यदनाभोगेन[2] परार्थसंपादन-
समर्थफलमुपजायत इति वृत्तद्वयेनोपदर्शयन्नाह। यथा गारु-
डिक इत्यादि।

यथा गारुडिकः स्तम्भं साधयित्वा विनश्यति।
स तस्मिंश्चिरनष्टेऽपि विषादीनुपशामयेत्॥ ३७

10 यथा गारुडिको विषतत्त्ववित्। लब्धमन्त्रसामर्थ्यः। स्तम्भं
काष्ठमयं वा पाषाणमयं वा अन्यद्वा साधयित्वा। मन्त्रेणाभि-
संस्कृत्य ममाभावादयमेव सर्वविषापहारचतुरो भविष्यतीति
विनश्यति। स्वयमुपरतव्यापारो भवति। स स्तम्भस्तेनाभि-
मन्त्रितः। तस्मिन् गारुडिके चिरनष्टेऽपि। प्रभूतकालमुप-
15 रतेऽपि। विषादीनुपशामयेत्।[3] आदिशब्दाद्ग्रहादिविकारमप-
हरेत्। छान्दसममुं परिपालयता मितो[4] पि उपधाया णिचि
ह्रस्वो न कृत। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वा [154a]। एवं
दृष्टान्तमुपपाद्य दार्ष्टान्तिके योजयन्नाह। बोधिचर्येति।

[1] So Ms.—*Bstod pa bzhi las*
[2] See supra VIII. 1. 107
[3] Wanting in Tib.
[4] Thus Ms.—See Pāṇ. VI, 4. 92

बोधिचर्यानुरूप्येण जिनस्तम्भोऽपि साधितः ।
करोति सर्वकार्याणि बोधिसत्त्वेऽपि निर्वृते ॥ ३८

यथाशब्दस्तथेत्याकर्षयति । तथा बोधौ बोधिनिमित्तं बुद्धत्वार्थं चर्या [बोधिचर्या][1] । बोधिसत्त्वेऽपि निर्वृत इति । बोधिर्बुद्धत्वमेकानेकस्वभावविविक्तमनुत्पन्नानिरुद्धमनुच्छेदमशा- 5
श्वतं सर्वप्रपञ्चविनिर्मुक्तमाकाशप्रतिसमं धर्मकायाख्यं परमार्थ- तत्त्वमुच्यते । एतदेव च प्रज्ञापारमिताशून्यतातथताभूतकोटि- धर्मधात्वादिशब्देन संवृतिमुपादायाभिधीयते । इदमेव चाभि- मधायोक्तं ।

धर्मतो बुद्धा द्रष्टव्या धर्मकाया हि नायकाः । 10
धर्मता चाप्यविज्ञेया न सा शक्या विजानितुं ॥ इति ।[2]

उक्तं च ।

अलक्षणमनुत्पादमसंस्कृतमवाङ्मय ।
आकाशं बोधिचित्तं च बोधिरद्वयलक्षणा ॥ इति ॥

तत्र सत्त्व अभिप्रायोऽस्येति बोधिसत्त्वः । तस्मिन्निर्वृतेऽपि ।[3] 15
अपिशब्दो भिन्नक्रमः । अप्रतिष्ठितनिर्वाणत्वेन परमां शान्तिं गतेऽपि । हेत्ववस्थानिवृत्तौ फलावस्थाप्राप्तौ चेत्यर्थः ॥ इत्युभय- थापि सर्वथा कल्पनाविरहेऽपि सत्त्वार्थसंपादनमविकलमुप- दर्शितं भवति ।

---

1 *bodhicaryā* from Tibetan —I suppose that our text is incomplete

2 See *Vajracchedikā*, § 26

3 Ms *nirvrtau* or *nirvrtau*

स्यादेतत् । यदि भगवानुपरतसकलविकल्पालम्बनतया निवृत्तसर्वचित्तचैत्तव्यापारः । कथं तर्हि तथागतपूजा महाफला वर्ण्यत इत्याशङ्कयन्नाह । अचित्तक इत्यादि ।

अचित्तके कृता पूजा कथं फलवती भवेत् ।

5 स्मृतिचित्तविविक्ते भगवति कृता उपकृता । पूजा कारा-विशेषः[1] । कथ फलवती भवेत् । सफला स्यात् । तत्रामत्युप-भोक्तरि दायकदानपतीनां कथ पुण्य भवेत् । अत्रोत्तरमाह । तुल्यैवेत्यादि ।

तुल्यैव पठ्यते यस्मात्तिष्ठतो निर्वृतस्य च ॥ ३९

10 तुल्येव समैव । पठ्यत आगमे प्रतिपाद्यते । यस्मात्तिष्ठतो निर्वृतस्य च तस्मात्फलवती भवेदिति योजनीयं । तिष्ठतो-ऽपरिनिर्वृतस्य । निर्वृतस्य निरुपधिनिर्वाण [105] गतस्य पूजाया नास्ति विशेषः ॥

अयमभिप्रायो । द्विविध हि पुण्य । त्यागान्वय च । त्यागा

15 देव यदुत्पद्यते । परिभोगान्वय च । देयधर्मपरिभोगाद्यद्-त्पद्यते । तत्र यदि नाम निर्वृते भगवति प्रतिग्रहीतुरभावा-त्परिभोगान्वयं न भविष्यति पुण्यं परित्यागान्वयं च केन वार्यते ।

[1] See *D*[illegible] *and* Index s. voc. [illegible]

अप्रतिग्टह्णति कस्मिंश्चित्कथं परित्यागान्वयमपि पुण्यं । किं पुनः कारणं सति प्रतिग्रहीतरि भवितव्यं पुण्येन नासति । कस्य चिद्प्यनुभव[ाभाव]ादिति[1] चेत् । इदमकारणमेव । यदि हि पुण्यं परानुग्रहादेव स्यात् । मैत्र्याद्यप्रमाण्यसम्यग्दृष्टिभावनायां[2] न स्यात् । तस्माद्दृष्टव्यं स्वचित्तप्रभवं परानुग्रहमन्तरेणापि पुण्यं । तथा व्यतीतेऽपि गुणवति तद्भक्तिकृत स्वचित्ताद्भवेत्पुण्यं । न विरुध्यत इति ॥ अपि च । सर्वपुण्यपापसद्भावे सर्वेषामागमः साक्षीत्याह । आगमाच्चेत्यादि ।

आगमाच्च फलं तत्र संवृत्या तत्त्वतोऽपि वा ।

किमत्रोपपत्त्यन्तरेण । आगमाद्भगवत्प्रवचनात् । फलं भगवत्पूजाकृतं । महाभोगतादिलक्षणमवगम्यते । तत्रेति निर्वृतानिर्वृते भगवति पूजायामेतावांस्तु विशेषः । कस्य चित्तत्फलं सांवृत । कस्य चित्पुनः पारमार्थिकमभिमतं । एवमनन्तरविचारमनादृत्य विशेषेणोच्यते । संवृत्या तत्त्वतोऽपि वा पुण्यपापक्रियायाः[3] फलं भगवदागमात्प्रतीयते । तत्र चावयोरविवाद एव ॥

---

1 yaṅ ci ste len pa po lhag yaṅ med par phyin to zhe na = ka[smi]ṁś cid api pratigrahītari abhavati

2 Ms apramāṇa° —— byams pa tshad med pa la sogs pa = maitry-apramāṇādi°

3 sarveṣām, not translated in Tib

तत्रेदमुक्तं भगवता पुष्पकूटधारण्यां[1] । ये के चित्सिंह-
विक्रीडित तथागतस्य पूजां करिष्यन्ति तिष्ठतो वा परिनिर्वृ-
तस्य वा । सर्वे ते त्रियानादेकतरेण यानेन परिनिर्वास्यन्ति ।
यश्च खलु सिंहविक्रीडित तथागतमर्हन्तं सम्यक्संबुद्धं दृष्ट्वा
5 चित्तं प्रसादयेत् । प्रसन्नचित्तः सत्कुर्यात् । गुरुकुर्यात् । मान-
येत् । पूजयेत् । उपचरेत् । लाभेन चीवरपिण्डपातशयनासन-
ग्लानप्रत्य[155a]यभैषज्यपरिष्कारैः सर्वसुखोपधानैरुपतिष्ठेत् । यश्च
परिनिर्वृतस्य तथागतस्य[2] सर्षपफलमात्रधातौ शरीरपूजां
कुर्यात् । समो विपाकः प्रतिकाङ्क्षितव्यः । तथा पूजायै नास्ति
10 विशेषो नानाकारणं चेति ॥ उक्तं च ।

तिष्ठन्तं पूजयेद्यस्तु यश्चापि परिनिर्वृतं ।
समचित्तप्रसादेन नास्ति पुण्यविशेषता ॥ इति ।

पुनरिदमुक्तं[4] । यश्च खलु पुनः सिंहविक्रीडित तथागतं
वर्षशतं वा वर्षसहस्रं वा सर्वसुखोपधानेनोपतिष्ठेत् । यश्च परि-
15 निर्वृतस्य तथागतस्य चैत्ये बोधिचित्तपरिगृहीतैकपुष्पमारो-
पयेत्[5] । तथागतपूजायै जलाञ्जलिं चोपनामयेत् । जलेन
चोपसिञ्चेत् । ईषिकापदं[6] वा दद्यात् । निर्माल्यं वापनयेत ।

---

1 See Çikṣās., p. 173 n. 1
2 Ms. çarṣapa° = [illegible]
3 = Divyavad. p. 469, 3
4 This passage occurs Çikṣā. 173, 13
5 Çi. has °saṃgṛhīta cha°
6 Çi. iṣīkā° see Pet. W. [illegible]

उपलेपनप्रदानं वा[1] दीपप्रदानं वा कुर्यात् । आत्तमनाः । एक-क्रमपदव्यतिहारं[2] वातिक्रम्य वाचं भाषेत । नमस्तस्मै बुद्धाय भगवत इति । मा ते अत्र सिंहविक्रीडित काङ्क्षा वा विमतिर्वा विचिकित्सा वा । यदसौ कल्पं वा कल्पशतं वा कल्पसहस्रं वा दुर्गतिविनिपातं गच्छेत् । नेदं स्थानं विद्यत इति ॥ 5

एतदवश्यमभ्युपेयमिति । सत्यबुद्ध इत्यादि ।

सत्यबुद्धे कृता पूजा सफलेति कथं यथा ॥ ४०

सत्यबुद्धे परमार्थसति भगवति कृता पूजा सफलेति । फलवतीत्येतदपि कथं यथेति । कथमिवेत्युदाहरणमुपदर्शयति । नान्यदत्रोदाहरणमागमादिति भावः । तस्मात्सर्वथा भगवत्पूजायां फलसद्भाव आगमादवगम्यते ॥ 10

शून्यतावासनाधानादित्यादि यदुक्तं । तत्र वैभाषिकादयः सर्वधर्मशून्यतायाः सर्वावरणप्रहाणमसहमानाः । चतुरार्यसत्यदर्शनभावनां च तदुपायमिच्छन्तः प्राहुः सत्यदर्शनत इत्यादि ।

सत्यदर्शनतो मुक्तिः शून्यतादर्शनेन किं । 15

चतुर्णामार्यसत्यानां दुःखसमुदयनिरोधमार्गलक्षणानां दर्शनतः । [155b] उपलक्षितः साक्षात्कारणादित्यर्थः । दर्शनत इत्युपलक्षणं भावनातोऽपि द्रष्टव्यं ॥ तदुक्तं ।

---

1 So Q_1 and Ms. first hand — Q_1 adds *puṣpapradānam*.

2 *Pada*, wanting in Q_1 —gom pa'i gnas skabs lhag bos te—See *stabs*

क्लेशप्रहाणमाख्यातं सत्यदर्शनभावनात्। इति।

सच वृत्तस्थ[1] श्रुतचिन्तावतो भावनायां प्रवृत्तस्य। अशु-भानापानस्मृतिस्मृत्युपस्थानभावनानिष्पत्तिक्रमेण[2]। अनित्यतो दुःखतः शून्यतोऽनात्मतश्चेत्येतैः षोडशभिराकारैर्दुःखादिसत्यं
5 पश्यतः[3]। उष्मगतादिचतुर्निर्वेधभागीयद्वारेण[4] दुःखे धर्मज्ञान-क्षान्त्यादिपञ्चदशक्षणलक्षणस्य दर्शनमार्गस्य[5] ततः परं भावना-मार्गस्याधिगमाद्दर्शनभावनाहेयत्रैधातुकक्लेशोपक्लेशराशिप्रहाणा-त्[6]। [7]क्षयानुत्पादज्ञानोत्पत्तिरित्यार्यसत्येषु संक्षेपतोऽभिसमय-क्रमः। इत्थमार्यसत्यदर्शनतो मुक्तिरुच्यते।

10 तस्मादत एव मुक्तिरस्तु। शून्यतादर्शनेन किं। शून्य-तायाः सर्वधर्मनिःस्वभावताया दर्शनेनाधिगमेन साक्षात्करणे-नेति यावत्। किं। न किंचित्प्रयोजनं। तदपरस्य मुक्तेरुपा-यस्य विद्यमानत्वात्॥ अत्राह। न विनेत्यादि।

न विनानेन मार्गेण बोधिरित्यागमो यतः॥ ४१

---

1 zhugs-pas = *vṛttasya*

2 On the *açubhabhāvanā*, see *Mvyut* § 52, on the *anapanasmṛti*, ibid 53, on the *smṛtyupasthānas*, ibid § 38

3 The sixteen *ākāras*, see *Mvyut* § 54, 2 17, *Dhs* 97

4 The four *nirvedhabhāgīyas*, *Mvyut* § 55 — see *Divyāvadāna*, 240, 20, Wassilief 246, Çarad Candra Das 355, *Nettip* 15

5 See the sixteen *Kṣāntijñānalakṣaṇas*, *Mvyut* § 56, *Dhs* XLVI The last (*mārge 'nvayajñāna*), being a *phala*, is not a part of the *darçanamārga*

6 *Traidhātuka*, see for instance *Mvyut* § 109, 65-67 — *darçanabhāvanā heya*, ibid § 109, 68 69, and many Pāli and Sanskrit references.

7 See *Mvyut* § 57, 9 *kṣayajñana*, 10 *anutpāda*°

नोपायान्तरमस्ति । तस्मादित्यर्थः । इदं महार्थस्य तत्त्वं[1] । तथा हि । सर्व एव हि भावा आरोपितमनारोपितं चेति रूपद्वयमुद्वहन्ति । तत्र यत्तदविद्याप्रवाहितमारोपितं रूप तत्सर्वजनसाधारणमिति न तदुपलम्भः सक्लेशप्रहाणमुपपद्यते । अन्यथा सर्वे बालजनास्तथागताः स्युरिति प्राचीनप्रसङ्गः । इत्य- 5
नारोपितमेव तत्त्वमनु[प]लम्भयोगेऽधिगम्यमानमज्ञानास्रवक्षयाय[2] सामर्थ्यवदुपलभ्यते । तच्च प्रज्ञया विवेच्यमानं सर्वधर्मानुपलम्भ-लक्षणमवसितमिति सर्वधर्मशून्यतैव सर्वावरणविभ्रमप्रहाणाय पटीयसीत्यवगम्यते ॥

इति युक्तितो निरूपितं प्राक् । निरूपयि[156a]ष्यते च 10 पश्चात् । इह पुनरागमत एवैनमर्थमवग्राहयितुं ।

न विनानेन मार्गेण बोधिरित्यागमो यतः ।

इत्युक्तवान् ॥ यदुक्तं प्रज्ञापारमितायां । भगवानाह । इह सुभूते बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां चरन् रूपं भाव इति न भावयति । वेदनां भाव इति न भावयति । संज्ञां भाव 15 इति न भावयति । संस्कारान् भाव इति [न भावयति] । यावन्मार्गाकारज्ञतां भाव इति न भावयति । यावत्सर्वाकार-ज्ञतां भाव इति न भावयति । [3]सर्ववासनानुसंधिक्लेशप्रहाणं भाव इति न भावयति । तत्कस्य हेतोः । नास्ति भावसंज्ञिनः

---

[1] Tib = *idam arthasya tattvam*

[2] Mi-çes-pa dan zag-pa zad par ched du nus pa. Contrast the sixth *abhijñā āsravakṣayajñāna*

[3] *Sarva* is wanting in Tibetan

प्रज्ञापारमिताभावना । यावन्नास्ति भावसंज्ञिनो दानपारमिता-
भावना । नास्ति भावसंज्ञिनोऽध्यात्मशून्यता[1]भावना । यावन्नास्ति
भावसंज्ञिनोऽभावस्वभावशून्यताभावना । नास्ति भावसंज्ञिनः
षडभिज्ञाभावना[2] । यावन्नास्ति सर्वसमाधिसर्वधारणीमुख-
5 तथागतबलवैशारद्यप्रतिसंविन्महामैत्रीमहाकरुणाऽऽवेणिकबुद्धध-
र्माणां भावना । तत्कस्य हेतोः । तथा हि स [3]भाव एषोऽह-
मिति द्वयोरन्तयोः सक्तः । दाने शीले क्षान्तौ वीर्ये ध्याने
प्रज्ञायां । एषोऽहमिति द्वयोरन्तयोः सक्तः । अध्यात्मशून्यतायां
यावदभावस्वभावशून्यतायां षट्स्वभिज्ञासु । यावत्सर्ववासनानु-
10 संधिक्लेशप्रहाणे एषोऽहमिति द्वयोरन्तयोः सक्तः । यश्च द्वयो-
रन्तयोः सक्तस्तस्य नास्ति मोक्षः । तत्कस्य हेतोः । नास्ति
सुभूते भावसंज्ञिनो दानं । यावन्नास्ति प्रज्ञा । नास्ति मार्गो ।
नास्ति ज्ञानं । नास्ति प्राप्तिः । नास्त्यभिसमयो । नस्त्यानुलो-
मिकी[4] क्षान्तिः । नास्ति रूपस्य परिज्ञा । नास्ति वेदनायाः
15 परिज्ञा । यावन्नास्ति प्रतीत्यसमु[156b]त्पादस्य परिज्ञा ।
नास्त्यात्मसत्त्वजीवजन्तुपोषपुरुषपुद्गलमनुजमानवकारकवेदकजा-
नकपश्यकसंज्ञायाः परिज्ञा । यावन्नास्ति सर्ववासनानुसंधिक्लेश-
प्रहाणस्य परिज्ञा । कुतः पुनरस्य मोक्षो भविष्यतीति ॥

---

1 See *M vyut* § 37, *Dh s* XLI

2 Five *abhijñās*, *Dh s* XX, six abhijñās, *M vyut* § 10

3 In margin, from a second hand, *satva* —bdi ltar de dnos-po-la bdi bdag go *sakta* = chags

4 See notes to *Dh s*, CVII —*ānulomikī ā°* from a second hand

अत एव पुनस्तदैवोक्तं।

भगवानाह। एवमेतत् कौशिक एवमेतत्। येऽपि तेऽभूव-न्नतीतेऽध्वनि तथागता अर्हन्तः सम्यक्सम्बुद्धास्तेऽपीमामेव प्रज्ञा-पारमितामागम्यानुत्तरां सम्यक्सम्बोधिमभिसम्बुद्धाः। येऽपि ते भविष्यन्त्यनागतेऽध्वनि तथागता अर्हन्तः सम्यक्सम्बुद्धास्तेऽपीमा-मेव प्रज्ञापारमितामागम्यानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यन्ते। येऽपि त एतर्हि दशदिग्लोकधातुषु अप्रमेयासंख्येयेषु तथागता अर्हन्तः सम्यक्सम्बुद्धास्तिष्ठन्ति ध्रियन्ते यापयन्ति धर्मं देशयन्ति तेऽप्यपीमामेव प्रज्ञापारमितामागम्यानुत्तरां सम्यक्सम्बोधिमभि-संबुद्धाः[1]। येऽपि तेऽभूवन्नतीतानां तथागतानामर्हतां सम्यक्सं-बुद्धानां श्रावकाः। येऽपि ते भविष्यन्त्यनागतानां तथागता-नामर्हतां सम्यक्सम्बुद्धानां श्रावकाः। येऽपि त एतर्हि प्रत्यु-त्पन्नानां तथागतानामर्हतां सम्यक्संबुद्धानां श्रावकाः। तेऽपी-मामेव प्रज्ञापारमितामागम्य स्रोतआपत्तिफलं प्राप्ताः प्राप्स्यन्ति प्राप्नुवन्ति च। येऽपि तेऽभूवन्नतीतेऽध्वनि प्रत्येकबुद्धाः। याव-त्तेऽपीमामेव प्रज्ञापारमितामागम्य प्रत्येकबोधिं प्राप्ताः प्राप्स्यन्ति प्राप्नुवन्ति च॥ तत्कस्य हेतोः। अत्र प्रज्ञापारमितायां सर्वाणि त्रीणि यानानि विस्तरेणोपदिष्टानि। तानि पुनरनिमित्तयोगे-नानुपलम्भयोगेनानुत्पादयोगेनासंक्लेशयोगेनाव्यवदानयोगे[157a]-न। यावत्तत्पुनर्लोकव्यवहारेणापरमार्थयोगेनेति[2] विस्तरः॥

1 From a second hand *abhisambudhyante*

2 hjig rten gyi tha sñad-kyis yin te don dam-pai thsul gyis ni ma yin no

उक्तं च ।

बुद्धैः प्रत्येकबुद्धैश्च श्रावकैश्च निषेविता ।

मार्गस्त्वमेका मोक्षस्य नास्त्यन्य इति निश्चयः ॥ इति ।[1]

एतन्महायानवचनमसहमान आह । नन्वसिद्धमित्यादि ।

5 **नन्वसिद्धं महायानं ।**

ननु भो शून्यतावादिन् । महायानमागमत्वेन ममासिद्ध-ममंमतं । तदस्योपन्यासो न साधनतया[2] साधुः ॥ अत्र परस्य समानपरिहारदूषणमाह । कथमित्यादिना ।

कथं सिद्धस्त्वदागमः ।

10 यदि महायानमसिद्धं । कथं केन प्रकारेण त्वदीयागमो भगवद्वचनमिति सिद्धः । तत्र न किं चिदागमत्वप्रसाधकं प्रमाणमुत्पश्यामः ॥ परः परिहारमाह । यस्मादिति ।

यस्मादुभयसिद्धोऽसौ ।

यस्मात्कारणात् । उभयस्य तव मम च सिद्ध आगमत्वेन 15 निश्चितोऽसौ ममागमः । न हि मदागमे भवतोऽपि महा-यानानुयायिनो बुद्धवचनत्वेन विप्रतिपत्तिरस्ति । तस्मात्सिद्धो-ऽसौ । न तु महायाने न मम सप्रतिपत्तिः । येनेदमेवोत्तरं भवतोऽपि स्यात् ॥ सिद्धान्तवाद्याह ।

---

[1] See Prajñap. edit. by Rājēndralāl, p. 3

[2] sgrub par byed pa ñid du.

न सिद्धोऽसौ तवादितः ॥ ४२

इति। यद्यप्युभयसिद्धत्वं त्वदागमस्यागमत्वसिद्धौ हेतुः। तदापि नैतद्वक्तव्यमसिद्धत्वात्। यस्मात्तवैव तावदसौ त्वदागमो न सिद्धः। कदा। आदितः। आदौ तत्स्वीकारात्पूर्वं। न ह्यभ्युपगमात्प्राक् तव कथं चिदप्यसौ सिद्धः। इत्युभयसिद्धत्व- 5
मसिद्धत्वादसाधन ॥

यद्यप्युभयसिद्धत्वमसिद्धं। इदं तर्हि साधनमस्तु यद्गुरुशिष्य-परंपरयाम्नायायातं बुद्धवचनत्वेन। यच्च[1] सूत्रेऽवतरति। विनये संदृश्यते। धर्मतां च न विलोमयति। तद्बुद्धवचनं नान्यदित्य-चाह। यत्प्रत्ययेत्यादि। 10

यत्प्रत्यया च तत्रास्था महायानेऽपि तां कुरु।

यः प्रत्ययो निबन्धनं। अस्या आस्थायाः सा तथोक्ता। यत्प्रत्यया यन्निबन्धना। आस्था आदेयता आदरः। तत्र स्वा[157b]गमे। तां [2]तत्प्रत्ययामास्थां। इह महायानेऽपि कुरु विधेहि। महायानेऽप्युक्तस्यास्थाकारणस्य विद्यमानत्वात् ॥ 15

इद पुनः सर्वप्रवचनसाधारणमव्यभिचारि लक्षणं यदुक्त-मध्याशयसंचोदनसूत्रे[3]। अपि तु मैत्रेय चतुर्भिः कारणैः प्रति-भानं सर्वबुद्धभाषितं वेदितव्यं। कतमैश्चतुर्भिः। इह मैत्रेय

---

[1] Ms *tac ca* —gan yan mdo sde-la hjug

[2] From a second hand *yatpratyayām*

[3] See *Çikṣā*, p 15, l 13 22 —Comp *Subhāṣitasutta*, in *Suttanipāta*, Fausboll, p 71

प्रतिभानमर्थोपसंहितं[1] भवति नानर्थोपसंहितं । धर्मोपसंहितं भवति नाधर्मोपसंहितं । क्लेशप्रहायकं भवति न क्लेशविवर्धकं । निर्वाणगुणानुशंस[सं]दर्शकं भवति न संसारगुणानुशंससंदर्शकं । एतैश्चतुर्भिः[2] पेयालं ॥ यस्य कस्य चिन्मैत्रेय । एतैश्चतुर्भिः
5 प्रतिभाति प्रतिभास्यति वा । तत्र श्राद्धैः कुलपुत्रैः कुलदुहितृभिर्वा बुद्धसंज्ञोत्पादयितव्या । शास्तृसंज्ञां कृत्वा स धर्मः श्रोतव्यः । तत्कस्य हेतोः । यत्किं चिन्मैत्रेय सुभाषितं सर्वं तद्बुद्धभाषितं[3] । तत्र मैत्रेय य इमानि प्रतिभानानि प्रतिक्षिपेत् । नैतानि बुद्धभाषितानीति तेषु चागौरवमुत्पादयेत् । पुद्गल-
10 विद्वेषेण तेन सर्वं बुद्धभाषितं प्रतिभानं प्रतिक्षिप्तं भवति । धर्मं प्रतिक्षिप्य धर्मव्यसनसंवर्तनीयेन[4] कर्मणापायगामी भवति[5] ॥ तदत्र धर्मताया [अ]विलोमनमेव[6] सम्यग्लक्षणमुक्तं ॥

उक्तं च ।

यदर्थवद्धर्मपदोपसंहितं
15 त्रिधातुसंक्लेशनिबर्हणं[7] वचः ।
भवेच्च यच्छान्त्यनुशंसदर्शकं
तदुक्तमार्षं[8] विपरीतमन्यथा ॥ इति ।

---

[1] *Çikṣās* has *satyopasaṃhitaṃ* a°

[2] *Çikṣās* has *ebhiç çaturbhiḥ*

[3] See *Ang* N IV, 164, 7

[4] chos spans nas chos-kyis hphons par hgyur bas las mnon par hdu yed pas

[5] Thus in *Çikṣās* —Better *bhavatīti*

[6] chos ñid dan mi hgal ba

[7] spon-byed

[8] *M Vyut* § 66

एतन्महायाने सर्वमस्तीति कथमुपादेयं न स्यात् ॥

यदुक्तं न सिद्धोऽसौ तवादित इति तत्र परो विशेष-
मभिधत्ते । न ब्रवीमि यदावयोर्द्वयोः सिद्धमुभयसिद्धमिति ।
किं तर्हि । आवाभ्यामन्येषामुभयेषां मदागमः सिद्ध इत्युपा-
देयः । न महायानमेतद्विपरीतत्वात् । ते[158a]न नोपदेय- 5
मित्याह । अन्योभयेष्टेत्यादि ।

अन्योभयेष्टसत्यत्वे वेदादेरपि सत्यता ॥ ४३

यद्यावयोर्विवादाक्रूढत्वात्[1] । आवाभ्यामन्ये ये के चिद्प्रति-
पन्ना उभये[2] । तेषामिष्ट अभिमतं संमतमिति यावत् । तस्य
सत्यत्वे । यथार्थत्वे । अभ्युपगम्यमाने सति वेदादेरपि सत्यता । 10
वेदवाक्यस्य चोदनलक्षणस्य । आदिशब्दात्कणादादिवचनस्यापि
सत्यता । अमृषार्थता स्यात् । तत्रापि वादिप्रतिवादिभ्यामन्यो-
भयसंमतिः संभाव्यत इति तदप्युपादेय भवतः स्यात् । तस्मा-
न्नायमपि विशेषः ॥

अथापि स्यात् । मदागमे बुद्धवचनत्वेऽविवादो न तु 15
महायाने । तेन स उपादेयो नेतरदित्याशङ्कयन्नाह । सविवाद
महायानमित्यादि ।

---

[1] U bu-cag rtsod pa-dan bcas par phyin

[2] Interpunction erased after ubhaye. Tib gives no help ... ...
...han pa-dan su-dag ... yañ ... ... pa ... ... hdod-pa
lan = ubhayatra pratipannās

सविवादं महायानमिति चेदागमं त्यज ।
तीर्थिकैः सविवादत्वात्स्वैः परैश्चागमान्तरं ॥ ४४

सविवादं सविप्रतिपत्तिकं महायानं । केचिद्बुद्धवचनतया प्रवृत्त्यङ्गमिच्छन्ति । केचित्तद्विपरीतसमारोपान्नेच्छन्ति । इति
5 हेतोः । चेद्यदि न ग्राह्यं तदा । आगमं त्यज । स्वागममपि विजहीहि । सोऽपि न प्रवृत्त्यङ्गं[1] स्यात् ॥ कस्मात् । तीर्थिकै-र्मीमांसकादिभिः सविवादत्वात् । विप्रतिपत्तिसंभवात्[2] । परि-त्यागमर्हति । न केवलं तीर्थिकैः । अपि तु स्वयूथ्यैरित्याह । स्वैरिति । चतुर्निकायमष्टादशभेदभिन्नं[3] भगवतः शासनं ।
10 तत्रैकस्यैव निकायस्यानेकभेदसंभवात् । स्वयूथ्यैरपि परस्पर-विवादः संभवति ।

स्वैरिति स्वनिकायान्तर्गतभेदान्तरावस्थितैः । परैरिति अन्यनिकायव्यवस्थितैः । चकारः पूर्वापेक्षया समुच्चयार्थः । सवि-वादत्वात् । आगमान्तरं त्यजेति सबन्धः । त्वदभ्युपगतादागमा-
15 दन्य आगम आगमान्तरं । तदपि सविवादत्वान्न स्वीकार-मर्हति । त्वदागमस्याप्यपरापेक्षया सविवादत्वं समानमिति परित्या[158ᵃ]गे तुल्य एव न्यायः ।

अथ वा स्वैरिति । एकभेदव्यवस्थितैः सौत्रान्तिकाभिधर्मि-कवैनयिकैः[4] परस्परं सविवादत्वात्सूत्राभिधर्मविनयाः परित्याग-

---

[1] hjug pai yan lag
[2] log par rtogs pa srid pai phyir
[3] sde pa bzhi las bco-brgyad du gyes pa
[4] *Vainayika* wanting in Tibetan

मर्हन्ति। अस्ति ह्येकभेदावस्थितानां सौत्रान्तिकादीनामन्योन्य विवादः। परैरिति एकनिकायाश्रितभेदान्तरगतैः॥ एतेन यदुक्तं। गुरुपर्वक्रमेणाम्नायायातं बुद्धवचनमित्यादि। तदनेनैव प्रत्याख्यातं द्रष्टव्यं। न ह्यविस्मृतसंप्रदायानामन्योन्यस्य विवादो युक्तः। न च सर्वज्ञवचनेषु परस्पराहतिरस्ति। न च सूत्राभि- 5
धर्मविनयानां परस्परमेकवाक्यता भवतः संभवति। तत्कथं सूत्रादिसंस्यन्दनं[1] बुद्धवचनत्वे हेतुरुक्तं। तस्माद्यत्किंचिदेतत्॥

एवं समानपरिहारदूषणतामभिधाय पुनर्विशेषेण परस्याभ्युपगमे दूषणमुद्भावयन्नाह[2]।

शासनं भिक्षुतामूलं भिक्षुतैव च दुःस्थिता। 10

शासनमित्यादिनोपक्रमते। शासनं भगवता हिताहितस्वीकारपरिहारदेशनालक्षणं। तच्च भिक्षुतामूलं॥

अथ वा। आगमविप्रतिपत्तिमानुषङ्गिकीं परिसमाप्य यदुक्तं।

सत्यदर्शनतो मुक्तिः शून्यतादर्शनेन किं। 15

इति निराचिकीर्षन्नाह। शासनमित्यादि।

शासनमिदं कर्तव्यमिदं न कर्तव्यमित्याज्ञाप्रणयन। तद्भिक्षुतामूलं। भिक्षुभावो भिक्षुता सैव मूलं कन्दो यस्येति तत्त-

---

1 mdo-sde la sogs pa dan mthun pa

2 The Ms Burn 90 has here the following stanza [illegible] with the unmetrical readings [illegible]

थोक्तं। तत्प्रतिष्ठत्वात्। यथा किल दृढमूलो वृक्षश्चिरमव-
स्थितिमनुभवन् काण्डशाखाप्रशाखापत्त्रपुष्पफलच्छायादानसंता-
पाद्युपहरणसमर्थो भवति। तथा भगवतोऽपि शासनकल्पपादपो
भिक्षुताकन्दमासाद्य [1]स्मृत्युपस्थानसम्यक्प्रहाणर्द्धिपादेन्द्रियबल-
बोध्यङ्गध्यानारूप्यसमाधिसमापत्तिबोधिपाक्षिकार्य[159a]ष्टाङ्ग-
मार्गश्रामण्यफलसंपन्न ऋद्धिप्रातिहार्यादिभिः क्लेशोष्मसंतापाद्युप-
हरणपटुर्भवति। इति भिक्षुताया मूलसाधर्म्यं।

[2]तत्र संज्ञाभिक्षुः। प्रतिज्ञाभिक्षुः। भिक्षणशीलो भिक्षुः।
ज्ञाप्तिचतुर्थकर्मणोपसंपन्नो भिक्षुः[3]। भिन्नक्लेशो [4]भिक्षुरिति पञ्च-
प्रकारो भिक्षुः। तत्र चतुर्थपञ्चम द्वयमत्र। इतरेषां समा-
नाभिधानमात्राभिधेयत्वात्। तदुभयमपि शासनावस्थाननि-
दानमविरुद्धं। तत्रापि भिन्नक्लेशो भिक्षुः प्रधानं। तस्यैवेह
ग्रहणं। तद्भावो भिक्षुता॥

सा चार्यसत्यदर्शनतो न संगच्छत इत्याह। भिक्षुतैव
चेत्यादि।

भिक्षुता भिन्नक्लेशता। क्लेशप्रहाणमिति यावत्। यो वक्ष-
व्यान्तरं समुच्छिन्दन् हेतौ वर्तते। यस्मात्सा भिक्षुतैव दुःस्थिता।

---

[1] See *Dh.-s.* 43-50, 82; *Mvyut.* § 67, 68.

[2] See *Mvyut.* 270, 37-41, where the third bhikṣu is called *bhikṣuta iti bhikṣuḥ*.

[3] Ms. first hand °*karmodayasampanno*, second hand °*karmādyupa*. —Tib. las kyis bsñen par rdzogs pa.

[4] See *Abhidh. k. v.* (fol. 300 a): *bhinnakleśatvād bhikṣur ity arhan*.

शून्यतादर्शनमन्तरेणाममञ्जसा केवलमत्यदर्शनतो न युज्यते ।
तस्मात्सत्यदर्शनतो मुक्तिरिति न वक्तव्यमित्यभिप्रायः ॥ केषां
सा दुःस्थिता । सावलम्बनचित्तानामिति । सहावलम्बनेन वस्त्व-
भिनिवेशेन वर्तत इति सावलम्बनं । तत्तादृश चित्तं येषां
योगिनां ते तथोक्तास्तेषामिति । यतस्ते दुःखादिसत्य क्लेशवि- 5
संयोग च वस्तुत्वेनावलम्बन्त इति मत भवतां । अतस्तेषामुप-
लम्भदृष्टीनां दुःस्थिता । न निरालम्बनचित्तानां ॥

यत्पुनरुक्त । सत्यदर्शनतो मुक्तिरिति तद्विकल्पनीय । द्विधा
हि सत्यदर्शनं सभाव्यते । परमार्थतः संवृतितो वा । तद्यद्याद्यो
विकल्पः । तदा नास्माक विप्रतिपत्तिः । अस्मत्पक्षस्य प्रधान- 10
त्वात् । सर्वधर्माणामस्माभिः परमार्थतो दर्शनाभ्यु[प]गमात् ।
अथ द्वितीयः । तन्न सहामहे । युक्तिविरोधात् । न हि
संवृतिसत्यदर्शनान्मुक्तिरुत्पद्यते सर्वसत्त्वानां मुक्तिप्रसङ्गात् । तथा
हि युक्त्यागमाभ्यां [159] तत्त्वातत्त्वविवेचनात् । परमार्थसत्य-
मेवात्र क्लेशप्रहाणाथ निश्रीयते न संवृतिसत्यं । तच्च सर्वधर्मा- 15
नुपलम्भलक्षणं । न हि तदन्तरेण संक्लेशनिवृत्तिर्युज्यते । याव-
द्भावाभिनिवेशस्तावत्कल्पना न निवर्तते । यावच्च कल्पना ताव-
दखण्डितमहिमानः सक्लेशाश्चित्तसतानमध्यावसन्ति । यावच्च संक्ले-
शास्तावत्कर्मनिर्मितजन्मपरंपराप्रसवः । ससारोऽपि सुतरामव्या-
हतप्रसरः प्रवर्तते । तस्मात्सर्वधर्मशून्यतैवाविद्याप्रतिपक्षत्वात् । 20
संसारसंततिविच्छित्तिहेतुरवसीयते । न केवल सत्यदर्शनं ॥
इदमेवाचार्यपादैरुक्तं ।

मुक्तिस्तु शून्यतादृष्टेस्तदर्थाशेषभावना। इति॥[1]

यथार्थसत्यानि सत्यद्वयेऽन्तर्भवन्ति तथोपदर्शितमेव प्राक्। इत्यलमतिप्रसङ्गेन॥ अपि च।

5 **सावलम्बनचित्तानां निर्वाणमपि दुःस्थितं॥ ४५**

इति न केवलं भिक्षुता। किं तर्हि निर्वाणमपौत्यपेरर्थः। निर्वाणे क्लेशविसंयोगाख्निरुपधिशेष दुःस्थितं दुर्घटं॥ तत्र भिक्षुतायास्तावदसंगतिमाह।

क्लेशप्रहाणान्मुक्तिश्चेत्तदनन्तरमस्तु सा।

10 यदि चार्यसत्यदर्शनतः क्लेशाः प्रहीयन्ते। ततो विमुक्तिरुपजायते। तदा तदनन्तरं क्लेशप्रहाणात्समनन्तरमेवास्तु सा मुक्तिर्भवतु। भवत्वेव। को वै नामान्यथा ब्रूते। नैतदस्ति। कुत इत्याह।

दृष्टं च तेषु सामर्थ्यं निःक्लेशस्यापि कर्मणः॥ ४६

15 चो हेतौ। दृष्टं प्रतिपन्नं। आगमतः। यस्मात्। तेषु प्रहीणक्लेशेषु। आर्यमौद्गल्यायनार्याङ्गुलीमालप्रभृतिषु। सामर्थ्यं फलदानं प्रति शक्तिः। तस्मान्न तदनन्तरमेव मुक्तिरस्ति। कस्य

---

[1] Quoted *Subhāṣitasaṃgraha* (Muséon, IV p. 397 1.) Liberation by the view of vacuity. Every meditation has that view for aim.

सामर्थ्यं दृष्टं । कर्मणः शुभाशुभलक्षणस्य । किं पूर्वमनार्याव-
स्थायां क्लेशसहितस्य । नेत्याह । अक्लेशस्यापि । क्लेशसहका-
[160a] रिरहितस्यापि कर्मणः ॥ ननु च सत्यदर्शनादविद्यादि
प्रहीयते । तत्प्रहाणात्संस्कारादिप्रहाणक्रमेण तृष्णापि प्रहीयते ।
तृष्णाविपर्याससमती[1] च पुनर्भवोत्पत्तिनिमित्ते । ततश्च तयो- 5
रभावात्तुषरहितबीजस्येव[2] कर्मणः सद्भावेऽपि न किं चिद्वि-
हन्यत इति । तदुक्तं ।

मिथ्याज्ञानतदुद्भूततर्षसंचेतनावशात् ।
हीनस्थानगतिजन्म[3] त्यक्त्वा चैतन्न जायते[4] ॥ इति ।

अथ वा तृष्णैव केवला पुनर्भवकारणं समुदयाकारत्वात्[5] । 10
उक्तं हि भगवता[6] । तत्र कतमत्समुदयार्यसत्यं । येयं तृष्णा
पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी । यदुत
कामतृष्णा । भवतृष्णा । विभवतृष्णा चेति ॥ तदेवं यस्य तृष्णा
नास्ति तस्य प्रहीणसमुदयस्य कारणाभावान्न पुनर्जन्मसंभवः ।
इति पराभिप्रायमुत्थापयन्नाह । 15

तृष्णा तावदुपादानं नास्ति चेत्संप्रधार्यते ।

---

1 sred pa daṅ phyin ci log daṅ ldan pa ni = ?vatī [avidyā ?]

2 gun phrags med-pa'i sa bon bzhin du

3 So first hand.—Second hand: *jāter* or *gatau janma*.—Tib. dman pa'i gnas su skye ba yin = *hīnasthāne janma*

4 First hand: *te na cetanā jāyate*; second hand: *cetanā*.—Tib. de spaṅs pas ni skye-ba med = *tat (mithyājñānam) tyaktvā na jāyate*

5 So Ms.—kun hbyuṅ ba rgyu yin pa'i phyir = *samudayakāraṇatvāt*

6 The well known definition.—See *Mvyut.* § 244.120; *Itivuttaka* 58

अविद्याप्रहाणात्तृष्णा पुनर्भवोपादान कारण । तावन्नास्ति न विद्यते । चेद्यदि संप्रधार्यते निश्चीयते । तदा नैतद्वक्तव्य । यत उपलम्भदृष्टीनामविद्याप्रहाणमनुपपन्न । तद्भावात्तृष्णाप्रहाणस्याप्यभावात् ॥ भवतु वा । तथाप्यभिधीयते ।

5 **किमक्लिष्टापि तृष्णैषां नास्ति संमोहवत्सती ॥ ४७**

अक्लिष्टापि सती क्लेशाप्रसंयुक्तापि तृष्णा किमेषां भवद्योगिनां नास्ति न सम्भवति । कथमिव । संमोहवत् । अक्लिष्टाज्ञानवत् ॥ इत्थमपि तृष्णा निषेद्धुमशक्येत्याह ।

वेदनाप्रत्यया तृष्णा वेदनैषां च विद्यते ।

10 स्पर्शप्रत्यया वेदना । वेदनाप्रत्यया च तृष्णा । सा वेदना तृष्णाकारणमेषामस्ति । तृष्णा तु तत्कार्यमविकलेऽपि कारणे न समस्तीति कथमभिधातुं शक्यते । निरविद्यस्य[1] वेदनायामपि तृष्णा न भवतीति चेत् । न भावाभिनिवेशिनां निरवि-[165b]द्यत्वमेवासिद्धमित्युक्तं । ततो यदि[2] अक्लिष्टाऽज्ञानवन्ना-

15 भ्युपगम्यते तृष्णा तथापि शून्यतादर्शनमन्तरेण न्यायबला-दापतति ॥

---

[1] Tib. kha na ma tho ba med pa

[2] So Ms. *yadi akliṣṭa jñāna*°—ñon mongs-pa can ma-yin pai mi çes pa yod kyan smed pa khas mi len pa = *yadi akliṣṭa-ajñāna saty api nopagamyate, rena*

अयमत्र समुदायार्थः । यदा मुक्तसंतानेऽपि[1] कर्मणः फलदानसामर्थ्यमुपलभ्यते । तृष्णा च वेदनासद्भावे संभाव्यमाना । तदा क्लेशप्रहाणमपि संदिह्यमानं कथमिव विमुक्तौ निश्चयं कुर्यात् । तस्मान्न शून्यतामन्तरेण भिक्षुता सुस्थिता प्रतिभासत इति ॥ यदुक्तं ।

सावलम्बनचित्तानां निर्वाणमपि दुःस्थितं ।

इति तदुपपादयन्नाह ।

सालम्बनेन चित्तेन स्थातव्यं यत्र तत्र वा ॥ ४८

सालम्बनेन सोपलम्भेन चित्तेन स्थातव्यमासक्त्या । यत्र तत्र वा । यत्र तत्रासङ्गस्थानेषु । आर्यसत्यादिषु । तद्भावनाफलेषु वा । आसङ्गसंभावनायां[2] न पुनर्जन्मनिवृत्तिरिति । कथं पुनर्जन्मसंभावनायां[2] निर्वाणमपि न संदिग्धं स्यात् । तस्मादुक्तशून्यतैव निर्वाणकारणमुक्त्याह ।

विना शून्यतया चित्तं बद्धमुत्पद्यते पुनः ।
यथासंज्ञिसमापत्तौ भावयेत्तेन शून्यतां ॥ ४९

विना शून्यतया । शून्यतामन्तरेण चित्तं विज्ञानं सालम्बनं बद्धं संयतं । आलम्बनासङ्गपाशेन उत्पद्यते पुनः समाधिबलात्कियत्कालं निवृत्तमपि पुनरुत्पत्तिमद्भवति । क्व पुनरिदं दृष्टमित्याह । यथा असंज्ञिसमापत्ताविति । यथाऽसंज्ञिसमापत्ति

---

[1] rgyud grol-ba yin na

[2] Tib. zhen pa srid pas = *āsaṅgasaṃbhavāt*, *saṃbhāvanā* = bsgom pa

समापद्यमानानां तावत्कालं चित्तचैत्तविरोधेऽपि पुनस्तदुत्पत्तिः स्यात् तथान्यत्रापीत्यर्थः । उपलक्षणं चैतत् । यथा निरोधसमापत्तावित्यपि द्रष्टव्यं ॥ अथ वा । यथासंज्ञिसमापत्तिं समापद्यासंज्ञिषु देवेषूपपद्यमानानामनेककल्पशतं यावन्निरुद्धानामपि 5 तत्समापत्तिविपाकफलपरिसमाप्तौ चित्तचैत्तानां पुनरुत्पत्तिस्तथा ॥

यतः शून्यतामन्तरेण न भिक्षुता न निर्वाणमुपपद्यते । तत उभयार्थिनां शून्यतैव भावनीयेत्याह [161 ¹] भावये[दि]त्यादि । येन कारणेन विना शून्यतया चित्तं बद्धमुत्पद्यते 10 पुनः । तेन कारणेन निर्वाणाद्यर्थी शून्यतामेव भावयेत् । तद्भावना हि क्लेशप्रहाणं निर्वाणं चाधिगमयति । न केवलैव सत्यादिभावनेति यावत् । सालम्बनत्वात् ॥

यदुक्तमार्यवज्रच्छेदिकायां प्रज्ञापारमितायां[1] । तत्किं मन्यसे सुभूते अपि नु स्रोतआपन्नस्यैवं भवति मया स्रोतआपत्ति-15 फलं प्राप्तमिति ॥ सुभूतिराह । नो हीदं भगवंस्तत्कस्य हेतोर्न हि भगवन् किं[2] चिदापन्नस्तेनोच्यते स्रोतआपन्न इति । न रूपमापन्नो न शब्दान्न गन्धान्न रसान्न स्प्रष्टव्यानि[3] न धर्मानापन्नस्तेनोच्यते स्रोतआपन्न इति । सचेद्भगवन् स्रोतआपन्नस्यैवं भवेत् । मया स्रोतआपत्तिफलं प्राप्त-20 मिति । स एव तस्यात्मग्राहो भवेत्सत्त्वग्राहो जीवग्राहः ।

[1] Anecd. Oxon. I, 1, p. 25, l. 9.
[2] Printed text na kaṃ cid dharmam.
[3] Printed text na spraṣṭavyan.

पुद्गलग्राहो भवेत् । पेयालं[1] । तत्किं मन्यसे सुभूते ऽपि न्वर्हत एवं भवति मयार्हत्त्वं प्राप्तमिति ॥ सुभूतिराह । नो हीदं भगवन् । तत्कस्य हेतोः । न कश्चिद्धर्मो यो ऽर्हन्नाम । सचेद्भगवन्नर्हत एवं भवेत् । मयार्हत्त्वं प्राप्तमिति । स एव तस्यात्मग्राहो भवेत् । पेयालं । [2]भगवानाह । तस्मात्तर्हि सुभूते बोधिसत्त्वेन महासत्त्वेन एवमप्रतिष्ठितं चित्तमुत्पादयितव्यं [3]न क्वचित्प्रतिष्ठितं चित्तमुत्पादयितव्यं । न रूपप्रतिष्ठितं चित्तमुत्पादयितव्यं । न शब्दगन्धरसस्प्रष्टव्यप्रतिष्ठितं[4] चित्तमुत्पादयितव्यमिति ॥

तस्माच्छून्यतैव बोधिमार्ग इति स्थितं ॥

यत्सूत्रे ऽवतरेदित्यादि अनुष्टुप्त्रयं केन चित्प्रतिक्षिप्तमिव लक्ष्यते* । अपक्रमनिवेशितत्वात् ।

* These three *anustubhs* are given both in MSS and in the Tib translation

यत्सूत्रे ऽवतरेद्वाक्यं तच्चेद्बुद्धोक्तमिष्यते ।
महायानं भवत्सूत्रैः[5] प्रायस्तुल्यं न किं मतं ॥ ५०
एकेनागम्यमानेन[6] सकलं यदि दोषवत् ।
एकेन सूत्रतुल्येन किं न सर्वं जिनोदितं[7] ॥ ५१
महाकाश्यपमुख्यैस्तु यद्वाक्यं नावगाह्यते[8] ।
[9]तत्त्वयानवदुर्ज्ञत्वादग्राह्यं कः करिष्यति ॥ ५२

---

[1] p 26 1 5

[2] p 27, 1 4

[3] Printed text *yan na kvacit*

[4] Printed text *sprastavyadharma*

[5] Minaev and MSS *bhavet sutraih* —Tib *khyod kyi mdo dan mthsuns*

[6] *agamyamāna* = *ma rtogs*

[7] *mdo mthsuns gcig gis thams cad ni rgyal bas gsuns pa cis ma yin*

[8] So Minaev = *gtin-dpogs*—L[2] *ugrahyate* Dev 85 *vagahate*

[9] = tat tvayā an° = de ni khyod kyis ma rtogs pas

आगमविप्रतिपत्तिरस्य विचारस्य प्रस्तावः । शासनं भिक्षुतेत्यादिष्वाग[161b]मविवादात् । प्रक्रमान्तरत्वात् । पूर्वमेव वक्तुमुचितं । अनेनान्तरितस्य विवादस्य पुनरुपक्रमो ग्रन्थकारस्य प्रस्तावाकौशलं स्यात् । यत्प्रत्ययेत्यादिना[2] च
5 प्राक्तनवृत्तद्वयार्थस्याभिहितत्वात् । महाकाश्यपमुख्यैरित्यादिवचनस्याश्लीलत्वात् । ग्रन्थकाराप्रयुक्तमिति निश्चितं । तस्मात्प्रक्षेप एवायमिति ॥

स्यादेतत् । यथा सालम्बनचित्तस्यासङ्गसंभवात् । न मुक्तिः स्यात् । तथा शून्यतायामपि भयमुपजायते । तद्वरमुभयपरि-
10 हारेण संसार एव स्थितिर्युक्तेत्याह ।

[3]सक्तित्रासात्त्वनिर्मुक्त्या संसारे सिध्यति स्थितिः ।
मोहेन दुःखिनामर्थे शून्यताया इदं फलं ॥ ५३

सक्तिरासङ्गः । त्रासो भयं । शून्यताशब्दश्रवणात् । तदर्थापरिज्ञानात् । सक्तित्रासमिति । समाहारः[4] । तस्माद्भय-
15 पक्षपरिहारेण[5] संसारे त्रैधातुकस्वभावे सिध्यति स्थितिरव-

---

[1] See IX 45

[2] See IX 43

[3] Minaev *Çakti*°—Burn 90 supports the reading explained in the second part of the commentary (p 445, l 13) सक्तित्रासात्त्वनिर्मुक्त्या—So does the Tibetan translation *rmons pas sdug bsnal can-don du, chags dan hjigs mtha las grolbai, hkhor bar gnas-pa hgrub-hgyur-ba, hdi ni ston ñid hbras bu yin*

[4] zlas dbye bai bsdu ba yin no

[5] Second hand *pakṣaparihāreṇa*, but Tib *spans nas*

स्थानमुपजायते । तुशब्दः[1] पुनर्दोषपरिहारार्थं । इदं तु शून्यताभ्युपगमे[2] दूषणं स्यात् । साधारण[3] दूषणमिति यावत् । कुतः । अनिर्मुक्त्या । हेतौ तृतीया । मुक्तेरभावादित्यर्थः । कतमेषां दुःखिनां पञ्चगतिसंसारे जात्यादिदुःखपीड़ितानां सतां । कथ । अर्थे । अर्थविषये । मोहेन । अविद्यया । 5 आलम्बनासङ्गेनेति यावत् । अत. शून्यताया इदं फलं । यत्पुनरपि निवृत्य[4] संसारे ऽवस्थानं ॥

अयमभिप्रायः । यथा शून्यताव्यतिरेकेणोपलम्भदृष्टेर्न मुक्तिः स्यात् । तथा विषयासङ्गसुखचेताः सर्वधर्मशून्यताभयभीतकातरो वरं संसार एवावस्थानमिति मन्यमानो बालः 10 प्रशमसुखविमुखो विनिवृत्य[5] जात्यादिदुःखमनुभवन् । पुनस्तत्रैवावतिष्ठत इति किमनया प्रसाधितमिति ॥

अन्ये तु सक्तित्रासान्तनिर्मुक्त्येति पाठं मन्यमाना एवं व्याचक्षते । सक्तेर्हेतु[162a]त्वात् । सक्तिरासङ्गस्थानं । त्रासहेतुत्वात् । त्रासो भयस्थान । तावेवान्तौ सक्तित्रासान्तौ 15 शाश्वतोच्छेदान्तौ इत्यर्थः । तथा हि । शाश्वतदृष्टेरविसक्ति[6]च्छेददृष्टेश्च त्रासो जायते । तयोर्निर्मुक्त्या परित्यागेन पूर्व-

---

[1] *nai sgras —punar* is not translated

[2] From a second hand, in margin *çunyatānabhyupagame* but Tib *hdi ni ston-ñid khas-len pa la ñes par hgyur te*

[3] Skyon thun mon ama yin no ces-pai tha thsig go = *dusanam sadhāranam nasti*

[4] *mya nan-las-hdas nas = nirvrtya*

[5] Not translated

[6] = 'drster āsaktir The reading is doubtful *avisaktir* Tib *chags*

वक्तृतीया । यत्परमार्थविचारेण शाश्वतान्तविवर्जनं । संवृति-
सत्याभ्युपगमेन चोच्छेदान्तपरित्याग इति समारोपापवादान्त-
परिहारान्मध्यमा प्रतिपत्तिरियमुपदर्शिता भवति ॥ तथा च
किं समपद्यत इत्याह । संसारे सिध्यति स्थितिः । प्रज्ञया संसा-
5 रदोषालिप्तस्य करुणापरतन्त्रत्वात् संसारे सिध्यति निष्पद्यते
स्थितिरवस्थानं ॥ किमर्थं । दुःखिनामर्थे परदुःखदुःखितया
दुःखिनां संसारिणामर्थे । तद्दुःखसमुद्धरणाभिलाषात् ॥

ननु संसारिणो नाम परमार्थतो न सन्त्येव । तत्कथं
तदवस्थानमित्यत आह । मोहेन विपर्यासेन संवृत्या सत्त्वस्योपल-
10 म्भात् । एतच्च दुःखव्युपशमार्थं तु कार्यमोहो न वार्य इत्यत्र
पश्चाद्व्यक्तीकरिष्यते[1] ॥

तस्माच्छून्यताया इदं फलं । यत्करुणया संसारेऽवतिष्ठमानो
ऽपि शून्यतादर्शनात् संसारदोषैर्न लिप्यते । इदमप्रतिष्ठितनि-
र्वाणता शून्यतायाः फलं । शून्यतामन्तरेणास्याभावात् ॥
15 तस्मादासंसारं सत्त्वार्थमवस्थानमिच्छद्भिः शून्यतैव भावयितव्या ॥
एतत्सर्वमुपसंहारेणोपदर्शयन्नाह ।

तदेवं शून्यतापक्षे दूषणं नोपपद्यते ।

तदेतत् । एवमुक्तक्रमेण शून्यतापक्ष उक्तं दूषणं । शून्यतायां
चासात्संसारावस्थानलक्षणं नोपपद्यते । न सङ्गच्छते वक्ष्यमाण-
20 समाधानात् ॥ इति प्रथमपक्षे योजना[2] ॥ यत एव ।

---

[1] IX 77

[2] phyogs-la sbyar bai bya stc

तस्मान्निर्विचिकित्सेन भावनीयैव शून्यता ॥ ५४[1]

निर्गतो विचिकित्साया निर्विचिकित्सः निःसंदेहः। तेन सता भावनीयैवाभ्यसनीयैव शून्यता। सर्वधर्मनिःस्वभावता। [162b] अनुपलम्भयोगेन ॥

एतेन यदुक्तं न विनानेन मार्गेण[2] तदुपसंहृत भवति। 5
यत्पुनरुक्तं। शून्यतादर्शनेन किं। तत्र शून्यताया विशेषमाह।

क्लेशज्ञेयावृतितमःप्रतिपक्षो हि शून्यता।
शीघ्रं सर्वज्ञताकामो न भावयति तां कथं ॥ ५५

क्लेशा रागादयः। ज्ञेयं पञ्चविधं। आवृतिशब्दस्तूभयत्र 10
संबध्यते। क्लेशा एवावृतिः। ज्ञेयं चावृतिरावरणमिति[3]
विभज्य योजनीयं। ज्ञेयमेव समारोपितरूपत्वात्[4]। आवृतिः
सैव तम इव तमो[6] वस्तुतत्त्वावरणत्वात्। तस्य प्रतिपक्षः
प्रहाणहेतुः। हि यस्माच्छून्यता तस्माच्छीघ्रं त्वरितं। सर्वज्ञ-

---

1 Quoted *Subhaṣitasamgraha* Muséon, IV, p 396 20

2 Above IX 41

3 The two *āvaraṇas* are "well known" See *Dh* s CXV

4 Interpunction supported by Tibetan

6 *mun pa ltar mun pa yin te dnos poi de-kho-ñid la sgrib par byed pai phyir ro*

तायां बुद्धत्वे कामो ऽभिलाषो यस्यासौ तथोक्तः । सर्वज्ञतां कामयत इति वा । सर्वज्ञताकामः । न भावयति तां कथमिति[1] । तां शून्यतां कथ न भावयति नाभ्यस्यति । अपि तु महता यत्नेन भावयेदेव ॥

5 यदप्युक्तं । त्रासाच्छून्यतायां प्रवृत्तिर्न स्यात् । तदपि न युक्तमित्याह । यद्दुःखेत्यादि । द्वितीयपचे[2] पुनरित्थमवतारणीयं । अस्त्येव शून्यतायामेषो ऽनुग्रहः । केवलं प्रथमत एव तत्र संत्रासात्प्रवृत्तिर्न स्यादिति ॥ आह ।

यद्दुःखजननं वस्तु त्रासस्तस्मात्प्रजायतां ।
10 शून्यता दुःखशमनी ततः किं जायते भयं ॥ ५६

यद्वस्तु दुःखजननं पीडाकरं तस्माद्वस्तुनः सकाशात्त्रासः । भयं जायतां नाम । शून्यता पुनः प्रत्युत दुःखशमनी सर्वसांसारिकदुःखापहन्त्री । ततस्तस्याः शून्यतायाः । किं । किमित्यभयस्थाने कातरस्य जनस्य भयं जायते । सर्वगुणनिदानत्वा-
15 त्प्रेमैव तस्यामुचितमिति भावः ॥ [4]आत्मग्रहजनिताहंकारप्रसूतं हि भयमतत्त्वविदामुत्पद्यते । स चात्मा कल्पनासमारोपितमूर्तिरित्यहंकारो ऽपि तदभावादनास्पदं इत्युपदर्शयन्नाह ।

---

[1] MS *kathayati*

[2] See above 445 13 and 446 20

[3] See Subhās s , loc cit

[4] So MS *°graha°*

यतस्ततो वास्तु भयं यद्यहं नाम किं चन।
अहमेव न किं चिच्चेद्भयं कस्य भविष्यति॥ ५७[1]

यतस्ततो [वा] भयाभयस्थानात्। अस्तु भवतु भयं। कदा। यद्यहं नाम किं चन। अहमित्यहंप्रत्ययस्य [163a] विषयः कश्चित्। अहं नाम अहंप्रत्ययवेद्यं यत्किं चन किं चिद्वस्तु स्यात्। अव्यक्तनिर्देशाच्च पुंसकता। तदा युक्तमेव भयं। यदा पुनरहमेव न किं चिन्न वस्तु सद्विचार्यमाणमहं किं चिच्छब्दविकल्पमात्रादन्यत्। तदा भयं कस्याहमित्यस्याभावात्। भविष्यति। उत्पत्स्यते। इतोऽपि विचारात्त्रासो निवर्तत इति भावः। तदुक्तं। 10

नास्त्यहं[2] न भविष्यामि न मे ऽस्ति न भविष्यति।
इति बालस्य संत्रासः पण्डितस्य भयक्षयः॥ इति।

यथा चाहंप्रत्ययविषयस्य कल्पनामात्रोपदर्शितत्वात्। असत्त्वं तथा प्रतिपादयन्नाह।

दन्तकेशनखा नाहं नास्थि नाप्यस्मि शोणितं। 15
न शिंघानं न च श्लेष्मा न पूयं लसिकापि वा॥ ५८

[1] See Subhās. loc. cit.

[2] So Ms. nāsty

[3] Such is the reading of our Ms.—Minaev has siṃhāṇa. M. siṃghāṇa.—M. Vyut. § 189 (111) ciṅghāṇaka. See Gilgit... p. 200 l. 10, and P.W.

[4] M. Vyut. § 189 (110) lasikā

दन्तकेशनखा नाहं । प्रत्येकममी अहंप्रत्ययविषया न भवन्ति । नास्थि नाप्यस्मि शोणितं । अस्थि हट्टं[1] शोणितं रुधिरं । एतद्वयमपि नास्मि नाहं । शिंघानं न च श्लेष्मा न पूयं । शिंघानं नासिकाविवरनिर्यातः क्लेदः । श्लेष्मा मुखविवरविनिर्गतः । पूयं व्रणे पक्वरुधिरं । एतान्यपि नाहं भवन्ति । लसिकापि वा लसिका व्रणक्लेदः सापि नाहं ॥

नाहं वसा न च स्वेदो न मेदोऽन्त्राणि नाप्यहं ।
न चाहमन्त्रनिर्गुण्डी गूथमूत्रमहं न च ॥ ५९

नाहं वसा न च स्वेदो न मेद इति । वसा शरीरस्नेहः । स्वेदः प्रस्वेदः । मेदः चतुर्थो धातुः । इमान्यपि नाहं । अन्त्राणि नाप्यहमिति । अन्त्राणि प्रसिद्धानि तान्यपि नाहं । न चाहमन्त्रनिर्गुण्डी । अन्त्रनिर्गुण्डी[2] सूक्ष्मात्मिका । सापि नैवाहं । गूथमूत्रमहं न च । गूथ विष्ठा । एतदपि द्वयं नाहं भवति ।

नाहं मांसं न च स्नायु[3] नोष्मा वायुरहं न च ।
न च छिद्राण्यहं नापि षड्विज्ञानानि सर्वथा ॥ ६०

---

[1] Ms *haṭṭam* See P W *haṭṭa* and *haḍḍa*

[2] = zhag —Ms *sukṣmāttikā* Tibetan has suprasiddha

[3] Minaev and Mss *snāyuḥ*

नाहं मांसं न च स्नायु नोष्मा । स्नायुः[1] सिरा[2] । ऊष्मा शरीरतेजोधातुः । इमे ऽपि नाहं । वायुरहं न च । वायु-राश्वासप्रश्वासादिलक्षणः सो ऽपि नैवाहं । न च छिद्राणि चक्षुरादीनि । तान्यपि नाहं । नापि षड्विज्ञानानि सर्वथा । षट् चक्षुःश्रोत्रघ्राणजिह्वाकायमनोविज्ञानानि [163a] तान्यपि 5 नाहं भवन्ति ।

सर्वथा सर्वप्रकारेण । प्रत्येकं समुदितानि वा । तथा हि दन्तादिसमुदायात्मकमेव विचार्यमाणं शरीरमुपलभ्यते । तत्र प्रत्येकमहंप्रत्ययवेद्यं न भवति । प्रत्येकमहंप्रत्ययस्य तेष्वभावात् । न हि परेषामप्येकैकशः केशादयो ऽहंप्रत्ययवेद्या भवन्ति ॥ 10 समुदिता अपि त एव केवलाः पूर्ववत् । न च समुदितेषु तेषु कश्चिदेकः सम्भवति । तस्य प्रतिषेत्स्यमानत्वात् । नाप्यनेके समुदिता अप्येकप्रत्ययविषया भवितुमर्हन्ति न चानेकेष्वेकप्र-त्ययो ऽभ्रान्तो युक्तः । न च भ्रान्तिस्तत्त्वव्यवस्था । तस्मात्कल्प-नामात्रमेतदहमित्यर्थशून्यमाभातीति निश्चितं ॥ 15

उक्तं चैतदशुभभावनाप्रस्तावे शिक्षासमुच्चये[3] । सन्त्यस्मिन् काये केशा रोमा[णि] नखा दन्ता रजो मल[4] त्वक् मांसास्थि

---

1 Ms *snāyuḥ*

2 First hand *snāḥ*

3 See *Çikṣās.*, p. 209 l. 7 ff. The quotation is from the Ratnamegha—See M. Vyut. 189. *Kandaka Patha* (J.R.A.S. 1869, p. 311 326) to which Prof. Bendall refers.—On *antrabhājana*, *M. Vyut.* 52. Kern Manual, 54, above IX 43 and 79

4 Comp. *M. Vyut.* 189 (117 *antraguṇa*, 125 *karṇamala* 132, *mala*)

स्नायु[1] शिरा[2] वुक्का हृदयं प्लीहकः क्लोमकं । अन्त्राण्यन्त्र-
गुणाः । आमाशयः पक्वाशयः । औदरीयकं[4] । यकृत् पुरीष-
मश्रु स्वेदः खेटः शिङ्घानकं[5] वसा । लसिका । मज्जा मेदः
पित्तं श्लेष्मपूयशोणितं मस्तकलुङ्गं[6] प्रस्रावः । एषु च वस्तुषु
5 बोधिसत्त्व उपपरीक्षणजातीयो भवति ॥ एतत्पुनः पश्चात्काय-
स्मृत्युपस्थानपर्यन्तं निर्देक्ष्यामः ॥

एवं निर्विषय एवाहंप्रत्ययः ॥ स्यादेतद्यदि नाम केशादयो
ऽहंप्रत्ययवेद्या न भवन्ति । तथापि नायं निर्विषयः सिध्यति ।
यतो ऽन्तर्व्यापारपुरुषगोचर एवाहंप्रत्ययो ऽस्माभिरिष्यत इति
10 नैयायिकादयः । नैतदपि युक्तं । यस्मादहं गौरः कृशो दीर्घो
गच्छामीत्याद्याकारपरामर्शात्मक एवायमहंप्रत्ययः प्रतिभासते ।
न चात्मन एतद्रूपमिष्यते[7] परैः । न चान्याकारेण ज्ञानेनान्यस्य
ग्रहणं युक्तमतिप्रसङ्गात् । तथा हि । तद्वान् । इदमि[164a]द
तस्य लक्षणमुपवर्णयन्ति परे[8] । तत्र नैयायिकास्ताव-
15 न्नित्यं सर्वगतं प्रतिप्राणिभिन्नमचेतनं चेतनायोगात्तु चेतनं ।

---

[1] *Çikṣās.* has *snāyuḥ*, see p. 151 l. 1.

[2] So Ms.

[3] So Ms.—Read *vṛkkā* and see Prof. Bendall's note.—*M. Vyut.* has *plīhaḥ*.

[4] *lon ka* = intestines, entrails, guts.—*lon ge* in Tib. translation of *Çikṣās.* is a misprint.—*M. Vyut.* 189 (100).

[5] So Ms.

[6] *Çikṣās.* has *mastakam mastakalungam*.

[7] Reading uncertain, not supported by Tib. *hdi dag la bdag tu hdod pa ma-yin* "do not consider them as ātman."

[8] Ms. *lakṣaṇam upa°*.—Tib. *hdi ltar yan de dan ldan pa hdi ni hdi o zhe-mthsan ñid yin par*

सुखादिगुणाधारं[1] शुभाशुभकर्मकर्तारं । तत्फलोपभोक्तारं परलोकिन चात्मानमिच्छन्ति ॥ नैयायिकवद्वैशेषिका अपि । यदुक्तं ।

अन्ये पुनरिहात्मानमिच्छादीनां समाश्रयं ।
स्वतो ऽचिद्रूपमिच्छन्ति नित्य सर्वगत तथा ॥ 5
शुभाशुभानां कर्तारं कर्मणां तत्फलस्य च ।
भोक्तारं चेतनायोगाच्चेतनं न स्वरूपतः ॥ इति ।

जैमिनीयास्तु । व्यावृत्त्यनुगमात्मक बुद्धिरूपेण परिणामिनं चैतन्यरूपमात्मानमिच्छन्ति । तच्च चैतन्यं बुद्धिस्वभावं न च तस्य प्रवृत्तिनिवृत्ती भवतः । तस्योभयत्रानुगतरूपत्वात् । 10 तद्यथा सर्पस्य कुण्डलावस्थानिवृत्तावृजुत्वावस्थाप्रवृत्तौ च सर्पत्वस्योभयत्राप्यनुवृत्तिः ॥ यथोक्तं ।

व्यावृत्त्यनुगमात्मानमात्मानमपरे पुनः ।
चैतन्यरूपमिच्छन्ति चैतन्य बुद्धिलक्षण ॥
यथाहे॑ कुण्डलावस्था व्यपेति तदनन्तर । 15
सम्भवत्यार्जवावस्था सर्पत्वं न निवर्तते ॥
तथैव नित्यचैतन्यस्वभावस्यात्मनो ऽपि न ।
नि.शेषरूपविगमः सर्वस्यानुगमो ऽपि च ॥ इति ।

इति विशेषः । अन्यत्सर्वं पूर्ववत् ॥ जैनास्तु जैमिनीय-

---

[1] Ms *sukhādinavaguṇādhāram* Tib. bde ba la sogs pa yon tan rgyu-rten dan

वच्चैतन्यमात्मानमिच्छन्ति द्रव्यपर्यायरूपेण यथायोगमनुगमव्या-
वृत्त्यात्मकं ॥ तथा चोक्तं ।

जैमिनीया इव प्राङ्जैनाश्चिल्लक्षणान्तर ।
द्रव्यपर्यायरूपेण व्यावृत्त्यनुगमात्मक ॥

5 कापिलास्तु नित्य व्यापकं निर्गुणं स्वयमेव चैतन्यात्मकमा-
त्मानमिच्छन्ति । न तु बुद्धिसम्बन्धात् । बुद्धेः स्वयमचित्स्वभा-
वत्वात् । चैतन्यं पुरुषस्य स्वरूपमिति वचनात् । नापि स
कस्य चित्कार्यस्य कर्ता स्वयं तत्फलोपभोक्ता वा निष्क्रिय-
त्वात् । प्रकृतिरेव तत्कर्त्री तस्य । तत्फलोप[104]भोक्त्री च ।
10 विपर्यासवशादसौ स्वात्मनि तत्समारोपयति ॥ तथा हि ।
यदा पुरुषस्य शब्दादिविषयोपभोगाकारमौत्सुक्यमुपजायते ।
तदा प्रकृतिः[1] परिज्ञातपुरुषौत्सुक्या पुरुषेण युज्यते । ततः
शब्दादिसर्ग[2] करोति । शब्दादिषु श्रोत्रादिवृत्तिभिर्मनसा-
धिष्ठिताभिः परिगृहीतेषु विषयेषु बुद्धिरध्यवसाय करोति ।
15 ततो बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयत इति । एवं चैतन्यस्वरूप-
त्वान्निर्गुणत्वं । व्यापित्वान्निष्क्रियत्वमिति सांख्यपुरुषस्य विशेषः ॥
उक्तं च ।

चैतन्यमन्ये मन्यन्ते भिन्न बुद्धिस्वरूपतः ।
आत्मनश्च निज रूप चैतन्य कल्पयन्ति ते ॥

---

[1] rans bzhin [2] hbyin pa

प्रधानेनोपनीतं च फलं भुङ्क्ते स केवलं ।
कर्तृत्वं तस्य नैवास्ति प्रकृतेरेव तन्मतं ॥
प्रवर्तमानान् प्रकृतेरिमान् गुणां-
स्तमोवृतत्वाद्विपरीतचेतनः ।
अहं करोमीत्यबुधो हि मन्यते 5
तृणस्य कुब्जीकरणे ऽप्यनीश्वरः[1] ॥ इति ॥

उपनिषद्वादिनस्तु समस्तप्राणिसंतानान्तर्गतमेकमेव व्यापि नित्यं च ज्ञानमिच्छन्ति । तद्विवर्तरूपतया सकलमिदं क्षिति-जलपवनहुताशनादिकं जगदवभासते । तत्स्वभाव एव चात्मा । न बाह्यं किमप्यवयवि परमाण्वादिकं ग्राह्यं प्रमाणप्रसिद्धमस्ति ॥ 10
आह च ।

नित्यो ज्ञानविवर्तो ऽयं क्षितितेजोजलादिकः ।
आत्मा तदात्मकश्चेति संगिरन्ते ऽपरे पुनः ॥
ग्राह्यलक्षणसंयुक्तं न किंचिदिह विद्यते ।
विज्ञानपरिणामो ऽयं तस्मात्सर्वं परीक्ष्यते ॥ इति । 15

पुद्गलवादिनस्तु पुनरन्तश्चरतीर्थिकाः स्कन्धेभ्यस्तत्त्वान्यत्वा-भ्यामवाच्यं पुद्गलनामानमात्मानमिच्छन्ति । अन्यथा तीर्थिक-सिद्धान्ताभिनिवेशदर्शनं स्यात् ॥ आह चात्र ।

[1] = *Sāṃkhyakramadīpikā*, 43, with the reading *bhramanyate* (Garbe *Sāṃkhya Phil.* p. 308 and 69).—Prof. Garbe wrote to me in 1898: "I have never considered the *S. Kr. d.* so old that it could be quoted by an author of that antiquity (Prajñākaramati). Perhaps both, the quotation in your text and the corresponding passage in *S. Kr. d.* are taken from an original source which we don't know yet."

केचित्सौगतमन्या[1] अप्यात्मान प्रच[165]क्षते । इति ॥

[2]कथमात्मनो ऽहम्प्रत्ययविषयता स्यात् । स्वस्वरूपेण तत्रा-
प्रतिभासनात् । तत्कथमात्माहम्प्रत्ययतया प्रतिभासत इत्युच्यते ।
तस्माद्विकल्पमात्रमेतत् । निर्विषयमुत्पद्यत इति स्थित ॥

5 संप्रति चित्स्वभावात्मवादिनः सांख्यादयः । षड्विज्ञानाना-
मात्मनिषेधमसहिष्णवः प्राहुः । शब्दादिज्ञानं चिदात्मकमा-
त्मैवास्माभिरभिधीयते । तत्कथमस्यात्मताप्रतिषेध उच्यते ॥
इति पराभिप्रायमाकलय्य सिद्धान्तवादी प्रसङ्गमासञ्जयन्नाह ।

शब्दज्ञानं यदि तदा शब्दो गृह्येत सर्वदा[3] ।

10 ननु यदि शब्दज्ञानात्मक आत्मा तस्य च नित्यत्वाच्छब्दज्ञान
नित्यं स्यात् । तदा शब्दो ऽपि सदा[3] नित्यमेव तद्भावाभाव-
कालयोर्ग्रहीतव्यः स्यात् । शब्दग्रहणस्वभावस्य तस्य तत्सदसत्ता-
काले सर्वदानुवर्तनात् । अन्यथा नित्यत्वमेव तस्य हीयेत ॥
भवत्येवमेवेति चेत् । आह ।

15 **ज्ञेयं विना तु किं वेत्ति येन ज्ञानं निरुच्यते ॥ ६४**

ज्ञानमेव नित्यमुपस्थितं । शब्दस्य तु कादाचित्कत्वान्न

---

[1] Tib = *kecit saugata anye* = bdei gçegs pa hga kha cig ni gzhan yin bdag-tu rab brjod byed

[2] Tib *de phyir ji ltar* = *tasmāt katham, tat katham*

[3] The Sanskrit text has *sarvada* and the Tib *[illegible]* — Tib Commentary has *[illegible]*

सर्वदा सत्ताभिव्यक्तिः। ततश्च तदसत्ताकाले ज्ञेयं विना विषयमन्तरेण किं वेत्ति किं जानाति तज्ज्ञानं। तुशब्दो ऽसत्ताकालप्रश्नविशेषे वर्तते। येन ज्ञेयेन शून्यमपि ज्ञान निरुच्यते। अभिधीयते। ज्ञेयं ज्ञानातीति ज्ञानमाख्यायते। तदभावात्कथ ज्ञानमित्याशयः। एतदेवाह। 5

अजानानं यदि ज्ञानं काष्ठं ज्ञानं प्रसज्यते।

यदपि विषयं न जानाति तदपि यदि ज्ञानमुच्यते। तदा काष्ठमज्ञानस्वभावं ज्ञानं प्रसज्यते। न हि तेन किं चिदपराद्धं येन न विज्ञानं स्यात्। न चैवं। तस्माद्विषयपरिज्ञानाभावाद्यथा काष्ठं ज्ञान न भवति तथान्यदपि न स्यात्। 10 इत्याह।

तेनासंनिहितज्ञेयं ज्ञानं नास्तीति निश्चयः॥ ६२

येन निर्विषयं न ज्ञान तेन कारणेन। असंनिहितज्ञेय। असंनिहितमयोग्यदेशस्थ[1] ज्ञेय ग्राह्यो विषयो यस्य तत्तथोक्त ज्ञान नास्ति न विद्यत इ[105b]ति। निश्चय एकान्त एष 15 सापेक्षत्वात्।

स्यादेतत्। शब्दस्य सदाविद्यमानत्वात्[2]। नासंनिहितविषयं शब्दज्ञान। अग्रहणं तु कदा चित्कादाचित्काभिव्यक्ति-

[1] See *Nyāyabindu*

[2] Sgra rtag par yod pa ma yin pa'i phyir = [illegible] sadā a

त्वादिति[1] नोक्तदोषप्रसङ्गः । नैतदस्ति । यतो यदस्य ज्ञानस्य परिच्छेद्यं रूप व्यक्तमित्युच्यते । तस्य सदासंनिहितविषयतया[2] ग्राहकमज्ञानमभिधीयते[3] । शब्दस्य तु सदा सत्त्वमसत्त्वं वा न विवचितं । ज्ञानं तु कदा चिद्ग्राहकमित्येतावतैव साध्यसिद्धेः ।
5 तस्मादसंनिहितज्ञेयमित्यनेन ज्ञानस्यैवाग्राहकत्वं साध्यते । येन रूपेण ज्ञानस्य ग्राह्यो विषयस्तस्य न सर्वदा सनिधानमस्तीति कृत्वा इति कथं नोक्तदोषप्रसङ्गः । शब्दस्य यथा सर्वदा सत्त्वं नास्ति तद्विस्तरभयान्नोच्यते ॥

अपि च । यदि शब्दज्ञानमेवात्मा तदा तद्ग्रहणात्मकत्वा-
10 त्तस्य रूपग्रहणं न स्यात् । नैतदस्ति । यतस्तदेव रूपग्राहकमिष्यत इति चेदचाह । तदेवेत्यादि ।

तदेव रूपं जानाति तदा किं न शृणोत्यपि ।

तदेव शब्दज्ञानमेव यदि रूपं जानातीति मतं । तदा किं न शृणोत्यपि । तदा रूपग्रहणकाले किमिति न शृणो-
15 त्यपि । शब्दमपि किं न गृह्णाति । शब्दज्ञानत्वात् । अथ गृह्णात्येव । यदि संनिहित स्यात् । केवलमसंनिधानात् । न दोष इति । परस्योत्तरमाशङ्क्याह । शब्दस्येत्यादि ।

---

1 Kādācitkatva = res-hga yin pa

2 = sadā a°

3 MS grāhakam jñānam (Virāma after m) — hdzin-par byed pa çes-pa ma yin par brjod-par byao — I print according to the Tibetan, but I have little doubt that we must read *agrāhakam jñ°* — See below 1 5

शब्दस्यासंनिधानाच्चेत्ततस्तज्ज्ञानमप्यसत् ॥ ६३

शब्दस्य विषयतामापन्नस्यासंनिधानाद्योग्यदेशात् । ग्रहणं [न] स्याद्यदि[1] एवमभिधीयते । ततस्तत्[2] ज्ञानमप्यसत् । तत्तस्मात्तर्हि शब्दस्यासंनिधानात्तत् ज्ञानमपि शब्दज्ञानं । असदविद्यमानं । शब्दज्ञानमेव तर्हि तन्न भवतीत्यर्थः ॥ 5

किं च यदि शब्दज्ञानं तदा रूपग्रहणात्मकं तन्न युज्यत इत्याह । शब्दग्रहणेत्यादि ।

शब्दग्रहणरूपं यत्तद्रूपग्रहणं कथं ।

शब्दस्य ग्रहणरूपं शब्दस्य ग्रहणस्वभावं शब्दग्राहकमिति यावत् । यत् ज्ञानं तद्रूपग्रहणं रूपग्रहणात्मकं । कथं । न 10 कथं चिदपि स्यात् । एकस्य निरंशस्य रूपद्वयायोगात् ॥ ननु यथा कश्चि[166a][3]देक एव कस्य चिदपेक्षया पिता कस्य चिदपेक्षया च स एव पुत्रः स्यात् । तथा प्रकृते ऽपि रूपद्वय-मेकस्य भविष्यतीत्याह । एक. पितेत्यादि ।

एकः पिता च पुत्रश्च कल्प्यते न तु तत्त्वतः ॥ ६४ 15

एक पिता एव जनकः पुत्रश्च जन्यः स एवेति कल्प्यते ।

---

1 So MS —Tib gives no help

2 So MS

3 The fol 166 is wanting in the Nep MS the fol 167 is numbered (figures and letter numerals) 166

स तु तदपेक्षया कल्पनया व्यवस्थाप्यते । न तु तत्त्वतः । न पुनः परमार्थतः । एक एव स्वभाव उभयात्मकः कल्पनासमारोपित-व्यपदेशात् । [भिन्नरूपत्वात्[1]] पुनरेक एव तथा नानाभिधाने[न] नैवाभिधीयते । उभयवास्तवरूपद्वयमेकस्य घटनीयं । तच्च कथ
5 चिदपि न सङ्गच्छते । रूपद्वयव्यतिभिन्नतया वस्तुनो ऽपि द्वित्वप्रसङ्गात् । तस्माद्यथा वास्तवमेकस्य द्विरूपत्व तन्न दृष्टान्त-धर्मिण्यस्ति । यच्चास्ति काल्पनिकं तत्प्रकृतानुपयोगीति यत्किं चिदेतत् ॥

इतो ऽपि न पारमार्थिको ऽयं व्यपदेश इत्याह सत्त्वं रज
10 इत्यादि ।

सत्त्वं रजस्तमो वापि न पुत्रो न पिता यतः ।

एतच्चावश्यं त्वयापि स्वीकर्तव्य । सांख्यमते हि त्रिगुणमेकं जगत्ततः सत्त्वं रजस्तमो वापीति समुदायः समुच्चयार्थः । यतो यस्मादेते गुणाः स्वस्वभावावस्थिताः प्रत्येक समुदिता वा
15 तस्मान्न पिता न पुत्रः परमार्थतः । सर्वदा गुणा एव केवलाः सन्ति । [2]स्वयमथ[2] पुत्रावस्थायां ये सत्त्वरजस्तमोलक्षणा गुणास्त एव प्राप्तजनकभावा अपि तेन पूर्वापरकालयोरवि[शि]ष्ट-स्वभावा एव[3] । ते ततस्तदपेक्ष्य पिता पुत्रश्चाभिधीयन्ते। न तु

---

[1] rtogs pai sgro btags pa yin te gzugs tha-dad-pas yan gcig ñid de bzhin-du sgra sna tshogs par sgra-sna tshogs kyis brjod par-bya ba min-no

[2] [2] So MS —don ni hdi yin-te = *ayam arthah*

[3] khyad par-med pai dnos-po ñid yin-te

तत्र कश्चिद्विशेषः । ततः काल्पनिक एवायं व्यवहारः ॥ यदि च रूपग्रहणकाले ऽपि शब्दग्रहणात्मक[मेक]मेव तत् ज्ञानं[1] तदा तत्स्वभावमुपलभ्येत । न चोपलभ्यते । ततो न तद्ग्रहणात्मकमित्याह । शब्दग्रहणेत्यादि ।

शब्दग्रहणयुक्तस्तु स्वभावस्तस्य नेष्यते ॥ ६५ 5

शब्दग्रहणेन युक्तः संबद्धः । तु शब्दो विशेषाभिधाने । स्वभावस्तस्य रूपग्राहकस्य ज्ञानस्य नेष्यते न प्रतीयते । अतस्तदा तस्य शब्दग्रहणात्मता नास्तीति निश्चीयते ॥

स्यादेतत् । यदि नाम न प्रतीयते तथापि तदेव तत्[2] ॥ [166a] कथं तर्हि रूपग्रहणमित्याह । तदेवेत्यादि । 10

तदेवान्येन रूपेण नटवत्सोऽप्यशाश्वतः ।

तदेव शब्दज्ञानं । अन्येन रूपेण स्वभावेन रूपग्रहणात्मकेन रूपं गृह्णातीति शेषः । कथमिव तस्यानुरूपता । नटवत् । यथा नाट्यसमये रङ्गभूमिगतो नटः । एक एव नानारूपेणावतरति । तथा प्रकृते ऽपीति न दोषः ॥ अत्राह । सो 15 ऽप्यशाश्वत इति । अनित्यः पूर्वस्वभावपरित्यागेन रूपान्तरमाविशति । न च पूर्वापरकालयोरेकस्वभाव एव नटो नाना-

[1] ces pa de gcig ñid yin na
[2] de lta na yan de ñid de yin no zhe na de ltar na yi ltar

रूपसंबन्धात् । अन्यथा तस्यापि रूपद्वयमेकदा चेति[1] भाषेत । इति साध्यविकलो दृष्टान्तः ।

अथापि स्यात् । भावः स एव । स्वभाव. पुनरस्यापरापर उत्पद्यते निरुध्यते च । ततो ऽयमदोष इत्यत्राह । स एवान्येत्यादि ।

स एवान्यस्वभावश्चेदपूर्वेयं तदेकता ॥ ६६

स एवात्मा नटो वा । अन्यस्वभावो ऽपरस्वभावः । चेदुच्यते । तदा ऽपूर्वेयं तदेकता । अपूर्वेयमदृष्टपूर्वेयमीदृशी तदेकता । तस्य भावस्यापरस्वभावोत्पत्तावप्येकता । अभिन्नात्मता । तथा हि स एवेति तत्त्वमाख्यायते । पुनरन्यस्वभाव इति तस्यैवान्यत्व । न चैतत्परस्परविरुद्धधर्मद्वयमेकस्य युक्तं । न हि भावो नामान्य एव स्वभावात् । येन तस्योत्पादनिरोधयोरपि भावस्य तौ न स्याताम् । नापि तदभिन्नस्य स्वभावस्योत्पादनिरोधयोर्भावस्य तादवस्थ्यं युक्तमभेदाभावप्रसङ्गात्[2] । भेदे वा संबन्धासिद्धिरिति भावः ॥

स्यादेतत् । भवत्वेवैष प्रसङ्गो यदि रूपद्वयमस्यात्मनः सत्यं स्यात् । किं तर्हि निजमस्य रूपमपहायापरं रूपमतात्त्विकं

---

[1] So MS —Tib gives no help gñis po yan gcig tu sems la (?) snan-bar hgyur ro Possibly *sems-la* = *iti*

[2] So Nep (first hand) and Tib *tha-dad pa ma yin pa med par thal bar hgyur bai phyir* —Second hand *yuktam bheda°*

तेन नोक्तदोषप्रसङ्गः । इत्याशयमाशङ्कयन्नाह । अन्यद्रूपमित्यादि ।

अन्यद्रूपमसत्यं चेन्निजं तद्रूपमुच्यतां ।

अन्यद्रूपं तद्विषयोपाधिकं स्फटिकोपलस्येव असत्यमस्वाभाविकं । इति चेद्यदि । तर्हि निजं तद्रूपमुच्यतां । निजं स्वाभाविकं । तस्यात्मनो रूपं तत्त्वं । उच्यतां । अस्त्येवान्यद्रूपं तस्य किं तत् । ज्ञानता चेत् ।

ज्ञानता चेत्ततः सर्वपुंसामैक्यं प्रसज्यते ॥ ६७

ज्ञानात्मतैव तस्य पूर्वापरकाला[166a]नुगामिनी । निजं रूपं किमन्यद्वक्तव्यं । [1]आपद्यते । वस्तुतो भेदे ऽपि विशेषाभावात् ॥

इत्थं च पुनरिदमतिप्रसज्यत इत्याह चेतनेत्यादि ।

---

[1] There is no lacuna in Nep MS.—I have no information concerning the Maith MS.—Tib has gzhan ni ci zhig brjod par-bya dei gzugs kyis sna ma dan phyi ma dag tu gzugs gzhan dan hbrel ba-na yan cel bzhin du hdi gcig-pu yin no zhes gal-te zer na de-ltar na skyes-bu kun gcig tu thal bar hgyur te de ltar na de çes-pa-ñid-du thun mon-bai chos yin pas-so dper na sna-ma dan phyi-mai dus kyi sgra dan gzugs kyi çes pa-dag dei rnam-pa tha-dad pas tha-dad pa yin na yan gcig yin pa de-ltar na sems can kun-te srog chags-kyi rgyud du gtogs-pa rnams bdag-gcig tu thal bar hgyur-ba hthob par hgyur-la dnos-po tha dad pa yan khyad par med pai-phyir ro = *kim anyad vaktavyam*, tadrupena pūrva-apara anya-rūpa-sambandhe pi sphatikavad yady eko 'stity ucyate, evam sarvapumsām aikyam prasajyate, evam jñānatvena tat sadhāranarūpatvāt, tadyathā pūrvaparakālikayoh çabdarūpajñānayor bhinnākāratvad bhinnayor apy ekatvam eva tathā sarvasattvānām prani-gati-gatānam ekātmatā prasajyate, *āpadyate*

5

10

चेतनाचेतने चैक्यं तयोर्येनास्तिता समा ।

यदि वावान्तरं[1] भेदनिबन्धनं विशेषमपास्य किं[2]चिदाकारकमाश्रित्यैकत्वमुच्यते । तदा चेतना पुरुषधर्मः । अचेतना प्रकृत्यादिधर्मः । चकारो दोषान्तरसमुच्चये । ते ऽप्येकमभिन्न
5 वस्तु स्यातां । कथ । तयोश्चेतनाचेतनयोर्येन कारणेन । अस्तिता समा । सापि भावानां निज रूप । समा द्वयोरपि तुल्या ॥

[3]ननु चात्रापि सादृश्यनिबन्धनमिष्यत एवैकत्वं वस्तुभेदे ऽपि । ततो ऽयमिष्टप्रसाधनाद्दोष इत्याह । विशेषश्चेत्यादि ।

विशेषश्च यदा मिथ्या कः सादृश्याश्रयस्तदा ॥ ६८

10 दूषणान्तरद्योतने चकारः । विशेषो भेदः । सर्वभावानामनियमेन यदा मिथ्या ऽसत्य । निजमेव रूप सत्यं । तदा कः सादृश्याश्रयः स्यात् । किमाश्रित्य[4] सादृश्य व्यवस्थाप्यते । विशेषसद्भावे हि किंचिन्मात्रसाधर्म्येण सादृश्यं स्यात् । विशेषाभावे च तदेव तत्स्यान्न सदृशं । न हि गोगवययोर्गोविशेषमननुभवन् । न गवयो गोसदृशो भवेदपि तु गौरेव
15

---

[1] *yadi vā av°*—bar-skabs-kyi

[2] rnam pa cun-zhig la brten nas = kam cid akāram —ākārakam ? ka from a second hand

[3] ci ste hdi la yin dnos po tha dad na yan hdra bai rgyu mthsan gyis gcig pa-ñid yin te de lta bas na = *nanv atrāpi vastubhede pi sādṛśyanibandhanenaikatvam asti tata*

[4] Ms °rtya

स्यात्[1]। अतो विशेष एव सादृश्याश्रयः। स च यदा पारमार्थिको न भवति। तदा कः सादृश्यस्य समानाकारतायाः पुमामन्यस्य वा आश्रयो निबन्धनं वा भवेत्। नैव कश्चिदित्यर्थः। अतो वस्तुत एवैकत्वमापतितं भवतो न सादृश्यकृतं[2]। तत्कथं सिद्धसाधनादोष इत्युच्यते॥ 5

एवं कापिलजैमिनीयपरिकल्पितस्य चित्स्वभावस्यात्मनः सत्त्वमसिद्धं। उपनिषदादिपरिकल्पितेऽपि यथासम्भवं दूषणं यदिदमभिधेयमिति॥

सांप्रतमचेतनस्य नैयायिकादिपरिकल्पितस्यात्मनः सद्व्यवहारप्रतिषेधायाह। अचेतनश्चेत्यादि। 10

अचेतनश्च नैवाहमाचैतन्यात्पटादिवत्।

चेतनस्तावदुक्तक्रमेणात्मा न युज्यते। अचेतनोऽपि न वाहमात्मा युक्त इति चकारार्थः। कुतः। आचै[167 B]तन्यात्। चैतन्याभावात्। न विद्यते चेतनाऽस्येत्यचेतनः। तस्य भाव आचैतन्यं। उभयपदवृद्धिः। पारलौकिकादिवत्। तस्मात्। 15 अचेतनत्वादित्यर्थः। कथमिव पटादिवत्। यथा पटघटपर्वतादयश्चैतन्यविरहादात्मा न भवन्ति। तथाभिमतोऽपि[4]

---

1 So Ms.—According to the Tib. *gogaranayor visesanamubhave na*.

2 Hdra bas byis pa mi ma yin no.

3 So Ms. Sems med kyan bdag ma yin par bstan-pai phyir ... [illegible] ... te mi rigs so zhes pa ni an gi sgra don te.

4 de bzhin du mnon par hdod pa kyan

कर्मकर्तृत्वादेरस्याभ्युपगमात् । अन्यथा न किंचित्प्रयोजनं तेन । न चाचेतनस्य तद्युक्तं । यथा पटादेः ॥

यदि नाम स्वयममावचेतनस्तथापि बुद्ध्या[1] चेतना चेतयते । तेनायमदोष इति पराभिप्रायं संभावयन्नाह । अथ ज्ञ

5 इत्यादि ।

अथ ज्ञश्चेतनायोगादज्ञो नष्टः प्रसज्यते ॥ ६८

अथेति पृच्छायां । अथायमात्मा चेतनायोगाद्बुद्धिसमवायात् । स्वयमचेतनोऽपि ज्ञो भवति । जानातीति ज्ञ इति कप्रत्ययान्तस्य रूपं[2] । एवमुपगम्यमानेऽज्ञो नष्टः प्रसज्यते । यदा

10 तर्हि मदमूर्छावस्थायां चेतनानिवृत्तावयमात्माऽज्ञो न किंचिदपि जानाति । तदा नष्टः प्राक्तनचैतन्यसंबद्धस्वभावपरित्यागाद्विनष्टः प्रसज्यते ॥

चैतन्यसंबन्धासंबन्धकालयोरेकस्वभावत्वान्नायं दोष इति परमाशङ्कयन्नाह । अथाविकृत इत्यादि ।

15 ## अथाविकृत एवात्मा चैतन्येनास्य किं कृतं ।

अथ चैतन्योत्पादनिरोधयोरविकृत एव । अनुत्पन्नानिरुद्धस्वभाव एवात्मा । यद्येवं तर्हि चैतन्येनास्य किं कृतं ।

---

[1] *buddhyā*, second hand —blo i sems kyis sems dan ldan par byed de

[2] *Pan* 3 1 135

अचेतनस्य सर्वकालमविकृतस्य सतः। अस्यात्मनः। चैतन्येन बुद्धिसमवायेन किं कृतं। किमतिशयाधानमनुष्ठित। न किं चित्। बुद्धिसमवाये पि तथैवाप्रच्युतप्राच्यस्वभावस्यावस्थाना-दचेतन एवात्मा॥

तथा च सति किमनुष्ठितं भवद्भिरित्याह। 5

अज्ञस्य निष्क्रियस्यैवमाकाशस्यात्मता मता॥ ७०

अज्ञस्य कि चिदपि हिताहित ज्ञातुमशक्तस्य। निष्क्रियस्य। निर्गतो वहिर्भूतः क्रियाया इति निष्क्रियः। तस्य सर्वप्रतीकार-रहितस्यानाधेयातिशयतयाऽसंस्कर्तव्यस्य। अथ वा सर्वकर्मणि [167b] शक्तिविकलस्य गमनादिक्रियाशून्यस्य वा आकाशस्य 10 प्रकृतानुपयोगित्वादाकाशकल्पस्य। एवं सत्यात्मता आत्म-स्वभावताव्यवस्था व्यवस्थापिता॥ एतच्च स्वमतेनोदाहरण। यथा निःस्वभावतया सर्वक्रियाशून्य प्रज्ञप्तिसन्मात्रमाकाशं तथात्मापीत्यर्थः। परमतेनापि वा। यथा च न कर्मकर्त्रादिरूप-माकाशमचेतनत्वादक्रियत्वाच्च। तथात्मापीति भावः॥ 15

इदानीं पुनरन्यथात्मप्रतिषेधवाधक परमतेनोत्थापयन्नाह। न कर्मेत्यादि।

न कर्मफलसंवन्धो युक्तश्चेदात्मना विना।

यदि न कश्चिदेकः परलोकी स्यात्। तदा तेनात्मना

परलोकगामिना विनाऽन्तरेण कर्मफलसंबन्धोऽयुक्तः[1] । कर्म शुभाशुभं । फलं च तस्यैवेष्टानिष्टलक्षणं । तयोः संबन्धः । कर्मणः कृतस्य फलेन वा संबन्धः । येनैव कृतं कर्म तस्यैव तत्फलप्रतिलम्भो नान्यस्येति । न युक्तो न घटत इष्यते च
5 परलोके कर्मफलसंबन्धः । तत्र च सौगतानामप्यविवादः ।

तथा च सूत्रे[2] । अनेनैव कृतं कर्म कोऽन्यः प्रत्यनुभविष्यति । न हि भिक्षवः कृतोपचितानि[3] कर्माणि पृथिवीधातौ विपच्यन्ते । नाब्धातौ । न तेजोधातौ । न वायुधातौ । उपात्तेष्वेव[4] स्कन्धधात्वायतनेष्विति विस्तरः ।

10 उक्तं च ।

न प्रणश्यन्ति कर्माणि कल्पकोटिशतैरपि ।

सामग्रीं प्राप्य कालं च फलन्ति खलु देहिनां । इति ॥[5]

ततः कर्मफलसंबन्धोऽनिवारितो भवतामपि । तस्मादवश्यमङ्गीकर्तव्य आत्मा । अन्यथा सर्वमेतदसंगतं स्यात् ॥

15 कथमसत्यात्मनि कर्मफलसंबन्धो घटत इत्याह । कर्म कृत्वेत्यादि ।

---

[1] gal te hjig rten pha-rol-po hga yan med par hgyur na dei tshe bdag de hjig rten pha rol tu hgro-ba yod pa ma yin zhin med-na las hbras hbrel par mi rigs so = *yadi na kaścit paralokaḥ syāt tadā sa ātmā paralokagāmī na syāt [tad]abhāvāt karmaphalasambandho na yuktaḥ syāt*.—Observe that *ekaḥ* (na kaścid ekaḥ) is not translated. The original reading was *yadi na kaścid ekaḥ paralokagāmī*; from the wrong reading *paraloka* follows the total alteration of the sentence.

[2] See *Divyāvadāna* p. 54, and elsewhere.

[3] On the import of the word *upacita*, see *Madh. vṛtti* 303, n. 4.

[4] See ibidem 285 n. 3.

[5] See *Divya* 501, 23; 582, 1, etc. *Abhidh. k. [illegible]*, Soc. Asiat. fol. 2[illegible]1[illegible]

कर्म कृत्वा विनष्टे हि फलं कस्य भविष्यति ॥ ७१

हि यस्मात्[1] कर्म कृत्वा कर्मेत्याद्य शुभाशुभलक्षणं । विनष्टे निरुद्धे सति कर्मकर्तरि । फलं कस्य भविष्यति । आत्मनोऽसत्त्वे परलोकगामिनः कस्य चिदभावात् । येन चित्त-क्षणेन कृत कर्म तस्य क्षणिकतया [168a] तत्कर्मक्रियाकाले 5 निवृत्तत्वात् । कृतस्य कर्मण फलं सुगतौ दुर्गतौ वा सुख-दुःखात्मक कस्य भविष्यति । उत्पत्स्यते । नैव कस्य चित्स्यात् । परलोके च कृतकर्मण एव फलयोगिनो[2] ऽन्यस्य कस्य चिदुत्पा-दात् । इति कृतविप्रणाशो ऽकृताभ्यागमश्च स्यात्[3] ॥ उपलक्षणं चैतत् । स्मृतिप्रत्यभिज्ञानसंशयनिर्णयस्वयंनिहितप्रत्यनुमार्गण- 10 दृष्टार्थकुतूहलविरमणकार्यकारणभावतदधिगतप्रमाणबन्धमोक्षा-दयोऽपि न स्युः । चेद्यदि मतं तत्र दुक्तमित्याह । द्वयोरित्यादि ।

द्वयोरप्यावयोः सिद्धे भिन्नाधारे क्रियाफले ।

द्वयोरप्यावयो । आत्मवादिनो भवतो मम च नैरात्म्य-वादिन. । सिद्धे निश्चिते । के सिद्धे आह । भिन्नाधारे क्रियाफले । 15 कर्मक्रिया अस्मिन् भवे । तस्याः फल परलोके । ते भिन्नाधारे । नानाधिकरणे सिद्धे । तथा हि । न येनैव शरीरेण तस्मिन्

[1] mi sgras mi gan gi phyir

[2] hbras-bu dan ldan pa

[3] byas pa chud za źin ma-byas pa dan hphrad par hgyur.—See *Syādvāda mañjarī*, § 18 (p. 151). *Sarvadarśana* 29. 13 (Cowell's translation of this passage and my own translation are wrong.)

जन्मनि कर्म करोति तेनैव प्रेत्य फलमुपभुङ्क्ते । अतोऽन्यदेव कर्मकर्तृ तदन्यच्च फलोपभोक्तृ । अतो भिन्नाधारे क्रियाफले भवतः । अत्र चाविप्रतिपत्तिरावयोः ॥

स्यादेतदात्मव्यापारमन्तरेण ते एव कर्तृत्वोपभोक्तृत्वे न 5 स्यातामित्यत्राह ।

निर्व्यापारश्च तत्रात्मेत्यत्र वादो वृथा ननु ॥ ७२

निर्व्यापारो व्यापाररहितः । तत्र तयोः कर्मक्रियाफलोपभोगयोरात्मा निःक्रियत्वादचेतनत्वात् । नित्यत्वाच्च क्वचिदपि क्रियायां समर्थः ॥ यदप्युक्तं ।

10 ज्ञानमात्रादिसंबन्धः कर्तृत्वं तस्य भण्यते ।

सुखदुःखादिसंवित्तिसमवायस्तु भोक्तृता ॥ इति ।

तदपि पूर्वापरकालयोरविचलितस्वभावस्यात्मनः क्रमेण न संगच्छते ॥ इति हेतोरत्रात्मनि निर्व्यापारे वादो विवादो । वृथा निष्फलो । यदर्थमसावङ्गीकृतस्तत्र तस्यानुपयोगित्वात् ॥ 15 नन्विति परसंबोधने ॥

ननु यद्यात्मा न भवेत्कथ तर्हि कृतविप्रणाशादिदोषो न स्यात् । ततो [न][1] वृथा तद्वाद इत्याह । हेतु[165b]मानित्यादि ।

हेतुमान् फलयोगीति दृश्यते नैष संभवः ।

[1] de ltar bas na rtsod pa don med pa ma yin no zhe na

यो हेतुमान् कर्मणा युक्तः स एव फलयोगी फलसंबद्धः । इत्येवमेष सम्भवो न दृश्यते नोपलभ्यते । यस्मादन्य एव मृतो लोके जायते अन्य एव हि[1] । ततो हेतुमतः फलयोगो न दृश्यते ॥

एतर्हि कथं नीयते यदुक्तं । अनेनैव कृतं कर्म कोऽन्यः प्रत्यनुभविष्यतीति[2] । अत्राह । संतानस्येत्यादि । 5

संतानस्यैक्यमाश्रित्य कर्ता भोक्तेति देशितं ॥ ७३

संतानस्योत्तरोत्तरानेकक्षणपरंपरालक्षणस्य कार्यकारणभावेन प्रवर्तमानस्य । ऐक्यमाश्रित्य[3] । अनेकेष्वेकत्व[4] लोकाध्यवसायवशादवरोपितमेव[5] निमित्तीकृत्य कर्ता भोक्तेति देशितं । 10 य एव कर्मणः कर्ता स एव तत्फलस्योपभोक्ता च । इत्येतद्देशितत्वेऽपि नेयाभिप्रायवशात् भगवता प्रकाशित । अन्यथा कर्मफलोच्छेद मन्येत जनः । न तु तावता उभयलोकानुगामिनः सत्त्वमाख्यात ॥ अत एव च तत्रैवोक्तं । उपात्तेष्वेव स्कन्धधात्वायतनेषु विपच्यन्त इति[6] । तथा चेतना कर्म चेतयित्वा कर्मेति 15 वचनाच्च[7] । तदुक्तं ।

---

[1] So Ms See above, VIII 98

[2] See above, 468 6

[3] Ms ऐक्य

[4] One of the aspects of the avidyā, piṇḍasaṃjñā, ekasaṃjñā, etc

[5] Ms vaśād āvaropitam —Possibly āropitam

[6] See above 468 9

[7] See above ad V 6, also Madh vṛtti ad XVII 2 —de bzhin du sems pa las l yis bsam pas bsams pa las yin no zhes gsuns pas so (?)

कर्मजं लोकवैचित्र्यं चेतना तत्कृतं च तत् ।
चेतना मानसं कर्म तज्जे वाक्कायकर्मणी । इति[1] ॥

अन्यत्राप्युक्तं ।

सत्त्वलोकमथ भाजनलोकं
चित्तमेव रचयत्यतिचित्रं ।
कर्मजं हि जगदुक्तमशेषं
कर्म चित्तमवधूय न चास्ति । इति[2] ॥

तस्मान्न चित्तविनिर्मुक्तमन्यत्कर्मास्ति । तच्च कुशला-कुशलं चित्तमुत्पाद्य निरुध्यमानं स्वोपादेयचित्तक्षणे कुशला-कुशलादिसंस्कारविशेषवासनामादधाति[4] । तदपि तदाहित-वासनमुत्तरोत्तरतदभिसंस्कृतक्षणपरंपराविच्छेदतः सतानप्रवर्त-मानं[5] परिणतिविशेषमुपगच्छत्[6] कर्मविशेषानुरूपं तथाविधं सुखादिस्वभावं चित्तात्मकमेव फलमभिनिर्वर्तयति परलोके ॥

---

1 Quoted *Abhidh. k. v.* Soc. As., fol. 337 b (chapter IV, initio) — *las las hjig-rten sna tshogs skye, las ni sems pa dan des byas*.

2 Quoted *Pañcakramaṭ.*, p. 40, and also *Madh. vṛtti*.

3 de yan dge ba yan mi dge bai sems skyes nas hgags pa na ran gi ñe bar len pa las byun bai sems kyi skad cig la dge ba dan mi dge ba la sogs pai hdu-byed pai bag chags hjog go. de yan des gzhag pai bag chags gzhan dan gzhan des mnon par hdu byas pai skad cig ma gzhan dan gzhan rgyun ma chad pas hjug pa na yons-su-gyur pai khyad par ñe bar skyes las kyi khyad par dan rjes-su mthun pa de lta buo (?) rnam par bde ba la sogs pai ran bzhin gyi sems kyi bdag ñid-kyi hbras bu hjig rten pha rol tu skyed par byed do zhes brjod do.

4 *viçeṣa*, not translated—in from a second hand, *çeṣa* in margin.

5 According to the Tibetan *kṣaṇaparamparāsaṃtānāvicchedataḥ pra* ?

6 According to the Tibetan *upajāyate*.

[1]तद्यथा क्षितिबीजादयः परस्परोपसर्पणप्रत्ययविशेषात्समधिगता-
तिशयतया प्रथमक्षणो[169a]पनिपातिनः स्वोपादेयभूतद्वितीय-
क्षणकलापे कार्योत्पादानुगुणविशेषोत्पादनद्वारेण तदुत्तरोत्तर-
तारतम्यमुपजनयन्तः संततिपरिणामविशेषादन्त्यक्षणलक्षणं प्रकर्ष-
पर्यन्तमासादयन्तो बीजानुरूपशालिकोद्रवाङ्कुरमुत्पादयन्ति ॥ 5
यथा च लाक्षारसपरिभावितं मातुलुङ्गादिबीजमुप्तं तत्संस्कार-
परंपराप्रवृत्तेस्तत्पुष्पादिषु रक्ततामुत्पादयति । न च तत्र
कश्चित्पूर्वापरकालयोरेकोऽनुगामी समस्ति । तच्च कुशलाकुशलं
समानस्यापि[2] कल्पनोपस्थापितत्वात् । नोपन्यासो युक्तः । तदुक्तं ।

यस्मिन्नेव हि संतान आहिता कर्मवासना । 10
फलं तत्रैव बध्नाति कर्पासे रक्तता यथा ॥ इति ॥[3]

तस्माद्यथा बीजादिष्वात्मानमन्तरेणापि प्रतिनियमेन कार्यं
तदुत्पत्तिश्च क्रमेण भवति । तथा प्रकृतेऽपि परलोकगामिनमेकं
विनापि कार्यकारणभावस्य नियामकत्वात्प्रतिनियतमेव फलं ।
क्लेशकर्माभिसंस्कृतस्य संतानस्याविच्छेदेन प्रवर्तनात्परलोके फल- 15

[1] dper-na de ni sa dan sa bon la sogs pa phan-tshun tshogs pai rkyen-gy khyad par-las thob-pai khyad par du gyur pa skad-cig ma dan-po las bsed-pa-la ran gi ñe bar-len pa [r bya] bas byun hgyur pa skad cig ma gñis pa gyur-pai tshogs pa la hbras bu bskyed pai rjes su-mthun pai khyad-pai skyed-par gyur nas phyi ma phyi ma khyad par du hbyun bar rgyud yons-su gyur pai khyad par las mthar skad-cig mai mtshan ñid phul tu byun [ ] thob-bo, sa bon skyed pai byed de

[2] So Ms —dge ba dan mi dge ba dan mtshuns pa la yan rnam-par rtogs pas gzhag pai phyir ñe-bar-dgod pa ni ma rigs so

[3] See *Sarvadarçana*, p 25, and references *Museon*, 1902, p 43

प्रतिलम्भोऽभिधीयते ॥ इति नाकृताभ्यागमो न कृतविप्रणाशो बाधकं । ततो नात्मानमन्तरेण कर्मफलसंबन्धो न युज्यते ॥

यथा च सत्येवात्मनि स न घटते । तथा सप्रचयमुच्यमानमतिविस्तरं स्यादिति नेह प्रतन्यते ॥

5 आह च ।

नात्मास्ति स्कन्धमात्रं तु क्लेशकर्माभिसंस्कृतं ।
अन्तराभवसंतत्या कुक्षिमेति प्रदीपवत् ॥ इति ॥

[1]पुद्गलतदादिभिस्तत्त्वान्यत्वप्रतिषेधपक्षाभ्युपगमात्त्वयमेव वस्तुत्वं प्रतिषिद्धं । वस्तुनो हि तत्त्वान्यत्वप्रकारानतिक्रमात् । पर-
10 स्परपरिहारवतोरेकप्रतिषेधापरविधिनान्तरीयकत्वात् ॥ भारहा-
[169b]रादि[2]सूत्रमपि समर्थितमत्रार्थे । तस्मादाभिप्रायिकी भगवतो देशनामजानद्भिः परिकल्पितोऽसौ न वस्तु सन् । वस्तुत्वाभ्युपगमे[3] नान्यत्वमित्यात्मनो निराकरणेनैव निरस्तः[4] । इति न पुनर्विशेषेण प्रतिषेधितः ॥

15 उक्तं चैतद्भगवता । इति हि भिक्षवोऽस्ति कर्म । अस्ति फलं । कारकस्तु नोपलभ्यते य इमान् स्कन्धान् विजहाति । अन्यांश्च स्कन्धानुपादत्ते । अन्यत्र धर्मसंकेतात् । अत्राय धर्मसंकेतो यदस्मिन् सति इदं भवत्यस्योत्पादादिदमुत्पद्यत इति ।[5]

---

1 gan-zag tu smra-ba de rnams kyis

2 See J R A S , 1901, p 308

3 dnos pos (?) blans-pa na y in g/han ma yin no zhes .

4 = nirastah pudgalah --bsal-ba ma yin-no ?? (na nirastah)

5 *dharmasamketa* = chos-kyi-brda.—See *Çālistambasūtra.*

एतेन भगवतैवेदंप्रत्ययतामात्रलक्षणः[1] कार्यकारणभावोऽपि दर्शित[2] एव । अयमपि च संतानस्त्येत्यनेन[3] यथाव्यवहार-मनिरूपितस्वरूपः सूचित[4] एव । संतानवचनेनेदंप्रत्ययतामात्रस्याभ्युपगमात् । अन्यथा संतान एव न स्यात् । तेन वास्तवकार्यकारणभावभाविनो[5] दोषा नावतीर्यन्ते ॥ 5

इदमेवाचार्यपादैरप्युक्तं ।

अशक्तं सर्वमिति चेत् । बीजादेरङ्कुरादिषु ।
दृष्टा शक्तिर्मता सा चेत्संवृत्यास्तु यथा तथा[6] ॥

कार्यकारणभावप्रतिनियमादेव स्मृत्यभावोऽपि निरस्तः । एकस्यानुगमात्मनोऽभावात् । न स्मर्ता कश्चिदिह विद्यते । किं 10 तर्हि स्मरणमेव केवलमारोपवशात् । स्मर्यमाणवस्तुविषयं । न चात्र स्मर्तुरभावेऽपि कश्चिद्व्याघातः । अनुभूते हि वस्तुनि विज्ञानसंताने स्मृतिबीजाधानात्कालान्तरेण संततिपरिपाकहेतोः स्मरणं नाम कार्यमुत्पद्यते ॥ एवं प्रत्यभिज्ञानादयोऽपि द्रष्टव्याः । अतिविस्तरभयात्प्रत्येकमिह न प्रतिविधीयन्त इति 15 तत्समर्थनमन्यत्रैव विस्तरेणावधार्यमिति ॥

---

1 rkyen hdi pa tsam kyi mtshan ñid

2 Sic Ms old hand, r erased, Tib has *bstan* = *deçita*

3 So Ms —hdi yan rgyun gcig ces pas = samtāna eka ity

4 bstan pa

5 *vāstava* = dnos po la gnab pa — *bhāvino* = yod pai ... = dosâ ye vastutvena siddhe kāryakāranabhāvo bhavanti

6 gal te kun-rdzob hdod na ji-ltar de ltar hgyur = *yadi sā çaktir samvrtyā istā* .

सर्वमेतत्संवृतिसत्यमुपादाय समर्थितं। परमार्थे[1] तु सर्व-
धर्माणां निःस्वभावत्वात्सर्वविकल्पोपरमाच्च। न किं चिदुत्पद्यते
निरुध्यते वा। सात्मकमनात्मकं वा। नापि[170a] विचार्यमाणं
कर्म तत्फलं वा नापीहलोको न परलोको वा न[2] कश्चि-
5 दस्ति। कल्पनाविठपितत्वात्। तस्मात्सर्वमेतत्प्रतिबिम्बसंनिभं
निःस्वभावमुत्पद्यते निरुध्यते च। कार्यकारणं[3] च सात्मक
निरात्मकं च नित्यमनित्यं चाभिधीयते। स्वप्नवत्कर्मकर्तृत्वं
तत्फलोपभोग[4] इहलोकः परलोकः सुगतिदुर्गतिगमनं च।
कल्पनानामप्रहाणात्। इति सर्वं सुस्थं। यद्वक्ष्यति[5]।

10 एवं च न निरोधोऽस्ति न च भावोऽस्ति तत्त्वतः।
अजातमनिरुद्धं च तस्मात्सर्वमिदं जगत्॥
स्वप्नोपमास्तु गतयो विचारे[6] कदलीसमाः।

इत्यादि॥ उक्तं च।

कर्ता स्वतन्त्रः कर्मापि त्वयोक्तं व्यवहारतः।
15 परस्परापेक्षिकी तु सिद्धिस्तेऽभिमतानयोः॥
न कर्तास्ति न भोक्तास्ति[7] पुण्यापुण्यं प्रतीत्यजं।
यत्प्रतीत्य न तज्जातं प्रोक्तं वाचस्पते त्वया॥ इति।

---

[1] Ms paramārthahetu sarva°
[2] cun zad
[3] rgyu dan hbras-bu
[4] lons spyod pa po
[5] Below ix 150 151
[6] Tib has sñin po med = asārā.
[7] bhoktā = za ba po

यथा निरात्मानश्च सर्वे धर्माः कर्मफलसंबन्धाविरोधश्च[1] । निःस्वभावता च । यथा दृष्टसर्वधर्माविरोधश्च । तथा पिता-पुत्रसमागमे देशित । तदुक्तं[2] । भगवानाह । एवमेव महाराज बालोऽश्रुतवान् पृथग्जनश्चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानी-यान्यभिनिविशते । सोऽभिनिविष्टः समनुनीयते । समनुनीतः 5 सरज्यते । संरक्तो रागजं कर्माभिसंस्करोति[3] । त्रिविधं कायेन । चतुर्विधं वाचा । [त्रिविधं मनसा][4] । तच्च कर्माभि-संस्कृतमादित एव क्षीणं निरुद्धं विगतं[5] विपरिणतं । न पूर्वां दिशं निश्रित्य[6] तिष्ठति । न दक्षिणां । न पश्चिमां । नोत्तरां । नोर्ध्वं । नाधः । नानुविदिशं । नेह । न तिर्यक् । नोभय-मन्तरा । 10 तत्पुनः कालान्तरेण मरणकालसमये प्रत्युपस्थिते । जीवितेन्द्रियनिरोधे आयुषः परिक्षयात् । तत्सभागस्य कर्मणः क्षीणत्वात् । चरमविज्ञानस्य निरुध्यमानस्य[7] मनस आरम्बणी-भवति । तद्यथापि नाम [170b] शयितविबुद्धस्य जनपद-कल्याणी[8] । इति हि महाराज चरमविज्ञानेनाधिपतिना । 15

---

[1] MS 'sambandhavinirodha—Tib hbrel-ba mi hgal ba

[2] Quoted Çikṣās 250 10—Comp ibid 226 7—The first part (. trividham manasā) is locus classicus, see Madh vṛtti, 137, note 1

[3] The Tib adds dveṣajam mohajam

[4] Neither in our MS nor in the Tib translation, nor in Çikṣās

[5] hgags-la bral zhin

[6] = brten te = niçritya

[7] rnam par çes-pa tha-ma hgags pai tshe = caramavijñāna-nirodhakāle

[8] Neither our MS nor the Tib translation does repeat the words ārambanam bhavati See Çikṣās p. 253, n. 1

तेन च कर्मारम्बणेन औपपत्त्यंशिक[1] इयप्रत्ययं प्रथमं विज्ञान-मुत्पद्यते । यदि [वा] नारकेषु । यदि वा तिर्यग्योनौ । यदि वा यमलोके । यदि वा आसुरकाये । यदि वा मनुष्येषु । यदि वा देवेषु । तस्य च प्रथमविज्ञानस्यौपपत्त्यंशिकस्य समन-
5 न्तरनिरुद्धस्यानन्तर सभागा[2] चित्तसंततिः प्रतिवर्तते[3] यत्र विपाकस्य प्रतिसंविद्[4] प्रज्ञायते[5] । तत्र यश्चरमविज्ञानस्य निरोधस्तत्र च्युतिरिति संख्या भवति । यः प्रथमविज्ञानस्य प्रादुर्भावस्तत्रोपपत्तिरिति । इति महाराज न कश्चिद्धर्मो-ऽस्माल्लोकात्परलोकं गच्छति । च्युत्युपपत्तौ प्रज्ञायेते । तत्र[6]
10 महाराज चरमविज्ञानमुत्पद्यमान न कुतश्चिदागच्छति । निरुध्यमानं न क्व चिद्गच्छति । कर्माप्युत्पद्यमान न कुतश्चि-दागच्छति । निरुध्यमान न क्व चिद्गच्छति ।[7] [प्रथमविज्ञान-मप्युत्पद्यमान न कुतश्चिदागच्छति । निरुध्यमान न क्व चिद्ग-च्छति] । तत्कस्य हेतोः । स्वभावविरहितत्वात् । चरमविज्ञान
15 चरमविज्ञानेन शून्य । कर्म कर्मणा शून्यं । प्रथमविज्ञानं प्रथमविज्ञानेन शून्य । च्युतिश्च्युत्या शून्या । उपपत्तिरुपपत्त्या

---

1 skye bai char-gtogs-pai rnam par çes pa
2 skal ba dan hdra ba *or* skal ba hdra ba
3 *Çikṣās* has *pravartate*, more correct
4 So MS —*Çikṣās* has *pratisaṃvedanā*, correct —See below 479 1
5 mnon par yod
6 *Çikṣās* has tatra
7 Given by *Çikṣās* and Tib

शून्या । कर्मणां चावन्ध्यता प्रज्ञायते[1] । विपाकस्य च प्रतिसंवेदना । न तत्र कश्चित्कर्ता न भोक्ता । अन्यत्र नामसंकेतादिति विस्तरः ॥ एवं द्वेषमोहाभ्यामपि कर्माभिसंस्करणं यथायोगं वाच्यमिति ॥ 5

शालिस्तम्बसूत्रेऽप्युक्तं[2] । पुनरपरं तत्त्वेऽप्रतिपत्तिर्मिथ्याप्रतिपत्तिरज्ञानमविद्या । एवमविद्यायां सत्यां त्रिविधाः संस्कारा अभिनिर्वर्तन्ते । पुण्योपगा । अपुण्योपगा । आनंज्योपगाश्च[3] । [4]इम उच्यन्ते अविद्याप्रत्ययाः संस्कारा इति[4] । पुण्योपगानां संस्काराणां[5] पुण्योपगमेव विज्ञानं भवति[6] । अपुण्योपगानां 10 संस्काराणामपुण्योपगमेव विज्ञानं भवति[7] । [171a] आनज्योपगानां संस्काराणामानज्योपगमेव विज्ञानं भवति[8] । इदमुच्यते संस्कारप्रत्ययं विज्ञानमिति । तद्देव विज्ञानप्रत्ययं नामरूपं । नामरूपविवृद्ध्या षड्भिरायतनद्वारैः कृत्यक्रियाः[9] प्रवर्तन्ते ।

---

1 las-rnams horas-bu med par mi hgyur bar mnon zhin

2 See *Çikṣās* 222 11– For the first part of the quotation, see above ix 2

3 So MS —*Çikṣās* has āniñjya°

4—4 Wanting in Tib , but see note 8

5 hdu byed rnams las (abl not genit)

6 Tib adds hdi dag ni ma-rig pai rkyen-gyis hdu-byed rnams zhes byas zhes bya ba dan

7 Tib adds hdi ni hdu dyed kyi rkyen-gyis rnam par-çes-pa zhes bya bao

8 The text is corrupt Tib has mi gyo bai hgro-bai rnam par çes pa ñid du hgyur te hdi ni rnam par çes pai rkyen gyis min dan gzugs çes byas min dan gzugs rnam par hphel bas —*Çikṣās* has idam ucyate samskarapratyayam vijñānam iti evam nāmarūpam nāmarūpavivrddhyā ..—As observed by Prof Bendall, the Madhyamakavrtti gives better readings and is followed by the Tibetan translation of *Çikṣās* itself.

9 bya ba byed-pa

तन्नामरूपप्रत्ययं षडायतनमुच्यते । षड्भ्य आयतनेभ्यः षट्
स्पर्शकायाः प्रवर्तन्ते । अयं षडायतनप्रत्ययः स्पर्श इत्युच्यते ।
यज्जातीयः स्पर्शो भवति तज्जातीया वेदना प्रवर्तते । इयं
स्पर्शप्रत्यया वेदनेत्युच्यते । यस्तां वेदयति । विशेषेणास्वादयति ।
5 अभिनन्दयति । अध्यवस्यति । अधितिष्ठति । सा वेदनाप्रत्यया
तृष्णेत्युच्यते । आस्वदना । अभिनन्दना । अध्यवसायस्थान[1]
आत्मप्रिय[रूप]सातरूपैर्वियोगो मा भवत्विति । अपरित्यागो
भूयो भूयश्च प्रार्थना इदं तृष्णाप्रत्ययमुपादानमित्युच्यते । एवं
प्रार्थयमानः पुनर्भवजनकं कर्म समुत्थापयति । कायेन वाचा
10 मनसा । स उपादानप्रत्ययो भव इत्युच्यते । तत्कर्मनिर्जातानां
[2][पञ्च]स्कन्धानामभिनिर्वृत्तिर्या सा भवप्रत्यया जातिरित्युच्यते ।
या जात्यभिनिर्वृत्तानां स्कन्धानामुप[चय]परिपाकाद्विनाशो[3]
भवति । तदिदं जातिप्रत्ययं जरामरणमित्युच्यते । पेयालं । तत्र
विज्ञानं बीजस्वभावत्वेन हेतुः[4] । कर्म क्षेत्रस्वभावत्वेन हेतुः ।
15 अविद्या तृष्णा च क्लेशस्वभावत्वेन हेतुः । कर्मक्लेशा विज्ञानबीजं
संजनयन्ति । तत्र कर्म विज्ञानबीजस्य क्षेत्रकार्यं करोति । तृष्णा
विज्ञानबीजं स्नेहयति । अविद्या विज्ञानबीजमवकिरति । [अ]-
सतामेषां प्रत्ययानां विज्ञानबीजस्याभिनिर्वृत्ति[र्न] भवति । तत्र

---

[1] *Çikṣās* has adhyavasānam mā me priyarūpaçātarūpair viyogo bhavatv iti —Tib has mjon ba, mnon par dga, lhag par zhen nas hdug-pa las bdag sdug no-bo dan bden-pai no bo dan hbral bai

[2] pañca = lna

[3] According to Tib °pākavināço bhavati = *yons su smin pa* dan hjig-par hgyur-ba.

[4] rgyu byed do

कर्मणां नैव भवति। अहं विज्ञान[बीजस्य] क्षेत्रकार्यं
करोमि। तृष्णाया अपि नैव भवति। अहं विज्ञानबीजं
स्नेहयामि। अविद्या[या] अपि नैव भवति। अहं विज्ञान-
बीजमवकिरामीति। विज्ञान[171b]बीजस्यापि नैवं भवति।
अहमेभिः प्रत्ययैर्जनितमिति। अपि तु विज्ञानबीजं कर्म- 5
क्षेत्रप्रतिष्ठितं तृष्णास्नेहाभिष्यन्दितं अविद्यावकीर्णं विरोहति।
नामरूपाङ्कुरस्याभिनिर्वृत्तिर्भवति[1]। स च नामरूपाङ्कुरो न
स्वयंकृतो न परकृतो नोभयकृतो नेश्वरनिर्मितो न काल-
परिणामितो न चैककारणाधीनो[2] नाप्यहेतुसमुत्पन्नः। अथ
च मातापितृसंयोगादृतुसमवायादन्येषां च प्रत्ययानां समवा- 10
यादास्वादनानुप्रबद्धं विज्ञानबीजं तत्र तत्रोपपत्त्या मातुः कुक्षौ
नामरूपाङ्कुरमभिनिर्वर्तयति। अस्वामिकेषु धर्मेष्वममेष्वपरि-
ग्रहेष्वप्रत्यर्थिकेष्वाकाशसमेषु[3] मायालक्षणस्वभावेषु। हेतु-
प्रत्ययानामवैकल्यात्। पेयालं[4]। न तत्र कश्चिद्धर्मोऽस्मा-
ल्लोकात्परलोकं संक्रामति। अस्ति च[5] कर्मफलमस्ति च विज्ञ- 15

---

[1] *Çikṣās.* has vijñānabīje pratiṣṭhite °abhiṣyandite 'vidyāvakīrṇe tatra tatrotpattyāyatana pratisaṃdhau mātuḥ kukṣau virohati nāma°. These readings are supported by our Tibetan translation except as concerns the reading *utpatt°* (*correct upapattyāyatana*).

[2] So MS. and *Çikṣās.*—Tib. has raṅ bzhin-las ma byuṅ byed pa la rag-las pa ma yin = na svabhāvād utpanno na kāraṇādhīnaḥ.

[3] *apratyarthikeṣu* is wanting in Tib.

[4] Supply the omitted passage from *Çikṣās.* 225, 5—18.

[5] *Çikṣās.* asti ca karmaphalapratijñaptiḥ hetu°—Supported by our Tib. translation las kyi ḥbras bu mṅon par yaṅ yod do = karmaṇaḥ phalam prajñāyate.

61

न्निर्हेतुप्रत्ययानामवैकल्यात् । पेयालं[1] । यथाग्निरुपादान-
वैकल्यान्न ज्वलति[2] । उपादानावैकल्याच्च ज्वलति । एवमेव
कर्मक्लेशजनितं विज्ञानबीजं तत्र तत्रोपपत्त्यायतनप्रतिसंधौ
मातुः कुक्षौ नामरूपाङ्कुरमभिनिर्वर्तयति । अस्वामिकेषु धर्मेष्व-
5 ममेष्वपरिग्रहेष्वप्रत्यर्थिकेषु । [आकाशसमेषु] । मायालक्षण-
स्वभावेषु हेतुप्रत्ययानामवैकल्यात् ॥ एवमाध्यात्मिकस्य प्रतीत्य-
समुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः[3] ॥

तत्राध्यात्मिकः प्रतीत्यसमुत्पादः पञ्चभिः[4] कारणैर्द्रष्टव्यः ।
कतमैः पञ्चभिः । न शाश्वततः । नोच्छेदतः । न संक्रान्तितः ।
10 परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः । तत्सदृशानुप्रबन्ध-
तश्चेति[5] । कथं न शाश्वततः । यस्मादन्ये मारणान्तिकाः[6]
स्कन्धाः । अन्ये औपपत्त्यंशिकाः[7] स्कन्धाः प्रादुर्भवन्ति[8] । न
तु य एव मारणान्तिकाः स्कन्धाः त एव औपपत्त्यंशिकाः
प्रादुर्भवन्ति । अतो न शाश्वततः ॥ कथं नोच्छेदतः । [172 a]
15 न च पूर्वनिरुद्धेषु[9] मारणान्तिकेषु स्कन्धेषु औपपत्त्यंशिकाः

---

1 *Çikṣās* omits this mention.

2 This first clause wanting in our MS., the second in *Çikṣās*.

3 This clause wanting in *Çikṣās*.

4 So MS. and *Çikṣās*.—The correct reading is *pañcabhir ākārair* (rnam-pa lṅa).

5 de dan hdra bar rgyud-du o

6 tha ma chi bai phun-po

7 skye bai char gtogs pa

8 *prādurbhavanti* omitted by Tib. translator and by Çikṣās which adds api tu māraṇāntikāḥ skandhā nirudhyamānā aupapattyaṃçikāḥ skandhāç ca prādurbhavanti—But see below.

9 pūrva (snon) wanting in *Çikṣās*.

स्कन्धाः प्रादुर्भवन्ति। नाप्यनिरुद्धेषु। अपि तु मारणान्तिकाः स्कन्धा निरुध्यन्ते। तस्मिन्नेव च समय औपपत्त्यंशिकाः स्कन्धाः प्रादुर्भवन्ति। तुलादण्डोन्नामावनामवत्। अतो नोच्छेदतः॥ कथं न संक्रान्तितः। विसदृशात्सत्त्वनिकायाद्विसभागाः[1] स्कन्धा जात्यन्तरेऽभिनिर्वर्तन्ते। अतो न संक्रान्तितः॥ कथं परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः। परीत्तं कर्म क्रियते। विपुलफलविपाकोऽनुभूयते। अतः परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः॥ कथं तत्सदृशानुप्रबन्धतः। यथावेदनीयं कर्म क्रियते। तथावेदनीयो विपाकोऽनुभूयते। अतस्तत्सदृशानुप्रबन्धतः॥ एवमाध्यात्मिकः प्रतीत्यसमुत्पादः पञ्चभिर्द्रष्टव्य इति विस्तरः॥

तदेवमात्मादिविरहेऽपि कर्मफलसंबन्धोऽविकलः सूत्रेषु भगवता स्वयमुपदर्शित[2] इत्युपदर्शितं[3] भवति। इति नैकस्योभयानुयायिनोऽभावेऽपि[4] किंचिद्विरुध्यत इति।

यदि कथंचिदपि नास्त्येवात्मा कथं तर्हि।

आत्मा हि आत्मनो नाथः को नु नाथः परो भवेत्।
आत्मना हि सुदान्तेन स्वर्गं प्राप्नोति पण्डितः॥

---

[1] MS has °nikāyād visabhāgāḥ, and Çiksas MS ddhi sabhāgah But the Tibetan translators agree do skal pa mñam pa skye bas (sabhaga not visabhaga)—Prof Bendall prefers °nikayād dhi sa and he may be right

The meaning is that a man can be reborn as a god, etc

[2] = gsuns

[3] = bstan

[4] gñi gar hgro ba

इति गाथायामुक्तं ॥ चित्तमेवाहंकारसंनिश्रयतया अस्या-
मात्मशब्देनोक्तं। अन्यत्र सूत्रे

चित्तस्य दमनं साधु चित्तं दान्तं सुखावहं ।

इति चित्तस्य दमनवचनात्। तदपि चात्मदृष्ट्यभिनि-
5 विष्टानामन्यत्रा[1]त्मग्राहपरिकल्पविच्छेदार्थं नेयार्थतया संवृत्या
चित्तमात्मेति प्रकाशितं। न तु परमार्थतः। एतेन यदुक्त-
मार्यलङ्कावतारे।

पुद्गलः संततिः स्कन्धाः प्रत्यया अणवस्तथा[2]।
प्रधानमीश्वरः कर्ता चित्तमात्रं वदाम्यहं ॥

10 इति। तदपि व्याख्यातं[3] भवति यतस्तदपि चान्यत्र पुद्गला-
द्यभि[172b]निवेशबाधनाय वचनं। न तु तावता चित्तस्य
परमार्थसत्त्वमुक्तं। एवमन्यत्रापि स्कन्धादिष्वात्मदेशना नेयार्था।
अतश्चित्तमपि वस्तुतो नाहंप्रत्ययस्य विषयः ॥

भवतु वा चित्तं परमार्थसत्। तथापि न वस्तुतस्तदहंकार-
15 गोचर इत्युपदर्शयन्नाह। अतीतेत्यादि।

अतीतानागतं चित्तं नाहं तद्धि न विद्यते।

त्रिधा हि चित्तं संभवति। परिकल्पमुपादाय। अतीत-

---

[1] gzhan-du hdzin pai, °atma not translated —This last text (cittasya damanam), by which it is established that by ātman the only thought is meant, has been said in order of cutting the wronger view of those who search elsewhere for an ātman

[2] According to the Tib. pratyaya hetavas tatha (rkyen dan rgyu dan de bzhin du)

[3] vyākhyata = bsgrubs pa = siddha

मनागतं प्रत्युत्पन्नं च। तत्रातीतानागतं नष्टाजातं। चित्तं नाहं। नाहंदर्शनविषयः। कुतः। हिर्यस्मात्। तदतीतानागतं चित्तं न विद्यते। न सम्प्रत्यस्ति। नष्टाजातत्वात्। यदतीतं तत्क्षीणं निरुद्धं विगतं विपरिणामितं। यदनागतं तदप्यसम्प्राप्तमिति। प्रत्युत्पन्नं तर्हि चित्तमहं भविष्यतीत्यत आह। 5

अथोत्पन्नमहं चित्तं नष्टेऽस्मिन्नास्त्यहं पुनः ॥ ७४ ॥

यथोत्पन्नं वर्तमानं चित्तमहमस्तु तदपि न युक्तं। यतो नष्टेऽस्मिन्ना[स्त्य]हं पुनः। अस्मिन् प्रत्युत्पन्ने चित्ते नष्टे द्वितीयक्षणेऽतीते सति नास्त्यहं पुनः। पश्चादहंप्रत्ययस्य विषयो नेष्टः स्यात्। प्रत्युत्पन्नस्य स्थितिर्नोपलभ्यते। तत्कुतश्चित्तमालम्ब्यतां 10 येन आलम्बनं स्यात्। अतो न चित्तालम्बनोऽपीति निरालम्बन एवायमहंप्रत्यय उत्पद्यते। एवमात्मनो ऽसत्त्वान्नात्मा त्र्यध्ववर्तिनश्चित्तस्य च तद्विषयत्वात्[1]। नापि चित्तमहंकारस्य विषय इति प्रसाध्योपसंहरन्नाह। यथैवेत्यादि।

यथैव कदलीस्तम्भो न कश्चिद्भागशः कृतः। 15
तथाहमप्यसद्भूतो मृगयमाणो विचारतः ॥ ७५ ॥

यथैव कदलीस्तम्भो रम्भादण्डखण्ड। भागशः प्रत्यवयवशः कृतोऽवधूतो न कश्चिन्न वस्तु सन् प्राप्यते। तथाहमप्यसद्भूतः[2]

[1] de bzhin du bdag med de bdag yod pa ma yin te dus gsum du hbyun bai sems ñid dei yul yin par phyir ro = [illegible]

[2] MS asambhuta Tib yod par brgyur bi ma yin la

कदलीस्तम्भवत् । अहमपि अहम्प्रत्ययस्य विषयोऽपि । असद्भूतो ऽवस्तुभूतः । वन्ध्यातनयवत् । न कश्चिद्विषयोऽस्यास्तीति भावः । कथं मृग्यमाणो विचारत । निरूपणत ॥

पुनरन्यद्बाधकमात्मप्रतिषेधे प्रसञ्जयन्नाह । यदीत्यादि ।

5 **यदि सत्त्वो न विद्येत कस्योपरि कृपेति चेत् ।**

यदि सर्व[173]थैव सत्त्व आत्मा पुद्गलो वा विचार्यमाणो न विद्येत । न स्यात् । तदा कस्योपरि कृपा करुणा बोधिसत्त्वानां भवेत् । सत्त्वमन्तरेण किमालम्ब्य प्रवर्तेत । करुणा च सम्यक्सम्बोधिसाधनं । तत्पूर्वकमेव दुष्करनिदानेषु दानादिषु 10 प्रवर्तनात् । अतः करुणापुरःसराः सर्वबुद्धधर्माः प्रवर्तन्ते ।

तथा चोक्तमार्यधर्मसंगीतौ[1] । अथ खल्वार्यावलोकितेश्वरो बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत् । [2]न भगवन् बोधिसत्त्वेनातिबहुषु धर्मेषु शिक्षितव्यं । एक एव हि धर्मो बोधिसत्त्वेन स्वाराधितः[3] कर्तव्यः सुप्रतिविद्धः[4] । तस्य करतलगताः सर्वे 15 बुद्धधर्मा भवन्ति[5] । तद्यथा येन राज्ञश्चक्रवर्तिनश्चक्ररत्नं

[1] See Çikṣās 286 7

[2] This clause is twice repeated in Tib bcom ldan hdas byan chub sems dpas chos man po-rnams-la bslab par mi bgyio bcom ldan hdas byan chub-sems dpas chos çin-tu man po bslab par mi byao

[3] = rab tu-gzun = sugṛhitaḥ

[4] = rab tu rtogs-pa = su pratividdha (Çikṣā)—Our MS supratibaddhaḥ

[5] Çikṣās adds katama ekadharmo yad uta mahākaruṇā mahākaruṇayā bhagavan bodhisattvānām sarvabuddhadharmāḥ karatalagatā bhavanti — Supported by our Tib translation chos gcig po gan zhe na hdi lta ste sñiṅ rje chen po

गच्छति । तेन सर्वबलकायो गच्छति । एवमेव भगवन् येन बोधिसत्त्वस्य महाकरुणा गच्छति । तेन सर्वे बुद्धधर्मा गच्छन्ति[1] ॥ तद्यथा भगवन् जीवितेन्द्रिये सत्यन्येषामिन्द्रियाणां प्रवृत्तिर्भवति[2] । एवमेव भगवन् महाकरुणायां सत्यां बोधिकारकाणां[3] धर्माणां प्रवृत्तिर्भवतीति ॥ 5

आर्यगयाशीर्षे चोक्तं । किमारम्भा[4] मञ्जुश्रीर्बोधिसत्त्वानां चर्या । किमधिष्ठाना[5] । मञ्जुश्रीराह । महाकरुणारम्भा देवपुत्र बोधिसत्त्वानां चर्या सत्त्वाधिष्ठानेति विस्तरः ॥

तस्मादवश्यं प्रथमतः सत्त्वालम्बना करुणाभ्युपगन्तव्या दुःखितसत्त्वाधिष्ठानेन समुत्पत्तेः । सत्त्वाभावे च सा न स्यात् । 10 इति[6] चेत् । एवं मन्यसे यदि । तदा नैतद्वक्तव्यमित्याह कार्यार्थमित्यादि ।

कार्यार्थमभ्युपेतेन यो मोहेन प्रकल्पितः ॥ ७६ ॥

कार्यमभिमतसाध्यः पुरुषार्थ इत्युच्यते । तदर्थमभ्युपेतेन स्वीकृतेन मोहेन संवृत्या यः प्रकल्पितः समारोपितः सत्त्वः- 15 स्तस्योपरीत्यर्थः । तथा हि सकलकल्पनाजालरहित[7] । सर्वा-

---

1 One more simile in Çikṣas

2 pravṛtti = hbyun ba

3 The first a is erased (kurakanam) — Çikṣas bodhikaranam

4 brtsam pa

5 brten pa

6 iti is translated by ʼhe na

7 jalarahitam is wanting in Tib

वरणविनिर्मुक्तं। परमपुरुषार्थतया बुद्धत्वमिह साध्यं। तच्च सर्व-
धर्मानुपलम्भमन्तरेण नाधिगम्यते। स च [173b] प्रज्ञाप्रकर्ष-
गमनात्संपद्यते। तच्च सादरनिरन्तरदीर्घकालाभ्यासादुपजायते।
तदारम्भश्च करुणावशादुत्पद्यते। सा च प्रथमतो दुःखितसत्त्वेषु
5 प्रवर्तमाना संभारारम्भनिदानमुत्पद्यत[1] इति कार्यार्थं मोहस्य
संवृतिसत्यरूपस्याभ्युपगमः[2]। ततः प्रथमतः सत्त्वालम्बनैव करुणा।
ततः परं धर्मालम्बनाऽनालम्बना च॥ अयमभिप्रायः। न सर्वथा
सत्त्वस्याभावः। स्कन्धादयो हि संवृत्यात्मशब्देनोच्यन्ते[3]। यथोक्तं
भगवता ये केचिच्छ्रमणा वा ब्राह्मणा वा आत्मेति
10 समनुपश्यन्तः समनुपश्यन्ति इमानेते पञ्चोपादानस्कन्धानिति।
ततो यदि नाम प्रज्ञया निरूपयतः परमार्थतः सत्त्वानुपलम्भः
तथापि संवृत्या न निषिध्यत इति। तदुक्तं।

> यतः प्रज्ञा तत्त्वं भजति करुणा संवृतिमतः
> तवाभून्निःसत्त्वं जगदिति यथार्थं विमृशतः।
> 15 यदा चाविष्टोऽभूर्[4]दृढबलजनन्या करुणया
> तदा तेऽभूदार्तं सुत इव पितुः प्रेम जगति॥ इति।

चतुस्तवेऽपि[5]।

---

[1] Read upapadyate (pa written in marg. and erased).—Tib. hgyur tshogs kyi rgyu rtsom pa = sambhāra nidāna ārambha.

[2] MS. mohasya saṃvṛtisatya° ... (sya erased).—blun pas hdzin pa kun rdzob kyi bden pa ... khas blangs pa yin no.

[3] bden pa sgras = satya śabdena.

[4] MS. bhudd°.

[5] bstod pa bzhi pa las.

सत्त्वसंज्ञा च ते नाथ सर्वथा न प्रवर्तते।

दुःखार्तेषु च सत्त्वेषु त्वमतीव कृपात्मकः॥ इति।

तस्मादमी रूपादय एव संवृत्या[1] सत्त्वशब्देनोच्यन्त इति न करुणा निर्विषया॥

ननु परमार्थतः सत्त्वाभावे कस्य तत्कार्यं। इति कथं 5
तत्साधनाय कस्य चित्प्रवृत्तिरित्यभिसंधायाह। कार्यमित्यादि।

कार्यं कस्य न चेत्सत्त्वः सत्यमीहा तु मोहतः।

न चेत्सत्त्व इति। यदि सत्त्वो नास्ति। तदा एकस्यानुयायिनो[2]ऽभावाद्रूपादीनां चोत्पन्नविनाशित्वात् कार्यं कस्य। न कस्य चित्स्यादित्यर्थः। सत्यमित्यभ्युपगम इति। एवमेवैतन् 10
मतमेवास्माकं। नैव कस्य चित्परमार्थतः कार्यं। अस्वामिकत्वात्सर्वधर्माणां। यद्येवं कथं तर्हि तत्साधनाय प्रथमतः प्रवृत्तिरिति चेत्। ईहा तु [174a] मोहतः। ईहा चेष्टा पुनस्तत्कार्यार्थितया व्यापार[ो] मोहात्। ममैव तत्कार्यं भविष्यतीत्येकत्वाध्यवसायेन सत्त्वाभावेऽपि संवृत्या मायास्वभावतया 15
वस्तुतो निरीहत्वात्सर्वधर्माणामन्यत्र प्रतीत्यसमुत्पादात्। तदुक्तं।

निरीहा वशिकाः[3] शून्या मायावत्प्रत्ययोद्भवाः।

सर्वधर्मास्त्वया नाथ निःस्वभावाः प्रकाशिताः॥ इति।

तस्मात्संवृतेरेव[4] कार्यार्थव्यापारः॥

---

1 bden-pai sgr is = satvaçabdena

2 rjes su hgro-ba

3 So MS

4 Kun rdzob-ñid du = saṃvṛtyā —hbras bui don du bya-ba ldan pa yin = phalārthaṃ kriyāvattvaṃ

ननु च मोहो नामाविद्यास्वभावतया सर्वथैवानुपादेयः ।
तत्कथं पुनस्तस्यैव स्वीकार इष्यत आह । दुःखेत्यादि ।

दुःखव्युपशमार्थं तु कार्यमोहो न वार्यते ॥७७॥

द्विविधो हि मोहः संसारप्रवृत्तिहेतुः । तत्प्रशमहेतुश्च ।
5 तत्र यः संसारनिदानं स प्रहातव्य एव । अन्यस्तु यः परम्परया
दुःखव्युपशमार्थं । सर्वसत्त्वजात्यादिव्यसननिवृत्तिनिमित्त । कार्य-
मोहः । कार्यस्य परमार्थसत्यलक्षणस्याधिगमाय मोहः स पुनर्न
वार्यते । न प्रतिषिध्यते । उपादीयत एव । परमार्थोपयोगि-
त्वात् । इदमिष्टा[धि]कृतं[1] । तदपि कार्यं नात्मसुखाभि-
10 लाषेण महद्भिरुपादीयते । अपि तु सर्वसत्त्वानामात्यन्तिक-
सर्वदुःखव्युपशमार्थं । तत्र चोपायभूतः परमार्थाधिगम एव ।
तस्याप्युपायभूतं [संवृतिसत्यं][2] । संवृतिमन्तरेण परमार्थानधि-
गमात् । इति दुःखप्रशमार्थता कार्यमोहस्य । एतत्कार्यार्थ-
15 मविचारत इति[3] । अस्मिन् प्रस्तावे प्रतिपादितमेव पूर्वं ।
पुनर्विपश्चयितुमुक्तं ॥

स्यादेतत् । यथा दुःखोपशमहेतुत्वात् । कार्यमोहोऽविद्या-
स्वभावोऽप्युपगम्यते । तथैवात्ममोहोऽपि तद्धेतुत्वादस्तु । तत्कि-
मात्मा यत्नेन निषिध्यते । तत्सद्भावेऽप्यात्मभावनयाहंकार-

---

1 MS ıhākltam —Tıb bsam-pa nı hdı yın te

2 MS. °bhūta *samvrti* samvṛtım antarena (*samvrti* erased) — Tıb gyur pa nı kun-rdzob kyı bden-pao yın te Kun rdzob med par

3 See above IX 4 (p 371)

क्षयात्[1] । भविष्यति संसारनिवृत्तिः । ततः किं नैरात्म्यभावन-येत्यचाह । दुःखहेतुरित्यादि ।

दुःखहेतुरहंकार आत्ममोहात्तु वर्धते ।

यथा कार्यमो[174b]हो दुःखोपशमहेतुः । न तथा द्वितीय आत्ममोहः । तस्मिन् सत्यहकारक्षयाभावात्[2] । आत्म- 5
मोहात्तु । अनात्मन्यात्मविपर्यासदर्शनात् । पुनरहकारो वर्धते । वृद्ध उपजायते[3] । किंभूतः । दुःखहेतुः दुःखस्य सांसारिकस्य त्रिदुःखतालक्षणस्य हेतु कारण । अहंकारक्षयाच्च दुःखोपशम दृश्यते । सति चात्मदर्शने कथमसौ निवर्तेत । कारणेऽविकल- सामर्थ्ये कार्यस्य निवृत्त्ययोगात् । ततो दुःखमपि न निवर्तते । 10
तथा ह्यात्मानं पश्यतः सस्कृतेषु स्कन्धधात्वायतनेष्वहमिति दृढ- तरमुत्पद्यते स्नेहः । ततस्तद्दुःखप्रतीकारेच्छया सुखाभिलाषो दोषान्[4] प्रच्छाद्य तर्थितया गुणाध्यारोपात्तत्साधनेषु प्रवर्तते । स्वोपकारिणि[5] वयमिति बुद्धिरुपजायते । अहं ममेति च दर्शनात् । परिपन्थिनि विद्वेषः । ततः समस्तदुःखनिदान सर्व 15
एव क्लेशोपक्लेशा लब्धप्रसराः प्रवर्तन्ते । इत्यात्ममोहप्रवर्तितो दुःखहेतुरहकारो भवति । तदुक्तमाचार्यपादैः[6] ।

---

1 According to Tib. ... tats ... bhāva ... pi bhāvanayā

2 MS pratunta erased

3 MS second hand vṛddhim upa — Tib. ... hphel ba ñe bar skye bar hgyur-ro (= vṛddhir upa)

4 bde hdod pai ñes rnams bsgribs nas = sukhābhilāsadoṣān

5 kho bo la phan pa byed pao zhes blo skye bar hgyur ro = asmāsu hitam karotīti buddhir jāyate

6 Nagarjuna

यः पश्यत्यात्मानं तस्याचाहमिति शाश्वतः स्नेहः
स्नेहात्सुखेषु तृष्यति[1] तृष्णा दोषांस्तिरस्कुरुते ।
गुणदर्शी परितृष्यन्ममेति[2] तत्साधनान्युपादत्ते
तेनात्माभिनिवेशो यावत्तावत्तु संसारः ॥
5 आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ ।
अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ॥ इति ।

इत्थमात्मस्नेहान्निवर्तयितुमशक्तो ऽहंकारः ।

ततो ऽपि न निवर्त्यश्चेत् ।

ततोऽप्यात्मदर्शनादपि न निवर्त्यो निवर्तयितुमशक्यः ।
10 अहंकारश्चेद्यदि । तदा

वरं नैरात्म्यभावना ॥ ७८ ॥

नैरात्म्यस्य पुद्गलादिविरहस्य भावनाभ्यासः । वरमुत्तमं ।
आत्मदर्शनप्रवृत्ताहंकारनिवृत्तिहेतुत्वात् । तावत्कालमस्तु[3] प-
[175ᵃ] श्चात्पुनरियमपि प्रहास्यते । उपलम्भदृष्टित्वादिति
15 भावः[4] ॥ तथा हि तद्भावनाप्रकर्षपर्यन्तगमनात् । साक्षान्नैरात्म्य-
दर्शनात् । विरोधिनः[5] । सत्कायदर्शनं निवर्तते । तन्निवृत्तौ
चैकस्यानुगामिनो दर्शनाभावात् । पूर्वापररूपविकलस्य क्षणमात्रस्य

---

1 Tib. sred pas = tṛṣṇayā doṣān .

2 ti, from a second hand —Tib = na yi zhes dei sgrub byed len —The Tib has twice seven syllables for each pāda

3 astu = gzhag nas (sthitā ?)

4 dnos-por dmigs pa yin-pai phyir = vastvālambanatvāt.

5 According to Tib. tatviruddhasatkaya°

दर्शनं। ततः पूर्वापरसमारोपाभावान्नानागतसुखसाधनं किं चिदात्मनः पश्यति। ततो न तस्य क चिद्विषये रागो जायते। नापि तत्प्रतिविरोधिनि द्वेषः। आसङ्गाभावादेव[1]। नाप्यपकारिणं प्रत्यपकारस्थानं पश्यति। येन यस्मिन् कृतोऽपकारः। तयोर्द्वयोरपि द्वितीयक्षणाभावात्। न चान्येन कृते ऽपकारे प्रेक्षावतो ऽन्यत्र वैरनिर्यातनमुचितं। नापि यस्य कृतस्तेनापि[2]। एवं रागादिनिवृत्तावन्ये ऽपि तत्प्रभवाः क्लेशोपक्लेशा नोत्पद्यन्ते। नापि वस्तुतः कश्चित्कस्य चिदपकारकारी। इदं प्रतीत्य इदमुत्पद्यत इति प्रतीत्यसमुत्पाददर्शनाद्वा। एवं हि पुद्गलशून्यतायां सत्कायदर्शननिवृत्तौ छिन्नमूलत्वात्। क्लेशा न समुदाचरन्ति।

यथोक्तमार्यतथागतगुह्यसूत्रे[3]। तद्यथापि नाम शान्तमते वृक्षस्य मूलच्छिन्नस्य सर्वशाखापत्त्रपलाशं शुष्यति। एवमेव शान्तमते सत्कायदृष्टिप्रशमात्सर्वक्लेशा उपशाम्यन्तीति॥ तस्माद्वरं नैरात्म्यभावना॥

गतमिदमानुषङ्गिकं। संप्रति पुनरहंकारविषयं निरूपयितुमुपक्रमते। स्यादेतत्। यदि नामात्मा विचारेण खरविषाणसदृशत्वान्नाहंकारस्य विषयः। तथापि कायावयवी[4] तद्विषयो भविष्यतीत्यत्राह। कायो नेत्यादि।

---

[1] zhen pa ñid yin pas so = isinG abhiva it ( )

[2] gan la des byas pa de la yan no = yatra tena krtas tatrāpi

[3] This passage is also quoted Çiksās 242 7 and Madh vrtti, p 361 Çiksās has °palaçaḥ Madh vrtti palaçani

[4] See p 495, l 11, p 496, l 13

कायो न पादौ न जङ्घा नोरू कायः कटिर्न च।
नोदरं नाप्ययं पृष्ठं नोरो बाहू न चापि सः॥ ७९
न हस्तौ नाप्ययं पार्श्वौ न कक्षौ नांसलक्षणः।
न ग्रीवा न शिरः कायः कायोऽत्र कतरः पुनः॥ ८०

5 कायोऽपि विचार्यमाणो नैव कश्चिदस्तीत्युपदर्शयति। तथा हि करचरणादयो भागा एव परं[1] दृश्यन्ते। न लेकः कायो नाम प्रतिभास[175b]ते। न च तेष्वन्यतमः कायो युज्यते। यतः कायो न पादौ। न चरणौ। न जङ्घा। जङ्घा च कायो न भवति। नोरू जङ्घैकदेशविशेषौ न 10 कायः। कटिर्न च। श्रोणिरपि नैव कायः। नोदरं जठरमपि कायो न भवति। नाप्ययं पृष्ठं। अयं कायः पृष्ठमपि नैव। नोरः। नोरो वक्षो ऽपि न कायः। बाहू न चापि सः। स कायो भुजावपि न भवति। न हस्तौ। करावपि न कायः। नाप्ययं पार्श्वौ। अयं कायः पार्श्वावपि न भवति। 15 न कक्षौ भुजमूले अपि न कायः। नांसलक्षणः। नापि स्कन्धस्वभावः कायः। न ग्रीवा। न कन्धरा कायः। न शिरः कायः। मस्तकोऽपि कायो न भवति॥ चरणादीनां वक्ष्यमाणविचारेण परमाणुशो ऽप्यनवस्थानात्। करचरणादीनामन्यतमच्छेदे कायविनाशेन मरणप्रसङ्गात्। पराभ्युपगमाभावाच्च। नैषु प्रत्येकं

---

1 hba zhig = kevalam

कायात्मता । एवं यदा न प्रत्येकमेते कायस्वभावाः । एतत्स-
मुदायमात्रं च शरीरं । तत्कायो ऽत्र कतरः पुनः । अत्र एषु
पादादिभागेषु पुरोवर्तिषु शरीरकल्पनानिमित्तेषु कतरः
कायो भवतु । नैव कश्चिदेकोऽपि निरूप्यमाणः कायात्मक
उपलभ्यत इति यावत् ॥ 5

अथापि स्यात् । नैवमभिधीयते प्रत्येक करादयः कायः
किं तर्हि सर्वावयवव्यापकत्वादवयविनः सर्वावयवेषु वर्तत इत्य-
त्राह । यदीत्यादि ।

यदि सर्वेषु कायोऽयमेकदेशेन[1] वर्तते ।

सर्वावयवेषु वर्तमानो ऽयमेकदेशेन वर्तते । युगपत्सर्वात्मना 10
वा । तत्र यदि । सर्वेषु करचरणादिष्ववयवेषु कायो ऽवयवी ।
एकदेशेन वर्तते । केन चिद्भागेन कं चिदवयवं व्याप्नोति । न
सर्वात्मना सर्वमित्यर्थः । तदेतत्र वक्तव्यं । यतो यैरेकदेशैरवयवेषु
वर्तते । तेष्वपि किमेकदेशेष्वपरैरेकदेशेन व[176a]र्तते
सर्वात्मना वेति विकल्पो न निवर्तते । तत्रापि पुनरेकदेशेन 15
वृत्तिकल्पनायामनवस्थानवृत्तिश्च स्यात् ॥

अपि च तस्यावकाशाभावादेवावयवेषु न वृत्तिरित्याह ।
अंशा इत्यादि ।

---

[1] phyogs gcig gis

अंशा अंशेषु[1] वर्तन्ते स च[2] कुत्र स्वयं स्थितः॥ ८१

अंशा भागा अंशेषु स्वस्वभागेषु वर्तन्ते। व्यवतिष्ठन्ते। स्वस्वभागव्यवस्थितत्वात्सर्वभावानां। स च कुत्र स्वय स्थितः। स्वय पुनरसौ कायोऽवयवी क्व नु नाम व्यवस्थित इति न विद्मः॥
5 अथ द्वितीयो विकल्पः। तत्राह। सर्वात्मनेत्यादि।

सर्वात्मना चेत्सर्वत्र स्थितः कायः करादिषु।
कायास्तावन्त एव स्युर्यावन्तस्ते करादयः॥ ८२

सर्वात्मनापि वृत्तिसंभावनायामवयवेष्वनवकाशत्वात्स च कुत्र स्वय स्थित इति प्रसङ्गो नाद्यापि निवर्तते। तथापि पुनरपर-
10 मुच्यते। सर्वात्मना सर्वभावेन नैकदेशेन। सर्वत्र सर्वेषु करादिष्ववयवेषु। आदिशब्दाच्चरणादिषु। स्थितः समवेतः। कायावयवी चेद्यदि। तदा पुनरय दोष स्यादित्याह। [3]काया इति कायावयविनः तावन्त एव स्युः। तत्संख्यापरिच्छिन्ना एव प्राप्नुयुः। कियन्तः। यावन्तस्ते करादयः। ते करचरणादयो
15 ऽवयवा यावन्तः। [4]यत्संख्यापरिच्छिन्नास्तत्समवेता अवयविनोऽपि तावन्त एव भवेयुः। तस्य निरंशतया। सर्वात्मना तेषु परिसमाप्तत्वात्। तदनेकसंबन्धादनेकत्वात्। नान्यथा एकवृत्तिः स्यात्। अय च प्रसङ्गो ऽनेकत्रैकदेशेन [5]वृत्तिपक्षेऽपि योजयि-

---

1 So L², M, Commentary — Min angadeçesu, Dev 85 angā angesu
2 Min has tu (nu ?)
3 According to Tibetan kāyā ityādi
4 Ms tatsamkhyā?
5 d ma yul gcig tu hjug pai phyogs la

तव्यः । यथा[1] रक्तारक्तपिहितापिहितकम्पादयोऽपि यथायोगं वक्तव्या इति ॥

एवं प्रत्यक्षादिप्रमाणसमधिगम्यः कायो नास्ति । बाधकं पुनरस्यानन्तरमुक्तमस्तीति प्रसाधितमित्युपदर्शयन्नाह । नैवान्त-रित्यादि । 5

नैवान्तर्न बहिः कायः कथं कायः करादिषु ।

पूर्वमन्तर्व्यापारपुरुषप्रतिषेधात् । मांसशोणितादीनां विचारितत्वात् । नैवान्तर्मध्ये कायः । अधुना पुनरवयविन प्रतिषेधान्न बहिः न बाह्य] प्रत्यक्षादिगोच[176b]रः कायः । इति कथं कायः करादिषु व्यवस्थाप्यते । अथ करादिव्यतिरिक्तो भविष्यतीत्याह । करादिभ्य इत्यादि । 10

करादिभ्यः पृथग् नास्ति कथं नु खलु विद्यते ॥ ८३

करादिभ्योऽवयवेभ्यः पृथग् भिन्न उपलब्धिलक्षणप्राप्तः कायो नास्ति न प्रतिभासते । करादय एव हि केवलाः प्रति-भासन्ते । एवं यो न करादिस्वभावो नापि तदाधेय समवेतो 15 नाप्यन्तर्गतो न चापि तद्व्यतिरिक्तः[4] स कायः कथं नु खलु विद्यते । कथं न्विति । कथं चिदपि कायमनुपलभमानस्तत्त्व

1 = de bzhin-du = tadyathā — Comp. [illegible] 1. 42

2 Minayev has [illegible]

3 Second hand [illegible]prāpt[illegible]

4 According to Tib. [illegible]

मसभावयन्[1] । पृच्छति । कथं नु । केन प्रकारेण । स्थिति विमर्शो । विद्यते । तद्युक्त्या व्यवस्थाप्यते ॥

यदा चैवं विचारेण कायो व्यवस्थापयितुमशक्यस्तदा ऽसन्नेव व्यवहर्तव्य इत्युपसंहरन्नाह । तन्नास्तीत्यादि ।

5 **तन्नास्ति कायो मोहात्तु कायबुद्धिः करादिषु ।**

तन्नास्ति काय इति यस्मादेवं विचारेण नोपलभ्यते । तस्मादुपलब्धिलक्षणप्राप्तो ऽनुपलभ्यमानो नास्ति कायः । यदि नास्ति कथं तर्हि करादिषु कायबुद्धिरित्याह । मोहात्त्वित्यादि । मोहादविद्यावशात् । [तु] पुनः । कायबुद्धिः । करादिष्वेक-
10 द्रव्यरहितेषु । न तु परमार्थतः । अवधारणे वा तुशब्दः । तथा ह्यनवराग्रसंसारप्रवृत्तिजन्मपरम्परापरिचितमिथ्याभ्यास-वासनावशात् । यथावस्थितवस्तुतत्त्वप्रतिपत्तावपि तद्विपरीत-समारोपकल्पनोपजायते । तदुपनिबद्धोऽयं कायादिव्यवहारो लोके प्रवर्तते । न तु पारमार्थिक इति ॥

15 कथमन्यत्र सा न भवति । इत्यत्राह । संनिवेशेति ।

संनिवेशविशेषेण स्थाणौ पुरुषबुद्धिवत् ॥ ८४

करचरणादिसंनिवेशः संस्थानं । तदेव विशेषो भेद इतरस्मात् । तेन विभ्रमहेतुना । करादिष्वेव न सर्वत्र सा भवति । प्रतिनियतविषया हि भ्रान्तय इष्यन्ते । कथमिव । स्थाणौ

[1] de yod mi srid-pa ñid kyi bdag par byed do

पुरुष[बुद्धि]वत् । यथा स्थाणौ पुरुषस्वभावरहितेऽपि[1] पुरुषसाधारणोर्ध्वता[177a]दिसंनिवेशविशेषमुपलभमानस्य दूराद्विवेचितपरविशेषस्य[2] कस्यचिद्विभ्रमात्पुरुषबुद्धिरुपजायते । तथा प्रकृतेऽपीत्यर्थः ॥

स्यादेतत् । कथं पुनरेतदवसितं मोहात्कायबुद्धिर्न तु 5 पुनर्वस्तुत इत्यत्राह । यावदित्यादि ।

यावत्प्रत्ययसामग्री तावत्कायः पुमानिव ।

यावत् । यावत्कालावधिपरिच्छिन्ना । प्रत्ययानां कारणानां । पृथिव्यादिषड्धातुषट्स्पर्शायतनाष्टादशमनोपविचारात्मकानां कर्मायत्तवृत्तीनां सामग्री समवधानं । तावत्कालावधिरेव कायः 10 पुमानिव । यथा पुरुषस्वभावविरहितोऽपि परमार्थतः परिकल्पितरूपतया पुरुष इव प्रतिभासते । व्यवह्रियते । उपलक्षणं चैतत् । स्त्रीवेत्यपि द्रष्टव्यं । न पूर्वं कललाद्यवस्थायां न पश्चाद्विकलितत्वाद्भस्माद्यवस्थायां निजस्वभावाभावात् ॥

इदमत्रापि सामान्यमित्युपदर्शयन्नाह । एवमित्यादि । 15

एवं करादौ सा यावत्तावत्कायोऽत्र दृश्यते ॥ ८५

यथा प्रत्ययसामग्रीसद्भावे कायः पुमानिव प्रतिभासते । असद्भावेन[3] प्रतिभासते । एवं तथा करादौ यावत्सा प्रत्ययसामग्री

---

[1] Skyes pa dan mtshuns par gyen du bgren ba la sogs pio dbyibs kyi = ūrdhvatadi saṃniveça .. —Possibly uddhatadi
[2] MS dūrādvivecitaḥ para° (i erased)
[3] So MS.—Tib has de med pa na = tadabhāve na pratibhāsate.

तावत्कायोऽत्र करादौ दृश्यते । कल्पनावशात् प्रतिभासते । न तु परमार्थतः । तस्मात्सामग्रीसाकल्ये भवति । तदभावे च न भवति कायबुद्धिः । अतो मोहादेव करादिषु कायबुद्धिरिति निश्चितं ॥ अयमत्र समुदायार्थः । तत्तत्प्रत्ययसामग्रीसद्भावे तत्तद्वस्तुस्वभाव-
मन्तरेणाप्यभूत तत्त्वमादर्शयन्ती भ्रान्तिवशादसौ कल्पनोपजायते । तद्वशात्संनिवेशविशेषेषु स्त्रीपुरुषकायादिव्यवहारः प्रवर्तते । अत एव भस्माद्यवस्थायां सामग्रीवैकल्यान्निवर्तते । अतो नायं कायादिव्यवहारो वास्तव इति वक्ष्यति । तदुक्तं[1] ।

कायस्वभावो वक्तव्यो यो ऽवस्थारहित[:][2] स्थित: ।
कायश्चेत्प्रतिमाकार.[2] [177b] पेशीभस्मसु नास्ति सः ॥
सूक्ष्मभावेन चेत्तत्र स्थौल्यं त्यक्त्वा व्यवस्थितः ।
अनिर्देश्यः स्वतः प्राप्तः काय इत्युच्यते कथ ॥ इति ।

उक्तं[3] च ।

हेतुतः सम्भवो यस्य स्थितिर्न प्रत्ययैर्विना ।
विगमः प्रत्ययाभावात्सो ऽस्तीत्यवगतः कथ ॥ इति ।

क्वचित्पाठः ।

यावत्प्रत्ययसामग्री तावत्काष्ठं पुमानिव । इति ।

तत्रेद व्याख्येयं । यावद्विपर्यासप्रत्ययसामग्री स्थाणौ पुरुष-

---

[1] These two stanzas occur Çikṣāsamuccaya 358, 14-17 (with the reading kāya ity ucyate na saḥ)

[2]–[2] Wanting in the Tibetan

[3] This stanza is quoted from Nagārjuna's Yuktiṣaṣṭikā—See also Madh. vṛtti, 413 6

प्रतीतिस्तावत्काष्ठं स्थाणुस्वभाव पुमानिव पुरुष इव प्रतीयते। न तदभावे। एवमेव करादौ। यावत्सा प्रत्ययसामग्री तावत्कायो ऽत्र करादौ दृश्यते। न पश्चात्। अतो मोहादेव कायबुद्धि-रिति निश्चयः॥

ननु यदि नाम कायो नास्ति करचरणादयः पुनरवयवाः 5 प्रत्यक्षोपलब्धत्वात्प्रतिषेद्धुमशक्या इत्याशङ्क्य करादयोऽपि परि-कल्पितस्वभावा एवेत्युपदर्शयितुमाह। एवमङ्गुलीत्यादि।

एवमङ्गुलिपुञ्जत्वात्पादोऽपि कतरो भवेत्।

यथैव विचार्यमाणः कायो नास्ति। एव करचरणादयोऽपि न सन्ति। यतः। अङ्गुलीनां पुञ्जः समुदायः। अङ्गुलीनामि- 10 त्युपलक्षण। पार्ष्णिप्रभृतीनामपि द्रष्टव्यः। तस्य भावस्तत्त्व। तस्मात्तत्स्वभावादित्यर्थः। पादोऽपि चरणोऽपि कतरो भवेत्। तत्समुदायमन्तरेण विचार्यमाणो नैव कश्चिदिति भावः॥ अङ्गुलिपुञ्जोऽपि नैकस्वभाव इत्याह। सो ऽपीत्यादि।

सोऽपि पर्वसमूहत्वात्पर्वापि स्वांशभेदतः॥ ८६ 15

सोऽपि। अङ्गुलिपुञ्जोऽपि विचारतो न वस्तु सन्। कुतः पर्वसमूहत्वात्। पर्वणामङ्गुलिभागानां समूहत्वात्। सघातत्वात् कतरो भवेदिति प्रकृतेन सबन्धः॥ पर्वणामपि प्रत्येकमवस्तुत्व-मित्यत आह। पर्वापि न वस्तु। कस्मात्। स्वांशभेदतः। स्वस्यात्मनों शानामवयवानां भेदतोऽपि विभागात्॥ 20

अंशा अपि तत्त्वतो न सन्तीत्याह ।

अंशा अप्यणु[178a]भेदेन ।

इति । अंशाः पर्वभागा अप्यणुभेदेन परमाणुशो विभागेन भिद्यमानत्वात् । कल्पिता एव ॥

5 अणवोऽपि न प्रत्येकं परमार्थसन्त इत्याह ।

सोऽप्यणुर्दिग्विभागतः ।

दिशां पूर्वापरदक्षिणोत्तराधरोर्ध्वस्वभावानां संबन्धेन विभागतो नानात्वात् । तद्विभागभेदाद्भिद्यमानस्य परमाणोः षडंशता स्यात् । दिक्षु वा विभागा नानादिगवस्थिता नानारूपांशाः

10 परमाणोः । ततो भेदेन [न] तस्य स्वभावोऽवतिष्ठते[1] । दिग्भागभेदो यस्यास्ति तस्यैकत्वं न युज्यत इति न्यायात् ॥ तथा हि । पूर्वापरादिदिगवस्थितपरमाण्वभिमुखं यत्तत्परमाणोर्मध्यवर्तिनो रूपं । तत्किमेकमेवापरापरं वा । यद्येकमेवेति पक्षः । तदा सर्वपरमाणूनां परिवार्यावस्थितानामेकदेशताप्रसङ्गः । यतः पूर्वादि-

15 दिगवस्थितपरमाणुसमानदेशतामन्तरेणापरदिगाद्यवस्थितपरमाणुना न प्राग्देशावस्थितपरमाण्वभिमुखरूपाभिमुखं स्यात् । अन्यथा रूपभेदप्रसङ्गात् । तत्समानदेशता च न तत्स्वरूपान्तर्भावमन्तरेण तस्यापि पूर्वदिगवस्थितस्य परमाणोरपरपरमाणुना सर्वात्मना संबन्धेन । तत्स्वरूपान्तर्भावात् परमाणुमात्रं द्रव्यं

[1] Tib. dei raṅ bzhin gnas pa ma yin no =

स्यात् । तथा च सति प्रचयरूपा भूधरादयो न स्युः ॥ अतो
भवनादीनां प्रचयमिच्छता द्वितीय एव पक्षः समभ्युपेयः ।
तदा च षड्भिरपरापररूपेण युगपत्संबन्धात् । षड्भागो
मध्यपरमाणुः स्यात् । तत्तद्देशावस्थितापरापरपरमाणुसंबन्धेन
तत्परमाणुरूपस्य भेदात् । इति परमाणुरपि नैकस्वभावो युक्तः । 5
यदुक्तमाचार्यपादैः ।

षट्केन युगपद्योगात्परमाणोः षडंशता ।
षण्णां समानदेशत्वात्पिण्डः स्यादणुमात्रकः ॥ इति[1] ।

तेऽपि पुनरणीयांसो भागास्तथैव निरू[178b]प्यमाणा
निरात्मतया नभःस्वभावतां प्रतिपद्यन्त इत्याह । दिग्विभागो- 10
ऽपीत्यादि ।

दिग्विभागो निरंशत्वादाकाशं तेन नास्त्यणुः ॥ ८७

दिग्विभागोऽपि दिग्भेदेन परमाणोर्विभागोऽपि पूर्ववत् ।
षडंशतया भिद्यमानः कतरो भवेत् । न किं चिदस्तु स्यात् ।
एतत्सर्वत्र पूर्वेषु योजनीय । कुतोऽनंशत्वात् । अतोऽभिनिरूप्य- 15
माणो निःस्वभावतया आकाश शून्यमेव । तेन कारणेन
नास्त्यणुः । न विद्यते परमाणुरिति ॥

[1] This celebrated stanza occurs Sarvadarçanasamgraha, 16 5, Nyāyavārttika, iv, 2 24, Tātparyaṭīkā 459 28, Sarvasiddhāntas, iii, 12 13, see Wassilieff, 303—[Some various readings ṣaṭkena yugapad yogāt . ṣaṭkonayugapad yogāt . kiṃ na syād aṇumātrakaḥ piṇḍaḥ syād aṇumātrakaḥ]—The first line refers to the Sautrāntika-system, the second line to the Vaibhāṣika

एवं करादयोऽपि विचारतो निःस्वभावा द्रष्टव्या इति । ततः कायोऽपि न परमार्थतः कश्चिदस्ति । एकानेकस्वभाव-वियोगस्य प्रतिपादनात् । इत्थं न केशादयो न चात्मा नापि चित्तं न च कायोऽहंकारस्य विषयो वस्तुतः । तस्मादविद्या-
5 समुत्थापितात्मतया आत्मादिसत्त्वमन्तरेणापि प्रवर्तमानोऽयमह-मिति प्रत्ययो निर्विषय एव समुत्पद्यते । तेन यदुक्तं ।

अहमेव न किं चिच्चेद्भयं कस्य भविष्यति ।

इति तत्समर्थितं । सर्वेण चैतेन कायस्मृत्युपस्थानमुपदर्शितं भवति । यदुक्तं धर्मसंगीतिसूत्रे[1] । पुनरपरं कुलपुत्र बोधिसत्त्व
10 एवं कायस्मृतिमुपस्थापयति । अथ कायः पादपादाङ्गुलिजङ्घो-रुत्रि[2]कोदरनाभीपृष्ठवंशहृदयपार्श्वपा[3]र्शुकाहस्तकलाचीबाहुग्रीवा-हनुललाटशिरःकपालमात्रसमूहः कर्मभवकारकोपचितो नानाक्लेशोपक्लेशसंकल्पविकल्पशतसहस्राणामावासो । बहूनि चात्र द्रव्याणि समवहितानि । यदुत केशरोमनखदन्तास्थिचर्मपिमित-
15 वपुः[4]स्नायुमेदोवसालसिकायकृन्मूत्रपुरीषामाशयपक्वाशयरुधिर-

---

[1] The same quotation occurs Çikṣās 228 12—Compare the stock lists quoted ibidem, p 209 and here above ad ix 58 (p 452), also Khuddaka pāṭha, 3 (J R A S, 1869, 311, 326), Mahāvyutpatti, 189 and Triglotte 65—I give, in the text, the readings of our MS

[2] Marked as doubtful M vyut 189 75

[3] So MS —Çikṣās pārçvaka —Trigl. parçvikāḥ (m)—Pali phāsuka Mbo II 520 parçukā (?)

[4] Read vapā (Çikṣās) = çar phyi

खेटपित्तपूयसिंहा[1]णकमस्तिष्[2]कमस्तकलुङ्गानि । एवं बहुद्रव्यसमूहस्तत्को ऽत्र कायः । तस्य प्रत्यवेक्षमाणस्यैवं भवति । आकाशसमो ऽयं कायः । स आकाशवत्काये स्मृतिमुपस्था-
[179a]पयति । सर्वमेतदाकाशमिति पश्यति । तस्य काय-
परिज्ञानहेतोर्न भूयः काचित्स्मृतिः प्रसरति न विसरति न 5
प्रतिसरतीति ॥

पुनरुक्तं[3] । अयं कायो न पूर्वान्तादागतो नापरान्ते संक्रान्तो न पूर्वान्तापरान्तावस्थितोऽन्यत्रासद्विपर्याससम्भूतः कारकवेदकरहितो नाद्यन्तमध्ये प्रतिष्ठितमूलः । अस्वामिको ऽममो ऽपरिग्रहः । आगन्तुकैर्व्यवहारैर्व्यवह्रियते काय इति देह इति 10
भोग इति आश्रय इति शरीरमिति कुणप इति आयतनमिति । असारको ऽयं कायो मातापितृशुक्रशोणितसम्भूतो ऽशुचिपूतिदुर्गन्धिस्वभावो रागद्वेषमोहविषादतस्कराकुलो नित्यं शत[4]नपतनभेदनविकिरणविध्वंसनधर्मा नानाव्याधिशतसहस्रनीड इति ॥ 15

एवं यदा विचार्यमाणो वस्तुतः शून्यस्वभावतया आकाशसमकायः सर्वथा कायस्तदा मिथ्यैव वस्तुत्वमारोप्य रागादि-

[1] The reading of our MS seems to be Siṃhāṇaka (mucus) written Siṃhānaka (compare elsewhere [illegible])

[2] Not supported by Çikṣās., but the Tib. has klad pa dan klad rgyas rnams = mastiṣka mastaka luṅgāni — brain and the membrane covering the brain (Çarat Candra)

[3] See Çikṣā., 229. 7

[4] [illegible] pa, [illegible] ba, [illegible] ba

64

कमुत्पादयन्तः संसारमुपबृंहयन्ति बाला इत्याह। एव-
मित्यादि।

एवं स्वप्नोपमे रूपे को रज्येत विचारकः[1]।

एवमित्युक्तक्रमेण स्वप्नोपमे स्वप्नोपलब्ध इव रूपे
5 सौमनस्यस्थानीये को रज्येत्[2]। क आसज्येत्[2]॥ अस्य
चोपलक्षणत्वात्। को द्विष्यात्। को मुह्येदित्यपि वेदितव्य।
तद्य[था][3] सौमनस्यस्थानीयानि चक्षुषा रूपाणि दृष्ट्वा रागो
जायते। दौर्मनस्यस्थानीयानि चक्षुषा रूपाणि दृष्ट्वा द्वेषो
जायते। उपेक्षास्थानीयानि चक्षुषा रूपाणि दृष्ट्वा मोहो
10 जायत इति। यदेतन्मनो ऽप्रतिकूलेषु रूपेष्वनुनीतं चरति
तेनास्य राग उत्पद्यते। प्रतिकूलेषु रूपेषु प्रतिहतं चरति
तेनास्य द्वेष[4] उत्पद्यते। नैवानुकूलेषु न प्रतिकूलेषु सम्मूढ
चरति तेनास्य मोह उत्पद्यते। एव शब्दादिषु त्रिविधमालम्ब-
नमनुभवति पूर्ववत्। तत्र य· पण्डितजातीय·[5]। इति ह्यत्य-
15 न्ततया चक्षुरायतनं[6] शून्य चक्षुरायतनस्वभावेन तत्पूर्वान्ततो
[279ᵇ] ऽपि नोपलभ्यते। अपरान्ततो ऽपि नोपलभ्यते।
मध्यतो नोपलभ्यते। स्वभावरहितत्वात्। एवमन्येषु श्रोत्रादिषु

---

[1] So Burn 90 and Dev 85—Minaev has vicakṣaṇaḥ

[2] So MS

[3] = de bzhin du

[4] MS first hand doṣa

[5] Tib de la gin dpyod ldan su zhig ces te gtan tu yan ,, = tatra yaḥ kaścid vicārayukta iti atyantatayā

[6] Āyatanam wanting in Tibetan

वक्तव्यं । एवमत्यन्ततया रूपायतनं शून्यं[1] रूपायतनस्वभावे-
नेत्यादि पूर्ववत् । एवं शब्दादिषु वाच्यं ॥

इति हि[2] मायोपमानीन्द्रियाणि स्वप्नोपमा विषया
यस्येति[3] । तस्य कथं रागादिकमुत्पद्यते । अत एवाह ।
विचारक इति । विचारको विचक्षणः । एवमेतद्यथाभूतं 5
सम्यक् प्रज्ञया पश्यन् । को रज्येत् । द्विष्टि । मुह्यति वा ॥

अत्र च स्वप्नोपलब्धजनपदकल्याणीप्रभृति भगवतोक्तं
निदर्शनमुपदर्शितव्यं । कायाभावे च स्त्र्यादिकल्पनयापि रागो
न युक्त इत्याह । कायश्चेत्यादि ।

कायश्चैवं यदा नास्ति तदा का स्त्री पुमांश्च कः ॥ ८८ 10

हेतुसमुच्चये चकारः । यस्मात्स्त्र्यादिकल्पनया रागो न
भवति । कायो यदा एवमुदितनयेन नास्ति । निःस्वभावः ।
तदा कायाभावात् । का स्त्री कामिनी यस्याः कमनीयतया
पुरुषे रागो भवेत् । कश्च पुमान् कामुकः यस्य रञ्जनीयतया
स्त्रियां रागो भवेत् । स्त्री हि स्वात्मनि स्त्रीति सङ्कल्प्य 15
बहिर्धा पुरुषे पुरुष इति रागं जनयति । एवं पुरुषोऽपि
स्वात्मनि पुरुष इति संकल्प्य बहिर्धा स्त्रियां स्त्रीति राग

[1] Tib = rupasvabhena

[2] Tib has de ltar na = evam hi

[3] MS has svapnopamān viṣayān paçyati (eva second hand), but Tib dban po rnams ni rgyu ma lta bu yin la yul rnams ni rmi lam lta bu gan gi yin pa de la ji ltar

जनयति । कायाभावे तु स्त्रियां स्त्रीति न संविद्यते । पुरुषे पुरुषो न संविद्यते । यच्च स्वभावेन न संविद्यते । न तत्स्त्री न पुरुष इति । तस्मादसति काये स्त्र्यादिकल्पनाकृतो ऽपि न युज्यते रागः । तत्कस्य हेतोः । मन्यनापगता[1] हि सर्वधर्मा इति ॥ यथाप्रधानमयं निर्देशः । एवमेव स्रक्चन्दनादयो ऽपि स्वभावरहिता वेदितव्याः । तथा द्वेषमोहविषया अपीति ॥

उक्तं चैतद्भगवता पितापुत्रसमागमे[3] । षड्धातुरयं महाराज पुरुषः[4] [180a] । षट्स्पर्शायतनः । अष्टादशमनोपविचारः । षड्धातुरयं महाराज पुरुष इति । खलु[5] पुनरेतदुक्तं । किं चैतत्प्रतीत्य क[6] । षडिमे महाराज धातवः । कतमे षट् । तद्यथा पृथ्वीधातुः । अब्धातुः । तेजोधातुः । वायुधातुः । आकाशधातुः । विज्ञानधातुश्च । इमे महाराज षड् धातवः । यावत् । षडिमानि महाराज स्पर्शायतनानि । कतमानि षट् । चक्षुःस्पर्शायतनं रूपाणां दर्शनाय यावन्मनःस्पर्शायतनं धर्माणां विज्ञानाय । इमानि महाराज षट् स्पर्शायतनानि ।

---

[1] manvanā = mtshan ma see below, p 511

[2] ji-ltar hdi gtsor bstan-pa de bzhin-du

[3] See Çikṣās 244 11 —Compare Majjhima III, p 240

[4] Skyes-bu gan-zag hdi ni = ayam puruṣapudgalaḥ

[5] So MS —Çikṣās has mana upa?

[6] 6 So MS —Çikṣās has na khalu punar etad yuktam kim caitad pratītyoktam—Both Tibetan versions agree skyes bu hdi ni khams drug-pa zhes gan smras pa ci la (s) brten te smras çe na rgyal po chen po khams hdi ni hdi dag go = saddhātur ayam puruṣa iti yad uktam kim pratītyoktam iti cet ṣaḍ ime mahārāja dhātavaḥ

पेयालं ॥ अष्टादशेमे महाराज मनउपविचाराः । कतमे अष्टादश । इह पुरुषः चक्षुषा रूपाणि दृष्ट्वा सौमनस्यदौर्मनस्योपेक्षास्थानीयानि रूपाण्युपविचरति[1] । एवं श्रोत्रादिषु वाच्यं । तेन प्रत्येकमिन्द्रियषट्के[न][2] सौमनस्यादित्रयभेदादष्टादश मनउपविचारा भवन्ति । पेयालं ॥ कतमश्च महाराजाध्यात्मिकः पृथ्वीधातुः । यत्किं चिदस्मिन् काये ऽध्यात्मं खक्खटत्वं[3] खरगतमुपात्तं । तत्पुनः कतमत् । तद्यथा केशा रोमाणि नखा दन्ता इत्यादि । कतमश्च महाराज बाह्यः पृथ्वीधातुः । यत्किंचिद्बाह्यं खक्खटत्वं[4] खरगतमनुपात्तं । अयमुच्यते बाह्यः पृथ्वीधातुः ॥ तत्र महाराजाध्यात्मिकः पृथ्वीधातुः । उत्पद्यमानो न कुतश्चिदागच्छति । निरुध्यमानो न क्वचित्संनिचयं गच्छति ॥ भवति महाराज समयो ऽयं [यत्स्त्री] अध्यात्मं [अहं] स्त्रीति कल्पयति[5] । सा अध्यात्ममहं स्त्रीति कल्पयित्वा बहिर्धा पुरुष पुरुष इति कल्पयति । सा बहिर्धा पुरुष पुरुष इति कल्पयित्वा संरक्ता सती बहिर्धा पुरुषेण सार्धं संयोगमाकाङ्क्षते । पुरुषो ऽप्यध्यात्मं पुरुषो ऽस्मीति कल्पयतीति पूर्ववत् । तयोः संयोग[180b]माकाङ्क्षायां संयोगो भवति । संयोगप्रत्ययात्कललं जायते ।

---

1 Çikṣās omits *rūpāṇy*— Our reading is supported by Tibetan.
2 From Çikṣās
3 Çikṣās has Kakkhaṭatva—See p 245 n 2
4 MS khakkhaṭam
5 Çikṣās *sa samayo yat strī* —*adhyātmam* in marg

तत्र महाराज यश्च संकल्प्यते[1] यश्च संकल्पयिता उभयमेतन्न संविद्यते। स्त्रियां स्त्री न संविद्यते। पुरुषे पुरुषो न संविद्यते[1] इति ह्यसदसद्भूतः संकल्पो जायते[2]। सो ऽपि संकल्पः सद्भावेन न संविद्यते। यथा संकल्पः। तथा संयोगो ऽपि कर्कशमपि
5 स्वभावेन न संविद्यते। यश्च स्वभावतो न संविद्यते तत्कथं खक्खटत्वं जनयिष्यति। इति हि महाराज संकल्पं ज्ञात्वा खक्खटत्वं वेदितव्यं यथा खक्खटत्वमुत्पद्यमानं न कुतश्चिदागच्छतीति[3]। भवति महाराज समयो यदयं कायः श्मशानपर्यवसानो भवति। तस्य तत्खक्खटत्वं संक्षियमाणं संनिरुध्यमानं
10 न पूर्वां दिशं गच्छति। न दक्षिणां न पश्चिमां। नोत्तरां। नोर्ध्वं। नाधो। नानुविदिशं गच्छति। एवं महाराजाध्यात्मिकः पृथिवीधातुर्द्रष्टव्यः। पेयालं[4]॥ तत्र महाराज पृथिवीधातोरुत्पादो ऽपि शून्यो व्ययो ऽपि [शून्य]। उत्पन्नो [ऽपि] पृथिवीधातुः स्वभावशून्यः[5]॥ इति हि महाराज पृथि-
15 वीधातुः पृथिवीधातुत्वेन नोपलभ्यते। अन्यत्र व्यवहारात्। सो ऽपि व्यवहारो न स्त्री न पुरुषः। एव[6] महाराज यथा-

---

[1] Cıksās samkalpo

[2] Çıksās jātah

[3] Çıksās, has na kutaç cıd āgacchatı nırudhyamānam na kva cıt sammıcayam gacchatıtı

[4] Peyālam = Çıksās 245 18—246 12

[5] The Tıbetan does not support these readings sai khams te hbyun ba yan ston, sai khams hjig pa dan hbyun bı yan no bo ñıd kyıs ston no

[6] Çıksās, evam evaitat

भूतं सम्यक् प्रज्ञया द्रष्टव्यमिति ॥ [1]तेन का मन्यना। मन्यना मारगोचरः। तत्कस्य हेतोर्मन्यनापगता हि सर्वधर्मा इति ॥

एवं कायस्मृत्युपस्थानं प्रतिपाद्य वेदनास्मृत्युपस्थानमुपदर्शयितुं वेदनां विचारयन्नाह। यद्यस्तीत्यादि।

यद्यस्ति दुःखं तत्त्वेन प्रहृष्टान् किं न बाधते। 5
शोकाद्यार्ताय मृष्टादि सुखं चेत्किं न रोचते ॥ ८९

त्रिविधा हि वेदना सुखा वेदना। दुःखा वेदना। अदुःखासुखा चेति। तत्र रूपवद्वेदनापि परमार्थतो नास्ति। कथमिति चेत्। यद्यस्ति दुःखमसातं वेदितं। तत्त्वेन परमार्थेन। तदा प्रहृष्टान् किं न बाधते। संतोषयुक्तान् किं न 10 दुःखयति। [181ª] सुखमपि यद्यस्ति तत्त्वेन तदा शोकाद्यार्ताय। आदिशब्दात्कामभयोन्मादार्ताय। मृष्टादि सुखं चेत्। मृष्टादि सुरसमाहारपानादि। आदिशब्दात्स्रक्चन्दनादि सुखं सुखहेतुत्वात्। सुखं चेद्यदि किं न रोचते। न हि वस्तु सत्स्वभावं कदा चिदपि निवर्तितुमुत्सहते। तस्मात्क- 15 ल्पनोपस्थापितमेव सुखदुःखं वेदनीयमिति ॥

---

[1] Çikṣās 251 8 tena kā manyanā, manyanā ca nāma mahārāja māragocarah, amanyanā buddhagocarah tat kasya hetoh —Tibetan translators do not agree as concerns *manyanā* We have had above (p 508) *mtshan ma* (=nimitta) Here we have des-na ci-zhig la dpyad-par bya sto dpyad par bya bai yul ma yin-no chos thams cad ni dpyad pa dan bral bao (=tena kutra vicāryam ? nāsti vicāravisayah vicārāpagatā sarvadharmāh]—Çikṣās has *rlom sems*='pride self consciousness —Bendall compares maññana Dh Sm 1116 1233, see also Nettipak 24 and manana (rlom pa), amanana (Madh vṛtti, p 381, n 5)

यदुक्त प्रहृष्टान् किं न बाधत इति । तत्र परस्य समाधानमाह । बलीयसेत्यादि ।

बलीयसाभिभूतत्वाद्यदि तन्नानुभूयते ।

न हि प्रहृष्टावस्थायां सर्वथैव दुःखमसत् । किं तर्हि
5 समुद्भूतवृत्तिना सुखेन तिरस्कृतत्वात् विद्यमानमपि नानुभूयते । बलीयसा ऽतिबलवता सुखेनाभिभूतत्वादुपहतत्वात् । सदपि यदि तद्दुःख नानुभूयते । न वेद्यत इत्युच्यते । तदा न युक्तमेतत् । इत्याह वेदनात्वमित्यादि ।

वेदनात्वं कथं तस्य यस्य नानुभवात्मता ॥ ९०

10 वेदनात्वं वेदनास्वभावत्व कथ केन प्रकारेण तस्याव्यक्तस्य सुखस्य यस्य नानुभवात्मता । यस्य नानुभूयमानस्वभावता । वेद्यत इति हि वेदनोच्यते । वेदनानुभव इति वचनात् । यदि चावेद्यमानापि वेदना स्यात् । तदा न किंचिन्न वेदना स्यादित्यतिप्रसङ्गः ॥ अथापि स्यात् । न सर्वथा नानु-
15 भूयते । किं तु । सूक्ष्मतयानुभूतमप्यननुभूतकल्पमित्यत्राह । अस्तीत्यादि ।

अस्ति सूक्ष्मतया दुःखं स्थौल्यं तस्य हृतं ननु ।
तुष्टिमात्रा ऽपरा चेत्स्यात्तस्मात्साप्यस्य सूक्ष्मता[1] ॥ ९१

अस्ति विद्यते । सूक्ष्मतया अनुपलक्ष्यमाणतया दुःख तर्हि

---

[1] Dev. 85 has tuṣṭimātrāparesthitet — tuṣṭimātrā'parā ...

बलीयसा सुखेन किं कृतमस्य। स्थौल्यमस्य कृतं ननु।
प्रहृष्टावस्थायां प्रवृत्तेन बलवता सुखेन स्थौल्यं प्राबल्यमस्य
दुःखस्य कृतमभिभूतं। ननु। नन्विति परस्य सम्बोधने। इति
मतं भो तव। न हि सूक्ष्मता नाम दुःखस्य सातानुभवकाले
का चिदुपलभ्यते। तत्कथ सूक्ष्मता तस्येति व[181ᵇ]क्तव्य[1]। 5
अथ तुष्टिमात्रा ऽपरा ---- तस्मात्[2]। तस्मादुद्भूतवृत्तेः
सुखात्। अपरा तुष्टिमात्रा द्वितीया सुखमात्रा अल्पीयसी
सुखकणिका स्यात्। दुःखस्य सूक्ष्मता भवेत्। चेदयभिप्रेत।
ननु सात्यस्य सूक्ष्मता सापि तुष्टिमात्रा ऽपरा। अस्य सुखस्यैव
सूक्ष्मता। न तु दुःखस्य। तुष्टेः[3] सुखजातित्वात्। इति दुःखस्य 10
सूक्ष्मता ऽवेद्यस्वभावा सुखानुभवकाले नास्त्येवेति निश्चित॥

स्यादेतत्। न दुःख काल्पनिकतया कादाचित्क। कि तर्हि
कारणवैकल्यात् कदा चिन्नोपलभ्यते। इत्यत्राह। विरुद्धे-
त्यादि।

विरुद्धप्रत्ययोत्पत्तौ दुःखस्यानुदयो यदि। 15

दुःखेन विरुद्धस्य सुखस्य य. प्रत्ययो हेतुः स्पर्शः। तस्यो-
त्पत्तौ साभिमुख्ये सति। अथ वा। विरुद्धस्य प्रत्ययस्य
सुखहेतोरुत्पत्तौ सन्निधाने विरुद्धः प्रत्ययो ऽस्येति वा। दुःख-

---

[1] MS vaktavyam atha

[2] The MS is almost illegible—the Tib. on te de ni de las gzhan dga tsam zhes te de-las ni phul du byuṅ bai bde las so = atha sā eva [duḥkhasūkṣmatā] tasmād aparā tuṣṭimātrā iti tasmād eva udbhūtavṛtteḥ sukhāt

[3] MS tuṣṭiḥ

नेत्यपेक्षायामपि गमकत्वात् भवति समासः । तस्योत्पत्तौ सत्यां प्रहृष्टावस्थायां हेतुवैकल्यात् दुःखस्यानुदयो दुःखस्यानुत्पत्तिरुच्यते । तदा ।

कल्पनाभिनिवेशो हि वेदनेत्यागतं ननु ॥ ९२

5 ननु यदेवास्माभिरभिहितं तदेव सांप्रतमागतमायातं । किं तत्कल्पनयाभिनिवेशः[1] । कल्पनया कृतो यो ऽभिनिवेशः । हिरवधारणे । स एव वेदना सुखा दुःखा तदितरा वा । नान्यदात्मवं सुखादिसुखादिहेतुर्वास्ति । इति । तथा हि निजस्वभावरहितमपि यत्सुखसाधनत्वेन परिकल्पितं तदभि-
10 निवेशात्सुखं वेदितमुत्पद्यते । इतरस्मादितरत् । कथमन्यथा यदेवान्यस्य दुःखसाधनं तदेवापरस्य कस्य चित्सुखसाधनं स्यात् । तस्यैवैकस्य यस्य शब्दश्रवणादपि दुःखमासीत् पुनः कालान्तरेण तस्य दर्शनात्प्रीतिरुपजायते । तस्मात्काल्पनिकमेव
15 सु[182a]खादिकं तत्साधनं वा न वास्तवं । आह च ।

अहिर्मयूरस्य सुखाय जायते
विषं विषाभ्यासवतो रसायनं ।
भवन्ति चानन्दविशेषहेतवो
मुखं तुदन्तः करभस्य कण्टकाः ॥ इति[2] ॥

20 वेदना ऽभिनिवेशस्वभावत्वादेव च विचारेण निवर्तयितुं शक्यत इत्याह । अत एवेत्यादि ।

---

1 MS kalpanāyābhi °—Tib rtogs-pas mnon-par zhen

2 Compare the Ustrakantakabhaksananyāya, Col Jacob, First handful, p iv

अत एव विचारोऽयं प्रतिपक्षो ऽस्य भाव्यते ।

अत एवेति । यत एवाभिनिवेशस्वभावा वेदना । अत एव विचारो ऽयं विमर्शो ऽयं । प्रतिपक्षो विरोधी निराकृतिकारणत्वात् । अस्याभिनिवेशस्य सुखादिरूपस्य । भाव्यते विचिन्त्यते । तत्साधनाभावे तदभिनिवेशाभावात् ॥ अपि च । इत्थमप्यभिनिवेशो वेदनेति । आह । विकल्पेत्यादि ।

विकल्पबीजसंभूतध्यानाहारा हि योगिनः ॥ ९३ ॥

अत एवेति [अत्रापि] वर्तते[1] । विकल्प एव बीजं जन्मभूमित्वात् । तस्मिन् संभूतं जातं ध्यानं विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं समाधिजं प्रीतिसुखमित्यादि । ध्यानादि भावना समाधिसमापत्तेर्विकल्पभवत्वात्[2] । तदेवाहारः । शरीरस्थापनाहेतुत्वात् । येषां ते तथोक्ताः । के ते । योगिनः । स्थिर्यस्मात्कल्पनानिर्मितप्रीतिसुखाहारसधारितशरीरा योगिनः । तस्मात्कल्पनाभिनिवेशो वेदनेति सिद्धं । एवं हेतुमभ्युपगम्याभिनिवेशो वेदनेति प्रतिपादितं ।

साम्प्रतं हेत्वनभिसंभवादेव न वेदना वस्तुसती युक्तेत्याह । सान्तरावित्यादि ।

---

[1] de ñid-kyi-phyir zhes pa ni hdir yaṅ hbrel-to

[2] So MS.—Tib. bde-ba zhes-pa la sogs-pai bsam gtan ni bsgom-pa yin-no tiṅ ne-hdzin ni sñoms-par hjug-pai yin-no rnam-par rtog pa-las byuṅ-ba yin-pai-phyir-ro = °*sukham ityādidhyānam bhāvanā, samādhiḥ samāpatteḥ, vikalpa-bhavatvāt.*

सान्तराविन्द्रियार्थौ चेत्संसर्गः कुत एतयोः।

अयमत्र समुदायार्थः। स्पर्शप्रत्यया वेदना। विषयेन्द्रिय-विज्ञानानां त्रयाणां सनिपातश्च स्पर्शः। स्पर्शाः षट् संनिपातजा इति वचनात्[1]। स च त्रिकसनिपातजः स्पर्श एव न घटते। 5 कुतस्तत्प्रत्यया वेदना भविष्यतीति। तथा हि। इन्द्रियार्थयोः सान्तरयोर्वा स्यान्निरन्तरयोर्वा। तत्रेन्द्रियार्थावत्रवि[182b]षयौ सान्तरौ सव्यवधानौ यदि तदा संसर्गः संनिपातो मीलन। कुतः कस्मात्। एतयोरिन्द्रियार्थयोः। नैव युज्यते। स्पर्शो हि सपर्क उच्यते। व्यवधाने सति स कथ भवेदिति भावः॥ 10 अथ द्वितीयः प्रकारः। सो ऽपि न युज्यत इत्याह। निरन्तर[त्व] इत्यादि।

निरन्तरत्वे ऽप्येकत्वं कस्य केनास्तु संगतिः॥ ९४

निरन्तरत्वेऽपि व्यवधानाभावेऽपि सति। एकत्वं तादात्म्य-मिन्द्रियार्थयोः। एव हि तयोः सर्वात्मना नैरन्तर्यं भवेद्य-15 द्यणीयसापि नांशेन व्यवधानं स्यात्सधर्मता[2] च। तत्रान्तर्भावे तत्त्वमेव। एवं च कस्य केनास्तु संगति। एकत्वे सति भेदा-भावात्। कि केन सगतं स्यात्। न ह्यात्मनैवात्मनः सगतिर्युक्ता॥ स्यादेतत्। निरंशानामेव परमाणूनां ससर्गो वस्तुतः। न च तत्रांशांशिव्यवहारो युक्तः। स्थूलरूपाणामेव तत्संभवात्। तत्र च 20 ससर्गदूषणे न किंचिद्दूष्यत[3] इत्यत्राह। नाणोरित्यादि।

[1] From Abhidharmakoça, III, 30

[2] MS sadharmitā, i erased

[3] MS from a second hand dduyate

नाणोरणौ प्रवेशोऽस्ति निराकाशः समश्च सः ।

परमाणूनामपि नैव संपर्को युक्तः । यत एकस्याप्यणोरन्यस्मिन्नणौ न प्रवेशोऽस्ति । नान्तर्भावोऽस्ति । कुतः । चो यस्मात् । निराकाशः स नीरन्ध्रः परमाणुः । समः स तुल्यः । निम्नोन्नताभावात्[1] । इति कथं निरंशस्य संगतिरस्तु[2] ॥ अथापि स्यात् । 5 मा भूदणोरणौ प्रवेशः । संगतिमात्रं केवलमस्तु । तावता सिद्धं नः साध्यमित्याह । अप्रवेश इत्यादि ।

अप्रवेशे न मिश्रत्वममिश्रत्वे न संगतिः ॥ ९५

सर्वात्मना हि संपर्कः संगतिरणोः । अन्यथा सांशत्वप्रसङ्गात् । तथा च तत्स्वरूपं स्वात्मना व्याप्नुवत एव तेन संगतिः । एवं 10 तत्स्वरूपमिश्रत्वाभावे संगतिर्न स्यात् । तच्च मिश्रत्वं तच्च प्रवेशमन्तरेण न भवेत् । इत्यमप्रवेशे प्रवेशाभावे सति न मिश्रत्वं नामभिन्नरूपत्वं । अमिश्रत्वे [183a][3] मिश्रत्वाभावे च न संगतिर्नासङ्गः ॥ निरंशस्य सर्वथैव संसर्गो न युज्यत इत्याह । निरंशस्य चेत्यादि । 15

निरंशस्य च संसर्गः कथं नामोपपद्यते ।

निरंशस्यांशशून्यस्य च पदार्थस्य । चो दूषणान्तरसमुच्चये । संसर्गो मीलनं कथं नामोपपद्यते । नामेति संभावनायां ।

---

1 *Unna[ta]tabhāvāt ?*

2 *Praveśo 'stu ?*

3 The fol. 183 is numbered 184 in the old pagination (letter numeral), 184 becomes 185.

कथं संसर्गः संभाव्यते। सर्वात्मनात्मावयवमेकेनांशेन भवितव्यं। यस्य पुनरंश एव नास्ति तस्यामूर्तस्यांशाभावेऽसत्त्वमेव प्राप्तमिति भावः[1] ॥ न चैतद्भ(व)तो[2]ऽपि प्रमाणप्रतीतं कश्चिदस्तीत्याह। [संसर्गं इत्यादि।

5 संसर्गं च निरंशत्वं यदि दृष्टं निदर्शय ॥ ९६

. . . . ाह।] विज्ञानस्य त्वित्यादि।

विज्ञानस्य त्वमूर्तस्य संसर्गो नैव युज्यते।

तुरतिशयाभिधाने। विज्ञानस्य विषयविज्ञप्तेः। पुनः संसर्गो नैव युज्यते। न संगच्छते। कुतः। अमूर्तस्येति हेतु-
10 पदमेतत्। मूर्तिशून्यस्य। विज्ञानस्य। अमूर्तत्वादित्यर्थः। परस्परसंपर्को हि संसर्गः। स च मूर्तिमतामेव विद्यते। यस्य तु मूर्तिरेव नास्ति। तस्य कथ संसर्गः स्यात् ॥ इति त्रयाणामपि संसर्गमवधूय संप्रति समूह एव वस्तुसन्नास्ति इति प्रतिपादय-न्नाह। समूहस्यापीत्यादि।

15 समूहस्याप्यवस्तुत्वाद्यथा पूर्वं विचारितं ॥ ९७

अपि दूषणसमुच्चये। समूहस्यापि संघातस्यापि। अवस्तु-त्वात्। वस्तुरहितत्वाद्शशविषाणवत्। संसर्गो नैव युज्यत इति

---

[1] See IX, 87

[2] MS. *bhāgato*

प्रकृतेन सबन्धः। समूहस्यैवाभावात् । कथं पुनरवस्तुकत्वं। यथा पूर्वं विचारित। यथा प्राङ्निरूपितं। एवमङ्गुलिपुञ्जत्वादित्यादिना[1] ॥ हेत्वसंभवमेवोपसंहरन्नाह। तदेवमित्यादि ।

तदेवं स्पर्शनाभावे वेदनासंभवः कुतः ।

तस्मादेवं प्रतिपादितक्रमेण स्पर्शनाभावे त्रिकसंपर्काभावे । 5
वेदनासंभवः कुतः। वेदनायाः सुखादिरूपायाः संभव उत्पादः। कुतो। नैव युज्यते। कारणाभावे कार्यस्य संभवायो[183b]गात् । इति परमार्थतो वेदनाभावे हिताहितविषयस्यासंभवात् ।

किमर्थमयमायासः ।

सुखदुःखसाधनप्राप्तिपरिहाराय यो ऽयमायासः क्रियते 10
स किमर्थः। आकाशचर्वणार्थमिव नैवोचित इति भावः ॥ मा भूत्सुखसाधनाय। दुःखस्याभिघोढुमशक्यत्वात् तत्परिहाराय भवतु चेदाह।

बाधा कस्य कुतो भवेत् ॥ ९८

वेदनाया विचारेण निःस्वभावत्वाद्बाधा [ऽ]विचारतः । 15
आत्मादेः पूर्वनिरस्तत्वाद्वेदकाभावः। उपघातहेतोरपि विकल्पकल्पितत्वात्। न परमार्थतः सत्त्व। इत्येवं बाधा पीड़ा वेदनाभावात्। कस्य वेदकाभावाद्भवेत् । कुत उपघातहेतोरभावाच्च भवेत् । नैव परमार्थतः कस्य चित्कुतश्चित्स्यात् ।

[1] IX, 86

तस्माद्वेदिचभावतो ऽपि[1] वेदना न युक्ता ॥ सम्प्रति वेदना-
भावात्तत्प्रत्यया[2] तृष्णापि कारणविरहात्परमार्थतो नोत्पाद-
मर्हतीत्युपदर्शयितुमाह । यदा नेत्यादि ।

यदा न वेदकः कश्चिद्वेदना च न विद्यते ।
5 **तदावस्थामिमां दृष्ट्वा तृष्णे किं न विदीर्यसे ॥ ९९**

यो वेदनां वेदयते स वेदको । यदा कश्चिदात्मादिर्नास्ति
तदभावात्तमनन्तरनिरूपणाच्च वेदना न विद्यते । तदावस्थामि-
मामेवविधां स्वजन्मविकलां दृष्ट्वा । उपलभ्य । तृष्णे किं न
विदीर्यसे । तद्दुःखदुःखितापि मनी किं न विशीर्यसे ।
10 यद्यापि तद्वियोगविधुरा त्वमात्मानं न मुञ्चसि ॥ स्यादेतत्
यदि वेदको न स्यात् । वेदना च नास्ति । केनायं तर्हि
सुखसाधनत्वादिना भावेषु दृष्टादिव्यवहारः प्रवर्तते । इत्यत्राह ।
दृश्यत इत्यादि ।

दृश्यते स्पृश्यते चापि स्वप्नमायोपमात्मना ।
15 **चित्तेन सहजातत्वाद्वेदना तेन नेक्ष्यते ॥ १००**

दृश्यते चक्षुरिन्द्रियजेन[4] । स्पृश्यते कायेन्द्रियजातेन चित्तेन
ज्ञानेन । एवं तर्हि चित्तमेव वेदकं वस्तुमदस्तीति चेदाह

[1] MS. vaiditrabhāvato, below p. 523, l 10 vedanitr
[2] MS vedānāṃtmabhavat
[3] Contrast the readings
[4] So MS

स्वप्नमायोपमात्मना । स्वप्नोपमस्व[184b]भावेन । मायोपमस्वभावेन च । प्रतीत्यसमुत्पन्नेन चित्तेन । न तु परमार्थसता ॥ कथं चित्ताद्व्यतिरिक्तं चित्तेन दृश्यते । सहजातत्वात् । चित्तेन सहोत्पन्नत्वात् । चित्तेन सह जन्म [यस्य] तस्य दर्शनमेकसामग्रीप्रतिब[द्ध]त्वात् । प्रतीत्यसमुत्पादस्याचिन्त्यत्वाच्च । न तु परमार्थतो दर्शनमस्ति येनैवं दृष्टादिव्यवहारः ॥ वेदना तेन नेष्यते । येन दृष्टसुखसाधनादिव्यवहारो ऽप्यन्यत एव । तेन कारणेन वेदना नेष्यते । न दृश्यते वस्तुतः ॥ अथापि स्यात् । न सहज दृश्यते । अपि तु ज्ञानं विषयाकारतया तत उत्पद्यमानमुत्तरकालं तस्य ग्राहकमुच्यते । इत्येतदपहस्तयितुमाह । पूर्वमित्यादि ।

पूर्वं पश्चाच्च जातेन स्मर्यते नानुभूयते ।

अवश्यं सहजातस्य वेदनं । अन्यथा पूर्वं प्राग्भावि पश्चादुत्तरकाल जातेनोत्पन्नेन ज्ञानेन । स्मर्यते नानुभूयते । स्मृतिरूपेण विषयीक्रियते न साक्षात्क्रियते । तज्ज्ञानकाले तस्यातीतत्वात् । न चातीतस्य स्वरूपेण वेदनमुचितमविद्यमानत्वात् । स्वरूपवेदनं चानुभवः । तस्मात्स्मरणमात्रमेतत् । तच्च युक्तं न स्वरूपवेदनं । वेदनाया स्वभावव्यवस्थापकं लक्षणमेवायुक्तमित्याह । स्वात्मानमित्यादि ।

स्वात्मानं नानुभवति ।

स्वात्मानं स्वं स्वरूपं नानुभवति न वेदयते । स्वसंवेदनस्य पूर्वं निरस्तत्वात् ॥ अन्येन तर्हि सा ज्ञानेनानुभूयते वेदना । आह ।

न चान्येनानुभूयते ॥ १०१

5 न च नैव । अन्येन तत्समानकालभाविना ज्ञानेनानुभूयते । वेद्यते । ज्ञानस्य ज्ञानान्तरेणावेदनात् ।

न चास्ति वेदकः कश्चिद्वेदनातो न तत्त्वतः ।

न च नैवास्ति वेदकः कश्चिद्यो वेदनां वेदयते । चित्त-मन्यद्वा । अतो अस्मात्कारणाद्वेदना अनुभव इति वेदना-
10 लक्षणशून्यत्वाद्वेदना न तत्त्वतः न परमार्थतः । अन्य[184b]चाभि-निवेशात् । तत्स्वरूपप्रतिपादकस्य कस्यचिदभावात् ॥ [1]एतदुक्त-मार्याक्षयमतिसूत्रे । अपि तु खलु पुनरभिनिवेशो वेदना । परिग्रहो वेदना । उपादानं वेदना । उपलम्भो वेदना । विपर्यासो वेदना । विकल्पो वेदनेत्यादि । धर्मसंगीतिसूत्रेऽप्युक्तं ।

15 वेदनाऽनुभवः प्रोक्ता केनाऽसावनुभूयते ।
वेदको वेदना वेद्यः पृथग्भूतो न विद्यते ॥[2]
एवं स्मृतिरुपस्थेया वेदनायां विचक्षणैः ।
यथा बोधिस्तथा ह्येषा शान्ता शुद्धा प्रभास्वरा ॥[1]

---

[1] [1] Çikṣāsamuccaya, 233, 7 13

[2] So MS Çi has *vedako vedanād anyaḥ*-Our reading is more than doubtful

तस्माद्वेदकवेदनास्वभावशून्यं प्रतीत्यसमुत्पन्नमात्रं निर्व्यापारमस्वामिकं मायाप्रपञ्चवदुपलम्भगोचरतामुपगतमिदं कडेवरमवभासते। इति न कस्य चित्सुख वा दुःख वा स्वकीयं भवतीत्याह। निरात्मक इत्यादि।

निरात्मके कलापेऽस्मिन् क एव बाध्यते ऽनया॥१०२ 5

निरात्मके कस्य चिदात्मादेर्वेदकस्याभावादस्वामिके कलापे। एकस्यानुयायिनो ऽभावात्। प्रतीत्यसमुत्पन्नमात्रेऽस्मिन् मायास्वभाववदुपलम्भगोचरतामुपगते। एवमिन्द्रजालवत्पश्यन्। संजातविस्मयो ब्रूते। क एवं बाध्यतेऽनया। एवमुक्तक्रमेण कस्य चिद्वेदयितुरभावाद्वेदनायाश्च। कः परमार्थतोऽनया वेदनया 10 बाध्यते। पीड्यते। विचारतो नैव कश्चित्। तस्मान्मिथ्याविकल्प एवायं सुखादिसाधनाध्यवसायः। तदेतद्वेदनास्मृत्युपस्थानं दर्शित ॥

सांप्रतं चित्तस्मृत्युपस्थानमुपदर्शयितुमाह। नेन्द्रियेष्वित्यादि।

नेन्द्रियेषु न रूपादौ नान्तराले मनः स्थितं। 15
नाप्यन्तर्न बहिश्चित्तमन्यत्रापि न लभ्यते॥१०३

तत्र षष्ठं तावन्मनोविज्ञानं निरूपयति। तथा क्व पुनरिदं मनोविज्ञानं स्वयमुपस्थितं। तत्र न तावदिन्द्रियेषु चक्षुरादिषु मनः स्थितं स्थितिमुपगतं। न रूपादौ विषये मनः स्थित। नान्तराले। नापीन्द्रियविषययोरन्तराले मध्ये म[185a]नः 20

स्थितं। एकत्राप्यनिश्चितस्वरूपत्वात् । नाप्यन्तर् [न] बहिश्चित्त। नाप्यन्तर्न मध्ये कायस्य चित्तं। नापि बहिः। न बाह्येषु शरीरावयवेषु चित्तं लभ्यते । अन्यत्रापि न लभ्यते । उक्तेभ्यः स्थानेभ्यः। अन्यत्रापि क चिद्देशान्तरे यत्र वा न लभ्यते। न प्राप्यते विचारतः ॥ तथा क चित्कथ चिद्भवति ततः कथं तस्य निषेध इत्यत्राह। यन्न काय इत्यादि।

यन्न काये न चान्यत्र न मिश्रं न पृथक् क चित्।
तन्न किं चिदतः सत्त्वाः प्रकृत्या परिनिर्वृताः ॥ १०४

यच्चित्तं न काये वा बाह्याभ्यन्तरे शरीरे। न चान्यत्र नैव कायादन्यत्र बाह्ये वस्तुनि । न मिश्रं क्रियाविशेषणमेतत्। द्वयोराध्यात्मिकबाह्ययोर्मिश्रमपि न स्थितं। यच्चित्तं न पृथक्कायात्। नापि पृथक् स्वातन्त्र्येण च क चिदवस्थितं यच्चित्त। तत्परमार्थतो न किं चिन्न वस्तुसत्। कल्पनोपदर्शितमेव तत्। अमंसार चित्त मायावत्प्रतिभासो निःस्वभावत्वात्। अतोऽस्मात्कारणात्सत्त्वा प्राणिन' प्रकृत्या स्वभावेन परिनिर्वृताः परिमुक्तस्वभावा निःस्वभावतालक्षणस्य प्रकृतिनिर्वाणस्य सर्वसत्त्वसंतानेषु सदा विद्यमानत्वात् । स्वयमेव त्वभूतपरिकल्पवशादसत्यपि सत्यमारोप्य क्लेशवासनोपहतसंततिचित्तवृत्तयः समारचारकावरोधनिषिद्धस्वातंत्र्यवृत्तयोऽपरिमुक्ता इत्युच्यन्ते। न तु परमार्थतः ॥ इति मनो विचार्यापि। चक्षुरादिविज्ञानं विचारयन्नाह। ज्ञेयादित्यादि ।

ज्ञेयात्पूर्वं यदि ज्ञानं किमालम्ब्यास्य संभवः।
ज्ञेयेन सह चेज्ज्ञानं किमालम्ब्यास्य संभवः॥ १०५

तथा हि [न] कश्चित्सदा सद्रूपतयावस्थितं ज्ञानं। किं तु चक्षुरादिसामग्रीं प्रतीत्योत्पद्यमानं रूपादिज्ञेयग्राहकमित्युच्यते। इति परस्याशयमाशङ्क्य विकल्पयति। तत्पुनर्ज्ञेयात्पूर्वं वा स्यात्। ज्ञेयसमानकालं वा ज्ञेयस्य पश्चाद्वेति। तत्र यदि प्राचीनो विकल्पस्तत्राह। ज्ञेयाद्ग्राह्यविषयात्। पूर्वं प्रागेवानुत्पन्न एव ज्ञेये यदि ज्ञानमुत्पन्नमभिधीयते। तदा किमालम्ब्यास्य संभवः। पूर्वं ज्ञेयमालम्बनमन्तरेण किमालम्ब्य किमाश्रित्यास्य[2] संभव उत्पादः॥ द्वितीयपक्षमाश्रित्याह। ज्ञेयेन ग्राह्यविषयेण सह समानकालं चेद्यदि ज्ञानं किमालम्ब्यास्य संभवः। समानकालस्य ज्ञेयस्याकारणतया अनालम्बनत्वात्। नाकारणं विषय इति वचनात्॥ अथ तृतीयः [155b] प्रकारः स्वीक्रियते। अथेत्यादि।

अथ ज्ञेयाद्भवेत्पश्चात्तदा ज्ञानं कुतो भवेत्।

अथेति पृच्छायां। ज्ञेयादिति पूर्वं ज्ञेयं। पश्चात्तदनन्तरं निवृत्ते ज्ञेये भवेदुत्पद्येत ज्ञानं। तदा ज्ञानं कुतो भवेत्। ज्ञानकाले ज्ञेयस्य निवृत्तत्वात्। कुत आलम्बनात्। ज्ञानं

[1] ā second hand ... (illegible)
[2] First hand ā ... (illegible)
[3] Compare above IX 22

भवेत् । किमाश्रित्योत्पद्येत[1] । तस्माद्विषयादिसामग्रीतोऽपि परमार्थतो न सिध्यति ज्ञानं ।

इदं चित्तस्मृत्युपस्थानमार्यरत्नकूटादिष्वभिहितं[2] । स एवं चित्तं [परि]गवेषते । कतरत्तच्चित्तं[3] रज्यति वा दुष्यति वा
5 मुह्यति वा । किमतीतमनागतं प्रत्युत्पन्नं वेति । तत्र यदतीतं तत्क्षीणं । यदनागतं तदसंप्राप्तं । प्रत्युत्पन्नस्य स्थितिर्नास्ति । चित्तं हि काश्यप नाध्यात्मं न बहिर्धा नोभयमन्तरेणोपलभ्यते । चित्तं हि काश्यपारूप्यनिदर्शनमप्रतिघमविज्ञप्तिकमप्रतिष्ठमनिकेतं[4] । चित्तं हि काश्यप सर्वबुद्धैर्न दृष्टं । न
10 पश्यन्ति । न द्रक्ष्यन्ति । [यत्सर्वबुद्धैर्न दृष्टं न पश्यन्ति न द्रक्ष्यन्ति][5] कीदृशस्तस्य प्रचारो द्रष्टव्यः । अन्यत्र वितथपतितया संज्ञया धर्माः प्रवर्तन्ते । चित्तं हि काश्यप मायासदृशमभूतकल्पनतया[6] विविधामुपपत्तिं[7] परिगृह्णाति । पेयालं । चित्तं हि काश्यप नदीस्रोतःसदृशमनवस्थितमुत्पन्नभग्न-
15 विलीनं । चित्तं हि काश्यप दीपार्चिःसदृशः हेतुप्रत्ययतया प्रवर्तते । चित्तं हि काश्यप विद्युत्सदृशं क्षणभङ्गानवस्थितं । चित्तं हि काश्यपाकाशसदृशमागन्तुकैः क्लेशोपक्लेशैरुपक्लिश्यते ।

---

[1] MS *açrtya*

[2] Quoted in Çikṣās from Ratnakuta, p 233, 15-234, 18.

[3] Çi has *katarat tu*

[4] Çi has *arupam*

[5] From Çi

[6] Çi has *kalpanaya*

[7] *Skye ba* rebirth (Bendall)

पेयालं । यावच्चित्तं हि काश्यप परिगवेष्यमाणं न लभ्यते[1] । यन्न लभ्यते तन्नोपलभ्यते । तन्नैवातीतं नानागतं न प्रत्युत्पन्नं । तत्त्र्यध्वसमतिक्रान्तं । यत्त्र्यध्वसमतिक्रान्तं तन्नैवास्ति न नास्ति [इत्यादि] ॥

एवं चित्तस्मृत्युपस्थानं प्रतिपाद्य धर्मस्मृत्युपस्थानं प्रतिपाद- 5
यितुमुक्तमेव क्रम योजयन्नाह । एवं चेत्यादि । [186a] ।

एवं च सर्वधर्माणामुत्पत्तिर्नावसीयते ॥ १०६

चकार एवकारार्थः । एवमेव यथोदितन्यायेन सर्वधर्माणां सर्वभावानामुत्पत्तिरुत्पादो नावसीयते । न प्रतीयते । तेषामपि स्वहेतुतः पूर्वं समानकालं पश्चाद्वोत्पत्ताविदमेव दूषणं यथासंभव वाच्यं । उत्पादाभावान्निरोधो ऽपि न युज्यते । 10
अनुत्पन्नस्य निरोधायोगात् । अत एव चानुत्पन्नानिरुद्धस्वभावतया निष्प्रपञ्चत्वात्सर्वधर्मा विमोक्षाभिमुखा धर्मधातुनिर्याता आकाशधातुपर्यवसाना अप्रज्ञप्तिका अव्यवहारा अनभिलाप्या अनभिलपनीया इत्युच्यन्ते । एव धर्मस्मृत्युपस्थानेनाविरहितं सर्वधर्मेष्वनासङ्गज्ञानमुत्पद्यते[2] ॥ 15

धर्मस्मृत्युपस्थानभावना च । आर्याक्षयमतिसूत्रे दर्शिता[3] । यदुक्तं । धर्मे धर्मानुपश्यी[4] विहरन्बोधिसत्त्वो न कं[5] चिद्धर्मं

---

[1] See Madh. vṛtti, p. 45, l. 1.
[2] Anāsaṅgam.
[3] Ci. p. 236, 6.
[4] Çi. -darçī.
[5] MS. kiṃ.

समनुपश्यति । यतो न बुद्धधर्माः । यतो न बोधिर्यतो न मार्गो । यतो न निःसरणं । सर्वधर्मा[1] निःसरणमिति[2] विदित्वाऽनावरण-महाकरुणासमाधिं[3] समापद्यते[4] । स सर्वधर्मेषु सर्वक्लेशेषु च कृत्रिमसंज्ञां प्रतिलभते । निःक्लेशा[5] एते [धर्मा] नैते सक्लेशाः । [तत्कस्य हेतोः] । तथा ह्येते नीतार्थं[6] समवसरन्ति । नास्ति क्लेशानां संनिचयो[7] राशीभावः । न रागभावो न द्वेषभावो न मोहभावः । एषामेवानुबोधाद्बोधिः[8] । यत्स्वभावाश्च क्लेशा-स्तत्स्वभावा बोधिरित्येव स्मृतिमुपस्थापयतीति ॥ उक्तं च ।

उत्पत्तिर्यस्य नैवास्ति कस्य का निर्वृतिर्भवेत् ।
मायागजप्रकाशत्वादादिशान्त[9] तु यत्नतः ॥
यः प्रतीत्यसमुत्पादः शून्यता सैव ते मता[1] ।
तथाविधश्च सद्धर्मस्तत्समश्च तथागतः ॥
तत्तत्त्वं परमार्थोऽपि तथता द्रव्यमिष्यते ।
भूतं तदविसंवादि तद्बोधाद्बुद्ध उच्यते ॥ इति ॥

एवं धर्मस्मृत्युपस्थानमुपदर्शयता सर्व[10]धर्मा अनुत्पन्ना-निरुद्धाः प्रकाशिताः ॥

1 First hand [illegible]
2 MS *nissaraṇam* and elsewhere
3 Ç. *anāvaraṇam nāma mahā*[illegible]
4 MS *pratilabhate*
5 MS *nikleçā*
6 MS [illegible]
7 Ç. *saṁcayo*
8 Ç. [illegible]
9 [illegible]
10 MS [illegible] — Compare [illegible]

तथा सति । संवृतिसत्यमयुक्तमित्युक्तं स्यात् । ततः सत्यद्वय-
व्यवस्थापनं न घटत इति परिहर्तुं चोद्यमुत्थापयन्नाह ।
यद्येवमित्यादि ।

यद्येवं संवृतिर्नास्ति ततः सत्यद्वयं कुतः ।

यदि परमार्थतः सर्वधर्मा अनुत्पन्नानिरुद्धस्वभावाः । एवं 5
सति संवृतिर्नास्ति । व्यवहारो न स्यात् । परमार्थसत्यमेवैकं
स्यात् । ततः संवृतेरभावात् । सत्यद्वयं । संवृतिसत्यं परमार्थ-
सत्यं चेति । यदुक्तं

संवृतिः परमार्थश्च सत्यद्वयमिदं मतं

इति । तदेतत्सत्यद्वयं कुतः । नैव स्यात् । तदभावाच्च 10
परलोकगमनकर्मक्रियाफलसंबन्धस्वभावोपार्जनादि न स्यात् ।
सर्वव्यवहाराभावात् ॥ अथापि स्यात् । यदि नाम नास्ति
तथा मरीचिकासु जलकल्पनयेव संवृतिस्वभावया कल्पनया
बुद्ध्या व्यवस्थाप्यते । ततः सत्यद्वयमुत्पद्यत इत्याशङ्कयन्नाह ।
अथ सेत्यादि । 15

अथ साप्यन्यसंवृत्या ।

अथेति प्रश्ने । सापीति संवृतिर्न केवलं परमार्थसत्यमित्य-
पेरर्थः । अन्यया संवृत्या कल्पनाबुद्धिरूपया व्यवस्थाप्यते । अथ

वा ऽपिरवधारणे भिन्नक्रमे[1] च। अन्यथैव संवृत्येति योजनीयं। एवमेकं संधित्सतो ऽन्यत्प्रच्यवत[2] इत्युपदर्शयन्नाह।

स्यात्सत्त्वो निर्वृतः कुतः॥ १०७

इति। यदि परमार्थतस्तत्स्वभावशून्यमपि कल्पनाबुद्धि-
5 विषयीकरणात्। सांवृतमुच्यते। यो ऽपि तर्हि सर्वधर्मनिः-
स्वभावतालक्षणं परमार्थसत्यमधिगम्यानुपलम्भयोगेन। सर्व-
प्रपञ्चविरहात्। परिनिर्वृतिमुपयातः। सो ऽपि सत्त्वः परि-
निर्वृतो विनिर्मुक्तः कुतो भवेत्। नैव स्यात्। तस्यापि बुद्ध्या
विषयीकरणात्। बुद्धिश्च सर्वैव संवृतिः कल्पनास्वभावत्वात्।
10 बुद्धिः संवृतिरुच्यत इति वचनात्। निर्वृतिरपि सं[187a]वृतिः
स्यात्॥ अत्र परिहारमाह। परचित्तेत्यादि।

परचित्तविकल्पो ऽसौ।

परस्य निर्वृतसत्त्वादन्यस्य सत्त्वस्य चित्तं तस्यासौ विकल्पः।
योऽयं निर्वृतस्यापि बुद्ध्या विषयीकरण। न हि परचित्त-
15 विकल्पेनान्यस्य संवृतिर्युक्ता। ततो ऽन्यबुद्ध्या विषयीक्रियमाणोऽपि
निर्वृत एवासौ। कुतो यतः।

---

[1] So MS

[2] See Col. Jacob, Handful of Popular Maxims I, 2d ed., 1907, p. 14

स्वसंवृत्या तु नास्ति सः ।

तु पूर्वस्मादिशेषमभिधत्ते । स्वसंवृत्या निजसंवृत्या स्वकल्पनया स इति परिनिर्वृतो नास्ति न विद्यते । परिनिर्वृत एव स इति स्वयमस्य सर्वविकल्पोपरमात् ॥ अन्यथापि तर्हि कथमन्यसंवृतिः स्यादित्यचाह । स पश्चादित्यादि ।

स पश्चान्नियतः सो ऽस्ति न चेन्नास्त्येव संवृतिः ॥ १०८ 5

अस्मिन् सतीदं भवति । अस्योत्पादादिदमुत्पद्यत[1] इति । इदंप्रत्ययतामात्रमेव संवृतिः । इति धर्मेभ्यो धर्म उत्पद्यमानः पश्चाद्भावी भवेत् । ततः स पश्चान्नियतो धर्मः सो ऽस्ति यदि । तदा ऽस्त्येव संवृतिः । न चेद्यदि स नास्ति तदा नास्त्येव संवृतिः । गगनेन्दीवरादिष्विदंप्रत्ययताया अभावात् ॥ एतदुक्तं 10 भवति । यदि नाम परिनिर्वृतो बुद्धा विषयीकृतो । नैव तावता परचित्तविकल्पमात्रेण तस्यापरिनिर्वृतिः । स्वयमस्य सर्वविकल्पप्रपञ्चोपशमात् । न रक्तचित्तेनालम्बितः स्वयं प्रहीणसर्वक्लेशावरणो वीतरागो ऽप्यवीतरागो भवेत् । तस्मात्सर्वकल्पनाविरहादन्यसंवृत्यालम्बितो ऽपि स्वयं परिनिर्वृत एवासौ 15 परमार्थतः । अत एव सर्वधर्माः सर्वकल्पनाशून्यत्वादनुत्पन्नानिरुद्धस्वभावत्वाच्च प्रकृतिपरिनिर्वृताः । आदिशान्ता इत्युच्यन्ते।

---

[1] MS. *Upalabhyata* see p. 474, l. 18

तथापि तथाविधेभ्य एव तथाविधा अन्ये धर्मा उत्पद्यन्ते
निरुध्यन्ते च । मायास्वभाववत् । तेन च रूपेण परिकल्प-
वशात्पुनरालभ्यमानाः सांवृताः । वास्तवरूपाभावा[187b]त्वा-
नुत्पन्नानिरुद्धा इत्युच्यन्ते । खरविषाणवत् ॥

5 यदुक्तं[1] । शून्येभ्य एव शून्या धर्माः प्रभवन्ति धर्मेभ्य इति ।
आर्यललितविस्तरेऽप्युक्तं[2] ।

संस्कार प्रदीप अर्चिर्वत् । क्षिप्रमुत्पत्तिनिरोधधर्मकाः ।
अनवस्थित मारुतोपमा । फेनपिण्डेव असार दुर्बलाः ॥
संस्कार निरीह शून्यका । कदलीस्कन्धसमा निरीक्षते[4] ।
10 मायोपम चित्तमोहना । बालउल्लापन रिक्तमुष्टिवत् ॥

पेयालं ।

यथा मुञ्ज प्रतीत्य वल्वज । रज्जुव्यायामबलेन वर्तिता ।
घटियन्त्र सचक्र वर्तते । तेषु एकैकशु[5] नास्ति वर्तना ॥
तथा सर्वभवाङ्गवर्तनी[6] । अन्यमन्योपचयेन निश्रिता ।
15 एकैकशु[7] तेषु वर्तनी[1] पूर्व अपरान्त नोपलभ्यते ॥
मुद्रात्प्रतिमुद्रा दृश्यते । मुद्रासंक्रान्तिर्न चोपलभ्यते ।

---

[1] See p 455 l 13

[2] Raj Mitra pp 209, 210, 211 Lefmann, p 176 See Çikṣas, p 237 Madhyamakavṛtti, p 551—I give the readings of the MS without corrections

[3] Second hand *saṃskarāḥ*

[4] Second hand *nirīkṣyante*

[5] Second hand *ekaikaśe*

[6] Second hand *aṅgam* (?)

[7] Second hand °*śas*

न च तत्र न चैव मान्यतो । एवं संस्कार[1]नुच्छेदशाश्वतः ॥
अरणि यथ चोत्तरारणि । हस्तव्यायामत्रयेभि[2] संगतिः ।
इति प्रत्ययतोऽग्निर्जायते । जातु ज्ञन्तुकार्य[3] लघु निरुध्यते ॥
अथ पण्डित[4] कश्चि मार्गते[5] । कुतो ऽयमागत[6] कुत्र याति वा ।
विदिशो दिशि सर्व मार्गतो । नागतिर्नास्य गतिश्च लभ्यते ॥ 5
स्कन्धायतनानि धातवः । तृष्ण अविद्या[7] इति कर्मप्रत्यया ।
सामग्रि तु क्लेशसूदना[8] । सा च परमार्थत[9] नोपलभ्यत । इति ॥

चतुस्तवेऽप्युक्त[10] ।

निरुद्धाद्वानिरुद्धाद्वा बीजादङ्कुरसम्भवः ।
मायोत्पादवदुत्पादः सर्व एव त्वयोच्यते ॥ 10
अतस्त्वया जगदिदं परिकल्पसमुद्भव ।
परिज्ञातमसद्भूतमनुत्पन्न न नश्यति ॥
नित्यस्य संसृतिर्नास्ति नैवानित्यस्य संसृतिः ।
स्वप्नवत्संसृतिः प्रोक्ता त्वया तत्त्वविदां वर ॥ इति ॥

तस्मात्परमार्थत उत्पादनिरोधाभावे[186a]ऽपि न संवृति- 15
सत्यविरोध इति सर्व समञ्जसं ॥ ननु यदि परमार्थतो-

---

[1] Second hand *saṃskāra*

[2] From a second hand first hand illegible

[3] = *kṛtakārya*

[4] Second hand °*taḥ*

[5] Second hand *n mārgate*

[6] Second hand °*taḥ*

[7] *a* erased by second hand avagraha

[8] Common reading sattvasūcanā

[9] Second hand °*to*

[10] See IX 36 and 76 Catustava, of course, is correct

ऽनुत्पन्नानिरुद्धाः सर्वधर्मास्तदा न ज्ञानं न च ज्ञेयं वस्तुतः संभवति । तत्किमिह केन विचार्यत इति विचारो ऽपि न स्यात् । अतस्तूष्णीमेव स्थातव्यमित्यत आह । कल्पनेत्यादि ।

कल्पना कल्पितं चेति द्वयमन्योन्यनिश्रितं ।
यथाप्रसिद्धमाश्रित्य विचारः सर्व उच्यते ॥ १०९

कल्पना आरोपिका बुद्धिः । कल्पितं तया समारोपितं । चेत्युक्तसमुच्चये । इत्येव द्वयमुभयमन्योन्यस्य[1] निश्रित परस्पर-समाश्रितं[2] । कल्पनापेक्षया कल्पितं । कल्पितापेक्षया कल्पनेति । यथा प्रसिद्धं लोकव्यवहारतो निश्चितमाश्रित्य गृहीत्वा विचारो विमर्शः[3] सर्व उच्यते । अभिधीयते । सर्व इति न कश्चिदेव विचारोऽपि संवृतिमाश्रित्य प्रतन्यते । न तु परमार्थसत्यं । तस्य सर्वव्यवहारातिक्रान्तत्वादित्यर्थः ॥ विचारोऽपि बहिर्विचार-वत्काल्पनिकस्वभावत्वादिचारयितव्य इति चेत् । विचारस्या-प्यविचारत्वादित्यभिसंधायाह । विचारिते[ने]त्यादि ।

विचारितेन तु यदा विचारेण विचार्यते ।
तदानवस्था तस्यापि विचारस्य विचारणात् ॥ ११०

विचारितेन तु परीक्षितेन पुनर्यदा विचारेण विचार्यते । निरूप्यते । तदानवस्थाऽप्रतिस्थानं स्यात् । कुतः । तस्यापि

---

[1] Adverbial use of *anyonyasya*, Goldstucker, 148*b*, 20
[2] See Senart, Mhv I, 456.
[3] MS *vimarsah*

विचारस्य विचारणात् । योऽसौ विचारस्य विचारणार्थं विचार उपादीयते । तस्यापि विचारस्य विचारणाद्धेतोः ॥ विचार्ये[1] तर्हि विचार्यमाणे कथमियमनवस्था न स्यादित्यचाह । विचारित इत्यादि ।

विचारिते विचार्ये तु विचारस्यास्ति नाश्रयः ।　5
निराश्रयत्वान्नोदेति तच्च निर्वाणमुच्यते ॥ १११

विचार्ये तु परीक्ष्ये पुनर्वस्तुनि विचारिते निर्णीते सति विचारस्य निर्णयस्य पुनरुत्तरकाल कर्तव्यस्याश्रयो नास्ति । यमाश्रित्य पुनर्विचारानुसरणेना[न]वस्थानं स्यात् । विचार्यस्य विचारणे चरितार्थतया पुनराकाङ्क्षाभावात् । अत एव निरा- 10 श्रयत्वान्नोदेति । आश्रयाभावान्न पुनर्विचारः प्रवर्तते । सर्व-समारोप[189b]निषेध विधाय वस्तुतत्त्वपरिज्ञानात्क्रतकृत्यत्वात् । प्रवृत्तिनिवृत्त्यभावात् । न क्व चित्सज्यते[2] । नापि विरज्यते । तच्च निर्वाणमुच्यते । सर्वव्यवहारनिवृत्तेः । सर्वत्र निर्व्यापारतया प्रशान्तत्वात् । तदेव निर्वाणमभिधीयते ॥ कल्पितविषये 15 ऽवश्यमेव सर्वत्र विचारः सत्यो न तु परमार्थत इत्याह । यस्य त्वित्यादि ।

यस्य त्वेतद्द्वयं सत्यं स एवात्यन्तदुःस्थितः ।

यस्य पुनः परमार्थसद्भाववादिन. । एतद्द्वयं विचारो विचार्य

---

[1] First hand [illegible]　　[2] So MS

चेति। एतदुभयमपि सत्यं। परमार्थसत्। स एव भाव-
स्वभाववादी। अत्यन्तदुःखितः। अत्यन्तमतिशयेन दुःखेन
स्थितो दुःखितः। दुष्करकरणीयत्वात्। एतदेवोपदर्शयन्नाह।
यदीत्यादि।

5 **यदि ज्ञानवशादर्थो ज्ञानास्तित्वे तु का गतिः॥ ११२**

यदि ज्ञानवशात्। ज्ञानस्य प्रमाणस्य वशात्सामर्थ्यात्।
अर्थं प्रमेयं व्यवस्थाप्यते। तदा भवतु नाम प्रमाणात्प्रमेय-
व्यवस्था। को नाम निवारयति। केवलमिदमिह निरूपणीय।
ज्ञानास्तित्वे तु का गतिः। ज्ञानस्य प्रमाणस्य पुनरस्तित्वं कुतो
10 निश्चितमिति वक्तव्य। स्वसंवेदनस्याभावात्। प्रमाणान्तरान्वेषणे
ऽनवस्थानं स्यादिति का गतिराश्रयणीया॥ स्यादेतत्।
स्यादेवानवस्थानं यदि ज्ञानास्तित्वे प्रमाणान्तरं मृग्यते।
यावता प्रमेयादेव प्रमाणव्यवस्था तत्कुतोऽनवस्थानं स्यादित्या-
शङ्कयन्नाह। अथेत्यादि।

15 **अथ ज्ञेयवशाज्ज्ञानं ज्ञेयास्तित्वे तु का गतिः।**

अथेति पराभिप्रायप्रकाशने। अथ ज्ञेयस्य प्रमेयस्य वशात्।
ज्ञानं व्यवस्थाप्यते। तर्हि ज्ञेयास्तित्वे तु का गतिः। यदि
ज्ञेयवशात्। ज्ञानं व्यवस्थाप्यते। तदा स्वयमेव ज्ञेयं ज्ञानास्तित्वे
व्यवस्थानिबन्धनं स्यात्। तच्च कुतः प्रमाणात्सिद्धमिति पृच्छति।
20 ज्ञेयास्तित्वे पुनः का गतिरिति। प्रमेय[18a]सिद्धये ज्ञाना-
न्तरानुसरणे तदपि ज्ञानान्तरं कुतः सिद्धमिति वक्तव्य

तस्मादेव ज्ञेयादिति चेत् । ज्ञेयं कुतः सिद्धं । तत्सिद्धौ ज्ञानान्तरानुसरणे पुनरनवस्थानमपर्यवस्थानं च स्यात् ॥ स्यादेतत् । भवेदेतत् । यदि ज्ञानस्य ज्ञेयस्य वा सिद्धये ज्ञानान्तरापेक्षा स्यादपि तु परस्परमितरेतरस्य सिद्धिरतो नोक्तदोषप्रसङ्ग इति परास्याशयमाविर्भावयन्नाह । अथान्यो 5 न्येत्यादि ।

अथान्योन्यवशात्सत्त्वमभावः स्याद्द्वयोरपि ॥ ११३

अथ पुनरेवमभिधीयते । अन्योन्यस्य ज्ञानस्य ज्ञेयस्य परस्परस्य वशात्सामर्थ्यात् । ज्ञानज्ञेययोरपि सत्त्वमस्तित्वं निश्चीयते । ज्ञानवशाज्ज्ञेयस्य ज्ञेयवशाच्च ज्ञानस्येति यावत् । 10 तदेव सति । अभावः स्याद्द्वयोरपि । द्वयोरपि ज्ञानज्ञेययोरभावः स्यात् । एकस्यापि न सत्त्वसिद्धिर्भवेत् । इतरेतराश्रयत्वादेकस्यासिद्धौ द्वितीयस्याप्यसिद्धिः ॥ अत्र प्रकृतानुरूपदृष्टान्तमाह । पिता चे[दि]त्यादि ।

पिता चेन्न विना पुत्रात्कुतः पुत्रस्य संभवः । 15
पुत्राभावे पिता नास्ति ।

पिता जनकः । यदि पुत्रं विना पुत्रमन्तरेण न स्यात् । पुत्रजननसापेक्षत्वादस्य व्यपदेशस्य । तर्हि कुतः पुत्रस्य संभवः । कुतः कस्मात्पितुरभावात्पुत्रस्य जन्यस्य संभवो जन्मास्तु । किमिति चेत् । पुत्राभावे पिता नास्ति हेतुपदमेतत् । यतः 20

पुत्रस्याभावेऽसत्त्वे पिता नास्ति पिता न भवति । पित्रा हि पुत्रो जनयितव्यः । स च न पुत्रं यावज्जनयति तावत्पितैव न भवति । यावच्च पिता न भवति तावत्पुत्रस्य तस्मात्स-भवो नास्ति । अत इतरेतराश्रयणादेकाभावादन्यतराभावः
5 स्यादिति । द्वयोरप्यनयोरभाव इति समुदायार्थः ॥ अमुमर्थं दार्ष्टान्तिके योजयन्नाह । तथेति ।

तथासत्त्वं तयोर्द्वयोः ॥ ११४

यथाऽत्र पितापुत्रोदाहरणे[1] तथाऽसत्त्वं तथैवाभाव । तयोर्द्वयोर्ज्ञानज्ञेययो । तथा हि ज्ञेयजननाज्ज्ञानमुच्यते
10 [189b] ज्ञानपरिच्छेद्यतया च ज्ञेयमिति यावज्ज्ञान न सिध्यति । यावत्परिज्ञान[2] न सिध्यति । तावत्तत्परिच्छेद्यतया च ज्ञेयं न सिध्यति । इतरेतराश्रयणादुभयाभावः स्यादिति भाव ॥ स्यादेतत् । न ब्रूमोऽन्योन्यवशात्सिद्धिरनयोरपि तु ज्ञेयकार्यं ज्ञान । ततो ज्ञानादङ्कुराद्बीजमिव ज्ञेय सेत्स्यति ।
15 इति पराशयमुद्भावयन्नाह । अङ्कुर इत्यादि ।

अङ्कुरो जायते बीजाद्बीजं तेनैव सूच्यते ।
ज्ञेयाज्ज्ञानेन जातेन तत्सत्ता किं न गम्यते ॥ ११५

अङ्कुरो जायते । उत्पद्यते । बीजात्स्वलविलान्तर्गतात् । बीजं तेनैव बीजाज्जातेनाङ्कुरेण सूच्यते । गम्यते यथा ।

[1] MS. *nam*

[2] MS *[illegible]*. The whole clause is doubtful.

तथात्र ज्ञेयात्प्रमेयात् । ज्ञानेन जातेनोत्पन्नेन । तत्सत्ता तस्य ज्ञेयस्य सत्ता सद्भावः किं न गम्यते । किं न प्रतिपद्यते । अत्रापि बीजाङ्कुरवत् कार्यकारणभावस्य विद्यमानत्वात् ॥ नायं सदृशो दृष्टान्त इत्याह । अङ्कुरादित्यादि ।

अङ्कुरादन्यतो ज्ञानाद्बीजमस्तीति गम्यते । 5
ज्ञानास्तित्वं कुतो ज्ञातं ज्ञेयं यत्तेन गम्यते ॥ ११६

अङ्कुरात्कार्याद्बीजमस्तीति यद्गम्यते । तन्नायमस्यैव केवलस्य प्रभावः । किं तर्हि । अन्यतो ज्ञानादङ्कुरव्यतिरिक्तात् तदस्तीति गम्यते[1] । तथा हि न योग्यतामात्रेण कार्यं कारणस्य गमकं । बीजस्यैव अङ्कुरजननमप्रतिपन्नस्यापि[2] गमकत्वं स्यात् । 10
नापि स्वरूपप्रतीतिमात्रेण ऽप्रतिपन्नकार्यकारणभावस्यापि तत्प्रतिपत्तिप्रसङ्गात् । अपि त्वविनाभावित्वेन निश्चितं । अतः प्राक्प्रतिपन्नकार्यकारणभावस्य पुनः पश्चात्क्वचिद्बीजाविनाभाविनमङ्कुरमुपलब्धवतोऽङ्कुराद्ध्यवसायात्मकमनुमानमुत्पद्यते । ततो बीजमस्तीत्यवसीयते । अतो ज्ञानविषयीकृत एवाङ्कुरो 15
बीजप्रतिपत्तिहेतुः ॥

---

1 ... — *b...* It is not by the sole knowledge of this *ankura* that one understands that this *ankura* has a *bija*, but owing to a knowledge produced from elsewhere ... knowledge of the *ankuras* of the *bijas* and of the necessary relation between them.—See on this topic Nyayabindu, p 22, and Sarvadarsana, pp 7 and 8

2 One who does not know that *ankuras* are born from *bijas*

Ms ... *...ayatmakam — ...*

ज्ञानास्तित्व ज्ञानस्य सद्भावः । कुतो ज्ञातं कस्मात्प्रतीत ।
स्वसंवेदनाभावादनवस्थानभयेन[1] ज्ञानान्तराननुसरणाच्च । ज्ञेय
यत्तेन गम्यते । यद्यस्माज्ज्ञेयं [190b] तेन ज्ञानेन ज्ञेयकार्येण
गम्यते । अवसीयते । न हि स्वयमनिश्चितं लिङ्ग साध्यस्य
5 गमकमुपपद्यते । ज्ञापकहेतुत्वादस्य ज्ञेयगमकत्व ॥ तस्माद्वास्तव-
पक्षे ज्ञानज्ञेयासिद्धेर्विचारः कर्तुमशक्य । काल्पनिकपक्षे तु
यथाप्रसिद्धव्यवहारमाश्रित्य शक्यत इति निश्चित ॥

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुत ।
उत्पन्ना जातु विद्यन्ते भावाः क्व चन के चन[2] ॥

10 इत्यस्यार्थस्य समर्थनार्थं नाप्यहेतुत इति तुरीयकोटि-
प्रसाधनाय तावत्स्वभाववादिमतमपाकर्तुमाह । लोक इत्यादि ।

लोकः प्रत्यक्षतस्तावत्सर्वं हेतुमुदीक्षते ।

तथा हि ते स्वपरस्वभावसर्वहेतुनिरपेक्षमेव[3] भावग्राम-
वैचित्र्यमुत्पद्यत[4] इति वर्णयन्ति । यतो न पङ्कजादीनां नाल-
15 पत्त्रदलकेसरादिकमनेकप्रकारभेदभिन्नवैचित्र्यमचेतना जल-
पङ्कादयो निर्वर्तयितुमलं । न च चेतनोऽपि कश्चिदन्यः
कर्मणा[5] तादृश निर्माणप्रवीण उपलभ्यते । नापि चाद्रियते

1 MS. sthānambhavayena
2 See Madhyamakavṛtti, p. 12; above p. 357.
3 Compare above p. 357, l. 11.
4 MS. has upapadyate. In Amṛtakaṇikā [illegible] sarvabuddhamayabhāvanā [illegible] māvabodhat [illegible] sarvavit
5 na in the margin and very doubtful. First hand has [illegible], ca in the margin.

तत्कर्मणो ऽपर्यवसानात् । युगपदपर्यन्तविशेषेषु व्यापारायोगाच्च । तस्मात् किंचित्कारणमन्तरेणैव सर्वमिदं जगद्वैचित्र्यमुत्पद्यत इति तेषां मतं । तदुक्तं ।

> सर्वहेतुनिराशंस भावानां जन्म वर्ण्यते ।
> स्वभाववादिभिस्ते च नाहुः स्वमपि कारणम् ॥
> राजीवकेसरादीनां वैचित्र्यं कः करोति हि ।
> मयूरचन्द्रिकादिर्वा विचित्रः केन निर्मितः ॥
> यथैव कण्टकादीनां तैक्ष्ण्यादिकमहेतुकं ।
> कादाचित्कतया तद्वद्दुःखादीनामहेतुता[1] ॥

तदेववादिनो लोकप्रतीतादेव हेतुसामर्थ्याद्बाधा स्यादित्युपदर्शयति । लोकः सर्वो जनः । प्रत्यक्षत इन्द्रियाश्रिताज्ज्ञाना[⁰⁰¹ᵇ]त् । प्रत्यक्षत इत्युपलक्षणादनुमानतोऽपि[2] तत्प्रतीतिभावात् । प्रत्यक्षानुमानाभ्यामिति यावत् । सर्वमनेकप्रकारं । हेतुं जगद्वैचित्र्यकारणं । उदीक्षते । तदन्वयव्यतिरेकानुविधायि कार्यमुपजनयन्तं पश्यति । यत्कार्यं यस्य सद्भावे भवति तदभावे च न भवतीति प्रतीयते । स तस्य हेतुरिति निश्चीयते । इति लोकप्रतीतादेव हेतुव्यापारादस्याहेतुकत्वप्रतिज्ञा बाध्यते । तदेवोपदर्शयन्नाह । पद्मनालादीत्यादि ।

---

[1] tat tad query tadvat Compare Saddarsana (ed L Suali), p 13 kah kantakanam prakaroti taiksnyam

[2] MS apavakanat

पद्मनालादिभेदो हि हेतुभेदेन जायते ॥ ११७

पद्मस्य राजीवस्य नालमादि येषां पत्त्रदलकेसरादीनां ते तथोक्ताः तेषां भेदो नानात्व । हिर्यस्मात् । हेतुभेदेन हेतोः कारणस्य भेदेन विशेषेण जायते । उत्पद्यते । नान्यथा । अनियमेन सर्वत्र सद्भावप्रसङ्गत् । अतो यद्यस्यान्वयव्यतिरेकानु-
5 विधान कुर्वत्प्रतीयते तत्तस्यैव कार्य नान्यस्येत्युपगमनीय । यस्मात्प्रतिनियतकारणादेव प्रतिनियतविशेषोत्पत्ति । तद्भेदेन तद्भेदादिति नाहेतुमती ॥ ननु भवेदेष विशेषो यदि हेतो-रेव स्वयमसौ विशेषः सिद्धः स्यात् । किं तु तस्यैव कुतः स भवतीति वक्तव्य । न च निर्विशेषाद्विशेषोत्पत्तिः पुनरहेतुत्व-
10 प्रसङ्गात् । इत्याशङ्कां परिहरन्नाह । किङ्कृत इत्यादि ।

किंकृतो हेतुभेदश्चेत्पूर्वहेतुप्रभेदतः ।

किङ्कृतः केन कृत कुतो यात । हेतुभेदश्चेत् । हेतोर्भेदो विशेषश्चेदुच्यते । पूर्वहेतुप्रभेदतः । पूर्वस्य प्राक्तनस्य तज्जनकस्य हेतोः प्रभेदतः । प्रभेदाद्विशेषात् । तस्यापि तत्पूर्वस्य हेतोः कुतो
15 विशेष इति चेत् । पुनस्तत्रापि पूर्वहेतुविशेषादिति वक्तव्य । [191.] इत्युत्तरोत्तरस्य विशेषाकाङ्क्षाया पूर्वपूर्वस्य विशेषा-दित्युत्तर वाच्यं । न चैवमनवस्थानमनिष्टं किं चिदापादयति

1 Or [illegible]

See Garbe, Sāṃkhya-Philosophie, p. 159

अनवराग्रस्य संसारस्य पूर्वकोटिर्न प्रज्ञायत[1] इत्युपगमात्॥ अत एव फलविपर्ययोऽपि न स्वतो भवतीत्याह। कस्माच्चेदित्यादि।

कस्माद्धेत्फलदो हेतुः पूर्वहेतुप्रभावतः॥ ११८

कस्मात्कारणात्फलदो विशिष्टफलदानसमर्थो हेतुश्चेत्। पूर्वहेतुप्रभावतः पूर्वस्य तज्जनकस्य हेतोः सामर्थ्यात्। स्वहेतुना स तादृशस्तस्य स्वभावोऽजनि येन सहकारिविशेषोपहित-कार्योत्पादानुगुणविशेषपरम्परापरिणतिमधिगच्छन्समति प्रति-बन्धवैकल्ययोः सभवे तथाविधमेव फलमुत्पादयति। अतो-ऽविपरीतफलदानमपि स्वहेतुसामर्थ्योपजनितमेव। तेनाभ्युदय-नि श्रेयससाधनहेतोर्यथास्वमभ्युदयनि श्रेयसमेव फलं जायते। तद्विपरीताद्विपरीतमिति न कथ चिदपि विपर्ययः॥

एतच्चावश्य स्वभाववादिना सहेतुकत्वमकामकेनापि स्वीकर्तव्यं। कथमन्यथा। हेतुमन्तरेण। प्रतिज्ञातमहेतुकत्व भावानां सेत्स्यति। प्रतिज्ञामात्रेण तस्य केन चिदग्रहणात्। हेतुव्यापारेण तत्प्रसाधयतः स्वयमेव पुन सहेतुकत्वाभ्युपगमाद्वन्ध्या मे मातेति ब्रुवत इव प्रतिज्ञायां[2] स्ववचनेन बाधन स्यात्। इत्युभयतःपाशा रज्जुरिति[3] सकटप्राप्तो बताय तपस्वी॥ तदुक्त।[4]

---

[1] See Madhyamakavṛtti, p. 219

[2] Or *pratijñāyāḥ* ?

[3] See Col. Jacob Third Handful

[4] Compare Sarvadarśana p. 8 &c

न हेतुरस्तीति वदन् सहेतुकं
ननु प्रतिज्ञां स्वयमेव शातयेत् ।
अथापि हेतुप्रणयालसो भवेत्
प्रतिज्ञया केवलयास्य किं [101b] भवेत् ॥ इति ।

5 तस्मात्कुदृष्टिविजृम्भितमेवैतत्प्रमाणबाधितत्वात् ॥

एवं स्वभाववादिनं निराकृत्य चतुर्थप्रकारप्रसाधनार्थमेवेश्वरकारणतां जगतः प्रत्याख्यातुं तदुपक्षेपं कुर्वन्नाह । ईश्वर इत्यादि ।

ईश्वरो जगतो हेतुः ।

10 ईश्वरकारणवादिनो हि स्वभाववादिमतनिषेधमाकर्ण्य विशेषमभिधातुमर्धमवसितं भारस्येति मन्यमानाः प्राहुः । साहाय्यमेवानुष्ठितमेव भवद्भिः । न हि कारणमन्तरेणैव जगद्वैचित्र्यमुत्पद्यते । देशाद्यनियमप्रसङ्गात् । केवलमचेतनाः पुनरमी जलपङ्कादयो वैचित्र्यासामर्थ्या इति युक्तमनेनोक्तं । तत्रा-

15 स्त्येव स भगवान् विश्ववैचित्र्यनिर्माणप्रवीणः । जगदेकसूत्रधारः । सकलजगदादिभूतः । नित्यात्मतया सर्वदानुपहतशक्तिप्रभावः । सर्वभावानां कार्यकारणभावादितत्त्ववेदी । समस्तार्वाचीनदर्शनागोचरमाहात्म्य ईश्वरः । तेन हेतुना सहेतुकं सकलमिदं सचराचरं जगदिति कः सचेतनोऽन्यथा वक्तुमुत्सहते ॥

20 इति नैयायिकादिवेश्मकथामभिधाय प्रत्याचष्टे । ईश्वरो जगतो हेतुः । ईश्वर इति प्रकारख्याख्या । स एव जगतो

विश्वस्य हेतुः सृष्टिस्थितिप्रलयकारण। तस्मादेवैतद्विश्वमशेष-मुत्पद्यते। अन्यथा पुनरचेतनोपादानत्वात्कथममी गिरिसरिद्व-निसागरादय उत्पत्तिभाजो भवेयुः। चेतनावदधिष्ठानात्पुन-रिमे समुत्पत्तुमुत्सहन्ते। तद्व्यापारेणैव प्रवर्तनात्। तदुक्तं।

सर्वोत्पत्तिमतामीशमन्ये हेतु प्रचक्षते। 5
नाचेतनः स्वकार्याणि किल प्रारभ[192a]ते स्वय॥
न स्यान्मेरुरयं न चेयमवनी नैवायमम्भोनिधिः
सूर्यचन्द्रमसौ निवेशसुभगौ नैतौ जगच्चक्षुषी।
ईशानो न कुलालवद्यदि भवेद्विश्वस्य निर्माणकृत्
सत्त्वादीश्वरकर्तृक जगदिद वक्तीति कश्चित्किल॥ इति। 10

तस्माज्जगदेवमचेतनविश्वस्वभावमीश्वरकारणतामात्मनो ब्रूते॥ अत्रोच्यते। किमनया स्वगृहीतोपकल्पितया प्रमेय-रचनया वचनरचनाप्रपञ्चमालया। नैतदुच्यमानमपि स्वसमया-भिनिवेशिनां जड़धियां प्रीतिकरं प्रमाणशून्यं विदुषां सतोष-मुत्पादयति। तथा हि यद्यसौ कारुणिक किमर्थं पुनरिमान् 15
नरकादिदुःखपीडितान् प्राणिनः करोति। तथा च सति कारुणिकत्वं तस्य श्रद्धासमधिगम्यमेव स्यात्॥ [1]स्वकृतासत्कर्म-फलोपभोगेन तत्क्षेपापनयने[2] यस्य प्रवृत्तिः कथमकारुणिको नामेति चेत्। न। तत्कर्म कारुणिक किमिति कारयति

---

[1] MS *sakṛta*, tib ran gis byas pa

[2] MS *tat kṣayāpanayasya pravṛtteḥ*, tib de la gton ba dan sel ba la gzin zhiṅ ḥjug par ḥgyur ba

येनानिष्टं फलमुपभुज्यते । तत्रापि तस्य व्यापारात् । सर्वोत्पत्ति-
मतां निमित्तकारणत्वात् ॥ अपि च किं तस्मिन्नव्याप्रियमाणे
तत्कर्मफलमुपभुज्यते न वा । यदि प्रथमः पक्षस्तदा कथमेतत् ।

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
5 ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव च ॥ इति[1] ।

सर्वकार्येष्वेव तद्व्यापाराभ्युपगमस्यानेनैवानैकान्तिकताप्रसङ्गात् ।
अथ द्वितीयः । तदा कृपालुरसौ तत्रोपेक्षां किमिति नाधि-
वासयति यद्यत्नेन साहाय्यमेव तत्रोपकल्पयति । अथ कृतस्य
कर्मणोऽविप्रणाशाद्वश्यं तेन तत्फलमनुभवितव्यमिति तदुप-
10 [192b]भोगाय व्याप्रियत इति चेत् । कथं पुनरेतस्मिन्नव्या-
प्रियमाणे ऽवश्यं तेनानुभवितव्यं सामग्रीवैकल्यात् । कः पुनरेवं
विप्रणाशे ऽपि दोषः । प्रयत्नत एव ततो निवर्तितुमुचितं कारु-
णिकस्य । एवं हि तदिच्छायत्तवृत्तितया[2] तस्यापरिपाकान्तेन
स्वमैश्वर्यमुपदर्शितं तत्र भवेत् । अत्र सत्त्वानां तत्कर्मसंचोदितोऽसौ
15 दयालुरपि त्रातुमशक्तः । महद्वतानेन स्वमैश्वर्यमित्थं द्योतित-
मन्यत्र स्यात् । तत्परकर्मणापि समाकृष्टो नाम नात्मनि
वशित्वमधिगच्छति । ईश्वरतः[3] कर्मण एव महत्सामर्थ्यमेव

---

[1] This verse occurs in Sarvadarçana (former edition), p. 82 *svargam va çvabhram eva vā* (same reading in Saddarçanasamuccaya, ed. Suali pp. 12, 53), see Cowell's note p. 116, who refers to Mbh. III. 30. 28 (Protap's edition) *svargam narakam eva ca*, and Gaudapada S. Kār. 61 (p. 37, Ben. S. S. n° 9).

[2] MS. *tasyāḥ p°*.

[3] MS. *içvarato*

प्रकाशितं स्यात् । तद्वरं कर्मैव पर्युपास्यं यत्सामर्थ्येन समाहन्यमाणो महेश्वरोऽपि स्थातुमसमर्थः तस्मादिदमव्याहतमेव ।

नमः सत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति । इति[1] ॥

अथ न कारुणिकः । तदासौ वीतरागः सरागो वा । यद्याद्यो विकल्पः । तदा यदि नाम दयाविरहात्सुखं नोपनयति दुःखं तु जनस्य कस्मादुत्पादयतीति वक्तव्यं । दुःखं हि रागादिवशेन कस्य चिदुपनीयते । ते चास्य न सन्ति कथमकारणमेव जनं दुःखयति । क्रीडार्थं दुःखयतीति चेत् । क्रीडार्थं वीतरागस्य प्रवृत्तिरिति निश्चितमसौ वीतरागः । रागादिमतामपि तावज्जितेन्द्रियाणां न क्रीडार्थं दृश्यते प्रवृत्तिः । किं पुनर्वीतरागाणां तथा भविष्यति । न रक्षःक्रूरपिशाचादिमन्तरेणान्यस्य परदुःखेन क्रीडा सम्भाव्यते ॥

अथावीतराग इति पक्षः । तदा कथमयमितरजनसाधारणः सन्नीश्वरो भवितुमर्हति । रागादिक्लेशपाशाय[103a]त्तवृत्तेर्जगदैश्वर्यायोगात् । अन्यथा तदन्यस्यापि तथाविधस्य तत्प्रसङ्गात् । नापि संसारचारकोपरुद्धस्यातन्त्र्यस्य विश्ववैचित्र्यरचनाचातुर्यं तदन्यस्येव युज्यते । तदेवमखिलमेव भवन्तं विप्रलम्भयति यदेवंविधस्यापि यावदैश्वर्यमभ्युपगम्यते ॥ भवतु वा तथाविधस्यापि कर्तृत्वं । तथापि किमसौ स्वस्थात्मा [अस्वस्थात्मा वा] ।

---

[1] Vulgata *namas tat°* Bhartrhari, II 92 (Bohlen), Çilhana's Çāntiçataka, I 1, Subhāsitāvalī 3079, Çārngadharapaddhati, 436 (Bhartrhari) [F W Thomas]

यदि स्वस्थात्मा तदा किमिति जनमकाण्डमेव दुःखयति । न हि स्वस्थात्मा निरपराधं जनं पीडयन् दृष्टः । अथ विमार्गगामिनमेव कृतापराधं पीडयतीति चेत् । विमार्गगामिनमप्ययमेव कारयति । तथाभूतमपि कारयित्वा पुनः पीडय-
5 तीति । स लौकिकेश्वराणामपि[1] जघन्यतया वृत्तिमतिशेते । ते हि स्वयंकृतापराधमेवापराधिनमनुशासति । अयं पुनरात्मनैव कारयित्वेति महानस्य विशेषः ॥ अथास्वस्थात्मा । तदा साधु तदाराधने स्वर्गापवर्गार्थिनां प्रेक्षावतां प्रवृत्तिः । न ह्युन्मत्तस्याराधनमुन्मत्तकादन्यः कर्तुमुत्सहते । तथा हि स्वर्गा-
10 दिलिप्सया तदाराधनाय प्रवर्तन्ते प्रेक्षावन्तः । तच्चापरिनिश्चितस्वभावतया ततो न संभाव्यते । विपर्ययोऽपि वा तदाराधनफलस्य संभाव्यते । तदाराधनप्रवृत्तास्तु गाढतरश्रद्धावशेन तमुन्मत्तमाचक्षाणा आत्मानमेवोन्मत्तकमाचक्षीरन् । कथमन्यथा तदाराधने प्रवर्तन्ते ॥ तदपरोन्मत्तकैर्वा किमपराद्धं यतस्ते न
15 पर्युपास्यन्ते । तेषां प्रभावातिशयविकलत्वादिति चेत् । न वै प्रकृतेऽपि कं चित्प्रभा[193b]वातिशयमुत्पश्यामः । उन्मत्तकसकलजगदतिशायिशक्तिरिति कोऽन्य उन्मत्तकादक्तुमर्हति । तदयमभिविचार्यमाणो न क्वचिदवस्थानं लभत इत्यलं दुर्मतिविच्छन्दितेष्वादरेणेति । तस्मात्सूक्तमेतद्यदुक्तं ।

20 सुखस्य दुःखस्य न कोऽपि दाता

---

[1] MS ṇāṃ ntāṃ

परो ददातीति कुबुद्धिरेषा ।
स्वकर्मसूत्रग्रथितो हि लोकः
कर्ताहमस्मीति वृथाभिमानः ॥ इति ।

तस्मादकर्तृकमेवेदं जगदशेषमिति ॥ न परिदृष्टकारणा-
दन्यः स्वतन्त्रश्चेतनो वा तस्य कर्ता कश्चिदस्ति । इदमेव 5
विस्तरेण प्रतिपादयितुं सिद्धान्तवादी प्राह ।

वद कस्तावदीश्वरः ।

ईश्वरकारणवादिनं पृच्छति । वद ब्रूहि कोऽयमीश्वरो
भवतोऽभिमतः । तावच्छब्देनेदमभिधत्ते । येषां[1] क्षित्यादीनाम-
न्वयव्यतिरेकानुविधायि कार्यमुपलभ्यते । तत्र कतमदीश्वरं 10
भवानाचष्टे । न चानुपलब्धान्वयव्यतिरेकव्यापारस्य कारणता
प्रकल्पयितुं युक्ता । अतिप्रसङ्गात् । तस्मात्तत्कारणतामिच्छता
दृष्टान्वयव्यतिरेकव्यापार एवाङ्गीकर्तव्यः । न चान्यस्य क्षिति-
बीजादिव्यतिरिक्तस्यान्वयव्यतिरेकानुविधानं कुर्वद्दृश्यते कार्यं ।
तत्कथं तस्य कार्योपयोगित्वं व्यवस्थाप्यते । तदुक्तं । 15

येषु सत्सु भवत्येव . . . .[2]
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः ॥ इति ।

अथ पृथिव्यादीनि भूतान्येवेश्वरो भवत्विति पराभिप्राय-
माशङ्क्याह भूतानि चेत् ।

---

[1] Or kṣitibījādīnām

[2] MS may be *yat tebhyo 'nyasya kalpane*—Tibetan gives no help, it has *yeṣu satsu yad eva bhavati taddhetutvena* [gaṅ dag yod na gaṅ ñid ḥgyur | de rgyu ñid du]

भूतानि चेद्भवत्वेवं नाममात्रेऽपि किं श्रमः ॥ ११९

यदि भूतानि पृथिव्यादीनीश्वर उच्यते तदाभ्युपगम्यत एव। भवत्वेवं। एवमस्तु। न वयमत्र विप्रतिप[104a]द्यामहे। क्षित्याद्यन्वयव्यतिरेकानुविधानतः कार्यस्य दर्शनात्। 5 केवलं नाममात्रेऽपि किं श्रमः। नामैव केवलमर्थभेदशून्य नाममात्रकं। अपिरवधारणे। नाममात्र एव किमिह महासमारम्भेण तत्प्रसाधनाय श्रम आयासः क्रियते। मया क्षित्यादय उच्यन्ते। त्वया पुनस्तान्येव भूतानीश्वर इति नार्थतः कश्चिद्विशेषः। न चात्र विप्रतिपत्तावर्थशून्यायां किंचित्फल-10 मुपलभ्यते॥ अथास्त्येवार्थविशेषस्तदा नैषामीश्वरत्व युक्तमित्याह[1] अपि त्वित्यादि।

अपित्वनेकेऽनित्याश्च निश्चेष्टा न च देवताः।
लङ्घ्याश्चाशुचयश्चैव क्ष्मादयो न स ईश्वरः॥ १२०

अपितुशब्देनाधिकमाह। नैते क्षित्यादयो भवतामीश्वर-15 त्वेन कल्पयितु युज्यन्ते। तल्लक्षणायोगात्। कथ कृत्वा। अनेके नानास्वभावा। अनित्याश्च विनश्वरस्वभावाः। निश्चेष्टाः। अचेतनतया निर्व्यापाराः। न च देवता। नापि चाराध्यरूपाः। लङ्घ्याश्चातिक्रमणीयाः। अनभ्यत्वात्। अशुचयश्चैव अपवित्रा। अमेध्यादिष्वपि पृथिव्यादिसद्भावात्। क्ष्मादय क्ष्मा

[1] First hand °tv ayuktam, second hand illegible

पृथिवी आदिर्येषामप्तेजोवायूनां ते तथोक्ताः । न स ईश्वरः । स ईश्वरस्तादृक्स्वभावो न भवति । तत्षट्प्रकारविपरीतत्वात् ॥ यदि क्ष्मादयो नेश्वर आकाशं तर्हि भविष्यतीत्याह ना[काश-मित्यादि ।

नाकाशमीशोऽचेष्टत्वात् । 5

आ]काशमपीश ईश्वरो न भवति । कुतः । अचेष्टत्वात् । स्वभावविकलतया निर्व्यापारत्वात् । परमतेऽपि निष्क्रिय-त्वात् ॥ आत्मा तर्हि भवतु ।

नात्मा पूर्वनिषेधतः ।

पूर्वमेव विस्तरेणात्मनः प्रतिषिद्धत्वात् । निःस्वभावः शश- 10 विषाणवदसौ ॥ अथापि स्यात् । अवितर्क्यमाहात्म्यत्वादस्य नार्वाग्दर्शनैरिदमित्थमिति तत्स्वरूप विवेचयितुं शक्यमि-त्याह । अचिन्त्यस्येत्यादि ।

अचिन्त्यस्य च कर्तृत्वमप्यचिन्त्यं किमुच्यते ॥ १२१

यद्यसौ चिन्तातिक्रान्तमाहात्म्यः । तदाचिन्त्यस्य च चिन्ता- 15 पथमतिक्रान्तस्येश्वरस्य । कर्तृत्व युगपत्कारणत्वमप्यचिन्त्यमतर्क्य किमुच्यते । किमभिधीयते । कर्तृत्वमप्यस्याचिन्त्यत्वान्न वक्तु-मुचितमित्यर्थः ॥ स्यादेतत् । अतिदुर्लक्ष्यस्वभावतया चिन्तयि-तुमशक्योऽसौ । कार्यं तु तस्य । सर्वजनप्रतीतिसाधारणत्वात् । चिन्त्यमेवेति ब्रुवाणं प्रत्याह । तेन किमित्यादि । 20

तेन किं स्रष्टुमिष्टं च ।

भवतु नाम तस्य कार्यं चिन्त्यं। तथापि तेन किं स्रष्टुमिष्टं च। तेनेश्वरेणाचिन्त्यमाहात्म्येन किं कार्यं स्रष्टुं निर्मातुमिष्टमभिप्रेतं च। इति परस्योत्तरमाशङ्कयन्नाह

5 **आत्मा चेत्।**

अत्र पूर्वपदस्याकारेण छन्दोऽनुरोधात्सन्धिर्न कृतः। आत्मा तेन स्रष्टुमिष्ट चेन्मतं। एतत्प्रतिषेधयति।

नन्वसौ ध्रुवः।

ननु भो असावात्मा ध्रुवो नित्योऽभिमतो भवतां। तत्कथ-
10 मसौ क्रियते। अन्यथा नित्य एव स न स्यात्। सदकारणवन्नित्यमिति नित्यलक्षणाभावप्रसङ्गात्॥ अन्यत्रापि न तस्य सृष्टिव्यापार उपलक्ष्यत इत्याह। क्ष्मादीत्यादि।

**क्ष्मादिस्वभाव ईशश्च ज्ञानं ज्ञेयादनादि च॥ १२२
कर्मणः सुखदुःखे च।**

15 आदिशब्देनाप्तेजोवाय्वाकाशकालदिङ्मनांसि गृह्यन्ते। तेषां स्वभावो ध्रुवः। सोऽपि न तेन क्रियते। पृथिव्यादीनां परमाणूनां नित्यत्वाभ्युपगमात्। स्थूलरूपे च तद्व्यापारस्य निषेत्स्यमानत्वात्। आकाशादीनामपि नित्यत्वात्। गुणादीनामपि विचार्यमाणत्वात्। ईश[195a]श्चेति। ईश्वरोऽपि ध्रुव इत्यात्मानमसौ न
20 करोति। ज्ञान ज्ञेयादनादि चेति। ज्ञानमपि ज्ञेयादुत्पद्य-

मानसनादि च। आसंसारं ज्ञेयमालम्ब्य प्रवर्तनात्तदपि न तेन क्रियते। तत्कर्मणः सुखदुःखे च। कर्मणः शुभाशुभाद्यथासंभवं सुखदुःखे च भवत इष्टानिष्टविपाकजे। तत्रापि न तस्य व्यापारः[1] ॥ एवं सति।

वद किं तेन निर्मितं। 5

ब्रूहि किमिदानीं तेनेश्वरेण निर्मितं रचितं। इति न क्वचित्तस्य सामर्थ्यमुपलभ्यते। तत्कथमस्य जगत्कर्तृत्वमुच्यते ॥ अधुना सर्वत्र साधारणं दूषणमाह। हेतोरित्यादि।

हेतोरादिन चेदस्ति फलस्यादिः कुतो भवेत् ॥ १२३

तथा ह्यसौ नित्यो वा जगतो हेतुः स्यादनित्यो वा। 10 नित्य एव तद्वादिभिरसौ परिकल्पितः। तत्र नित्यत्वे सति हेतोः कारणस्यादिर्नास्ति यदि। तदा फलस्यादिः कुतो भवेत्। फलस्य तज्जन्यस्य कार्यस्य सदा प्रवृत्तत्वादादिः कुतो भवेत्। नैव स्यादित्यर्थः। नित्यमुपस्थिते समर्थस्वभावे हेतौ कार्यमपि तज्जन्यमजस्रमेव जायेत। इति तत्सामर्थ्यप्रतिबद्धं 15 कार्यं सदा प्राप्नोति। तत्

कस्मात्सदा न कुरुते।

कस्मात्कारणात्सदा सर्वकालं न कुरुते। न सर्वं कार्यं जनयतीति कथं कस्य चित्कार्यस्य कदा चित्क्रियाविरामः ॥

---

[1] See Sāmkhyasūtra V 2

अथ वान्यथावतार्यते । यदि च नेश्वरो जगतः कर्ता स्यात् । कथमिदं प्रलयानन्तरमादितः सर्गभाग्भवेत् । इत्यत्राह । हेतोरित्यादि ॥ अनवराग्रो हि जातिसंसारः । ततश्च हेतोः क्लेशकर्मादिलक्षणस्य । आदिः पूर्वकोटिः । न चेदस्ति । फलस्य सत्त्वभाजनलोकविवर्तादिलक्षणस्य । आदिः प्रथमारम्भः कुतो भवेत् । नैव विद्यत इत्यर्थः । अनादौ संसारे हि सत्त्वानां कर्माधिपत्येन स्थितिसंवर्तविवर्तानां प्रवर्तनात् । एतच्चोक्तमेव कर्मणः सुखदुःखे चेत्यनेन ॥

अथ वा अत्रापीश्वरमेवाभिसंधायोक्तं हेतोरिति । हेतोरीश्वरस्यादिर्न चेदस्ति । प्रलयकालेऽपि तस्यानुपहततया माहात्म्यस्याभ्युपगमात् । फलस्य तत्कृतस्य सर्गादिलक्षणस्यादिः कुतो भवेत् । नित्यतया तत्कारणस्य सदा समर्थत्वात्सर्गादिकमपि नित्यमेव स्यात् । अतो नित्यसमर्थे तस्मिन् सर्गादेरादिरेव न स्यात् । ततः कथं सर्गस्यादावपि तस्य व्यापारो भवेत् ॥

अपि च यद्यसौ कर्ता स्यात्तदा नित्यत्वात्

कस्मात्सदा न कुरुते ।

सर्गादिकमिति शेषः । तथा हि यदि कदा चित्सर्गं करोति । तदा तत्कारणस्वभावतया[1] सदा तमेव कुर्यात् । एवं स्थितिसंहारयोरपि वक्तव्यं युगपद्वा सर्गादिक्रिया तस्य स्यात् । अत एव च हेतोरुपरमाभावात् । न फलस्यापि विरामः । अन्यत्पूर्ववत् ॥

1 MS. *tatkarana.*

अथापि स्यात्। यदि नामासौ सदा समर्थस्वभावः। तथापि कदा चित्सहकारिवैकल्यान्न करोतीत्याह।

न हि सोऽन्यमपेक्षते

इति। समर्थस्वभावो हेतुरीश्वरः। हिर्यस्मात्। नान्यं सहकारिणमपेक्षते। नित्यस्य समर्थस्वभावस्य सतस्तदपेक्षायोगात्। न हि नित्यतयाऽनाधेयातिशयस्य का चिदपेक्षा नाम[1]। विशेषोत्पत्तौ वा तदव्यतिरिक्तस्वभावस्य तस्याप्युत्पत्तिप्र[196a]सङ्गात्। व्यतिरेके वा विशेषादेव कार्योत्पत्तिः। तस्याकारकत्वं स्यात्। तदुक्तं

अपेक्ष्यते परः कश्चिद्यदि कुर्वीत किं च न।[2]
यदकिंचित्करं वस्तु किं केन चिदपेक्ष्यते॥ इति।

भवन्तु वा तस्य सहकारिणः। तथापि ते नित्या वा स्युरनित्या वा। ये तावन्नित्याः परमाण्वादयस्तेषां न सद्भाववैकल्यं संभवति। नापि तदायत्तसंनिधीनां संनिधानवैकल्यं। अनित्यानामपि तदायत्तोदयसंनिधीनां कुतो वैकल्यं नाम येन सहकारिवैकल्यान्न करोतीत्युच्यते। ततो नायमत्र परिहारः॥ अत एवाह। तेनाकृत इत्यादि।

[1] Compare Sarvadarśana, p. 9 foll.; Ṣaḍdarśanasaṃgraha, p. 28.

[2] So Ṣaḍdarśana, p. 29. MS. has *apekṣeta* (second hand *kṣyeta*) *paraḥ kaścid yadi* [illegible] *kiṃ cana*.

[3] MS. *bhavatu*?

तेनाकृतोऽन्यो नास्त्येव तेनासौ किमपेक्षतां ॥१२४

तेनेश्वरेणाकृतो य उत्पत्तिमांस्तेनाकृतः । सो नास्त्येव न विद्यते । अन्योऽपरो जगति । तेन कारणेन तदायत्तवृत्तीनां सहकारिणां सदा सन्निहितत्वादसौ नित्यः कर्ता किमपेक्षतां । 5 किमपेक्षमाणः कदा चित्कार्यं न कुर्यात् । इत्थं न का चिदपि तस्यापेक्षास्तीति सदा कार्यं कुर्वीत ॥

अथापि स्यात् । समवायि कारणमसमवायि[1] कारणं निमित्तकारणं चेति कारणत्रितयात्कार्यमुत्पद्यते । तदस्य निमित्तकारणत्वात्सामग्रीमपेक्ष्य कार्यं कुर्वतो नोक्तदोषप्रसङ्गः । 10 इति पराशयमाशङ्क्याह । अपेक्ष[त] इत्यादि ।

अपेक्षते चेत्सामग्रीं ।

यदि नामासौ सदा सर्वकार्याणि कर्तुं समर्थः । तथाप्यपेक्षते सामग्रीं । न हि सामग्रीमन्तरेण सत्यपि समर्थे कर्तरि कार्यमुत्पद्यते । यथा किल पटोत्पादनसमर्थेऽपि क चिद्धेतौ 15 तुरितन्तुवेमादिकमन्तरेण न पट उत्पद्यते । तथा प्रकृतेऽपीति चेद्यदि । आह ।

हेतुर्न पुनरीश्वरः ।

यदि सामग्रीसद्भावे करोति । तदभावे च न करोतीत्यभ्युपगम्यते । तदा पुनरीश्वरो हेतुर्न स्यात् । सामग्र्या एव

1 MS samavaya

कार्योत्पत्तेः । ततश्चानुपपत्तेः । तस्या भावाभावयोः कार्यस्य भावाभावदर्शनात् । न तु पुनरीश्वरभावाभावयोरिति । न सामग्रीकालेऽपि स पररूपेण कर्ता । स्वरूपं चास्य प्रागपि समर्थं तदेवेति कथं कदाचित्क्रियाविरामः ॥ यदप्युक्तं । कुविन्दादिवत्कदाचित्करोतीति । तदपि न युक्तं । यतः 5 कुविन्दादयः प्रागसमर्था एव । पुनः पश्चात्तुर्यादिसामग्रीप्रतिलम्भादपूर्वसामर्थ्याधिगमात् । पटादिकार्यं कुर्वन्ति । अन्यथापि तेषामपि पूर्वं तत्सामर्थ्यसद्भावे तत्क्रियाप्रसङ्गो न निवर्तत इति साध्यविकलो दृष्टान्तः ॥ किं च सामग्रीजननेऽपि स एव कारणं । स च सर्वदा सन्निहितस्वभाव इति । कथं कदा 10 चित्सामग्रीवैकल्यमप्यस्य । अत एवोपदर्शयन्नाह ।

नाकर्तुमीशः सामग्र्यां

इति । नाकर्तुमीशः । नाक्रियायां समर्थः । सामग्र्यां सामग्रीविषये । सर्वकार्यक्रियायां समर्थत्वात्सामग्रीजन्मन्यपि नोदासितुं शक्नोति । जनयतु तर्हि सामग्रीमिति चेदाह । 15

[न कर्तुं तदभावतः ॥ १२५]

न कर्तुमपि सामग्र्यामीशः । कुतः । तदभावतः । तस्याः सामग्र्या अभावतोऽविद्यमानत्वात् । न चाविद्यमानस्वभावे वन्ध्यासुत इव किंचित्कर्तुं शक्यते । नीरूपत्वात् । यद्वक्ष्यति

नाभावस्य विकारोऽस्ति कल्पकोटिशतैरपि । इति ॥[1] 20

[1] See below 147

भवतु नाम । सामग्रीसद्भावे सत्येव [197a] कर्ता । तथापि किं सामग्रीबलाकृष्टः स्वयमनिच्छन्नेव करोति । आहोस्विदिच्छन्निति विकल्पौ । तत्राद्य विकल्पमाशङ्क्यन्नाह । करोतीत्यादि ।

5 **करोत्यनिच्छन्नीशश्चेत्परायत्तः प्रसज्यते ।**

करोति कार्यमभिनिर्वर्तयत्यनिच्छन्ननभिलषन्[1] । ईश ईश्वरः । चेन्मत । परायत्तः प्रसज्यते । परायत्त' परतन्त्रः प्रसज्यते आसज्यते । सामग्रीवशेनानिच्छतोऽपि कुर्वतः । तद्वशवर्तित्वप्रसङ्गात् । न च पारतन्त्र्यमनुभवत ईश्वरत्वं युक्तमति-
10 प्रसङ्गात् । द्वितीयं विकल्पमधिकृत्याह ।

इच्छन्नपीच्छायत्तः स्यात् ।

अथेच्छन् करोतीति पक्षः स्वीक्रियते । तदापि इच्छायत्तः स्यात् । इच्छासद्भावे कार्यव्यापारात् । तदभावे चाव्यापारात् । तदपेक्षासद्भावात् । अतः

15 **कुर्वतः कुत ईशता ॥ १२६**

एवं कुर्वतः कार्यमभिनिर्वर्तयतः[3] सतस्तस्य कुत ईशता कुत ऐश्वर्य ॥ एतेन यदुक्त केन चित् । बुद्धिमत्त्वादीश्वरस्य नैष दोष । बुद्धिशून्यो हि स्वसत्तामात्रजन्यमक्रमेणैव कार्यं कुर्यात् ।

[1] MS nivartayatu
[2] MS °ti am ulla n
[3] MS abhinivart

बुद्धिमांस्तु कर्तुमीशानोऽप्यनिच्छन्न करोति । इति कस्तस्यो-
पालम्भ इति तदपि निरस्तं । तथा हि ता अपीच्छाः स्वसत्ता-
मात्रनिबन्धना । किं न करोतीति स एव तस्योपालम्भः ॥
अपि च । यदि ता न सहकारिण्यः किं तासां वियोगेऽपि
न करोति । अथ[ा]सहकारिवैकल्येऽपि कार्याकरणे सर्वदा 5
तदायत्तः । सहकारिण्यश्चेत् । तथापि तद्भावेऽपि सर्वकार्यं किं
न करोति । सहकारिणा साकल्ये शक्तत्वात् ॥ केवलस्याशक्तस्य
न कारकत्वमिति चेत् । तत्किमयं पररूपेण कारकः । तथा
चेदकारक एव । न हि स्वरूपेणाकारकः कारको [197b]
नाम । स्वरूपमप्यस्य निजशक्तिशब्दवाच्य । कार्योपयोगीति 10
चेत् । अलमिदानीमागन्तुकशक्त्यपेक्षया । समर्थोऽप्येष प्रकृत्या
सहकारिणामसन्निधौ नैव कारक इति चेत् । मातापि सती
प्रकृत्या वन्ध्येत्येतदपि तर्हि देवानां प्रियेण वक्तव्यमित्यास्तां
तावत् ॥ अनित्यस्तु तद्वादिनां नाभिमतः । तथा च सत्यन्य-
साधारणस्वभावस्य कथमीशत्वमिति नेश्वरकार्यं जगद्वैचित्र्य- 15
मिति सिद्ध ॥

यदि न बुद्धिमत्कर्तृकं जगत् । तर्हि नित्यपरमाणुपुञ्जमयं
द्व्यणुकादिक्रमेणोत्थं चितितरुपर्वतादिकं भवत्वित्याह । येऽपी-
त्यादि ।

येऽपि नित्यानणूनाहुस्तेऽपि पूर्वं निवारिताः । 20

येऽपि मीमांसकादिवादिनो नित्यानणून् । परमाणूनाहु-

जगद्वैचित्र्यकारणत्वेन ब्रुवते । तेऽपि वादिनः पूर्वं । अथा अप्यणुभेदेनेत्यादिना[1] परमाणुविचारसमये तत्प्रतिषेधाभिवारिता निराकृताः : । अतो नित्यपरमाणुमयमपि नेदं जगत् ॥

एवमीश्वरकारणतां श्लोकार्धेनान्तराल एव नित्यपरमाणुस्वभावतां च जगतो निरस्य तस्यैव तुर्यप्रकारस्य[2] समर्थनाय प्रधानपरिणामरूपतां निराकर्तुं सांख्यमतमुद्भावयन्नाह । सांख्या इत्यादि ।

सांख्याः प्रधानमिच्छन्ति नित्यं लोकस्य कारणं॥ १२७

सांख्याः कापिलाः प्रधानं प्रकृतिरित्यपरनामधेयमिच्छन्ति मन्यन्ते नित्यं लोकस्य कारणं । तच्च नित्यमविनश्वरस्वभावं । लोकस्य सर्वस्य चराचरस्य जगतः कारणं परिणामरूपेण हेतुमिच्छन्ति ॥ किमिदं प्रधानं नामेति चेदाह । सत्त्वमित्यादि ।

सत्त्वं रजस्तमश्चेति गुणा अविषमस्थिताः ।
प्रधानमिति कथ्यन्ते विषमैर्जगदुच्यते ॥ १२८

सत्त्वं रजस्तमश्चेति । एते त्रयो गुणा अविषमं स्थिताः साम्याव[198a]स्थां प्राप्ताः । प्रधानमिति कथ्यन्ते । प्रधानमित्युच्यन्ते । एषां तावत्प्रकृत्यवस्था । विषमैर्जगदुच्यते । विषमावस्थां प्राप्तैः । पुनरेभिरेव गुणैर्जगदुच्यते । विश्ववैचित्र्यपरिणामः कथ्यते ॥ तथा हि तेषां प्रक्रिया । यदा पुरुषस्य

---

[1] See above, ix, 87

[2] See above p. 540 l. 10

विषयोपभोगाकारमौत्सुक्यमुपजायते । तदा प्रकृतिः परिज्ञात-पुरुषौत्सुक्या पुरुषेण युज्यते । तदा पुनः शब्दादिसर्गरूपेण परिणतिमुपजनयन्ति । तदाथ क्रम ।

प्रकृतेर्महांस्ततोऽहकारस्तस्माद्गणश्च षोडशक ।
तस्मादपि षोडशकात्पञ्चभ्य. पञ्च भूतानि ॥[1] 5

अस्यायमर्थः । प्रकृतेर्महान् । प्रधानान्महान् । महानिति बुद्धेराख्या । ततो महतोऽहकार । अहमिति प्रत्ययः । तस्मादहकाराद्गणश्च षोडशक । षोडशक इति एकादश चेन्द्रियाणि पञ्च तन्मात्राणि । तत्र पञ्च कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थलक्षणानि । पञ्च बुद्धीन्द्रियाणि श्रोत्र त्वक् चक्षू रसन घ्राण चेति । उभयात्मक तु मन इत्येकादश भवन्ति । पञ्च तन्मात्राणि पुन शब्दस्पर्शरूपरसगन्धाः । पञ्चभ्य पञ्च भूतानि । पञ्चभ्य शब्दादिभ्य पञ्च भूतानि भवन्ति । पञ्च भूतानि आकाशवायुतेजोजलपृथिव्याख्यानि ॥ आद्यप्रकृतिस्तु कारणमेव न कार्यं । महदहङ्कारौ शब्दादयश्च पञ्च कार्यं कारण च । एकादशेन्द्रियाणि आकाशादयश्च पञ्च कार्यमेव न कारण । पुरुष. पुनरुभयस्वभाववर्जित इति । यदाह ।

मूलप्रकृतिरविकृतिर्महदाद्या प्रकृतिविकृतयः [198b] सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष. । इति ॥[3]

[1] Sāṃkhyakārikā, 22
[2] So MS
[3] Sāṃkhyakārikā 3. MS has ṣoḍaśakaś ca

तच्च प्रधानमशेषकार्यशक्तिमयमेव चिगुणात्मकमेव कार्य-मभिनिर्वर्तयति । कथमन्यथा तचाविद्यमानं कार्यं वैश्वरूप्य-मुत्पद्यते । तथा चोक्तं ।

अशेषशक्तिप्रचितात्प्रधानादेव केवलात् ।
5 कार्यभेदाः प्रवर्तन्ते तद्रूपा एव तत्त्वतः ॥
यदि त्वसद्भवेत्कार्यं कारणात्मनि शक्तितः ।
कर्तुं तन्नैव शक्यं तन्नैरूप्याद्वियदब्जवत् ॥ इति ॥

एव किल प्रधानात्कार्यरूपेण जगद्विवर्तः प्रवर्तत इति कापिलाः[1] ॥ तदेवं तत्सर्वमाकाशे विरचितचित्रमिव प्रतिभासत 10 इति मन्यमानः सिद्धान्तवादी दूषयितुमाह । एकस्येति ।

एकस्य चिस्वभावत्वमयुक्तं तेन नास्ति तत ।

एकस्य सत. प्रधानस्य चिस्वभावत्व । सत्त्वरजस्तमो भेदेन च्यात्मकत्वं । अयुक्तमसंगत । तेन कारणेन नास्ति तत् । न विद्यते तत्त्रिगुणात्मक प्रधान । एकमनेकस्वभावमिति 15 परस्पराहतमेतत् । अतस्तस्मिन्नपहस्तिते सर्वं तत्कार्यमपाकृतं भवेत् ॥ मा भूत्ताम तदेकस्वभाव चिगुणात्मक । गुणास्ता-वत्स्वरूपतः सन्तीत्याह । एवमित्यादि ।

एवं गुणा न विद्यन्ते प्रत्येकं ते ऽपि हि चिधा ॥ १२९

एवमेव प्रधानवत् । गुणाः सत्त्वरजस्तमोरूपा न विद्यन्ते । ते

---

[1] "The lost Rājavārttika has been a Sāmkhya work in çlokas Should these verses have been taken from it?" (Prof R Garbe)

ऽपि हि त्रिधा । हिर्यस्मात् । ते ऽपि गुणाः प्रत्येकमेकैकशस्त्रिधा त्रिप्रकाराः । तथा हि सर्वं त्रिगुणात्मकमिति ब्रुवतां प्रत्येकं गुणा अपि स्वरूपेण त्रिगुणात्मकाः प्राप्नुवन्ति । तथा तद्गुणा अपि त्रिगुणात्मकतया नैकस्वभावा विद्यन्ते ॥ यदा चैवं विचारयतो गुणा न सन्ति । तदा तद्विवर्तरूपाः शब्दादयो 5 ऽपि [114]न युज्यन्त इत्याह । गुणाभाव इत्यादि ।

गुणाभावे च शब्दादेरस्तित्वमतिदूरतः ।

गुणानां सत्त्वादीनां । अभावेऽसत्त्वे च । दूषणान्तरसमुच्चये चकारः । शब्दादेरादिग्रहणात्स्पर्शादिपरिग्रहः । अस्तित्वं सद्भावो ऽतिदूरतः सर्वथैव न युज्यते । कारणाभावे कार्यस्य 10 सत्त्वायोगात् । यदप्युक्तं ।

सुखाद्यन्वितमेतद्धि व्यक्तं व्यक्तं समीक्ष्यते ।
प्रसादतापदैन्यादिरूपस्यैकोपलक्षितः ।

इति तदपि न युक्तं । [1]यस्य सत्त्वादीनां सुखादिरूपतामुपपादयितुं तत्परिणामस्य रूपादिनो व्यक्तस्य सुखाद्यन्वयो 15 हेतुरुक्तः सोऽपि नास्तीत्याह[1] । अचेतन इत्यादि ।

अचेतने च वस्त्रादौ सुखादेरप्यसंभवः ॥ १३०

अचेतने जडरूपे च । पूर्ववच्चकारः । वस्त्रादौ अचित्स्वभावे पटादौ । सुखादेरपि चिदात्मकस्य तादात्म्येनासंभवो ऽभावः ।

1—1 In the margin with reference to *aha* of the first hand, first hand *tad api na yuktam ity āha acetanetyādi*

यतः सत्त्वरजस्तमांस्येव सुखादुःखमोहा उच्यन्ते । ते च गुणा न हि सन्ति । तत्कथ तत्र सुखादयो भवेयुः ॥

अथापि स्यात् । न सुखाद्यात्मकतया पटादयः सुखादिस्वभावा उच्यन्ते । अपि तु सुखादेस्तदुत्पत्तेरित्याशङ्कयन्नाह ।
5 तद्धेत्वित्यादि ।

तद्धेतुरूपा भावाश्चेन्ननु भावा विचारिताः ।

तस्य सुखादेर्हेतुरूपाः कारणस्वभावा भावा बाह्याः पटादयश्चेन्मत । ननु भावा विचारिता । नामी पटादय ऽवयविरूपा नापि परमाणुस्वरूपा नापि त्रिगुणात्मकाः । एव भावा
10 विचारिता निरूपिता युक्तितः प्रतिभासमानानां मायावत्निःस्वभावत्वाच्च । तत्क इमे भावाः सुखादिहेतुरूपा भविष्यन्ति ॥
अपि च । व्यक्तस्य सुखादिस्वभावत्वे पटादय एव सुखादिजन्याः स्युरित्याह । सुखाद्येवेत्यादि ।

सुखाद्येव च ते हेतुः ।

15 पटस्यापि सुखाद्येव च । ते तव सांख्यस्य । हेतुः स्यात् । व्यक्तस्य सुखाद्यात्मकत्वात् । तथापि

न च तस्मात्पटादयः ॥ १३१

आदिशब्दाच्चन्दनमाला[199b]दयः । विपर्ययः पुनरिहोपलभ्यत इत्याह । पटादेस्त्वित्यादि ।

पटादेस्तु सुखादि स्यात्तदभावात्सुखाद्यसत् ।

पटादेस्तु । आदिशब्दान्मालादेः । पुनः । सुखादि स्यात् । आदिशब्दाद्दुःखादि भवेत् । तदभावात्तेषां पटादीनामभावात् । सुखाद्यसत् । पटादिकार्यत्वात् सुखाद्यपि न स्यादिति तदन्वयव्यतिरेकानुविधानात्सुखादेस्तत्कार्यत्वं ॥ सत्त्वादिगुणात्मकतया यदपि सुखादीनां नित्यत्वमिष्टं । तदपि न सम्यगित्याह । सुखादीनां चेत्यादि । 5

सुखादीनां च नित्यत्वं कदाचिन्नोपलभ्यते ॥ १३२

सुखदुःखमोहाना च । चकारोऽधिकदोषविवक्षायां । नित्यत्वं ध्रुवस्वभावत्वं कदाचिन्नोपलभ्यते न दृश्यते । गुणानामेवासत्त्वात्तेषां नित्यत्वाद्ययोगात् ॥ यदि च सुखादीनां नित्यत्वं स्यात् । तदा नित्यमुपलम्भेरन्नित्याह । सत्यामित्यादि । 10

सत्यामेव सुखव्यक्तौ संवित्तिः किं न गृह्यते ।

यदि सत्यमवस्थितरूपाः सुखादयः । तथा सर्वदेति सदा तत्संवेदनं स्यात् । तत्स्वभावापरित्यागादिति समुदायार्थः । सत्यामेव सुखव्यक्तौ । एकदा भूतायां सुखव्यक्तौ सुखस्य नित्यत्वे सति । संवित्तिः किं न गृह्यते । सुखस्य संवेदनं सर्वदा किं न स्यात् । न च सर्वदा संवेदनमस्ति । तस्मात्कदाचिदनुपलभ्यमानं तत्तदा नास्तीति निश्चितमिति कथं 15 20

नित्यत्वं ॥ स्यादेतत् । सर्वदा व्यक्तिरूप[ता]यां स्यादेष दोषः । यदा पुनस्तदेव प्रक्तिरूपतया व्यवगत भवति । तदा न दोष इत्याह तदेवेत्यादि ।

तदेव सूक्ष्मतां याति स्थूलं सूक्ष्मं च तत्कथं ॥ १३३

5 तदेव व्यक्तावस्थिति कृत्वा भावसमाश्रयात् । पश्चादनुपलम्भकाले सूक्ष्मतां [200ª]याति दिवा नक्षत्राणीवानुपलब्धस्वभावता समाश्रयते । तदेतदसगत । कुतः । यद्यस्मात्स्थूलं व्यक्तस्वभाव सत् । सूक्ष्म तत्कथ । अव्यक्तस्वभाव तत्सुखादि कथं । नित्यतया नानास्वभावतैकस्य न युक्तेति भावः ॥

10 अथापि स्यात् । एकदा परस्परविरुद्धयोरेकस्मिन्नयोगः । पूर्वधर्मनिवृत्तौ तु धर्मान्तरापत्तेर्न दोष इत्याह । स्थौल्यमित्यादि ।

स्थौल्यं त्यक्त्वा भवेत्सूक्ष्ममनित्ये स्थौल्यसूक्ष्मते ।

स्थौल्यमाविर्भावरूपतां त्यक्त्वा परित्यज्य । भवेत्सूक्ष्म ।

15 तिरोहितरूप स्यात् । एवमभ्युपगमे सति । अनित्ये स्थौल्यसूक्ष्मते[1] । उत्पादविनाशालीढत्वादध्रुवे स्थौल्यसूक्ष्मते स्यातां ॥ भवतां नामानित्ये का क्षतिरित्याह । सर्वस्येत्यादि ।

सर्वस्य वस्तुनस्तद्वत्किं नानित्यत्वमिष्यते ॥ १३४

सर्वस्य वस्तुन । पञ्चविंशतितत्त्वलक्षणस्य तद्वत् । स्थौल्य-

[1] MS sthūlasūkṣmate.

सूक्ष्मतावत् । किं नानित्यत्वमिष्यते । किमिति निरन्वय-
विनाशो न स्वीक्रियते ॥ अयमभिप्रायः । स्थौल्यसूक्ष्मतयोरपि
निरन्वयविनाशासदुत्पादमन्तरेण नाविर्भावतिरोभावौ युक्तौ ।
अन्यथा कथं चित्केन चिद्रूपेणावस्थानात् । पूर्ववत्पुनरुपलम्भः
प्रसङ्गः । तद्वत्सुखादीनामपि । तस्मादवश्यं तयोर्निरन्वयविना- 5
शासदुत्पादौ[1] चाङ्गीकर्तव्यौ । यथा च तयोरेतौ भवतस्तथा-
न्येषामपि विशेषाभावात्स्यातामिति ॥ किं च । यदि
स्थौल्यसूक्ष्मतयोर्विनाशोत्पत्ती इष्येते । तदा सुखादीनामनि-
त्यताप्रसङ्ग स्यात् । तथा हि तत्स्थौल्य सुखाद्भिन्नमभिन्न वा
स्यात् । तत्र यदि भिन्न तदा तस्मिन्निवृत्तेऽपि पूर्ववत्सुखसवेदन
स्यात् । न हि पटे निवृत्तेऽपि घ[200b]टस्यानुपलब्धिर्युक्ता । 10
तस्य तदिति सबन्धकल्पनायामनवस्थानप्रसङ्गात् । न च सत्यपि
सबन्धे ऽकारणस्य निवृत्तावन्यस्य निवृत्तिर्युज्यते । गोनिवृत्ता-
विव तत्स्वामिनः । नापि सुखस्य तत्कारण पटादेरेव सुखोत्पत्ते. ।
नापि तदपि कारण सुखादिसमानकालत्वात्तस्य ॥ अथाभिन्न-
मिति पक्षः । अत्रोच्यते । 15

न स्थौल्यं चेत्सुखादन्यत् ।

यदि स्थौल्यं सुखादन्यद्भिन्न न भवति । तदा स्यात्सुख-
मेव तत् । तदा

[1] Second hand, *dāv a* ?

सुखस्यानित्यता स्फुटं।

तत्स्वभावतया सौख्यस्य निवृत्तौ सुखस्य विनिवृत्तेः सुखस्यानित्यता विनश्वरता स्फुटं निश्चित॥ स्यादेतत् । यदि सर्वथा विनाशः स्यात्तदा सुखस्य पुनरुत्पत्तिर्न स्यात्। अत्यन्तासतो 5 गगनोत्पलवदुत्पादायोगात्। इति परमतमुपदर्शयन्नाह। नासदित्यादि।

नासदुत्पद्यते किं चिदसत्त्वादिति चेन्मतं॥ १३५

यत्सर्वथा कारणात्मन्यविद्यमान तन्नोत्पद्यते। यथा गगनाम्भोरुह। तथा चान्यदपि यदि स्यात्। तदा नोत्पद्यते। 10 अतो नासदुत्पद्यते किं चित्। नात्यन्तासत्स्वभावमुत्पद्यते कि चित्। कुतः। असत्त्वादभावात्। इति चेत्मत। एवं यदि समतं। तदा नैतद्वक्तव्यमित्याह। व्यक्तस्येत्यादि।

व्यक्तस्यासत उत्पत्तिरकामस्यापि ते स्थिता।

व्यक्तस्यासत। प्राक् शक्त्यवस्थायामविद्यमानस्य व्यक्तस्य 15 पश्चादुत्पत्तिरुत्पादः। अनभिलाषिणोऽपि ते तव सदुत्पत्तिवादिन. स्थिता आपन्ना। अन्यथा प्रागपि तस्य सद्भावे पश्चादत्। पूर्वमपि तदुपलब्धिप्रसङ्गः। यथा व्यक्तस्यासत उत्पत्तिस्तथा यद्यन्यस्या[201']पि स्यात्तदा न विरुध्यते कि चित्॥

अपि च। सत्कार्यवादिनः कारणावस्थायां कार्यसद्भावा20 दिदमपि दूषणमपरमाशङ्कृत इत्याह। असद इत्यादि।

अन्नादो ऽमेध्यभक्षः स्यात्।

अन्नमत्तीत्यन्नादो ऽन्नभक्षकः। अमेध्यभक्षः स्यात्। अशुचिभोक्ता भवेत्। कथं।

फलं हेतौ यदि स्थितं॥ १३६

कार्यं यदि कारणे सत्स्वभावं। तथा हि। कार्यममेध्यमन्नस्य। तच्चान्नावस्थायामेव सत्कार्यवादिनो विद्यते। इत्यन्नभक्षणात्तद्भक्षणमाप्नुते भवतः। किं च। इदमपि सत्कार्यवादिनः प्रसङ्गान्तरमासञ्जयन्नाह। पटार्घेणेत्यादि। 5

पटार्घेणैव कार्पासबीजं क्रीत्वा निवस्यतां।

फलं हेतौ यदि स्थितमिति सबन्धः। कर्पासबीजे कारणे भविष्यतः पटस्य कार्यस्य सद्भावात्। पटस्यार्घेण मूल्येन कर्पासबीजं क्रीत्वा गृहीत्वा निवस्यतां परिधीयतां॥ अथापि स्यात्। यदि नाम परमार्थतः कारणे कार्यमस्ति। तथापि नायं सदृत्यविद्यातिमिरोपहतलोचनः सांव्यवहारिको लोकः पश्यतीत्याशङ्कयन्नाह। मोहादित्यादि। 10 15

मोहाच्चेन्नेक्षते लोकः।

मोहादज्ञानात्। सदपि वस्तुतत्त्वं नेक्षते न पश्यति लोकः। ततो नोक्तदोषप्रसङ्गः। चेद्यदि। ननु

तत्त्वज्ञस्यापि सा स्थितिः ॥ १३७

यदि नाम न लोकोऽपश्यंस्तथा व्यवहारं करोति । तत्त्वज्ञस्य तु युज्यते । न चैवं यतस्तत्त्वज्ञस्यापि । कारणे कार्यमस्तीति परमार्थवेदिनोऽपि । सांख्यस्य सा स्थितिः । सैव सर्वसांव्यवहा-
5 रिकजनसाधारणी व्यवस्थितिः । तेऽपि दृश्यन्ते ऽन्नभक्षणादिषु प्रवर्तमानाः । कर्पासबीजं पटार्थिनः परिहरन्तः ॥ नाप्ययमत्र परिहारो युज्यत इत्याह । लोकस्येत्यादि ।

लोकस्यापि च तज्ज्ञानमस्ति कस्मान्न पश्यति ।

लोकस्य सांव्यवहारिकजनस्यापि तज्ज्ञानमस्ति । येन कार्यं
10 कारणे ऽस्तीति प्रतिपद्यते । न तत्त्वज्ञस्यैव । तथा हि कार्यं दृष्ट्वा कारणे ऽस्तीति निश्चय उभयोरपि तत्त्वज्ञस्य लोकस्य [च] साधारणः । अतो लोकः कस्माद्धेतोर्न पश्यति ॥ न च लोकस्यादर्शनकारणमिति वक्तव्यं । लोकस्य दर्शनमप्रमाणमिति चेत् । अत्राह । लोकेत्यादि ।

15 **लोकाप्रमाणतायां चेत् ।**

लोकस्य सांव्यवहारिकजनस्याप्रमाणतायां तज्ज्ञानस्याप्रामाण्ये

व्यक्तदर्शनमप्यसत् ॥ १३८

व्यक्तस्याविर्भूतस्वरूपस्य सदर्शनं । तदप्यसत् । अप्रमाणं स्यात् । न तस्माद्वस्तुतत्त्वव्यवस्था प्राप्नोति । एतच्चास्माभिरिष्यत
20 एव । सर्वसांव्यवहारिकप्रमाणानां परमार्थतो ऽप्रमाणत्वात् ।

तथा च भवतोऽप्यस्मत्पक्षनिक्षेपः ॥ एवं च परिनिष्ठितः कापिलः सिद्धान्तवादिनोऽपि साधारणदूषणमासञ्जयन्नाह । प्रमाणमित्यादि ।

प्रमाणमप्रमाणं चेन्ननु तत्प्रमितं मृषा ।

यदि प्रमाणमपि परमार्थतः प्रमाणं न भवतीति भवतां पक्षः । ननु तत्प्रमितं मृषा । प्रमाणस्याप्रामाण्ये तत्प्रमितं तेन प्रमाणेन परिच्छिन्नं मृषाऽलीकं प्राप्नोति । किमतः स्यात् ।

तत्त्वतः शून्यता तस्माद्भावानां नोपपद्यते ॥ १३९

यदि प्रमाणस्याप्रामाण्ये तत्प्रमितं मृषा । तदा येयं भावानां धर्माणां तत्त्वतः परमार्थतः शून्यता । सर्वधर्मनिःस्वभावता तस्मात्प्रमाणान्निश्चिता । सापि नोपपद्यते । न सङ्गच्छते । सर्वप्रमाणोपदर्शितस्य मृषार्थत्वात् । सापि सर्वधर्मनिःस्वभावता तद्विचारकप्रमाणोपदर्शितैवेति समानो न्यायः ॥ अत्र परिहारमाह । कल्पितमित्यादि ।

कल्पितं भावमस्पृष्ट्वा तदभावो न गृह्यते ।

क[202a]ल्पनाकल्पितं समारोपितं भावं धर्ममस्पृष्ट्वा कल्पनाबुद्ध्याऽगृहीत्वा तदभावो न गृह्यते नालम्ब्यते । तथा हि घटमारोपितरूपेण परिकल्प्य तत्सम्बन्धितया घटाभावं प्रतिपद्यते लोकः । घटस्य विचारेण लोकप्रसिद्धेनैव यदा न किं चित्स्वरूपमवतिष्ठते । तदा तदभावः । तद्विपर्ययरूपः । सुतरां न कश्चित् । तदेवोपदर्शयन्नाह । तस्मादित्यादि ।

तस्माद्भावो मृषा यो हि तस्याभावः स्फुटं मृषा ॥ १४०

यस्मात्कल्पितभावविवेकेनाभावो गृह्यते । तस्माद्भावो मृषा । असत्स्वभावो यः । तस्याभावः स्फुटं मृषा । तस्य निःस्वभावस्य भावस्याभावो विरहः स्फुटं निश्चितं मृषा । 5 असत्यः । तस्यापि परिकल्पितरूपत्वात् । एवं च भावाभावयोः परिकल्पितरूपत्वे सर्वधर्मनिःस्वभावतैवावतिष्ठते । पुनरिदमेवोपसंहारव्याजेन विस्पष्टयन्नाह । तस्मात्स्वप्न इत्यादि ।

तस्मात्स्वप्ने सुते नष्टे सो नास्तीति विकल्पना ।

यस्माद्भावाभावौ कल्पनोपस्थापितत्वान्मृषार्थौ[1] । तस्मात्स्वप्ने 10 निद्राक्रान्तचित्तावस्थायां उत्पन्नविनष्टे सुते पुत्रे सति । स पुत्रो नास्तीति [वि]कल्पना । तदभावविकल्पः । किं करोति ।

तद्भावकल्पनोत्पादं विबध्नाति ।

तस्य सुतस्य भावः । तस्यास्तित्वं । तस्य कल्पना सत्त्वसमारोपः । तस्योत्पादं उन्मज्जनं । तं निबध्नाति[1] । निषेधयति । 15 तथैव तर्हि सेति चेत् । न ।

मृषा च सा । १४१

कल्पना । तद्भावकल्पना विबध्नात्यपि मृषा । अलीकसुतस्य[2] स्वप्नेऽनुत्पन्नानिरुद्धत्वात् ॥ अथवा सत्याभिमत एव सुते स्वप्ने

[1] Sic MS [2] MS alikasutasya

नष्टे सर्वमेतद्योजयितव्यं ॥ एवं सर्वधर्माणामुत्पादनिरोधौ कल्पनोपदर्शितौ द्रष्टव्यौ ॥

एतदुक्तं भवति । यथा स्वप्नोपलब्धस्य वस्तुनोऽनुत्पन्नानिरुद्धस्यापि [202b] कल्पनोपदर्शितौ भावाभावौ न परमार्थसन्तौ । अथ च कल्पनया व्यवहारगोचरमुपगतौ प्रतिभातः । 5
न च सा कल्पनाऽसत्यार्थविषयतयाप्रमाणं । तद्विषयस्य परमार्थतो निःस्वभावत्वात् । तथैव जाग्रद्दशायामुपलब्धयोरपि भावाभावयोर्व्यवहारपथमुपगतयो[:] कल्पनाप्रतिपादितयोर्व्यवस्था । इति तस्या अप्रामाण्येऽपि न सर्वधर्मनिःस्वभावता विघटते । यदाह [नागार्जुनस्तुतस्तवे] । 10

उत्पन्नश्च स्थितो नष्ट उक्तो लोको ऽर्थतस्त्वया ।
कल्पनामात्रमित्यस्मात्सर्वधर्माः प्रकाशिताः ।
कल्पनाप्यसती प्रोक्ता यया शून्यं विकल्प्यते ॥

इति सर्वं समञ्जसं ॥ एवमहेतुभूतस्वभावेश्वरप्रधानकर्तृत्वं[1] जगतो निराकृत्य नाप्यहेतुतं[2] इत्यस्यार्थं प्रसाध्योपसंहरन्नाह । 15
तस्मादेवमित्यादि ।

तस्मादेवं विचारेण नास्ति किं चिदहेतुतः ।

यतः स्वभावादिरभूतं न किं चित्कार्यमुपपद्यते । तस्मादेव विचारेण समनन्तरनिरूपणेन नास्ति किं चिदहेतुतः ।

1 Second hand 'am evamamahetu, first hand sam visamahetu bhuta? — Perhaps visama, see Madhyamakavrtti, p. 10 l. 11

2 See above ix 116 ad finem

स्वभावादेरहेतुतो ऽकारणाज्जातं किं चित्कार्यं नास्ति न विद्यते । उपलक्षणं चैतत् । पुरुषकालादिकृतत्वमपि नास्ति । तेषामप्यहेतुत्वात् । अतो नाप्यहेतुत इति सिद्धं ॥ ननु यदि नाम स्वभावेश्वरप्रधानादेरहेतुतो न किं चिदस्ति । तथापि
5 परिदृष्टकारणादेव परमार्थेन उत्पत्स्यते । तत्कथं सर्वधर्माणां निःस्वभावता सेत्स्यतीति पराशयमाशङ्क्य ।

न स्वतो नापि परतो न द्वाभ्यां ।

इति कोटित्रयं समर्थयन्नाह । न च व्यस्तेत्यादि ।

न च व्यस्तसमस्तेषु प्रत्ययेषु व्यवस्थितं ॥ १४२

10 न च नैव व्यस्तसमस्तेष्विति व्यस्तेषु समस्तेषु च । तत्र न च व्यस्तेषु । एकैकशः स्वतः परतश्चेति । नापि समस्तेषु । द्वाभ्यां स्वप[203a]राभ्यां । प्रत्ययेषु कारणेषु । व्यवस्थितं उत्पादकरूपतया प्रतिष्ठितं किंचित ॥

तत्र न तावत्स्वतः स्वभावाद्भावा[1] उत्पद्यन्ते । उत्पादात्पूर्वं
15 तस्य स्वभावस्याविद्यमानत्वात् । कुत उत्पद्यन्तां । उत्पन्ने च तस्मिन् सत्यपि स्वरूपे तस्यापि निष्पन्नत्वात् किमुत्पद्यन्तां[2] । अपि च । स्वत एव जन्मनि जातस्यैव पुनर्जन्म स्यात् । न च तद्युक्तं । कृतस्य करणायोगात् । जातस्य पुनर्जन्मनि बीजादीनामेवासंसारं प्रवृत्तेर्नाङ्कुरादयः कदा चिदुत्पत्तुमवसरं लभेरन् ।

[1] MS svato vabhava utpadyante

[2] MS utpadyatam

न चैतदभ्युपगच्छतो ऽपि लोकत एव बाधामनुभवत्सिद्धिपथ-मुपयाति । बीजादेरङ्कुराद्युत्पत्तिदर्शनात् । न च बीजाङ्कु-रयोरैक्यं । उभयोरपि भिन्नरूपरसवीर्यविपाकत्वात्[1] । स्वस्व-भावजन्यत्वे च कस्य चिदुत्पत्तिरेव न स्यात् । इतरेतराश्रयत्वात् । तथा हि यावत्स्वभावो न भवति तावदुत्पत्तिर्न स्यात् । 5
यावच्चोत्पत्तिर्न भवति तावत्स्वभावो न स्यात् । इतरेतराश्रयत्वं । तस्मान्न स्वतः किं चिदुत्पद्यते ॥

नापि परतः । परतो हि जन्मनीष्यमाणे शालिबीजादपि कोद्रवाङ्कुरस्योत्पत्तिप्रसङ्गः । शालिकोद्रवयोरपि च कोद्रवाङ्कु-रापेक्षया परत्वमविशिष्टं । सर्वस्य वा जन्म सर्वतो भवेत् । 10
सर्वेषां परस्परं परत्वाविशेषात् ॥ अथ यदि नाम परत्वमवि-शिष्टं । तथापि कार्यकारणयोरन्योन्यजन्यजनकभावस्य नियामकत्वान्न सर्वस्योत्पत्तिरिति चेत् । न । अनुत्पन्ने हि कार्ये । कस्मिन्[2] पुनरस्य शक्तिरिति वक्तव्यं । उत्पन्ने च कार्ये कारणस्याभावात्कस्य शक्तिरिति वक्तव्यं । [203b] न च 15
कार्यकारणयोरसमानकालतया जन्यजनकभावप्रतिनियमो ऽपि कश्चित् ॥ अत एवैकसंततिप्रतिनियमो ऽपि न युक्तः । कार्यकारणमन्तरेण संततेरभावात् । तस्य चैकक्षणानवस्थानात् । केयं संततिर्नाम । पूर्वापरक्षणप्रवाहस्य च कल्पनासमारोपितत्वात् । नास्ति संततिर्वास्तवी । एतेन सादृश्यमपि नियामकमिह निरस्तं । 20

[1] Compare Sarvadarçana, p. 16, l. 22.
[2] First hand *kasya*, second hand *kasmi*.

इति न किं चित्केन चिदेकसंततिपतितं सदृशं वा अन्यजन-
कभावनियतं वास्ति । अन्यजनकभावस्यैव चात्र चिन्त्यत्वात् ।
कथं तेनैव परिहारः । तस्मात्परतो ऽपि न कस्य चित्संभवः ॥

नापि द्वाभ्यां प्रत्येकपक्षोक्तसर्वदोषप्रसङ्गात् । प्रत्येकं च
5 द्वयोरशक्तयोर्मिलितयोरप्यसमर्थत्वात् । न ह्येकेनान्धेनादृष्टमार्गो
बहुभिरपि द्रष्टुं शक्यते । प्रत्येकं वा सिकतास्तैलदानासमर्था
मिलिता ऽपि तत्समर्था भवन्ति । तस्मादुभयपक्षप्रतिपादित-
दोषप्रसङ्गात् । द्वाभ्यामपि न कस्य चिदुत्पत्तिसंभवः ॥

इति स्वपरो[भ]यजनितमहेतुजनितं वा तत्त्वतो न कि
10 चिदस्ति । तस्मात्परमार्थतोऽनुत्पन्नानिरुद्धस्वभावं मायमरीचि-
प्रतिबिम्बप्रति[श्रुत्का]समं[1] प्रतीत्यसमुत्पन्नं स्वभावशून्यमेव सव
विश्वमाभासते ॥ न तु पुनरिदं प्रत्ययतामात्रं सांवृतमिह
निषिध्यते । यदुक्तमत्र भगवता शालिस्तम्बसूत्रे । तत्र कथं
प्रतीत्यसमुत्पादं पश्यति । इहोक्तं भगवता ।[2] य इमं प्रतीत्य-
15 समुत्पादं सततसमितं निर्जीवं यथावदविपरीतमजीवमजातं
मभूतमकृतमसंस्कृतमप्रतिघमनालम्बनं शिवमभयमनाहार्यमव्यय-
मव्युपशमस्वभावं पश्यति । स धर्मं प[3][श्यति । यस्तु । एवं
सततसमितं निर्जीवमित्यादि पूर्ववत् । यावदव्युपशमस्वभावं
पश्यति । सोऽनुत्तरधर्मशरीरं बुद्धं पश्यति । आर्यधर्माभिसमये

[1] Ex conjectura
[2] See above ix 15
[3] MS samyal

सम्यग्ज्ञानाद्रूपनयेनैव ॥[1] प्रतीत्यसमुत्पाद इति कस्मादुच्यते ।
सहेतुकः सप्रत्ययो नाहेतुको नाप्रत्यय इत्युच्यते । पेयालं ।
अथ च पुनरयं प्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यामुत्पद्यते ।
कतमाभ्यां द्वाभ्यां कारणाभ्यामुत्पद्यते । हेतूपनिबन्धतः प्रत्य-
योपनिबन्धतश्च । सोऽपि द्विविधो द्रष्टव्यः । बाह्यश्चाध्यात्मि- 5
कश्च । तत्र बाह्यस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धः कतमः ।
यदिद बीजादङ्कुरः । अङ्कुरात्पत्त्रं । पत्त्रात्काण्डं । काण्डा-
न्नालं । नालाद्गण्डः[2] । गण्डाद्गर्भं । गर्भाच्छूकः । शूकात्पुष्पं ।
पुष्पात्फलमिति । असति बीजेऽङ्कुरो न भवति । यावदसति
पुष्पे फलं न भवति । सति तु बीजेऽङ्कुरस्याभिनिर्वृत्तिर्भवति । 10
एवं यावत्सति पुष्पे फलस्याभिनिर्वृत्तिर्भवति ॥ तत्र बीजस्य नैवं
भवति । अहमङ्कुरमभिनिर्वर्तयामीति । अङ्कुरस्यापि नैवं
भवति । अहं बीजेनाभिनिर्वर्तित इति । एवं यावत्पुष्पस्य
नैव भवति । अहं फलमभिनिर्वर्तयामीति[3] । फलस्यापि नैवं
भवति । अहं बीजेनाभिनिर्वर्तितमिति । अथ पुनर्बीजे सति 15
अङ्कुरस्याभिनिर्वृत्तिर्भवति । प्रादुर्भावः । एव यावत्पुष्पे सति
फलस्याभिनिर्वृत्तिर्भवति । प्रादुर्भावः । एवं बाह्यस्य प्रतीत्य-
समुत्पादस्य हेतूपनिबन्धो द्रष्टव्यः ॥

---

[1] Interpunction from Tibetan —See our forthcoming edition of the Çālistambasūtra in Bibliotheca Buddhica

[2] See Wogihara, on Bodhisattvabhumi (Leipzig, 1908), who refers to Divya, 100, l 16, 210, l 24

[3] MS *phalam nirvartayāmīti*

कथं बाह्यस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः। षणां धातूनां समवायात्। कतमेषां षणां [204b] धातूनां समवायात्। यदिदं पृथिव्यप्तेजोवाय्वाकाशर्तुसमवायात्। बाह्यस्य प्रतीत्यसमुत्पादस्य [प्रत्ययोप]निबन्धो द्रष्टव्यः। तत्र
5 पृथिवीधातुर्बीजस्य संधारणकृत्यं करोति। अब्धातुर्बीजं स्नेहयति। तेजोधातुर्बीजं परिपाचयति। वायुधातुर्बीजमभिनिर्हरति। आकाशधातुर्बीजस्यानावरणकृत्यं करोति। ऋतुरपि बीजस्य परिणामनाकृत्यं करोति। असत्स्वेषु प्रत्ययेषु बीजादङ्कुरस्य[ाभि]निर्वृत्तिर्न भवति। यदा बाह्यश्च पृथिवीधातु-
10 रविकलो भवति। एवमप्तेजोवाय्वाकाशर्तुधातवश्चाविकला भवन्ति। ततः सर्वेषां समवायात्। बीजे निरुध्यमानेऽङ्कुरस्याभिनिर्वृत्तिर्भवति॥ तत्र पृथिवीधातोर्नैवं भवति। अहं बीजस्य [सं]धारण[ा]कृत्यं करोमीति। एव यावदृतोरपि नैवं भवति। अहं बीजस्य परिणामनाकृत्यं करोमीति। अङ्कुर-
15 स्यापि नैव भवति। अहमेभिः प्रत्ययैर्जनित इति। अथ पुनः सत्स्वेतेषु बीजे निरुध्यमानेऽङ्कुरस्याभिनिर्वृत्तिर्भवति। स चायङ्कुरो न स्वयंकृतो [न परकृतो] नोभयकृतो नेश्वरनिर्मितो न कालपरिणामितो न प्रकृतिसंभूतो न चैककारणाधीनो नाप्यहेतुसमुत्पन्नः। पृथिव्यप्तेजोवाय्वाकाशर्तुसमवायात्। बीजे
20 निरुध्यमानेऽङ्कुरस्याभिनिर्वृत्तिर्भवति। एवं बाह्यस्य प्रतीत्यसमुत्पादस्य प्रत्ययोपनिबन्धो द्रष्टव्यः॥

तत्र [बाह्यः प्रतीत्य]समुत्पादः पञ्चभिः कारणैर्द्रष्टव्यः।

कतमैः पञ्चभिः। न शाश्वततो नोच्छेदतो न संक्रान्तितः। परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः[1]। तत्सदृशानु[प्र]बन्धत- [205ᵃ]श्चेति॥ कथं न शाश्वतत इति। यस्मादन्यो ऽङ्कुरो ऽन्यद्बीजं। न च यदेव बीजं स एवाङ्कुरः। अथ वा पुनर्बीजं निरुध्यते। अङ्कुरश्चोत्पद्यते। अतो न शाश्वततः॥ कथं नोच्छेदतः। न च पूर्वनिरुद्धाद्बीजादङ्कुरो निष्पद्यते। नाप्य- निरुद्धाद्बीजात्। अपि च। बीजं च निरुध्यते। तस्मिन्नेव समयेऽङ्कुर उत्पद्यते। तुलादण्डोन्नामावनामवत्। अतो नोच्छेदतः॥ कथं न संक्रान्तितः। विसदृशो बीजादङ्कुर इति। अतो न संक्रान्तितः॥ कथं परीत्तहेतुतो विपुलफलाभिनि- र्वृत्तितः। परीत्तबीजमुप्यते विपुलफला[न्य]भिनिर्वर्तयतीति। अतः परीत्तहेतुतो विपुलफलाभिनिर्वृत्तितः॥ कथं तत्सदृशा- नुप्रबन्धतः। यादृशं बीजमुप्यते तादृशं फलमभिनिर्वर्तयतीति। अतस्तत्सदृशानुप्रबन्धतश्चेति॥ एवं बाह्य[ः] प्रतीत्यसमुत्पादः पञ्चभिः कारणैर्द्रष्टव्यः॥

आध्यात्मिकस्तु प्रतीत्यसमुत्पादः पूर्वमेव विस्तरेण प्रति- पादितः[2]। इहापि योजयितव्यः॥

एवं परमार्थविचारे संवृतमप्रतिषिद्धमेव॥

ननु भावा नात्यन्तासंभविनो भवन्ति। अपि तु हेतु- प्रत्ययबलादनागतादध्वनो वर्तमानमध्वानमागच्छन्ति। वर्त-

---

1 MS. *vṛttiphala*

2 See p. 386

मानात्पुनरनित्यताबलादतीतमध्वानं गच्छन्तीत्येवमुत्पादस्थि-
तिविनाशव्यपदेशः[1] । प्रतीत्यसमुत्पादोऽपि यथावदेवं संग-
च्छते । इति त्रैकाल्यवादिमतमाशङ्क्याह । अन्यत इत्यादि ।

अन्यतो नापि चायातं न तिष्ठति न गच्छति ।

5 अन्यतो देशकालान्नायात । नागतं किं चित् । नाप्यागतं
यद्वर्तमानादध्वनः क चिद्गच्छति । नापि तेनैकस्वभावेन कश्चि-
त्तिष्ठति ॥ तथा हि यद्यनागताद[205b]ध्वनो वर्तमानमा-
गच्छेत् । वर्तमानाद्वातीत तदा सस्कृतमपि नित्यं स्यात् ।
सर्वदा विद्यमानत्वात् । नानित्यं नामास्ति । स धर्मो न च
10 नित्य इति कथमेतत्सेत्स्यति ॥

अथ पूर्वापरकालयो. कारित्रशून्यतया धर्मस्याध्वसु
विशेषः । तथा हि यदासंप्राप्तकारित्रः । कृत्य[2] न करोति ।
तदाऽनागतोऽभिधीयते । यदा करोति तदा प्रत्युत्पन्नः ।
यदा तु कृत्यान्निवृत्तः । तदाऽतीत इति विशेषः ॥ एतदपि
15 न किं चित् । तेनैवात्मना तस्यैव तदापि सद्भावात् । कारि-
त्रमपि कथं न स्यात् । इति वक्तव्य । प्रत्ययान्तरापेक्षापि
नित्यमवस्थितरूपस्य न संभवति । कारित्रशून्यस्य च वस्तुत्वे-
ऽश्वविषाणादीनामपि तत्त्वप्रसङ्गः । कारित्रं वा कथमतीत-

---

[1] See the texts quoted Madhyamakavṛtti p 145, on the *lakṣaṇas* of the *saṃskṛta*

[2] MS karitram—That may be right According to Abhidharmakoça the *kāritra* of the eye is *darçana*

मनागतं प्रत्युत्पन्नं चोच्यते । किं तदपरकारित्रसद्भावात् । स्वयमेव वा [।] पूर्वत्रानवस्थानं । पाश्चात्ये च धर्मस्यापि स्वयमतीतत्वादिव्यवस्थायां न किं चित्तूयते ॥ यदि च । यथा वर्तमानं द्रव्यतोऽस्ति तथातीतमनागतं चास्ति । तदा नैवं । स्वभावेन सतो धर्मस्य कथमनुत्पन्नविनष्टस्वभावता । किमस्य 5 पूर्वं नासीद्यस्याभावादजात इत्युच्यते । किं च पश्चान्नास्ति यस्याभावाद्विनष्ट इति । तेनैव चात्मना पूर्वापरकालयोरवस्थाने वर्तमानवदुपलब्ध्यादिप्रसङ्गः । तस्मादभूतत्वादभवनधर्मतो न संगच्छते कथं चिदप्यध्वत्रययोग. ॥ तत्त्वाभ्युपग[च्छ]तो नातीतादिसद्भाव. । तदयमत्र संग्रहश्लोकः । 10

स्वभावः सर्वदा चास्ति भावो नित्यश्च नेष्यते ।

न च स्वभावाद्भावो [206a] ऽन्यो व्यक्तमीश्वरचेष्टितं ॥ इति ।[2]

यदप्युच्यते । अस्त्यतीतं कर्म । अस्त्यनागतं फलमिति सूत्रवचनात् । अस्त्यतीतादिभावः । तदपि हेतुफलापवादे तद्दृष्टिप्रतिषेधार्थमुक्तं भगवता । अस्त्यतीतं अस्त्यनागतमिति ॥ अतीतं 15 तु यद्भूतपूर्वमुत्पद्य विनष्टं । अनागतं यत्सति हेतौ भविष्यति । एवं हि हेत्वाद्यस्तीत्युच्यते । अस्तिशब्दस्य निपातत्वात् । कालत्रयवृत्तित्व । इत्थं चैतदेव यत्परमार्थशून्यतायामुक्तं भग-

---

[1] So MS

[2] Quoted with a commentary in Abhidharmakoçavyākhyā, Société Asiatique, fol 360

वता । चक्षुर्भिक्षव उत्पद्यमानं न कुतश्चिदागच्छति । निरुध्य-
मानं न क्व चित्संनिचयं गच्छति । इति हि भिक्षवः चक्षुरभूत्वा
भवति । भूत्वा च प्रतिविगच्छतीति[1] ॥ यदि चानागतं चक्षुः
स्यात् । नोक्तं स्यादभूत्वा भवतीति । तस्मान्नाध्वसंक्रान्तिरस्ति ॥
5 यदि चैवं न कुतश्चिदागमनं [क्व चिद्] गमनं वा प्रज्ञायते ।
प्रतिभासमानस्य च प्रत्युत्पन्नस्य न रूपं किं चिद्विचारेणाव-
तिष्ठते । तदा

मायातः को विशेषोऽस्य यन्मूढैः सत्यतः कृतं ॥ १४३

मायात ऐन्द्रजालिकनिर्मितहस्त्यादिरूपाया अपि निःस्व-
10 भावतया विशेषो नैव कश्चित् । अस्य हेतुप्रत्ययोपजनितस्य
वस्तुरूपस्य परिदृश्यमानस्य ॥ कथं न विशेषः । पुनरिदमेव
व्यक्तीकुर्वन्नाह । माययेत्यादि ।

मायया निर्मितं यच्च हेतुभिर्यच्च निर्मितं ।
आयाति तत्कुतः कुत्र याति चेति निरूप्यतां ॥ १४४

15 मायाशब्देनात्र मायानिर्माणहेतुविज्ञानादिविशेष उच्यते ।
कारणे कार्योप[चा]रात् । हेतोरपि मायास्वभावताप्रतिपाद-
नार्थं । तया निर्मितं यच्च । वस्तुरूपं मयाहेतुना मायास्वभा-
वेन यद्विरचितमिति यावत् । यच्चान्यद्वस्तुरूपं हेतुभिः ।

---

[1] Quoted Abhidharmakoça, fol 362—On *abhutva bhava*, see Milinda, p 52 (Walleser, Grundlage, 128), Madhyamakavrtti, p 263, and xxi, 4, xxvii, 12.—Texts supporting the existence of the *atita*, see Digha, ix, 49.

लोकप्रसि[206b]द्धैः कारणैर्निर्मितं जनितं। परस्परसमुच्चयार्थे चकारद्वय। आयात्यागच्छति तन्मायानिर्मितं[1] हेतुनिर्मितं वा वस्तुरूप कुतः। कस्मात्। कुत्र याति च। विनष्टं सत्क पुनरेतद्गच्छति। इत्येवं निरूप्यतां। सूक्ष्मेचिकया विचार्यतां। यदि तस्य कुतश्चिदागच्छति। क चिद्गच्छति वोपलभ्यते॥ 5

ननु च यदि हेतुप्रत्ययसामर्थ्योपजनित वस्तुरूपं तदा कथमिवालीकं स्यात्। अत एवालीकमित्याह। यदन्येत्यादि।

यदन्यसंनिधानेन दृष्टं न तदभावतः।
प्रतिबिम्बसमे तस्मिन् कृत्रिमे सत्यता कथं॥ १४५

यद्वस्तुरूपमन्यस्य हेतुप्रत्ययस्य सनिधानेन दृष्टमुपलब्धं। न 10 तदभावतः तस्यान्यस्याभावतो न दृष्ट। तत्पराधीनवृत्तित्वात्। प्रतिबिम्बसमे प्रतिबिम्बेन आदर्शमण्डलप्रतिभासिना मुखादिसादृश्येन तुल्ये। यथा मुखादिबिम्बादर्शमण्डलादिसंनिधाने[न] प्रतिबिम्बं प्रतिभातेस। तदभावे न प्रतिभासते। तथा वस्तुरूपमपि हेतुप्रत्ययसनिधानासनिधानयोरिति। एवभूते वस्तुरूपे 15 कृत्रिमे परायत्तवृत्तितयाऽस्वाभाविके सत्यताऽमृषार्थता कुतो। नैव युज्यते। न हि परोपनिधिस्वभावानामकृत्रिमता युक्ता। तदुक्त।

हेतुतः संभवो येषां तदभावान्न सन्ति ये।
कथं नाम न ते स्पष्ट प्रतिबिम्बसमा मताः॥ इति।[2]

---

1 MS tasmān māyā°

2 See Madhyamakavrtti, p 413

तस्माच्च हेतुप्रत्ययोपजनितं किं चित्परमार्थसदस्ति । न च हेतुप्रत्ययानां सामर्थ्यं क्व चिदपि परमार्थतः संभवति ॥ तथा हि स्वपरोभयात्मकैर्हेतुभिर्विद्यमानो वा भावः क्रियेताविद्यमानो वा । उभयस्वभावो वा । तत्र न विद्यमानः क्रियत

5 इत्याह । विद्यमानेत्यादि[1] ।

विद्यमानस्य भावस्य हेतुना किं प्रयोजनं ।

वि[207a]द्यमानस्य कारणव्यापारात्प्रागेव सत्स्वभावस्य हेतुना कारणेन किं प्रयोजनं । कार्यस्य निष्पन्नात्मकतया निर्वर्त्यस्वभावाभावाद्धेतुव्यापारस्यानुपयोगात् ॥ द्वितीय विकल्पमधि-

10 कृत्याह । अथापीत्यादि ।

अथाप्यविद्यमानोऽसौ हेतुना किं प्रयोजनं ॥ १४६

अथापीति प्रकारान्तरद्योतनेऽविद्यमानोऽसौ न सत्स्वभाव । तर्हि हेतुना कि प्रयोजनं । तदापि न हेतुना किमपि प्रयोजनमस्ति । तत्राप्यसत्स्वभावत्वात् । हेतुव्यापाराभावात् ॥

15 स्यादेतद्यदि नाम विद्यमानस्य निष्पन्नत्वात् । कर्तव्याभावाच्च हेतुना किमपि प्रयोजनं । अविद्यमानस्य तु किं न भवतीत्याह । नाभावस्येत्यादि ।

नाभावस्य विकारोऽस्ति हेतुकोटिशतैरपि ।

नाभावस्याविद्यमानस्वभावस्य विकारोऽस्ति । अन्यथात्वं

---

[1] So MS

भावस्वभावताऽस्ति। नीरूपतया तस्यापि कर्तव्याभावात्। हेतुकोटिशतैरपि। आस्तां तावद्धेतुशतैर्हेतुसहस्रैर्हेतूनां कोटिशतैरपि। तस्य निःस्वभावतया केन चिदपि विकारयितुमशक्यत्वात्॥ मा भवतु विकारो भावस्वभावता केवलमस्यास्तु चेद्‌त्राह। तदवस्थ इति। 5

तद्वस्थः कथं भावः।

तदवस्थोऽपरित्यक्ताभावस्वभावः। नैव भावः स्यात्। नाभाव एव भावो भवति। केवलमभावस्वभावतानिवृत्तौ भावस्वभावो भवति। अत्राह।

को वान्यो भावतां गतः॥ १४७ 10

यदि न प्रागभावो भावस्वभावो भवति। को वा तर्हि। अभावादन्योऽपरो भावता। अभावस्वभावतां परित्यज्य। भावरूपतां गतः। नान्यः कश्चित्प्रतीयते। कारणस्य कार्यस्वभावतयाः पूर्वमेव प्रतिषिद्धत्वात्॥ स्यादेतत्। नान्यः कश्चिद्भावो भव[207b]ति। किं तर्हि प्रागभावस्य भावविरोधिनः सद्भावात्तदा भावो न भवति। पश्चात्पुनस्तस्मिन्नपगते भवत्येवेत्याह। 15

नाभावकाले भावश्चेत्कदा भावो भविष्यति।

नाभावकालेऽभावसत्तासमये न भावश्चेत्। यदि भावो न भवति। कदा भावो भविष्यति। अभावकाले भावस्यानुत्पत्ति-

स्येत्। [न] कदा चिद्भावस्योत्पादनं स्यात्। अभावेन विरोधिना सदा क्रोडीकृतत्वात्॥ तेनैवोत्पद्यमानेन भावेनाभावस्य विनाशो भविष्यतीति चेदाह।

नाजातेन हि भावेन सोऽभावोऽपगमिष्यति॥ १४८

5 यावदसौ भावो न जायते। तावदभावस्य विनाशो नास्त्येव। हिर्यस्मात्। तस्मान्नाजातेनानुत्पन्नेन भावेन सोऽभावः। *प्रागभावरूपः अपगमिष्यति। निवर्तयिष्यते॥* अथापि स्यात्। मापगच्छतु नामाभावः। तस्मिन्ननपगत एव भाव उत्पद्यते। उत्पन्ने च भावे भावाभावयोः परस्परपरिहारात्पश्चादभावः 10 स्वयमेवापगमिष्यतीति। आह। न चेत्यादि।

न चानपगतेऽभावे भावावसरसंभवः।

भवत्येष क्रमो यदि पूर्वं भाव एव भवेत्। न चैतदस्ति। चो यस्मात्। न चैवानपगतेऽनिवृत्तेऽभावे भावस्यावसरोऽवकाशः। तस्य संभवः। भावोत्पत्तिविरोधिनोऽभावस्यैव 15 भावात्। कारणेनैव तदभावो निवर्तयिष्यते चेत्। न। कारणस्य कार्योत्पत्तावेव व्यापारात्। कार्यमुत्पादयदेव तदभावमपि निवर्तयतीति चेत्। उत्पादयत्येव कार्यं यदि तद्विरोधिनोऽभावादुत्पादयितुं च[1]मते। न च तस्मिन्नप्रतिहतसामर्थ्ये तत्कार्यमुत्पादयितुं क्षमते। न च कारणेन तद-

[1] MS *lamate*

भावस्य विरोधः । कारणकालेऽपि तत्प्रागभावस्य भावात्मत्ता-वस्थानात् । तस्माद्भावात्मनि अभावात्मनि वा कार्ये न कारणस्य व्यापारो युज्यते । उभयानुभयपक्षे च प्रत्येकपक्षनिषेधादेव कारणव्यापारस्य निषेधः कृतो भवतीति द्रष्टव्यं । नापि तयोः सम्भवोऽस्ति । विरोधिनोरेकत्रैकदा विधिप्रतिषेधयो-भावायोगात् । तदुक्तं । 5

न सन्नुत्पद्यते भावो नाप्यसन् सदसन्न च ।

न स्वतो नापि परतो न द्वाभ्यां जायते कथं ॥ इति ।

एवं तावद्भावस्योत्पत्तिः परमार्थतो न कथं चिदपि संग-च्छते ॥ नापि कथं चिदुत्पन्नस्य सत्स्वभावस्य निवृत्तिर्युज्यत 10 इत्याह भावस्येत्यादि ।

भावस्याभावतां नैति द्विस्वभावप्रसङ्गतः ॥ १४९

पूर्वापेक्षश्चकारः । यथाऽभावो भावतां नैति । तथा भावस्याभावतां नैति । गच्छति । कुतः । द्विस्वभावप्रसङ्गतः । भावस्य सतो यदाऽभावस्वभावता भवति । तदा चैकस्यैव वस्तुनो द्वयोः 15 स्वभावयोः प्रसङ्गः स्यात् । एकस्यैव भावाभावरूपत्वात् । न च भावता परित्यज्याभावरूपतां यातीति वक्तुमुचितं । तदा च भावस्यैवाभावात् । कोऽभावरूपतां यतीति न विद्मः । न च सत्स्वभावस्य पारमार्थिकत्वे निवृत्तिर्युक्ता । पारमार्थिकत्वस्याभावप्रसङ्गात् ॥ इत्थं भावस्योत्पादविनाशयोः परमार्थतोऽभावं 20 प्रसाध्योपसंहरन्नाह [208b] एवमित्यादि ।

एवं च न निरोधोऽस्ति न च भावोऽस्ति सर्वदा ।

एवमुक्तक्रमेणोत्पादविनाशायोगात् । चो हेतौ । यस्मान्न निरोधोऽस्ति । न विनाशोऽस्ति । [न च भावोऽस्ति ।] न वस्तुसत्त्वमस्ति । चः समुच्चये । सर्वदा सर्वस्मिन् काले । उत्पादाद्वा तथागतानामनुत्पादाद्वा तथागतानां स्थितैवैषा धर्माणां धर्मता । धर्मसमता । धर्मस्थितिता । धर्मनियामता । धर्मधातुः । तथता । अवितथता इत्यादिवचनात्[1] । यत एव ।

अजातमनिरुद्धं च तस्मात्सर्वमिदं जगत् ॥ १५०

अजातमनुत्पन्नं । अनिरुद्धं चाविनष्टं परमार्थतः । तस्मादुत्पादविनाशाभावात् । पूर्वोक्तात् । सर्वमशेषं । इदं निःस्वभावतासमानाधिकरणं जगद्विश्वं सत्त्वभाजनलोकसंज्ञितं सचराचरं वा । मायोत्पादनिरोधवद्व्यवहारवशात् । पुनरुत्पादनिरोधौ स्तः[2] । एतेन संवृतिसत्यस्याप्रतिषेध उक्तः ॥ धर्मसंगीतौ चैतदुक्तं[3] । तथता तथतेति कुलपुत्र शून्यताया एतदधिवचनं । सा च शून्यता नोत्पद्यते । न निरुध्यते । आह । यद्येवं सर्वधर्माः[4] शून्या उक्ता भगवता तत्सर्वधर्मा[5] नोत्पत्स्यन्ते ।

---

[1] See Çālistambasutra, Madhyamakavṛtti p. 40 and additions

[2] Such seems to have been the first reading; second hand *nirodhāv ubhau*

[3] See Çikṣāsamuccaya, p. 263, 1

[4] *Sarva* wanting in Çi

[5] Çi *tasmāt sarvadharmā*

न निरोत्स्यन्ते । निरारम्भो[1] बोधिसत्त्वः । आह । एवमेतत्कुल-
पुत्र यथाभिसंबुध्यसे । सर्वधर्मा नोत्पद्यन्ते न निरुध्यन्ते ।
आह । यदेतदुक्तं भगवता संस्कृता धर्मा उत्पद्यन्ते निरुध्यन्ते
च इत्यस्य तथागतभाषितस्य कोऽभिप्रायः । आह । उत्पाद-
निरोधाभिनिविष्टः[2] कुलपुत्र लोकसंनिवेशः । तत्र तथागतो 5
महाका[209ᵃ]रुणिको लोकस्य[3] त्रासपदपरिहारार्थं व्यवहार-
वशादुक्तवानुत्पद्यन्ते निरुध्यन्ते च । न चात्र कस्य चिद्धर्मस्यो-
त्पादो न निरोध इति ॥

तस्मात्सर्वधर्मा अनुत्पन्नानिरुद्धस्वभावतया आदिशान्ताः
प्रकृतिपरिनिर्वृताः । इति जगतो निःस्वभावतायां तदन्त- 10
र्गताना नरकादिगतीनामपि निःस्वभावतैवेत्युपदर्शयन्नाह ।
स्वप्नेत्यादि ।

स्वप्नोपमास्तु गतयो विचारे कदलीसमाः ।

स्वप्नेनोपमा तुल्यं यासां तास्तथोक्ताः । तुरवधारणे । स्वप्नो-
पलब्धस्वभावगतयः । नरकप्रेततिर्यङ्मनुष्यदेवानां सभागता- 15
विशेषाः । यथा स्वप्ने देशान्तरादिगमनागमन सुखदुःखाद्यनु-
भवनं च तथा । अनधिगतपरमार्थतत्त्वस्य नरकादिषु वेदि-
तव्यं । न तु तत्त्वतः । कथं । विचारे कदलीसमा हेतुपद-

1 Such seems to have the first reading, as in C₁, second hand *nirālambo*

2 MS *utpādanisedha* C₁ *nirodha*

3 C₁ *lokasyottrāsa*

मेतत् । सर्वधर्माणां निःस्वभावतया विचारे विमर्शे सति । यस्मात्कदलीसमाः । कदलीवन्निःसारा गतयस्तस्मादित्यर्थः । एतेन यथोक्तं प्राक्

मायेवेयमतो विमुञ्च हृदय त्रास

5 इत्यादि । तदपि प्रमाणोपदर्शितं भवति । यतश्चानुत्पन्नानिरुद्धाः सर्वधर्माः । अत आह । निर्वृतेत्यादि ।

निर्वृतानिर्वृतानां च विशेषो नास्ति वस्तुतः ॥ १५१

निर्वृता ये सर्वधर्मावरणप्रहाणादिनिर्मुक्तसर्वबन्धनाः । अनिर्वृता ये रागादिक्लेशपाशायत्तचित्तसंततयः । संसारचारका-

10 न्तर्गताः । तेषामुभयेषामपि विशेषो भेदो नास्ति [200b] न संभवति । कुतः । वस्तुतः । परमार्थतः । सर्वधर्माणां निःस्वभावतया प्रकृतिपरिनिर्वृतत्वात् । संवृत्या पुनरस्त्येव विशेषः इत्यनेकधा प्रतिपादितं । अत एवाह ।

बुद्धानां सत्त्वधातोश्च येनाभिन्नत्वमर्थतः ।

15 आत्मनश्च परेषां च समता तेन ते मता ॥ इति ।[2]

इति परमार्थतत्त्वापरिज्ञानान्मिथ्याभिनिवेशादारोपितजगज्जालमुपकल्प्यात्मनैवात्मानमाकुलयति बालजन इत्युपदर्शयन्नाह । एवमित्यादि ।

एवं शून्येषु धर्मेषु किं लब्धं किं हृतं भवेत् ।
सत्कृतः परिभूतो वा केन कः संभविष्यति ॥ १५२

---

[1] Above iv 47

[2] Nāgārjuna Catustava

कुतः सुखं वा दुःखं वा किं प्रियं वा किमप्रियम् ।
का तृष्णा कुत्र सा तृष्णा मृग्यमाणा स्वभावतः ॥ १५३
विचारे जीवलोकः कः को नामात्र मरिष्यति ।
को भविष्यति को भूतः को बन्धुः कस्य कः सुहृत् ॥ १५४

एवं प्रतिपादितन्यायेन शून्येषु निःस्वभावेषु [धर्मेषु] किं लब्धं । किं कुतश्चित्प्राप्तं यल्लाभेषु प्रहृष्यन्ति । किं हृतं । किमपहृतं केन चित्कस्य चिद्भवेत् । यल्लाभापहारेण प्रकुप्यन्ति । सत्कृतः पूजितः । परिभूतोऽपकृतो वा केन कः संभविष्यति । वस्तुस्वभावाभावे न कश्चित्केन चिदित्यर्थः । 5

कुतः सुखहेतोरभावात्सुखं वा । कुतो दुःखं वा दुःखहेतोरभावात् । अन्योन्यसमुच्चयार्थं उभयत्र वाशब्दः । यत्प्राप्तिपरिहारार्थमायासं क्रियते किं प्रियं वा किं वल्लभं वा प्रियरूपतायाः कल्पितरूपत्वात् । किमप्रियं किमनभिलषणीयं । अप्रियमपि न परमार्थतः किं चिद्विद्यते । इति किमर्थं प्रियाप्रियसंयोगवियोगार्थं प्रयत्नः[2] क्रियते ॥ का तृष्णा यया लाभाद्यर्थं तृष्यति जनः । कुत्र सा तृष्णा क्व पुनरियमासङ्गस्थाने वस्तुनि तृष्णा । मृग्यमाणा स्वभाव[210a]तः । 10 15

1 Such is the reading of the commentary and of several MSS., but the reading of Minayeff vicāryajjīvaloka[illegible] is supported by Subhāṣitasaṃgraha ed. Bendall p. 11.

2 *Prayatnaḥ*, second hand.

अन्विष्यमाणा स्वरूपतः । तद्विषयस्याभावान्निर्विषयतया तस्या [अ]प्यभावः । यद्वशात्तत्कर्म समुच्चीयते ॥

विचारे परमार्थस्वरूपनिरूपणे सति जीवलोकः सत्त्वलोकः । को । नैव कश्चित् । तदभावात् । को नामात्र मरिष्यति । जीवलोकस्य विचारेणासत्स्वभावत्वात् । को नामात्र जीवलोके मरिष्यति । उपरतजीवितेन्द्रियो भविष्यति । को भविष्यति । क उत्पत्स्यते । को भूतः । पूर्वमुत्पन्न इत्यतीतादिव्यवहारः काल्पनिक एव । को बन्धुः । कः स्वजनः । कस्य कः सुहृत् । किं मित्र कस्य । अत्रेति सर्वत्र योजनीयं । यदभिष्वङ्गेणाकुशलमपि न गण्यते ॥ एवं स्वभावशून्यत्वात्कल्पनासमारोपितमेव तत्त्वमित्याह । सर्वमित्यादि ।

सर्वमाकाशसंकाशं परिगृह्णन्तु मद्विधाः ।
प्रकुप्यन्ति प्रहृष्यन्ति कलहोत्सवहेतुभिः ॥ १५५

सर्वमेतदुक्तमन्यच्च । आकाशसंकाश समारोपिततत्त्वशून्यत्वादाकाशकल्प । परिगृह्णन्तु । अविद्यमानमेव तु स्वरूपमारोप्य मद्विधा इति ग्रन्थकारमात्मानमेव निदर्शनं करोति । मादृशा अपरिज्ञातपरमार्थतत्त्वा बालजना असद्वितर्काकुलितचेतसः प्रकुप्यन्ति । मिथ्याभिनिवेशात्कोपं यान्ति । प्रहृष्यन्ति । अलीकलाभयोगात्प्रमुदिता भवन्ति । कैः । कलहोत्सवहेतुभिः । कलहहेतुभिर्विवादहेतुभि । उत्सवहेतुभिरानन्दहेतुभिः । यथायोगं ॥ तस्मादनधिगतपरमार्थतत्त्वाः । सांवृतमेव वस्तुरूपं

सत्यतयाभिनिविष्टाः [210a] सर्वमेतत्कल्प्यन्ते । न तु परमार्थवेदिन इति । तदुक्तं । एतावच्चैव ज्ञेय यदुत संवृतिः परमार्थश्च । तच्च भगवता शून्यत सुदृष्ट सुविदितं सुसाक्षात्कृत तेन सर्वज्ञ इत्युच्यते । तत्र संवृतिर्लोकप्रचारतः । तथागतेन दृष्टा । यः पुन. परमार्थः । सोऽनभिलाप्यः । अनाज्ञेयोऽविज्ञेय । अदेशित । अप्रकाशितः । यावदक्रिय । अकरणः । यावन्न लाभो नालाभो न दुःख न सुख न यशो नायश । न रूप नारूपमित्यादि । 5

तत्र जिनेन जगस्य कृतेन
संवृति देशित लोकहिताय । 10
येन जगत्सुगतस्य सकाशे
सजनयीह प्रमादसुखाय ॥
संवृति प्रज्ञयो नरसिंह
षड्गतयो भणि सत्त्वगणानां
नरकगतीश्च तथैव च प्रेतान् 15
[आ]सुरकाय नरांश्च मरूंश्च

---

[1] See ... 2nd ... (from Pitāputrasamāgama)
[2] MS ...
See ... p. 2... Madhyamakāvatāra, p. 175
[4] ... ukhe ...
...
[5] ... illegible
... ... MS jatānām
[6] ... a much better reading

नीचकुलां तथ उच्चकुलांश्च

आढ्यकुलांश्च[1] दरिद्रकुलांश्च ॥

इत्यादि ॥ इदमपि तत्त्वानधिगमस्य फलमित्याह ।

शोकायामैरित्यादि ।

शोकायासैर्विषादैश्च मिथश्छेदनभेदनैः ।
यापयन्ति सुकृच्छ्रेण पापैरात्मसुखेच्छवः ॥ १५६

पुत्रकलत्रादिविप्रयोगकृता शोकाः । सुखदुःखप्राप्तिपरिहारनिमित्तपरिश्रमा आयासाः । तैः शोकायासैर्मर्दिता यापयन्ति सुकृच्छ्रेणेति सम्बन्धः । विषादैश्च । लाभसत्कारादि-
10 विगमे विषादैर्दौर्मनस्यैश्च । मिथश्छेदनभेदनैः । मिथः परस्परं । छेदनानि करचरणशिरोनासिकाकर्णप्रभृतीनां । भेदनानि वाहुजङ्घोरुवक्षःपार्श्वोदरादीनां । चकारोऽनुवर्तते । तैश्छेदनभेदनैश्च यापयन्ति । कालक्रमेणायुःसंस्कारान्[2] क्षपयन्ति । सुकृच्छ्रेण महता कष्टेन कथं चिदन्नपानशयनासनेन ।
15 किंभूताः सन्तः । पापैरात्मसुखेच्छवः । पापैरकुशलैः कर्मभिः । आत्मनः स्वस्य सुखेच्छवः सुखाभिलाषशीलाः ॥ तथाविधैश्च समाचारविशेषैश्च[3]

1 MS adya
2 MS [illegible]
3 MS. abhilasana [illegible]

मृताः पतन्त्यपायेषु दीर्घतीव्रव्यथेषु च ।

मृता जीवितेन्द्रियविमुक्ता । पतन्ति गच्छन्त्यपायेषु नरकप्रेततिर्यक्षु । किंभूतेषु । दीर्घतीव्रव्यथेषु च दीर्घा चिरकालभाविनी । तीव्राऽतिदुःसहवेदनीयविपाकत्वात् । व्यथा येष्वपायेषु ते तथोक्ताः । तेषु च । चकार उक्तसमुच्चये भिन्नक्रमे वा । केन प्रकारेणेत्याह । आगत्यागत्येत्यादि । 5

आगत्यागत्य सुगतिं भूत्वा भूत्वा सुखोचिताः ॥ १५७

सुखसंवर्धिता भूत्वा भूत्वा । कथं । आगत्यागत्य सुगतिं । शोभनां देवमनुष्यगतिं प्राप्य प्राप्य ॥ पुनरपि तथाभूतानां दुःखपरम्परासागरनिमज्जनोन्मज्जनमादर्शयन्नाह भव इत्यादि । 10

भवे बहुप्रपातश्च तत्र चासत्त्वमीदृशम् ।
तत्रान्योन्यविरोधश्च न भवेत्तत्त्वमीदृशम् ॥ १५८

भवे संसारे कामरूपारूप्यस्वभावे बहुप्रपातश्च बहुतर उपघातश्च । तत्र चासत्त्वमीदृशं । तत्र च भवे प्रपाते वा । अतत्त्वमीदृशं व्यामोहविजृम्भितमेतादृशं सर्वजनसाधारणं यथाविध प्रतिपादितं परिदृश्यमानं वा । तत्रान्योन्यविरोधश्च । तत्रैवंविधे अतत्त्वे सति अन्योन्यविरोधः । परस्परविप्रतिपत्तिः । केन कारणेन न भवेत्तत्त्वमीदृशमिति । तस्माद्वस्तुरूपमेतादृशमनेकाकारसमारोपात् । 15

तत्र चानुपमास्तीव्रा अनन्तदुःखसागराः । [211a]

तत्र चैवमपि अनुपमा तदपरसदृशदुःखाभावादुपमातुमशक्याः । तीव्रा अत्युग्रवेदनाः । अनन्ता [अ]नवधिकालविपाकतयाऽपर्यन्ता वा दुःखानामतिविपुलतया महायानमनधिगम्य निस्तरीतुमशक्यत्वात् सागराः । तत्रापि कथंचित् महता वीर्येण कुशलपक्षोपचयाद्दीर्घेण कालेन सुगतिं प्राप्य क्षपयितुं शक्यन्त इत्यत आह तत्रैवमित्यादि ।

तत्रैवमल्पबलता तत्राप्यल्पत्वमायुषः ॥ १५९

तत्रापि जीवितारोग्यव्यापारैः क्षुत्क्लमश्रमैः ।

निद्रयोपद्रवैर्बालसंसर्गैर्निष्फलैस्तथा ॥ १६०

वृथायुर्व्रजत्याशु विवेकस्तु सुदुर्लभः ।

तत्र तथारूपेऽपि सुभावना एव परिदृश्यमानरूपा अल्पबलता हीनवीर्यतेति यावत् ॥ तत्राप्यल्पत्वमायुषः । तत्राप्येवंभूते सत्यपि अल्पत्वं स्तोकत्वम् आयुषः आयुःसंस्काराणाम् ॥ तत्रापि जीवितारोग्यव्यापारैः जीवितस्य चिरकालयापनाय व्यापारैः स्नानाभ्यञ्जनप्रभृतिभिः । आरोग्यस्य आरोग्याय वा रोगोपशमाय व्यापारैः । विशेषेण कटुतिक्तभैषज्यकषायपानादिभिः । कुशलोपार्जनमन्तरेण वृथा एवायुर्व्रजत्याशु इति वक्ष्यमाणेन सबन्धः ॥ तथा क्षुत्क्लमश्रमैः क्षुत् बुभुक्षा क्लमो ग्लानिः । श्रमो मार्गखेदादिभिः । निद्रयोपद्रवैः । निद्रया स्वप्नेन । उपद्रवैर्दस्योत्पातविहेठनादिकृतैः सरीसृपव्याडमृग-

दष्टमशकादिकृतैः । वधबन्धनताडनादिलक्षणैः । तथा बाल-संसर्गैर्निष्फलैस्तथा । बालानां पृथग्जनानां संसर्गैः संपर्कैः । किंभूतैः । निष्फलैः । आत्मोत्कर्षादिसंभिन्नप्रलापादिबहुलैः । तथेति । न केवलं पूर्वोक्तक्रमेण इत्थमपि वृथैवायुर्वेहत्याशु । वृथैव । निष्फलमेव कुशलपक्षो[1]पचयरहितत्वात् । आयु-र्वहति यांति आशु शीघ्रं असंज्ञापारप्रसंगात् त्वरितमेव परिक्षयात् ॥ एवमपि वर्तमानानां विवेकस्तु सुदुर्लभः विवे-कस्तु हेयोपादेयज्ञानं व्यासङ्गपरित्यागो वा सुदुर्लभः । कथमप्यतिकृच्छ्रेणापि न लभ्यते ॥ भवतु नामैवं तथापि यदि कथंचित्समाधानं जायते तदा कल्याणं स्यात् तदपि नास्तीत्याह तत्रापीत्यादि ।

तत्राप्यभ्यस्तविक्षेपनिवारणगतिः कुतः ॥ १६ ॥
तत्रापि मारो यतते महापायप्रपातने ।

तत्राप्येवमवस्था गतेऽपि अभ्यस्तविक्षेपं परिशीलितमो-हत्वं तस्य निवारणं निवर्तनं तस्य गतिरनुप्रवेशः कुतो नैवास्ति ॥ तत्राप्येवमनर्थपरम्परायां स्थितानां कथंचित्कुशल-पक्षं समीक्ष्य मारो यतते महापायप्रपातने क्लेशमारो देवपुत्रमारो वा यतते उद्यच्छते । महापायप्रपातने । प्रपातन-निमित्तं । अवीच्यादिनरकप्रक्षेपणार्थमिति यावत् ॥ एवमपि

[1] MS. *kṣapa...* This misreading is common enough but usually corrected by a second hand.

कदा चित्सत्यरवादिष्वभिसंप्रत्ययवशात्कथ चित्कल्याणमुपजायत इत्याह । तत्रासन्मार्गेत्यादि ।

तत्रासन्मार्गबाहुल्याद्विचिकित्सा[1] च दुर्जया ॥ १६२
पुनश्च क्षणदौर्लभ्यं बुद्धोत्पादोऽतिदुर्लभः ।
5 **क्लेशौघो दुर्निवारश्चेत्यहो दुःखपरम्परा ॥ १६३**

तत्रैवंदशा प्राप्नोति । सम्यग्दृष्टिविपक्षस्यासन्मार्गस्य चार्वाकमीमांसकादिपरिदीपितस्य बाहुल्याद्भूयस्त्वात् विचिकित्सा सन्मार्गे विमतिश्च दुर्जया कथ चिदपि विचिकित्सा त्यक्तुं न शक्या ॥ कथ चित्सुगतिप्रतिलम्भेऽपि पुनश्च क्षणदौर्लभ्य अष्टाक्षणविनिर्मुक्तस्य क्षणस्य दौर्लभ्य परमदुर्लभत्व
10 महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपम ।

कथ चिदितरक्षणसंभवेऽपि बुद्धोत्पादोऽतिदुर्लभ बुद्धानां [ ][2][3] समस्तजगदालोककारिणा सर्वदुःखनिदानभूतक्लेशशल्यापहारिणामुत्पाद प्रादुर्भाव अतिदुर्लभः कथ चित्कर्हि चित् उदुम्बरपुष्पप्राय संसारसागरोत्तरणोपायभूत । कथ चिद्बुद्धोत्पादसंभवेऽपि । क्लेशौघ
15 [ ][4] दीना उघ । अविच्छिन्नप्रवाह । स दुर्निवार ।

[1] Minaev *bahutayam*
[2] See above v. 20
[3] Four aksaras are wanting
[4] About seventeen aksaras wanting
[5] So MS

दुःखेनापि निवारयितुमशक्य ॥ इत्यहो दुःखपरम्परा । इत्येव । अहो इति खेदे । दुःखस्य कष्टस्य परम्परा । एकस्माद्दुःखाद्वि-निर्गमेऽपि । अपरस्मिन्दुःखे [प्रपातनात् ॥

साम्प्रतमेव सत्त्वान् सुदुःखितान् समीक्ष्य करुणाम्रेडित-हृदयः परदुःखदुःखी शास्त्रकारः सत्त्वानां दुःखं शोचयन्नाह । अहो बतेति ।

अहो बतातिशोच्यत्वमेषां दुःखौघवर्तिनाम् ।

निपातसमुदाय खेदे । अतिशोच्यत्वं अतिशयेन शोच-नीयत्वं । एषां हिताहितपरिज्ञानविकलानां सत्त्वानां दुःख-सागरकल्लोलपरम्परानिमज्जनोन्मज्जनाकुलचेतसां । के पुनरमी 10 सत्त्वाः शोचनीया इत्याह । य इत्यादि ।

ये नेक्षन्ते स्वदौःस्थित्यमेवमप्यतिदुःस्थिताः ॥ १६४

ये सत्त्वा अविद्यान्धीकृतज्ञानलोचनाः नेक्षन्ते न पश्यन्ति । स्वदौःस्थित्यं[1] । स्वस्यात्मनो दुःखावस्थितत्वमेवमप्यतिदुःस्थिता । एवमुक्तक्रमेण अतिदुःस्थिताः । अतिशयेन दुःखावस्थिताः । 15 दुःखपर्यापन्ना इति यावत् ॥ एतदनुरूपदृष्टान्तेन स्पष्टयन्नाह । स्नात्वेत्यादि ।

1 Visarga wanting in MS

2 First hand *sti*

स्नात्वा स्नात्वा यथा कश्चिद्विशेदग्निं मुहुर्मुहुः ।
स्वसौस्थित्यं च मन्यन्त एवमप्यतिदुःस्थिता ॥ १६५

स्नात्वा स्नात्वा जलावगाहनं कृत्वा कृत्वा यथा कश्चिदुप-हतबुद्धिः शीतार्तः सुखाभिलाषी । विशेत्प्रविशेत् । वह्निमग्निं मुहुर्मुहुः प्र[ ] तिक्षणं पुनः पुनर्वा । तथैतेऽपि मत्त्वा । स्वसौस्थित्यं आत्मसुखसंपत्तिं च । मन्यन्ते । अवबुध्यन्ते । एव-मप्यतिदुःस्थिताः । एवमनेन प्रतिपादितक्रमेणातिदुःस्थिताः । दुःखाग्निज्वलकवलीकृताः । अहो बतातिबहलतराज्ञानान्ध-काराक्रमणममीषां यदात्मगतमपि प्रमादं न पश्यन्तीत्याह । अजरेत्यादि ।

अजरामरलीलानामेवं विहरतां सताम् ।
आयास्यन्त्यापदो घोराः कृत्वा मरणमग्रतः ॥ १६६

न विद्यते जरा जीर्णता येषां तेऽजराः । न म्रियन्ते ये तेऽमराः । तेषामजराणाममराणामिव लीला विचेष्टितं । येषां ते तथोक्ताः । तेषामेवमनया लीलया विहरतां निश्चितं विचरतां सतामायास्यन्ति । ढौकिष्यन्ते । आपदो निरन्तरं । सर्वे ते दुःखहेतवो जराव्याधिविपत्तयः । घोरा अतीव भयं-कराः । कथमायास्यन्ति । कृत्वा मरणमग्रतः । मरणमप्रती-कारपरिहार्यं मृत्युमग्रतः पुरतः कृत्वा ॥

एतच्चोक्तं भगवता राजाववाद[क]सूत्रे[1]। तद्यथा महाराज। चतसृभ्यो दिग्भ्यश्चत्वारः पर्वता आगच्छेयुः। दृढाः। सारवन्तः। अखण्डाः। अच्छिद्राः। असुषिराः[2]। सुसंवृत्ताः। एकघनाः। नभः स्पृशन्तः। पृथिवीं चोल्लिखन्तः। सर्वं[3] तृणकाष्ठशाखा-पर्णपलाशादि सर्वसत्त्वप्राणभूतान्[4] निष्पिंषन्तः। तेभ्यो न सुकरं जवेन वा पलायितुं बलेन वा द्रव्यमन्त्रौषधैर्वा निवर्तयितुम्। एवमेव महाराज चत्वारीमानि महाभयानि। आगच्छन्ति। येषां न सुकरं जवेन [वा] पालयितुं। बलेन वा। द्रव्य-मन्त्रौषधैर्वा निवर्तनं कर्तुं। कतमानि चत्वारि। जरा व्याधि-र्मरणं विपत्तिश्च। जरा महाराज आगच्छति] [213b] यौवनं प्रमथमाना। व्याधिर्महाराज आगच्छति आरोग्यं प्रमथ्नन्[5]। मरणं महाराज आगच्छति जीवितं प्रमथमानं। विपत्ति-र्महाराज आगच्छति सर्वाः संपत्तीः प्रमथ्नन्ती। त[त्क]स्मा-द्धेतोः[6]। तद्यथा महाराज सिंहो मृगराजो रूपसंपन्नो जव-संपन्नः सुजातनखदंष्ट्राकरालो मृगगणमनुप्रविश्य मृगं गृहीत्वा यथाकामकरणीयं करोति। स च मृगराजोऽतिबलव्याड-मुखमासाद्य विवशो भवति। एवमेव महाराज विद्धस्य मृत्यु-शल्येनापगतमदस्य त्राणस्याप्रतिशरणस्यापरायणस्य मर्मसु छिद्य-

[1] See Çikṣāsamuccaya p. 206.
[2] MS. asucch
[3] Or satva
[4] Or prāṇabhṛtān
[5] Or pramathamānaṃ
[6] Or tat kasmād dhetoḥ

मानेषु मांसशोणिते परिशुष्यमाणे परित्रषितविक्लवदनस्य करचरणविक्षेपाभियुक्तस्याकर्मण्यस्यासमर्थस्य लालाशिङ्घाणक-प्रस्रवमूत्रपुरीषोपलिप्तस्य ईषज्जीवितावशेषस्य कर्मभवात्पुनर्भव-मालम्बमानस्य यमपुरुषभयभीतस्य कालरात्रिवशगतस्य चर-माश्वासप्रश्वासेषूपरुध्यमानेषु । एकाकिनो ऽद्वितीयस्यासहायस्य । इमं लोकं जहत परलोकमाक्रमतो महापथं व्रजतो महा-कान्तारं प्रविशतो महागहनमवगाहमानस्य महाकान्तारं प्रपद्यमानस्य महार्णवेनोह्यमानस्य कर्मवायुना नीयमानस्य निर्मित्तीकृतां दिशं व्रजतो नान्यत्त्राणं नान्यच्छरणं नान्यत्प-रायणमृते धर्मात् । धर्मो हि महाराज तस्मिन् समये त्राणं लयनं शरणं भवति । तद्यथा शीतार्तस्याग्निप्रतापः अग्नि-मध्यगतस्यापि निर्वापणं उष्णार्तस्य वा शैत्यं अध्वानं प्रतिपन्नस्य सुशीतलच्छायोपवनं पिपासितस्य सुशीतलं सलिलं । बुभुक्षितस्य वा प्रणीतमन्नं । व्याधितस्य वा वैद्यौ-षधिपरिचारका भयभीतस्य बलवन्तः सहाया, मा एवं प्रति-शरणा भवन्तीति विस्तरः ॥ तस्मादिदं दुःखपरिहारार्थं कुशल-पक्षेऽचैव प्रज्ञापरिशोधितेषु यत्नः करणीय ॥

इदानीं जात्यादिदुःखदुःखिना दुःखापहरणाय स्वाशय-माशङ्कयन्नाह । एवमित्यादि ।

[illegible]

[illegible]

[illegible]

[illegible]

एवं दुःखाग्नितप्तानां शान्तिं कुर्यामहं कदा ।
पुण्यमेघसमुद्भूतैः सुखोपकरणैः स्वकैः ॥ १६७

एवमनन्तरोक्तया नीत्या । दुःखाग्नितप्तानां दुःखान्येवाग्नयः । तैः संतापितानां सत्त्वानां शान्तिं जात्यादिदुःखानलतापप्रशमनं कुर्यामहं कदा । कस्मिन् काले कुर्यां विदध्याम् । कैः सुखोपकरणैः । सुखस्योपकरणानि सुखसाधनानि वस्त्राभरणानुलेपनशयनासनप्रभृतीनि । किं तदुपार्जितैरेव । नेत्याह । स्वकैः स्वात्मीयैः मया स्वयमुपार्जितैरित्यर्थः । किं निर्माणादिप्रदर्शितैः । नेत्याह । पुण्यमेघसमुद्भूतैः । पुण्यान्येव मेघाः । सर्वदुःखसंतापातिशमनसुखोपकरणशीतलवृष्टिप्रदाननिदानत्वात् । तेभ्यः समुद्भूतानि निर्जातानि तैः ॥ एवमभ्युदयसंपदि परेषां चेतो विधाय निःश्रेयससंपदि प्रदर्शयन्नाह कदेत्यादि ।

कदोपलम्भदृष्टिभ्यो देशयिष्यामि शून्यताम् ।
संवृत्यानुपलम्भेन पुण्यसंभारमादरात् ॥ १६८

कदा कस्मिन् काले । उपलम्भदृष्टिभ्यो भावग्राहाभिनिविष्टेभ्यो । देशयिष्यामि प्रकाशयिष्यामि । शून्यतां सर्वधर्मनिःस्वभावतां कथं । संवृत्या व्यवहारेण । अन्यथा विकल्पाविषयतया परमार्थशून्यस्य शून्यताया देशयितुमशक्यत्वात् ।

एव निःश्रेयसहेतुज्ञानसंभारनिमित्तमुपदर्शित ॥ तत्कारण पुण्यसंभारनिदानमुपदर्शयन्नाह । पुण्येत्यादि । पुण्यस्य दानादेः संभारः [क]ःोपलम्भ दृष्टिभ्यो दर्शयिष्यामीति सम्बन्धः । आदरादिति महता गौरवेण सत्कृत्य न यदृच्छया । केन प्रकारेण । अनुपलम्भेन । देयदायकप्रतिग्राहकादिचित्तयानुपलम्भयोगेन त्रिकोटिपरिशुद्धेति यावत् । एवमुपचित. पुण्यसंभारो बुद्धताधिगमाय जायते । तदेवमनेन सर्वणाशेषसंक्लेशहेतुसर्वसमारोपविकल्पप्रतिपक्षतया सर्वावरणप्रहाणोपायत्वात् । समस्ततथागताधिगमहेतुत्वाच्च सर्वदुःखोपशमोपाय-
10 प्रज्ञोपजायते इत्युपदर्शित भवतीति ॥

ये गम्भीरनयावगाहनपटुप्रज्ञा[नि]रस्तभ्रमाः
संक्लेशध्वदानपक्षविमलज्ञानोत्थिता सूरयः ।
ते सन्तो गुणदोषयोरपि च ते भार विमिश्रादतो
ग्राह्यं सद्सत्कल्मष विषमिव त्याज्य दूरके यदि ॥

[1] न युक्तमुक्तं किमपीह यन्मया
पर प्रजातं स्वधिया तदेव मे ।
ननु प्रतीष्यन्ति समाश्च साधवो
मति मयानेन कृतेन साम्प्रतम् ॥

अपि च ।

20 यः सवृत्या व्रजति मनसो गोचरत्व कथ चित्

[1] Eight akṣaras wanting
Or ... [illegible]
Ms. ... [illegible]

ताद्दृश्यर्थे स्खलति न मतिः कस्य वै मादृशस्य ।
तत्सूक्ष्मार्थप्रविचयवतां मध्यमानीतिभाजां[1]
दृष्ट्वा किं[2] चिद्गुणलवमिह स्यादुपादेयबुद्धिः ॥ [215 B]
प्रज्ञाया विवृतिं विधाय विशदव्याख्यापदैः संवृतां[4]
सम्यग्ज्ञानविपक्षदृष्टिनिबिडव्यामोहशान्त्यै मया ।
यत्पुण्यं समुपार्जितं हितफलं तेनाशु सर्वो जनो
मञ्जुश्रीरिव सद्गुणैकवसतिः प्रज्ञाकरो जायतां ॥ इति ॥

बोधिचर्यावतारे प्रज्ञापारमितापरिच्छेद-टीका समाप्ता ॥

॥ कृतिरियं पण्डितभिक्षुप्रज्ञाकर[मति]पादानाम् ॥

---

1 MS madhyamām
2 So MS
3 MS vyadhā
4 MS saṃvṛtam

टीकेयं परमा[1] सुयन्त्रितपदा शुद्धा मनोह्लादिनी
संसारार्णवपारगामिनि जने नौयानयात्रोपमा ।[2]
आशु प्राप्तिकरी जिनस्य पदवीं साध्वी लिखित्वा मया
प्राप्तं यत्कुशलं सुसम्पदि पदं तेनास्तु बुद्धो जनः ॥
अष्टानवतिसंयुक्ते शते सम्वति वत्सरे ।
कृष्णे श्रावणपञ्चम्यां वासरे कुजसाह्वये ॥
श्रीमच्छङ्करदेवस्य राज्ये विजयशालिनः ।[4]
बोधिचर्यावताराख्यटीके लिख्यमिदं शुभं ॥
श्रीललितपुरे रम्ये श्रीमानीग्लसंज्ञके ।
यच्छ्रीराघवनाम्नस्य विहारे सुगतालये ॥
धन्यं स्थविरभिक्षोऽस्य बुद्धचन्द्रस्य पुस्तकम् ।
तत्पुण्याद्बोधिसत्त्वं लभेत परमं पदम् ॥ इति ॥

सृजतु शलिलं घना यथेष्टं
भवतु मही बहुशस्यसम्प्रयुक्तम् ।
भवतु नरपतिः प्रजा विनाशा
भवतु रयनपतेः सुखातिवृद्धि ॥ इति ॥

॥ कायस्थः भुवनाकरसर्मण लिखितमिति ॥[7]

---

1 MS. paramam.
2 MS. padm... pratti... m.
3 So MS.
4 Visarga wanting in MS.
5 So MS.
6 The common reading is ..., Bendall Journey Insc. Plate xiv ... Catalogue p. ix, and Levi Nepal ii p. 105.
7 The readings of the colophon contrast with the correction of the MS.

Title	Rs.	As.
Pariçiṣṭa Parvan, (Text) Fasc 1-5 @ /6/ each ..	1	14
Prākṛta-Paingalam, Fasc 1-7 @ /6/ each	2	10
Prithivirāj Rāsa, (Text) Part II, Fasc 1-5 @ /6/ each ..	1	14
Ditto (English) Part II, Fasc 1	0	12
Prākṛta Lakṣanam, (Text) Fasc 1	1	8
Parāçara Smṛti, (Text) Vol I, Fasc 1-8, Vol. II, Fasc 1-6; Vol III, Fasc. 1-6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc 1-3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols I, Fasc 5-10, II, 1-6; III, 1-7, IV, 1-6, V, 1-8, @ /6/ each Fasc ...	12	6
Sānkhya Sūtra Vṛtti, (Text) Fasc 1-4 @ /6/ each	1	8
Ditto (English) Fasc 1-3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc 14-45 @ /6/ each	12	0
Tāndya Brāhmana, (Text) Fasc 1-19 @ /6/ each	7	2
Tattva Cintāmani, (Text) Vol I, Fasc 1-9, Vol II, Fasc 1-10, Vol III, Fasc 1-2, Vol IV, Fasc 1, Vol V, Fasc 1-5, Part IV, Vol II, Fasc 1-12 @ /6/ each	14	10
Trikānda-Mandanam, (Text) Fasc 1-2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc 1-5 @ /6/ each	1	14
Upamita bhava prapañca kathā (Text) Fasc 1-5 @ /6/ each	1	14
Uvāsagadasāo, (Text and English) Fasc 1-6 @ /12/	4	8
Varāha Purāna, (Text) Fasc 1-14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc 1-6 @ /6/	2	4
*Vāyu Purāna, (Text) Vol I, Fasc 2-6, Vol II, Fasc. 1-7, @ /6/ each	4	8
Viṣnu Smṛti, (Text) Fasc 1-2 @ /6/ each ..	0	12
Vivādaratnākara, (Text) Fasc 1-7 @ /6/ each	2	10
Vṛhannāradīya Purāna, (Text) Fasc 1-6 @ /6/	2	4
Vṛhat Svayambhū Purāna, Fasc 1-6 ..	2	4

Tibetan Series

Title	Rs.	As.
Pag-Sam Thi S'iñ, Fasc 1-4 @ 1/ each	4	0
Sher-Phyin, Vol I, Fasc 1-5, Vol II, Fasc 1-3, Vol III, Fasc 1-5, @ 1/ each	13	0
Rtogs brjod dpag ḥkhri S'iñ (Tib & Sans.) Vol I, Fasc 1-5, Vol II Fasc 1-5 @ 1/ each	10	0

Arabic and Persian Series

Title	Rs.	As.
'Ālamgīrnāmah, with Index, (Text) Fasc 1-13 @ /6/ each	4	14
Al Muqaddasi (English) Vol I, Fasc 1-3 @ /12/ ..	2	4
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol I, Fasc 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc 1-5, @ 1/12/ each ..	29	12
Akbarnāmah, with Index, (Text) Fasc 1-37 @ 1/ each	37	0
Ditto English Fasc, 1-7 @ 1/ each	7	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc 1-19 @ /6/ each ..	7	2
Catalogue of Arabic Books and Manuscripts ..	1	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal Fasc 1-3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc 1-14 @ 1/ each ..	14	0
Fihrist i-Tūsī, or, Tūsy's list of Shy'ah Books, (Text) Fasc 1-4 @ /12/ each ..	3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc 1-9 @ /6/ each	3	6
Ditto of Azādī, (Text) Fasc 1-4 @ /6/ each	1	8
Haft Āsman, History of the Persian Masnawi, (Text) Fasc 1 ..	0	12
History of the Caliphs, (English) Fasc 1-6 @ /12/ each ..	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc 1-3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc @ /12/ each ..	38	4
Maāsir-ul-Umarā, Vol I, Fasc 1-9, Vol II, Fasc 1-9, Vol III, 1-10, Index to Vol I, Fasc 10-11, Index to Vol. III, Fasc 11-12, Index to Vol II, Fasc 10-12 @ /6/ each	13	2
Maghāzi of Wāqidī, (Text) Fasc 1-5 @ /6/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

	Rs	
Muntakhabu-t-Tawārikh, (Text) Fasc. 1-16 @ /6 each ..	5	1(
Muntakhabu-t-Tawārikh, (English) Vol I, Fasc 1-7; Vol. II, Fasc. 1-5 and 3 Indexes, Vol III, Fasc 1 @ /12/ each ...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc 1-19 @ /6/ each ...	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc 1-6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc 1-2 @ /12/ each	1	8
Riyāzu-s-Salāṭīn, (Text) Fasc 1-5 @ /6/ each ..	1	14
Ditto Ditto (English) Fasc. I-II ...	1	8
Ṭabaqāt-i-Nāṣirī, (Text) Fasc 1-5 @ /6/ each	1	14
Ditto (English) Fasc 1-14 @ /12/ each	10	8
Ditto Index	1	0
Tārikh-i-Fīrūz Shāhī of Ẓiyāu-d-dīn Barni (Text) Fasc 1-7 @ /6/ each ..	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc 1-6 @ /6/ each	2	4
Ten Ancient Arabic Poems, Fasc 1-2 @ 1/8/ each	3	0
Wis o Rāmin, (Text) Fasc 1-5 @ /6/ each	1	14
Ẓafarnāmah, Vol I, Fasc 1-9, Vol II, Fasc 1-8 @ /6/ each	6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS

1. Asiatic Researches Vol VII, Vols XI and XVII, and Vols XIX and XX @ 10/ each .. .. — 50 0
2. Proceedings of the Asiatic Society from 1865 to 1869 (incl) @ /6/ per No ; and from 1870 to date @ /8/ per No
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6 , 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), @ 1/8 per No to Members and @ 2/ per No to Non-Members

N B —The figures enclosed in brackets give the number of Nos in each Volume.

4.	Centenary Review of the Researches of the Society from 1784-1883	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B Shaw (Extra No *J A S B*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No , *J A S B*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E Blyth (Extra No , *J A S B*, 1875)	4	0
	Introduction to the Maithili Language of North Bihār, by G A Grierson, Part II, Chrestomathy and Vocabulary (Extra No , *J A S B*, 1882)	4	0
5.	Anis-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W A Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols II and IV, @ 16/ each...	32	0
9.	Jawāmiu-l-'ilm ir-riyāẓi, 168 pages with 17 plates, 4to Part I	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to @ 6/ each		
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c , in the rooms of the Asiatic Society of Bengal by C. R Wilson	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein, Ph.D , Jl. Extra No. 2 of 1899 ...	4	0

Notices of Sanskrit Manuscripts, Fasc 1-29 @ 1/ each ...	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R L Mitra	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

12-2-03.

Books are supplied by V.-P P.